रुद्रयामलम्

[उत्तरतन्त्रम्]

(द्वितीयो भागः)

कुलपतेः : डॉ. मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा पुरस्कृतम्

सम्पादकः

आचार्यश्रीरामप्रसादत्रिपाठी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

वाराणसी

योगतन्त्र-ग्रन्थमाला

[सप्तमं पुष्पम्]

रुद्रयामलम्

[उत्तरतन्त्रम्]

(द्वितीयो भागः)

सम्पादकः

आचार्यश्रीरामप्रसादत्रिपाठी

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

YOGATANTRA-GRANTHAMĀLĀ
[Vol. VII]

RUDRAYĀMALAM

[PART TWO]

Foreword by
DR. MANDAN MISHRA M
Vice-Chancellor
Sampurnanand Sanskrit University
Varanasi

Edited by
ĀCĀRYA ŚRĪ RĀMAPRASĀDA TRIPĀṬHĪ
Ex. Professor & Head of Department
of
Vyākaraṇa-Yoga-Tantra & Āgama
Sampurnanand Sanskrit University
Varanasi

VARANASI
1996

Research Publication Supervisor—
Director, Research Institute,
Sampurnanand Sanskrit University
Varanasi.

■

Published by—
Dr. Harish Chandra Mani Tripathi
Publication officer,
Sampurnanand Sanskrit University
Varanasi-221 002

■

Available at—
Sales Department,
Sampurnanand Sanskrit University
Varanasi-221 002

■

Second Edition—1000 Copies
Price-Rs. 164-00

■

Printed at—
Ratna Printing Works
B 21/42 A, Kamachha,
Varanasi-221 010

योगतन्त्र-ग्रन्थमाला

[सप्तमं पुष्पम्]

रुद्रयामलम्

(उत्तरतन्त्रम्)

[द्वितीयो भागः]

कुलपतेः डॉ. मण्डनमिश्रस्य 'शिवसङ्कल्प'-पुरोवाचा
पुरस्कृतम्

सम्पादकः

आचार्यश्रीरामप्रसादत्रिपाठी
व्याकरण-योग-तन्त्रागमविभागाध्यक्षचरः,
वेदवेदाङ्गसंकायाध्यक्षचरश्च,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी

वाराणस्याम्

२०५२ तमे वैक्रमाब्दे   १९१७ तमे शकाब्दे   १९९६ तमे खैस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः –
निदेशकः, अनुसन्धानसंस्थानस्य
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालये
वाराणसी ।

■

प्रकाशकः –
डॉ. हरिश्चन्द्रमणित्रिपाठी
प्रकाशनाधिकारी,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२.

■

प्राप्तिस्थानम् –
विक्रय-विभागः,
सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य
वाराणसी-२२१ ००२.

■

प्रथमं संस्करणम्, १००० प्रतिरूपाणि
मूल्यम्–१६४=०० रूप्यकाणि

■

मुद्रकः–
रत्ना प्रिंटिंग वर्क्स
बी. २१/४२ ए, कमच्छा,
वाराणसी-२२१ ०१०.

शिवसङ्कल्पः

भारतीयसंस्कृतावगाहनाय निगमागमतन्त्राणामध्ययनमत्यावश्यकम् । निगमो वेदः, परब्रह्मणो निःश्वासरूपोऽपौरुषेय आगमश्च शिव-ब्रह्म-विष्णु-शक्ति-गणेशादित्यादिमुखाद् विनिःसृतः पौरुषेयः । यथा—शैवागमो वैष्णवागमः (वैखानसः पाञ्चरात्रश्च) शाक्तागमो गाणपत्यागम आदित्यागमादयश्च । तन्त्रं च आगमस्यैवैकः प्रकारोऽथवा आगमस्यैवापरं नाम । इदं च **शारदातिलके** उक्तम्—

"आगतं शिववक्त्रेभ्यो गतं च गिरिजाश्रुतौ ।
तदागम इति प्रोक्तं शास्त्रे परमपावनम्" ॥

प्रकारान्तरेणेदमेव ईश्वरप्रत्यभिज्ञाविमर्शिनीभास्करीटीकायां निम्नरूपेणोपस्थापितम्—

"आगतं शिववक्त्रात्तु गतं च गिरिजामुखे ।
मतं श्रीवासुदेवेन आगमस्तेन कीर्तितः ॥
गुरुः शिष्यपदे स्थित्वा स्वयमेव सदाशिवः ।
प्रश्नोत्तरपरैर्वाक्यं तन्त्रं समवतारयत्" ॥

एवञ्च आगमस्यैवापरं नाम तन्त्रमिति ।अत एव **मनुस्मृति**टीकायां (१।२) श्रीकुल्लूकभट्टेनोक्तम्—

"वैदिकी तान्त्रिकी चैव द्विविधा श्रुतिरुच्यते" ।

तन्त्रालोके चोत्तरोत्तरोत्तममध्यमावरतन्त्राणां प्रख्याने कथितं यत्—

"नरर्षिदेवद्रुहिणविष्णुरुद्राद्युदीरितम् ।
उत्तरोत्तरवैशिष्ट्यात् पूर्वपूर्वप्रबोधकम् ॥
सर्वज्ञानोत्तरादादौ भासते स्म महेश्वरः" ॥

अपरेऽप्यनेकेऽर्थास्तन्त्रशब्दस्य भवन्ति; किन्तु तन्त्रशास्त्रे प्रसिद्धस्य तन्त्रशब्दस्यास्मिन्नेवार्थे रूढिर्यत्र परमनिःश्रेयःसाधनप्रकारास्तत्तन्त्रम् । **वाराहीतन्त्रा**नुसारम्—

"सृष्टिश्च प्रलयश्चैव देवतानां यथार्चनम् ।
साधनं चैव सर्वेषां पुरश्चरणमेव च ॥
षट्कर्मसाधनं चैव ध्यानयोगश्चतुर्विधः ।
सप्तभिर्लक्षणैर्युक्तमागमं तद् विदुर्बुधाः" ॥

एतदर्थं यत्र पटलम्, पद्धतिः, कवचम्, सहस्रनाम तथा स्तोत्राणि भवन्ति, तत्तन्त्रमिति । एवञ्च यत्र शिवेन प्रोच्यते, उमया च श्रूयते तत् शैवं तन्त्रम्, यत्र च उमया प्रोच्यते शिवेन च श्रूयते तत् शाक्तम्, यत्र उभाभ्यां प्रोच्यते श्रूयते च तद् यामलं तन्त्रम् । यामलतन्त्राणां संख्याया निर्धारणमशक्यम्; किन्तु वाराहीतन्त्रे षड्यामलतन्त्राणि उल्लिखितानि-**आदियामलम्, ब्रह्मयामलम्, विष्णुयामलम्, रुद्रयामलम्, गणेशयामलम्, आदित्ययामलम्** । भवानीभैरवाभ्यामुभाभ्यां प्रोक्तत्वेन श्रुतत्वेन च यामलतन्त्रस्य वैशिष्ट्यं भवति ।

इदं च **'रुद्रयामलतन्त्रम्'** आनन्दभैरव्यानन्दभैरवयोः परस्परप्रश्नोत्तररूपेण प्रवर्तितम् । विषयवैपुल्याद् बृंहणत्वाच्चेदं रुद्रयामलतन्त्रम् अन्यानि तन्त्राण्यतिशेते । **"चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनम्"** (सौन्दर्यलहर्याम्-३१) इत्युक्तदिशा चतुःषष्टिसंख्याके तन्त्रे रुद्रयामलतन्त्रस्योत्तमत्वं वर्णितमस्ति । वाराणस्यां च चतुःषष्टियोगिनीनां स्थितिरस्ति । अस्मिन् ग्रन्थे च वाराणस्या विशिष्टं स्थानम् । इदं हि यामलस्योत्तरतन्त्रस्य द्वितीयभागस्य द्वितीयं संस्करणम् ।

अयमस्ति सौभाग्यस्य विषयो यदस्य सम्पादनं वाराणस्या गौरवभूतैर्वेदवेदाङ्ग-पुराणस्मृतिधर्मशास्त्रादीनां विशिष्टैर्मनीषिभिः साक्षात्पाणिनेरवतारभूतैः श्रद्धेयैरा-चार्यप्रवरैः **प्रो.रामप्रसादत्रिपाठि**महोदयैर्विहितम् । तेषां समग्रस्य वैदुष्यस्येदमपि निदर्शनं यत्तैरधिकारपूर्वकं तन्त्रविद्याया अस्य ग्रन्थस्य विभिन्नेषु विषयेषु मौलिक्यष्टिप्पण्यः प्रस्तुताः, ताभिश्च भृशं संवर्द्धितोऽस्य महिमा । वन्दनीया आचार्यवर्या विश्वविद्यालय-स्यास्य कृते विशेषतः प्रतिष्ठास्थानम् । अत्र च पूर्वं व्याकरणविभागस्याचार्यपदं साङ्ख्ययोगतन्त्रागमविभागस्याप्यध्यक्षपदम्, अनन्तरं वर्तमाने च काले सम्मानिता-चार्यत्वं च निर्वहन्तो विदुषामपि मार्गदर्शनं कुर्वन्ति । तेषाञ्च गृहं सर्वदा स्नातकैः शोधार्थिभिः परिपूर्णं भवति, यत्र चाहर्निशं केवलं विद्यायाः साधना प्रचलति, प्रदर्शयति चास्माकं राष्ट्रस्य गौरवास्पदीमाचार्यपरम्पराम् । तेषां समस्तमपि जीवनं प्रेरणादायकम् । एतैर्विलम्बेनापि संस्कृताध्ययनमारभ्य स्वकीयया साधनया स्वनाम-धन्यानां गुरुवर्याणामाशीर्भिश्च यद्वैदुष्यमर्जितं तत् सर्वथानुकरणीयम् । एते विद्यया विनयेन विवेकेन च समानरूपेण सम्भूषिताः सरलतायाः शिष्यजनवत्सलतायाश्च प्रतिमूर्त्तित्वेन राराज्यन्ते । शिष्यसम्पद्दृष्ट्याऽप्याचार्यत्रिपाठिनो महान्तः सौभाग्य-शालिनः । एतेषां शिष्या देशस्य विभिन्नेषु विश्वविद्यालयेषु विद्यापीठेषु च आचार्य-प्राचार्य-प्रभृतिपदेषु विराजमानाः संवर्द्धयन्ति प्राचीनां पाण्डित्यपरम्पराम् । यथा संस्कृतं संस्कृतिश्च वाराणसीं विना तथैव वाराणस्यपि आचार्यत्रिपाठिमहोदयं विना विद्यायाः क्षेत्रे न प्राप्नोति परिपूर्णतामिति सर्वसम्मतं सत्यम् । भारतराष्ट्रपतिभिरेते

संस्कृतवैदुष्यक्षेत्रे आजीवनं विंशतिसहस्ररूप्यकमितेन वार्षिकेण मानदेयेन सह सम्मान-प्रमाणपत्रेण सम्मानिताः, उत्तरप्रदेशसंस्कृताकादम्या एकलक्षरूप्यकमितेन **विश्व-संस्कृत-भारती** पुरस्कारेण, नवदेहलीस्थश्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठेन (मानित-विश्वविद्यालयेन) च **'महामहोपाध्याय'** इति सम्मानोपाधिना विभूषिताः । अयमस्ति दुर्लभः संयोगो यत् तेऽध्यापने लेखने भाषणे उपदेशप्रदाने पौराणिकाख्यानविवेचने च समानरूपेण दक्षाः कुशलिनश्च । ते च सन्ति वाराणस्या विद्वत्परिषदोऽध्यक्षाः । तेषामुपस्थित्यैवासौ विश्वविद्यालयो विविधाश्च शास्त्रीयाः कार्यक्रमा अलङ्कृता भवन्ति ।

तेषामनेन प्रकाशनेनाप्यस्माकं प्रकाशनकार्यक्रमस्य गरिमा सम्पोषितः । अतस्तेभ्योऽहं विश्वविद्यालयपक्षतः सविनयं कृतज्ञताविनयाञ्जलिं प्रकाशनाधिकारिणे **डॉ. हरिश्चन्द्रमणित्रिपाठिने** रत्नामुद्रणालयव्यवस्थापकाय **श्रीविपुलशङ्करपण्ड्या** महोदयाय च धन्यवादान् विज्ञापयन् ग्रन्थमिमं तन्त्रविद्यानुरागिभ्यः सादरं सप्रश्रयं समर्पयामि ।

वाराणसी
वासन्तिकनवरात्रारम्भः
वि. सं. २०५३
(२०-३-१९९६ खैस्ताब्दः)

मण्डनमिश्रः
कुलपतिः
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

॥ श्रीहरिः शरणम् ॥

प्रस्तावना

रुद्रयामलस्योत्तरतन्त्रस्यायं द्वितीयो भागः प्रकाशनं समुपैतीत्यामोदस्य विषयः। अस्य प्रथमो भागः पूर्वमेव १९९१ ईशवीयवत्सरे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयत एव प्रकाशितः। प्रथमभागस्य भूमिकायां रुद्रयामलस्य विवेच्यविषयाणाम्, तन्त्रसाधनासम्बद्धदेशकालानाम्, मन्त्ररहस्य-स्वररहस्य-षट्चक्रदेवरहस्यानां सम्यग् विवेचनमस्त्येवेति धियाऽत्र द्वितीये भागे संक्षेपत एव प्रास्ताविकं प्रस्तूयत इति ध्येयम्।

आस्तिकानां सर्वेषामेव दर्शनानामागमानां वा स्रोतांसि वेदा एवेति संशीतिरहितो वादः। आगमोपदेशो गुरुपरम्परासम्बन्धमपेक्षमाणः किञ्चिदनुशासनमपि वेदयते, गुरव आगमैः शिष्याननुशासतीति कृत्वाऽऽगमानां शास्त्रत्वमपि मन्तव्यम्।

तन्त्रागमयोः सकलशास्त्रे परस्परमभेदेन व्यवहारः प्रचलति। तन्यन्ते विस्तीर्यन्ते ऐहिकामुष्मिकाभ्युदयनिःश्रेयससाधका उपाया अनेनेति व्युत्पत्तिमादधानोऽस्ति तन्त्र-शब्दः। ततश्च "समाजस्य धारकत्वं पोषकत्वं वा तन्त्रत्वम्" इति, "नियमविशेष-नियन्त्रितलोकत्वं तन्त्रत्वम्" इति वा लभ्यते। तथा चोक्तम्—

तनोति विपुलानर्थान् तत्त्वमन्त्रसमन्वितान्।
त्राणं च कुरुते यस्मात् तन्त्रमित्यभिधीयते॥
व्यवहारः कथ्यते यत्र तथा चाध्यात्मवर्णनम्।
इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते॥

अथ च 'आगम्यते यो येन यत्र वेति' विग्रहे आगमशब्दो निष्पद्यते। ततश्च गतिः प्राप्तिः, ज्ञानं वा इति स्वीकृत्या सम्यक्प्राप्तिविषयः, सम्यक्प्राप्तिसाधनम्, सम्यग्ज्ञानाधिकरणमिति त्रयोऽर्था लभ्यन्ते। आभिर्व्युत्पत्तिभिर्मोक्षतत्त्वस्य ज्ञापकत्वं साधनत्वम्, आत्मतत्त्वविवेचकत्वं वा आगमशास्त्रत्वमित्यायाति।

तच्च समाजस्य पोषणमन्तरा न सम्भवतीति समाजपोषणनियमविशेषज्ञापकत्वे सति आत्मतत्त्वस्य ज्ञापकत्वमनुशासकत्वं वाऽऽगमत्वमिति पर्यवस्यति। समाज-पोषकत्वं तन्त्रत्वमित्यत्र समाजपोषणं किमर्थमिति विचारे क्रियमाणे आत्म-ज्ञानार्थमिति उत्तरमायाति। एवं तन्त्रपदार्थस्य फलमागमपदार्थः, आगमपदार्थस्य साधनं तन्त्रपदार्थः, द्वयोरनयोस्साध्यसाधनभावेनैव पूर्णता। अतश्च योगरूढ्या तन्त्रागमशब्दयोः साम्यं दृष्ट्वा तान्त्रिकैरन्यैर्वा विद्वद्भिरभेदेनानयोर्व्यवहारः कृतः।

एवञ्च दर्शन-शास्त्र-तन्त्र-आगमशब्देषु समानतया सामान्यविशेषभावेन वा कृतो व्यवहारोऽनुभूयत इति निष्कर्षः ।

शैव-शाक्त-यामलभेदात्तन्त्रस्य त्रैविध्यमस्ति । शैवतन्त्रे शिवभट्टारकस्य, शाक्ततन्त्रे शिवाभट्टारिकायाः, यामलतन्त्रे तु पुनर्द्वयोरनयोरभेदस्य वर्णनं कृतमस्ति ।

कियन्ति सन्ति यामलतन्त्राणि ? अत्र संख्यानिर्धारणं कर्तुमशक्यम्, तथापि वाराहीतन्त्रेऽष्टलक्षणात्मकयामलस्य षाड्विध्यं निर्दिष्टमस्ति, आदियामल-ब्रह्मयामल-विष्णुयामल-रुद्रयामल-गणेशयामलादित्ययामलभेदात् ।

चतुःषष्टिसंख्याकेषु तन्त्रग्रन्थेषु "राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम्" इत्युक्त्या यद्यपि रुद्रयामलस्यापि समावेशो दृश्यते, तथापि "सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च" इत्यादिलक्षणलक्षितात् तन्त्राद् अष्टलक्षणात्मकं यामलं तदपेक्षया वैलक्षण्येनाभिहितम् । तथा हि–

सृष्टिश्च ज्योतिषाख्यानं नित्यकृत्यप्रदीपनम् ।
क्रमसूत्रं वर्णभेदो जातिभेदस्तथैव च ॥
युगधर्मश्च संख्यातो यामलस्याष्टलक्षणम् ॥ इति ॥

एवं विशिष्टेष्वागमग्रन्थेषु निर्दिष्टस्यास्य वैशिष्ट्यं प्राचीनत्वं च निर्विवादम् । ग्रन्थस्यास्य मातृकाः प्रायः सर्वेष्वेव ग्रन्थालयेषु समुपलभ्यन्ते । सन्ति च स्तोत्र-पटलादीनि बहूनि पुस्तकानि रुद्रयामलान्तर्गततया निर्दिष्टानि ।

अत्र यथाक्रमं द्वितीयभागान्तर्गतपटलानां संक्षेपतो विषयवस्तुनिर्देशः क्रियते–

षट्चत्वारिंशे पटले रुद्रशक्तिलाकिनीस्तोत्रं सविधि प्रकीर्त्तितमस्ति । प्रथमतस्तत्र स्तोत्रस्यास्य माहात्म्यं निरूपितमनन्तरञ्च विनियोगस्तदनु स्तोत्रपाठो वर्त्तते । अस्य माहात्म्ये–

महासिद्धो भवेदेव महाकालवशो भवेत् ।
त्रैलोक्यरक्षणार्थाय ब्रह्मणा विष्णुना तथा ॥
एतत्स्तवनपाठेन चाष्टाङ्गकुलदेवताः ।
वशीभूताः प्रभवन्ति सप्तस्वर्गस्थदेवताः ॥

इत्यादि श्लोकैः एतत्स्तोत्रपाठाद् बहुविधसिद्धिलाभो निर्दिष्टः । स्तोत्रेऽस्मिन् महारुद्रशक्तेरनेकविधदोषापकर्तृत्वं जगत्तारणकर्तृत्वं परब्रह्मरूपत्वञ्च प्रदर्शितम् । तथा हि–

महालोभं पापं हर हर हरे हीरकनिभे
विषानन्दोद्धाता मम तनु विषं वेशवशिनि ।
सुधानन्दं देहि क्षयमपि हर क्रोधमतुलं
मदं कामं लोभं कुलजननि दिव्यं वितर तत् ॥

जगत्तारिणी त्वं जगद्व्यापिनी त्वं
जगज्ज्वालारूपा जगद्धर्मरूपा ।
अनैकान्तिकत्वात्त्वमानन्दरूपा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ इति ।

सप्तचत्त्वारिंशे पटले आनन्दभैरव्या षट्चक्रभेदमाहात्म्यवर्णनपुरःसरं महामन्त्रं पूजाप्रकरणं रुद्राणीयजनञ्च सविधि प्रकीर्तितम् । मन्त्रोद्धार ईदृङ् निरूपितः –

सम्प्रति मन्त्रस्योद्धारं करोमि कालकूटप ।
प्रणवं पूर्वमुच्चार्य नमःशब्दं ततो वदेत् ॥
ते शब्दान्ते समुद्धृत्य रुद्रशब्दं ततः परम् ।
रूपिण्यै पदमुच्चार्य रुद्राणीमन्त्रमीरितम् ॥ इत्यादि ।

अथ चाऽत्र पटले मातृकादिवर्णैः न्यासविधिरपि विस्तरेण प्रतिपादितोऽस्ति, एवञ्चानेकेषां मन्त्राणां सम्यगुपन्यासोऽपि विस्तरेणात्र राजते । अत एवास्य पटलस्य नामकरणं मन्त्रप्रकाश इति वर्तते ।

अष्टचत्त्वारिंशे पटले पूर्वमानन्दभैरवेणानन्दभैरवीं प्रत्येतन्निवेदनं कृतमस्ति यद्–हे देवि ! मया पूर्वं महारुद्रस्य पुण्यं श्रुतं किन्त्विदानीं तन्नुतिं वद यस्याः श्रवणमात्रेण योगिनीवशः सिद्धिसम्पत्तिश्च स्यादिति । एतदनुसारं आनन्दभैरव्या रुद्रमृत्युञ्जय-स्तवनमकारि । तस्य च पूर्वं माहात्म्यं तदनु बहुविधगुणानुवादात्मिका मृत्युञ्जयस्तुतिः प्रकीर्तिता । तथा हि–

शिवागमं शब्दमयं विभाकरं भास्वत्प्रचण्डानलविग्रहं ग्रहम् ।
ग्रहस्थितं ज्ञानकरं करालं भजामि शम्भुं गगनाधिरूढम् ॥
मायामयं पङ्कजदामकोमलं दिग्व्यापिनं दण्डधरं महेश्वरम् ।
त्रिपक्षकं त्र्यक्षरबीजभावं त्रिपद्ममूलं त्रिगुणं भजामि ॥

इत्यादिभिः श्लोकैः स्तुतिरस्तीति ।

एकोनपञ्चाशत्तमे पटले लाकिनीदेव्याः स्तोत्रपाठो वर्त्तते । अत्र पूर्वं विनियोगः, अनन्तरं लाकिनीदेव्याः स्वरूपवर्णनं विविधफलप्रदातृत्वञ्च सम्यङ् निरूपितम् । तथा हि–

केयूरामलहारमालशुभगा वीरासना स्थायिनी
भार्या रुद्रपतेः प्रवालविमला वक्त्रोत्पलस्रग्धरा ।
माता योगवतां सती परा परपदा माध्वीरसाच्छादिता
त्वं मां पाहि कृपामयी यमगतं मृत्युञ्जये श्रीधरे ॥
आकाङ्क्षी कुलसंख्यका क्षयकरी शत्रुप्रभादेर्दया
भक्तानामतिदुःखहा शशिमुखी योन्यानना कामुकी ।

कामस्थानमकामदोषशतकं शीघ्रं त्वलक्षेमदा

जीवन्मुक्तिपदं विधेहि समरे सर्गद्रुहस्य प्रियम् ॥

इत्यादयः श्लोकास्तस्या देव्या माहात्म्यमाख्यापयन्ति ।

पञ्चाशत्तमे पटले मणिभेदप्रकाशस्य याथातथ्येन वर्णनमस्ति । पूर्वमत्र त्रिवीरस्य उत्तमाधममध्यमभेदेन त्रैविध्यं निरूपितम् । तथा चोक्तम्–

त्रिवीरं त्रिविधं प्रोक्तमुत्तमाधममध्यमम् ।

तत्रैव त्रिविधं सङ्गमूर्ध्वपातालभूतलम् ॥

अथ चात्र त्रिविधभावस्य दिव्यवीरपशुभेदेन निरूपणमीदृक् समाख्यातम्–

तन्मध्ये त्रिविधं भावं दिव्यवीरपशुक्रमम् ।

दिवि तिष्ठन्ति देवाश्च वीरास्तिष्ठन्ति भूतले ॥

पशवः सन्ति पाताले क्रमशः क्रमशः प्रभो ।

सर्वत्र त्रिगुणच्छन्नं सत्त्वरजस्तमादिकम् ॥ इति ।

इतोऽनन्तरं विजयापत्रशोधनविधिरपि सम्यग् वर्णितोऽस्ति । तथा हि–

अमरा बिल्वपत्रं तु चामरा विजयादलम् ।

अमरलताग्रन्थिदूर्वा निर्गुण्डी चामरेश्वरी ॥

अथ च–

देहि देहि पदस्यान्ते स्वाहान्तं मन्त्रमुत्तमम् ।

एतन्मन्त्रेण चोत्पाट्य मन्त्रयित्वा प्रभक्षयेत् ॥

एकपञ्चाशत्तमे पटले लाकिनीसहस्रनाम प्रकीर्त्तितमस्ति । पूर्वमस्य पाठस्य माहात्म्यं तदनु चास्य विनियोगो वर्त्तते । अस्य पाठफलत्वेन प्रामुख्येन सर्वविध-सम्पत्तिलाभो मणियोगसुसिद्धिश्च निरूपिता । तथा हि–

तवाह्लादप्रणयनात् सर्वसम्पत्तिप्राप्तये ।

मणियोगसुसिद्ध्यर्थं सावधानाऽवधारय ॥

भूर्जपत्रे नाम्नां लेखनं विधाय कण्ठे धारणमपि कृपादायकमित्यप्यत्राख्यातमस्ति । उक्तञ्च–**भूर्जपत्रे लिखित्वा च कण्ठशीर्षे प्रधारयेत्** ॥ इति ।

अष्टोत्तरसहस्रनामसु प्रमुखतो नामान्येतानि सन्ति–

महाचण्डेश्वरी मीनो मणिपूरप्रकाशिका ।

महामत्तो महारात्रो महावीरासनस्थिता ॥

मायावी मारहन्ता च मातङ्गी मङ्गलेश्वरी ।

मृत्युहारी मुनिश्रेष्ठा मनोहारी मनोयवा ॥

महापतिर्महारुद्रो मरुणाहतकारिणी ।
मालाधारी शंखमाली मञ्जरी मांसभक्षिणी ॥

द्विपञ्चाशत्तमे पटले मन्त्रार्थचैतन्यविन्यासविधिः वर्णितो वर्त्तते । उक्तञ्च–

मन्त्राणां मन्त्रचैतन्यं विषयाणि शृणु प्रभो ।
मणिपूरे त्वनायासे यत्प्रसाद स्थिरो भव ॥

अथ चात्र शिवध्यानस्य फलमपि सम्यग् वर्णितमस्ति ।

त्रिपञ्चाशत्तमे पटले मणिपूरभेदनस्य सम्यङ्निरूपणमस्ति । तन्माहात्म्यञ्चेत्थं निरूपितम्–

कालभक्षो भवेत् सोऽपि म्रियते नाऽत्र संशयः ।
मणिपूरे मनो दत्त्वा साधयेद् देवताः सदा ॥

अथ चात्र दन्ती-धौतीत्यादीनामपि सम्यग् वर्णनमुपलभ्यते । तथा हि–

दन्ती योगं तदा कुर्याद् यदा मुख्यक्रियावतः ।
तदा क्षणेन यः कुर्याद् यदा तृष्णाविवर्जितः ॥
तृष्णानाशो भवेन्मोक्ष इति मे योगनिर्णयः ।
विशेषेण प्रवक्ष्येऽहं शृणु कैलासपावन ॥

चतुःपञ्चाशत्तमे पटले आनन्दभैरव्या पञ्चसिद्धद्रव्यशोधनस्य विधिः प्रदर्शितोऽस्ति । अस्य माहात्म्यवर्णने उक्तम्–

अमराशनमन्त्राणि शृणुष्व पार्वतीश्वर ।
यस्य स्मरणमात्रेण नरो नारायणो भवेत् ॥ इति ।

अत्र हि बिल्वपत्रभक्षणमाहात्म्यं दूर्वामहत्त्वञ्चापि सम्यगाख्यातमस्ति ।

पञ्चपञ्चाशत्तमे पटले क्रमयोगेन शिवतत्त्वस्य कथमवाप्तिरिति प्रश्ने देव्याऽऽनन्दभैरव्या मणिपूरचक्रभेदनविधिः प्रकाशितोऽस्ति । तथा चोक्तम्–

'तन्नाभिमूलदेशे च नीलपद्मं महाप्रभम् "। इत्याभ्य–
सर्वसिद्धिप्रदा माता सर्वत्र सर्वपालिका ।
सदा रक्षतु मां देवी विद्याभिः कुलपालिका ॥ इत्यन्तम् ।

षट्पञ्चाशत्तमे पटले अनाहतपद्मविन्यासविधिर्निरूपितो वर्त्तते । अत्र पद्मध्यानस्य वर्णनमप्यनुषङ्गतः कृतमस्ति । ध्याने पाठ्यानि पद्यानि प्रमुखत इमानि–

हृत्पद्मं कुलपालितं सुललितं हंसेन संशोधितं
बन्धूकामलदीप्तिकोटिजडितं सम्भावितं साधकैः ।
अत्युत्कृष्टमयूखपुञ्जमिलितं सिन्दूरपूरारुणं
ध्यात्वा पश्यति यो नरः प्रतिदिनं काद्यारुणैरावृतम् ॥

महाकायं तेजोमयमपि चरुं बीजमखिलं
मुदा ध्याये कामापहमतिमुखं चाष्टमदले ।
महासिन्दूराद्रिं दिनकरकराकोटिविमलं
त्रिनेत्रं पञ्चास्यं दशभुजयुतं सर्ववपुषम् ॥ ञं ।
त्रिनेत्रं कामाख्यं शिशुकरुणया सिद्धिफलदं
सुरत्नालङ्कारच्छविरुचितनूनां समनघम् ।
ठकारं बिन्द्विन्दुं नवरविघटाकोटिकिरणं
दले चार्के ध्याये कमलवरमाला शिशुधरम् ॥ ठँ । इत्यादि ।

सप्तपञ्चाशत्तमे पटले काकिनीश्वरपर्णपार्श्वचरयजनं सम्यक् प्रतिपादितम् । तत्र मन्त्रस्वरूपाण्यपि प्रदर्शितानि, तैश्च मन्त्रैर्वर्णरूपाया भगवत्याः सरस्वत्याः पूजन-प्रकारोऽपि प्रदर्शितः । तथा हि–

इति मन्त्रेण पूज्या वर्णरूपा सरस्वती ।
तदा प्रसन्नाः सिध्यन्ति श्रीकाकिन्याः कलौ युगे ॥

अष्टपञ्चाशत्तमे पटले काकिनीसिद्धिसाधनं विधिवत् प्रख्यापितमस्ति । काकिनीदेव्याः स्वरूपमत्रेदृङ् निरूपितम्–

सर्वेषां ज्ञानकर्त्री च सर्वानन्दकरी हृदि ।
सा देवी काकिनी विद्या ईश्वरी परमा कला ॥

अत्र पटले नानाविधानि कामबीजान्यपि वर्णितानि सन्ति ।

ऊनषष्टितमे पटले काकिनीदेव्याः स्तोत्रमाख्यातम् । काकिनीस्तोत्राख्येऽस्मिन् पटले–

"ज्ञानेश्वरी शुभकरी परिभावनीया
योगेश्वरैर्हरिहरैर्गुरुभिर्महेन्द्रैः ।
तां काकिनीं परशिवां परमेशपत्नीं
संस्तौमि चारुहृदयाम्बुजपीठमध्ये ॥

इत्यादि स्तुतिगीतैः देव्या स्तवनमस्ति ।

षष्टितमे पटले सुरस्तवनं प्रकीर्तितम् । तथा चोक्तम्–

ईश्वरस्य स्तवन्ब्रह्मपरं निर्वाणसाधनम् ।
शोभाकोटियोगपतेर्योगेन्द्रस्य परापतेः ॥
कौलत्वं शृणु शङ्करप्रियकरं स्तोत्रं तदीशस्य च ।
श्रीनाथाय नमः कुलेश परमप्राणेश तुभ्यं मुदा ॥

एकषष्टितमे पटले काकिनीदेव्या अष्टोत्तरसहस्रनाम्नां संकीर्त्तनमस्ति । अस्य पाठः कुत्रचिद् निर्जनस्थाने यथा भूमिगर्तमण्डपे शून्यागारे वा करणीय इति पाठविधौ निरूपितः ।. तथा चोक्तम्-

काकिनीश्वरयोगाढ्यं सहस्रनाममङ्गलम् ।
अष्टोत्तरं वृताकारं कोटिसौदामिनीप्रभम् ॥
प्रपठेद् योगसिद्ध्यर्थं भावकः परमप्रियः ।
शून्यागारे भूमिगर्तमण्डपे शून्यदेशके ॥
गङ्गागर्भे महारण्ये चैकान्ते निर्जनेऽपि वा ।
दुर्भिक्षवर्जिते देशे सर्वोपद्रववर्जिते ॥

द्विषष्टितमे पटले ईश्वरस्तोत्रविन्यासो निरूपितः । अस्य स्तोत्रस्य माहात्म्यमीदृङ् निरूपितम्–

एतत्स्तवनपाठेन सहस्राख्यान्तसिद्धिषु ।
राजत्वं लभते सद्योऽथवा योगी च सम्पदि ॥
मुनयः क्रोधवेतालस्तथा चण्डेश्वरादयः ।
एतच्छुभस्तवेन्द्रेण स्तुत्वा सर्वत्र सिद्धिगाः ॥

अत्र स्तोत्रे ललितैः पद्यैः स्तुतिर्विहितेति दिङ्मात्रमत्रोदाह्रियते–

पूर्णः पूर्णेन्दुबिम्बाननकमलकटाक्षादघौघापहारी
नारीन्धाता विधाता स भवति न च तान् योगयोग्यान् महेन्द्रान् ।
सम्पत्तिप्राणयोगी निरवधिवरदानन्दगोप्ता शरीरो
बालो मृत्युञ्जयस्य प्रभुरिति भयहा पातु मे गुप्तदेहम् ॥

त्रिषष्टितमे पटले आनन्दभैरव्या आनन्दभैरवं प्रति अनाहतनादेश्वरस्य सम्मोहनाख्यं कवचं प्रकीर्त्तितमस्ति । अस्मिन् कवचे महेश्वरं प्रति प्रार्थना स्वरक्षायै वर्त्तते । तथा हि–

प्रणवो मे पातु शीर्षं ललाटं च सदाशिवः ।
प्रासादो हृदयं पातु बाहुयुग्मं महेश्वरः ॥

अस्य स्तोत्रस्य माहात्म्यम्–

असाध्यं साधयेदेव पठनात् कवचस्य च ।
धारणात् पूजनात् साक्षात् सर्वपीठफलं लभेत् ॥
वाणी वश्या स्थिरा लक्ष्मीः सर्वैश्वर्यसमन्वितः ।
त्यागिता लभ्यते पश्चान्निःसङ्गो विहरेत् शिवः ॥

इत्यादिभिः निगदितम् ।

चतुःषष्टितमे पटले हि न्यासपूर्वकस्य कर्णिकास्थानपूजनस्य विधिः प्रतिपादितोऽस्ति । किं नाम कर्णिकिति प्रश्नस्योत्तरे उक्तम्–

पञ्चरश्मियुतं क्षेत्रं तन्मध्ये केशवप्रियम् ।
तन्मध्ये कर्णिकास्थानं परमाह्लादवर्धनम् ॥

अथ चात्र भैरवेण पृष्टाः सर्वे योगार्थाः श्रीदेव्या यथाक्रमं प्रतिपादिताः । तथा हि आनन्दभैरवेण पृष्टमेतत्–

"यदि मां रक्षितुं शक्ता विषाक्ताङ्गं सदावतु ।
कथं वा कण्ठसञ्चारः कथं वा राक्षसी क्रिया ॥
कथं वा रिपुविद्वेषी कथं वा मङ्गलोदयः ।
कियद्वा विनयाह्लादं कियद्वा कालसाधनम्" ॥ इत्यादि ।

एतेषामुत्तरार्थमानन्दभैरव्या–

"आदौ कण्ठसञ्चारः श्रूयतां परमेश्वर ।
श्रोतव्यं मन्त्रिभिर्नित्यं कर्त्तव्यं प्रत्यहं प्रभो" ॥

इत्यादिभिः श्लोकैः समेषां प्रश्नानां समाधानं विहितम् ।

पञ्चषष्टितमे पटले शाकिनीदेव्याः सदाशिवस्य च पूजनविधिवर्णितो वर्त्तते । तथा चोक्तम्–

ध्यात्वा शाकिनीं देवीं शाकम्भर्याश्च दक्षिणे ।
पूजयेत् परया भक्त्या पूर्वोक्तविधिना प्रभो ॥
आदौ जलं शोधयित्वा हस्तौ पादौ च विग्रहम् ।
क्षालयित्वा च द्विराचम्य मूलमन्त्रेण साधकः ॥

षष्ठषष्टितमे पटले शाकिनीयजनं सविधि वर्णितम् । शाकिनीयजनविधौ प्राणायामन्यासध्यानादीनां सम्यगाख्यानं वर्त्तते । तथा चोक्तम्–

संयोज्य जीवं कुलवस्त्रमध्ये श्रीकुण्डलिन्या सह मूलपद्मम् ।
क्रमेण भित्वा समयोर्ध्वतुण्डो विशुद्धपद्मे लयमाचरेद् बुधः ॥
पूर्वोक्तध्यानमाकुर्यान्मन्त्राक्षराणि भावयेत् ।
चिच्छक्तौ परमात्मानं भावयित्वा पुनः पुनः ॥
न्यासजालं ततः कुर्यात् शृणु तत्त्वासनादिकम् ।
सदाशिव ऋषिश्चास्य मस्तके संन्यसेत् सुधीः ॥

सप्तषष्टितमे पटले शाकिनीस्तोत्रविन्यासस्याख्यानं वर्त्तते । अस्य स्तोत्रस्य विधानं वाराणस्यामस्तीति–

"वाराणसीपुरे स्थित्वा कण्ठपद्मस्थितां भज ।
स्तोत्रेणानेन विधिना भक्तिं कुरु महाशिवे ॥"

इति श्लोकेन ज्ञायते । अस्य माहात्म्यमित्थं वर्णितम्–

एतत्स्तववरं पठेद्यदि सदा ध्यात्वा नरेन्द्रः सुखी
धन्यः पुण्यमुपैति देवविलयं पीठादिसन्दर्शनम् ।
योगानामपि सिद्धिभाक्प्रियतरं ज्ञानं धनं लभ्यते
राजानं वशयन्ति ते च सहसा साक्षात् कटाक्षै रमाम् ॥

अष्टषष्टितमे पटले आनन्दभैरव्या विशुद्धवर्णध्यानं प्रत्यपादि । तथा च–

वर्णध्यानं तव स्नेहात् कथये मम रूपकम् ।
अकस्मात् सिद्धिदं ध्यानं ज्ञानमात्रेण सिध्यति ॥

अस्य ध्यानस्य माहात्म्यमीदृगुच्यते–

एवं ध्यात्वा षोडशारे स्थिरचेताः प्रपूजयेत् ।
वर्णरूपं शक्तियुतं लोकनाथं सदाशिवम् ॥
तदा प्रसन्ना बुद्धिः स्यादमरो जायतेऽचिरात् ।
खेचरत्वं वाक्यसिद्धिं जलस्तम्भादिसिद्धिभाक् ॥ इति ।

एकोनसप्ततितमे पटले भगवत्याः काकिनीदेव्याः नामसहस्राणि प्रोक्तानि । तथा चास्य माहात्म्ये उक्तम्–

अष्टोत्तरसहस्राख्यं सदाशिवसमन्वितम् ।
महाप्रभावजननं दमनं दुष्टचेतसाम् ॥
सर्वरक्षाकरं लोके कण्ठपद्मप्रसिद्धये ।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ॥

काकिनीदेव्याः नामसु प्रमुखत एतानि नामान्युदाहाररूपेण प्रस्तूयन्तेऽत्र–

योगिनी योगजेताख्यः सुयोगा योगशङ्करः ।
योगप्रिया योगविद्वान् योगदा योगषड्भुवि ॥

सप्ततितमे पटले सदाशिवशाकिनीकवचफलादेशस्याख्यानमस्ति । उक्तञ्चात्र–

शृणुष्व कामदं नामाद्भुतं कवचमङ्गलम् ।
त्रैलोक्यसारभूतं च सर्वज्ञानविवर्धनम् ॥ इति ।

कवचे प्रमुखाः केचन श्लोकाः–

ॐ प्रभावा सदा पातु महाकाशाधिकाशिनी ।
त्रिगुणा चण्डिका पातु क्रोधदंष्ट्रा करालिनी ॥
अनन्तानन्तमहिमा महास्त्रदलपङ्कजम् ।
पूर्वाह्णं पातु सततं गायत्री सविता मम ॥
अनन्तशयना पातु वटमूलनिवासिनी ।
प्रलये मां काली पातु वटपत्रनिवासिनी ॥

एकसप्ततितमे पटले प्रमुखतः श्रीबटुकनाथस्य पूजाविधिः ध्यानञ्च प्रकीर्तितम् । तथा चोक्तम्–

कण्ठाब्जं मे सदानन्द प्रकाशय युगं द्विठः ।
अस्यापि ध्यानमाकृत्य जप्त्वा लक्षं समापयेत् ॥

अथ च–

करकल्पितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रमसमयसपर्याविघ्नविच्छेदहेतु-
र्जयति बटुकनाथः सिद्धिदः कौलिकानाम् ॥ इति ।

द्विसप्ततितमे पटले कालीस्तवनमस्ति । तथा चोक्तम्–

श्रीकालीचरणं चराचरगुणं सौदामिनीसम्भवं
गुञ्जद्‌गर्वगुरुप्रभानखमुखाह्लादैककृष्णासनम् ।
प्रेतारण्यासननिर्मितामलकजा नन्दोपरि श्वासनं
श्रीमन्नाथकरारविन्दमिलनं नेत्राञ्जनं राजते ॥

त्रिसप्ततितमे पटले वाणीगीतविन्यासो विस्तरेण प्रतिपादितो वर्त्तते । उक्तञ्चात्र–

श्रूयतां कोमलाम्भोजस्थितवक्त्रविराजिते ।
अत्यद्‌भुतं महागीतं शृणोति साधको हि यत् ॥
ध्वनिरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ।
तन्मनो विलयं याति ध्वनिषु ज्ञानकोटिषु ॥

चतुःसप्ततितमे पटले सदाशिवकवचपाठो वर्तते । उक्तं हि–

श्रूयतां भगवन्नाथ महाकालकुलार्णव ।
प्रसादमन्त्रकवचं सदाशिवकुलोदयम् ॥

अस्य पाठस्य फलं शिवसायुज्यलाभो वर्णितः । तथा हि–

सिद्धकवचमाख्यातं केवलं ज्ञानसिद्धये ।
मोक्षाय जगतां शम्भोः प्रियाय परमेश्वर ॥ इत्युक्तम् ।

पञ्चसप्ततितमे पटलेऽकालमृत्युहरणसभावर्णनं विराजते । उक्तञ्चात्र–

अकालमृत्युहरणं सर्वव्याधिविनाशम् ।
स्मरणात् पठनाद्ध्यानात् सदाशिवपतेः प्रभोः ॥

षट्सप्ततितमे पटले शाकिनीकवचस्य वर्णनं वर्त्तते । अस्य कवचस्य पाठमाहात्म्यमपि निगदितमत्र । तथा हि–

कवचं कारणैर्देवीं पूजयित्वा यथाविधि ।
अकस्मात् कार्यसिद्धिः स्यादष्टैश्वर्यसमन्वितः ॥

एतां विद्यामवधार्य जनोऽमृतं लभते इत्यप्यत्र सुष्ठु भणितम्, तथा चोक्तमपि–

धारयित्वा त्विमां विद्यामेतैर्दोषैर्न लिप्यते ।
कण्ठे यो धारयेदेतां समरे कण्ठधारिणीम् ॥
अक्षयत्वमवाप्नोति जीवमात्रः सदाशिवः ।
गोरोचनाकुङ्कुमेन कालागुरुहरिद्रया ।
लाक्षारसैर्लेखयित्वा धारयित्वामृतं लभेत् ॥ इति ।

सप्तसप्ततितमे पटले योगार्थसञ्चयनं सम्यङ्निरूपितं वर्त्तते । उक्तं हि—

चक्रस्थं चक्रबाह्यस्थं बाह्यमाभ्यन्तरं परम् ।
पश्यत्येव महायोगी कालचक्रं ततः परम् ॥ इति ।

अष्टसप्ततितमे पटले कण्ठाम्भोजभेदप्रकाशस्य सम्यङ्निरूपणं कृतमस्ति । कण्ठस्य माहात्म्यवर्णने उक्तमेतत्—

अनायासेन सिद्धिः स्याद् ज्ञानी च ज्ञानवान् भवेत् ।
ऊर्ध्वमुखं कण्ठपद्मं तदग्रे चक्रमण्डलम् ॥
इति कण्ठस्य माहात्म्यं संक्षेपात् कथितं मया ।
जानाति योगी ध्यानेन ज्ञानयुक्तेन चेतसा ॥ इति ।

एकोनाशीतितमे पटले शाकिनीमन्त्रोद्देशः कृतो वर्त्तते । तथा चोक्तम्—

वक्ष्येऽहं द्विदलं विभाण्डकमलं कालानलव्याकुलं
शोभामोहनरञ्जनं सुचपलामालाकपालोज्ज्वलम् ।
दीप्तिश्रेणि सुकर्णिकान्तरगतः श्रीशाकिनीवल्लभः
प्राणिप्राणनिदानगः परशिवः सम्पातु सञ्चारगः ॥

अशीतितमे पटले महामन्त्रस्य माहात्म्यं तस्य निर्वचनमपि सम्यङ्निरूपितं वर्त्तते । तथा हि—

स्वाहान्तो मन्त्रराजः सकलसुरपदानन्दितो भावपूज्यः ।
महामन्त्रं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ॥
जपित्वा युगलक्षं तु यत्नेन परमेश्वर ।
वाक्सिद्धिं देवलोके तु गमनं निजदेहतः ॥

एकाशीतितमे पटले भ्रूपद्मग्रन्थिभेदस्य सम्यगाख्यानं वर्त्तते । तथा च—

अप्रकाश्यं महागोप्यं सारात्सारं परात्परम् ।
भ्रूपद्मभेदनादीनां क्रमं शृणु महेश्वर ॥

अन्यच्च—

द्विमासात् सप्तग्रन्थीनां भेत्ता स्याद्भैरवो यथा ।
इति ग्रन्थिभेदनस्य क्रमज्ञानमुदाहृतम् ॥

द्व्यशीतितमे पटले हाकिनी-परशिवयजनस्य वर्णनं कृतमस्ति । अस्य विधौ प्रोक्तम्–

निर्जने प्रातरुत्थाय प्रातःकीर्तिं समाचरन् ।
देहबाह्यस्नानमादौ कृत्वा साधकोत्तमः ॥
आसनञ्च गोपनीयं प्रत्येकेनापि कारयेत् ।
पूर्वोक्तयोगचिह्नानि आसनानि समाचरेत् ॥
चतुस्त्रिंशत्संख्याघटितकवचं चासनमिह
प्रबुद्धं देहस्य क्षयमरणशंकाविरहितम् ।
महच्छब्देनाढ्यं यदि गदितसत्रत्रयमिति
प्रभाते मध्याह्ने निशि विकुरुते योगहृदयः ॥ इति ।

त्र्यशीतितमे पटले हाकिनीस्तोत्रपाठो वर्त्तते । तथा चोक्तम्–

कथयस्व वरारोहे हाकिनीस्तोत्रमुत्तरम् ।
यस्य प्रपठनाद् वाग्मी कृपायसे दयामयि ॥

अत्र स्तोत्रे बहुविधैर्ललितपद्यैः स्तुतिर्विहितास्ति । यथा–

शरण्यं वरेण्यं महाकामधन्यं
महादेवदेवं त्रिकालादिजन्यम् ।
श्मशानोग्रधूलिप्रियाङ्गानुलेपं
सदा स्तौमि संसारसारं निषेकम् ॥ इति ।

चतुरशीतितमे पटले हाकिनीदेव्याः कवचपाठो विद्यते । उक्तञ्चात्रानन्दभैरव्या–

आदौ शृणु महावीर परमानन्दसागर ।
कवचं हाकिनीदेव्याः संसारार्णवतारकम् ॥

पूर्वमत्र कवचपाठमाहात्म्यं तदनु तस्य विनियोगस्ततोऽनन्तरं कवचपाठो वर्त्तते ।

पञ्चाशीतितमे पटले परशिवस्य कवचपाठो विद्यते । उक्तञ्चा नन्दभैरव्या–

श्रूयतां योगिनीनाथ योगविद्यापते प्रभो ।
परनाथस्य कवचं ज्ञानगम्यं पुरातनम् ॥

अत्रापि पूर्वं कवचपाठमाहात्म्यं तदनु तस्य विनियोगस्ततोऽनन्तरं कवचपाठो वर्त्तते ।

षडशीतितमे पटले आनन्दभैरवस्य प्रार्थनानुसारमानन्दभैरव्या डाकिन्याः सुन्दरसहस्राष्टोत्तरं शुभनाम प्रकीर्तितम् । तथा ह्युक्तम्–

साक्षात्ते कथयामि नाथ सकलं पुण्यं पवित्रं गुरो
नाम्नां शक्तिसहस्रनाम भविकं ज्ञानादि चाष्टोत्तरम् ।
योगीन्द्रैर्जयकाङ्क्षिभिः प्रियकलाप्रेमाभिलाषार्चितैः
सेव्यं पाठ्यमतीव गोप्यमखिले शीघ्रं पठस्व प्रभो ॥

अस्यापि विनियोगं विधाय–

हाकिनीवसुधालक्ष्मीः परमात्मकला परा ।
परप्रिया परातीता परमा परमप्रिया ॥ इत्यारभ्य–
क्षुन्निवृत्तिः क्षणज्ञानी वल्लभा क्षणभङ्गुरा ।
इत्येतत् कथितं नाथ हाकिन्याः कुलशेखर ॥
सहस्रनामयोगाङ्गमष्टोत्तरशतान्वितम् ।
यः पठेन्नियतः श्रीमान् स योगी नाऽत्र संशयः ॥

इति पर्यन्तं सहस्रनामपाठः प्रकीर्तितः । अनन्तरञ्चास्य पाठस्य माहात्म्यमपि सुष्ठु निगदितम् ।

सप्ताशीतितमे पटले परशिवहाकिनीश्वराष्टोत्तरसहस्रनामपाठो वर्त्तते । तथा चोक्तम्–

सहस्रनामयोगाङ्गमष्टोत्तरसमाकुलम् ।
भ्रूपद्मभेदनाथाय हाकिनीयोगसिद्धये ॥
परनाथस्य योगाधिसिद्धये कुलभैरवि ।
कृपया वद मे प्रीता धर्मसिद्धिनिबन्धनात् ॥

अत्र–

ॐ ह्स सौ सां परेशश्च पराशक्तिः प्रियेश्वरः ।
शिवः परः पारिभद्रः परेशो निर्मलोऽद्वयः ॥ इत्यारभ्य–
मातृप्रियो मातृपूज्यो मातृकामण्डलेश्वरः ।
भ्रान्तिहन्ता भ्रान्तिदाता भ्रान्तस्थो भ्रान्तिवल्लभः ॥

इति पर्यन्तमष्टोत्तर-सहस्रनाम परिगणितम् ।

अष्टाशीतितमे पटले पराशक्तिनिर्मूलस्थाननिर्णयस्य समाख्यानमस्ति । तथा हि–

शृणुष्व परमेश त्वं दुर्लभं योगिमण्डले ।
महायोगज्ञानसारं त्रैलोक्यमङ्गलं शुभम् ॥
होमस्थानं शिखामध्ये दीपस्य भ्रूदलान्तरे ।
परब्रह्मस्वरूपां तां शिखारूपां जगत्प्रियाम् ॥

इत्यादिभिः पराशक्तिनिर्मूलस्थानस्य सम्यग् वर्णनं विहितम् ।

एकोननवतितमे पटले वाराणसीपीठनाथान्तर्यजनं सम्यगाख्यातमस्ति । तथा चोक्तम्—

कालरूपमहादेव कालकूटासवप्रिय ।
इदानीं शृणु देवेश वाराणस्याः प्रियं पदम् ॥
शतकोटियोगिनीनां मण्डलं योगिसेवितम् ।
तं ध्यायेत् सर्वदा योगी यदि कल्याणमिच्छति ॥ इति ।

नवतितमे पटले वाराणस्याः पञ्चकोणे हाकिनीदेव्याः पञ्चपीठानां तदधिष्ठातृदेवानां च समाख्यानमस्ति । अत्रैव पटले पञ्चकोणे पञ्चतत्त्वानाम्, पञ्चबीजानामपि सम्यग् वर्णनमवाप्यते । तथा चोक्तम्—

पञ्चकोणे पञ्चपीठं कामदं व्यालसिद्धिदम् ।
निर्वाणसिद्धिदं देव किमन्यत् कथयामि ते ॥
पञ्चकोणे पञ्चतत्त्वं पञ्चबीजं स्वमेव च ।
पूर्वकोणे इन्द्रबीजं पृथिव्याश्च त्रिकोणकम् ॥
तद्दक्षिणे वायुबीजं वायवीशक्तिमण्डलम् ।
वायुमुग्रवेगधरं धरणीभञ्जनाख्यकम् ॥ इत्यादि ।

अथ च—

पञ्चकोणे पञ्चतत्त्वं काशीपीठं च लिङ्गिनः ।
कोटिरूपधरा एते चात्रैव भान्ति नित्यशः ॥
हाकिनीमण्डलं मध्ये काश्यास्त्रिकोणयन्त्रके ।
हाकिनीपञ्चतत्त्वाख्यां पञ्चभूतप्रकाशिनीम् ॥

इत्यादिप्रकारेण हाकिनीदेव्या वर्णनं द्रष्टव्यम् ।

मान्या विद्वांसो निवेद्यन्ते यद्योगतन्त्रग्रन्थमालायां सम्पूर्णानन्द-संस्कृतविश्वविद्यालयेन रुद्रयामलस्योत्तरतन्त्रस्य नवतितमपटलान्तस्य प्रथमं संस्करणं प्रातःस्मरणीयानां तदानीन्तनकुलपतिपदमधितिष्ठतां विद्वद्वरेण्यानां श्रीमद्बदरीनाथशुक्लमहोदयानां सत्प्रेरणया सुसम्पन्नमभवत् । अधुनाऽस्य ग्रन्थस्य दौर्लभ्यमालक्ष्य पुनर्मुद्रणाय सन्नद्धेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन षट्चत्वारिंशपटलतो नवतिपटलपर्यन्त उत्तरभागः प्रकाश्यमानोऽस्तीति परमं प्रमोदस्थानम् ।

"श्रेयांसि बहु विघ्नानि" इति वादसत्त्वेऽपि दुर्लभस्यास्य ग्रन्थस्याचिरप्रकाशने साम्प्रतिककुलपतिपदं सभाजयता प्राच्यप्रतीच्योभयविधविद्यापारदृश्वनां महामनीषिणां **डॉ. श्रीविद्यानिवासमिश्र**महानुभावानां साधुप्रेरणैव महत्कारणम् । मान्या मिश्रमहोदयाः सर्वथा धन्यवादैः सत्क्रियन्ते ।

पुनश्चास्य ग्रन्थस्य प्रकाशने प्रकाशनाधिकारिणः **श्रीहरिश्चन्द्रमणित्रिपाठिनः**, प्राग्रूपसंशोधकस्य **श्रीहरिबंशकुमारपाण्डेयस्य**, तत्सहयोगिकर्मचारिणाम्, रत्नाप्रेस-सञ्चालकमहोदयानां **श्रीविनयशङ्करपण्ड्यानां** तत्रत्येतरकर्मचारिणाम् अत्रत्याचार्योपाचार्यादीनाम्, छात्राणां च सहयोगेन कठिनतरमपि एतत्कार्यं सम्पन्नतामलभत, तदर्थं सर्वे शुभाशीराशिभिः समेध्यन्ते ।

शिष्याणामध्यापनेन स्वयमपि शास्त्रचिन्तया च समयस्याल्पतया भ्रमाद् मुद्रणदोषाद्वा त्रुटयो नूनं सम्भाव्यन्ते, ताश्च यदि सुधीभिः सोसूच्यन्ते, तर्ह्यहं तदीयां कृतज्ञतामावक्ष्यामि । अन्ते च भगवन्तौ भवानीविश्वनाथौ प्रार्थये यत्तदीयानुग्रहेणैष विश्वविद्यालय ईदृशे महनीयकार्ये सर्वथा सर्वदा च तत्परतां भजेतेति स्वीयं हार्दं प्रकाशयति–

वाराणस्याम्,
विजयदशम्याम्,
२०४९ तमे वैक्रमाब्दे

रामप्रसादत्रिपाठी
सम्मानिताध्यापकः,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणस्याम् ।

विषयानुक्रमणिका

●

रुद्रयामलम्

[उत्तरतन्त्रम्]

(द्वितीयो भागः)

अथ षट्चत्त्वारिंशः पटलः

आनन्दभैरवी उवाच—

श्रृणु भैरव[1] वक्ष्यामि रुद्राणीस्तोत्रमुत्तमम् ।
श्रुत्त्वा पठित्त्वा देवेश धारयित्त्वा स्वदेहके ॥ १ ।
महासिद्धो भवेदेव महाकालवशो भवेत् ।
त्रैलोक्यरक्षणार्थाय ब्रह्मणा विष्णुना तथा[2] ॥ २ ।
रुद्रयुक्तां महारौद्रीं स्तुत्त्वा[3] सर्वंजयो भवेत् ।
तच्छ्रुत्त्वा मुनयः सर्वे योगिनो योगदर्शकाः ॥ ३ ।
सर्वे देवाः सर्वलोकाधिपाः स्युः प्राणरक्षकाः ।
एतत्स्तवनमात्रेण ब्रह्मा ब्रह्मत्त्वमाप्नुयात् ॥ ४ ।
विष्णुर्विष्णुत्त्वमाप्नोति देवत्त्वं सर्वदेवताः ।
इदानीं श्रृणु तत्स्तोत्रमष्टाङ्गयोगसाधनम् ॥ ५ ।
एतत्स्तवनपाठेन चाष्टाङ्गकुलदेवताः ।
वशीभूताः प्रभवन्ति[4] सप्तस्वर्गस्थदेवताः[5] ॥ ६ ।

अस्य महारुद्रशक्तिस्तोत्रस्य महाकालभैरवऋषिरनुष्टुप्छन्दः श्रीमच्छ्रीरूपिणी देवता[6] वां बीजं द्रां शक्तिः [7]समौं स्फें कीलकं महोग्रादि[8] देवता सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥

महारौद्री रुद्रारुणरवरवक्रोधनिकरा
विकारा धर्माणां हरतु विषयं देहि परमम् ।
विवेकं सत्पुत्रं त्वमपि जगतामादिपुरुषं
विभाकोटिग्रामस्खलननिचला [9]लोचनचला ॥ ७ ।

---

१. श्रृणु वक्ष्यामि ते रुद्र–क०; २ कृतामिति–ख०; ३. श्रुत्वा–क० ।
४. भवन्त्येव–ख०; ५. सप्तसंख्याकाश्च ते स्वर्गाश्चेति सप्तस्वर्गाः, मध्यमपदलोपिसमासः । तत्र तिष्ठन्ति इति सप्तस्वर्गस्थाः, कर्तरि कप्रत्ययः । ताश्च ता देवताश्चेति कर्मधारयसमासः ।
६. रां–क०; ७. क्षौ फे–क०; ८. महोग्र, महोग्रायी क्रमेण–ग०; ९. चालन–ग० ।

त्वमेका त्रैलोक्यं व्यवसि[1] सततं मे शुभभवा
अनन्ता सा चातीन्द्रियगणकला नागवसना ।
श्रियं दातुं नित्यं समुदयति रश्मिस्तव शिवे
शिवाह्लादानन्दा जडितमनमन्दा[2] कुरु मुदा ॥ ८ ।

महालोभं पापं हर हर हरे [3]हीरकनिभे
विषानन्दोद्घाता मम तनु[4] विषं वेशवशिनि ।
सुधानन्दं देहि क्षयमपि हरक्रोधमतुलं
मदं[5] कामं मोहं कुलजननि दिव्यं वितर तत् ॥ ९ ।

तपस्यासद्भावं त्वमपि च ददासीह यदि वा
प्रदीप्ता सद्व्याप्ता भवति तव दाने मम मनः ।
प्रफुल्लातिश्रीदे जय मम न भक्ति निजशुभां
समीडे त्वामेकां भुवनजनरक्षां कुरु सदा ॥ १० ।

विचार्य स्वे तन्त्रे रचयसि सुखं नित्यमिलितम्
महाखड्गप्रख्या त्रिभुवनकरा रुद्रदयिता ।
सुराणां संरक्षां यदि कुरु मुदा पीठनिकरे[6]
मणिद्वीपे तेजोमयि हि मणिपूरेऽमलपदम् ॥ ११ ।

महाक्षेत्रे युद्धोत्सवभयहरा त्वं कुलकला
किराती सर्वाणी मम कुलगतं पालय लये ।
लयज्ञानानन्दं रचय हृदये योगजननि
यतीनां रक्षायै कुलयुवति विद्ये[7] उदयति ॥ १२ ।

---

१. चरसि-ख० । 'व्यवसि' इति मूलपाठे विशेषेण अवसि रक्षसि, इत्यर्थो बोध्यः । चरसि इति पाठे तु भक्षयसि इत्यर्थः । प्रलयकाले त्रैलोक्यस्य देव्या भक्षणात्, स्वोदरे लयकरणात् । २. मनमंगमिति-ग०, जडिततममगमिति-ख० । ३. हारकनिभ-क०; ४. तनुरियमिति-ख०; ५. यदा-ग०; ६. पीठनिकटे-क०; ७. विधेन्द्रजयति-क०, त्वमपि हि-ख० ।

प्रतिष्ठा कीर्तिस्ते त्वमव[1]तरसि त्रासि [2]तिमिरा-
न्न जाने त्वत् तत्त्वं तरुणि महिमानं [3]सुखमयम् ।
महापारावारां निधिभवजलेशं कुरु जयम्[4]
हिरण्याह्लादस्था त्वमपि करुणासागरमयी[5] ॥ १३ ।

विधातारं विष्णुं सुरवरणवन्दीन्[6] परजनान्
प्रपासि त्वं सिद्धा सुखभुवनभंगक्षयकरा ।
किरन्ती[7] सानन्दा किरणशतकोटिं त्रिभुवने[8]
त्वमेका कल्याणि गिरिशरमणि पाहि सततम् ॥ १४ ।

त्वदीयं सुखान्तं समीच्छामि सत्यं
विसर्गेन्दुवर्णात्मकं कामनाख्यम् ।
कृपादृष्टिपाता मनः पाहि[9] शुद्धा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ १५ ।

जगत्तारिणी त्वं जगद्व्यापिनी त्वं
जगज्ज्वालरूपा[10] जगद्धर्मरूपा ।
अनेकान्तिकत्वात्त्वमानन्दरूपा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ १६ ।

विधानं जनानां कुरु त्वं त्वमीशा
क्षपाक्षामचित्ता[11] प्रियानन्ददात्री ।
त्वमाज्ञाम्बुजस्था त्वमार्या[12] गुरूणां
त्वमेका परब्रह्मरूपेण सिद्धा ॥ १७ ।

---

१. तमसि–ख० । २-३. तिमिराट्–क०, 'तिमिराट्' इति पाठे तिमिरमन्धकारमटति या सा तिमिराट्, अटतिः कर्तृक्विबन्तः, भगवत्या विशेषणमेतत् । तिमिरादिति पाठे तु स्पष्टमेव, तिमिराद् अन्धकारात्, त्रासि = रक्षसि, त्रैङ्धातुर्बाहुलकाद् आदादिकः परस्मैपदी च मन्तव्योऽत्र पक्षे । प्रथमान्तपाठेऽपि त्रासि इत्यस्येयमेव स्थितिः ।

४. सुरमयमिति पुरमयमिति वा–क०; ५. सागरमयि–ग०; ६. रादीनिति–क० । ७. किरातीति–क०; ८. च्छदविले–क०; ९. पातासनं पाहि–ख०; १०. जगद्धर्मरूपा जगज्ज्ञानरूपेति–क०; ११. क्षुब्धदा–क०; १२. त्वमाज्ञा गुरूणामिति–क० । अत्र आज्ञा इति पाठे आ = समन्ताद् जानाति इति 'आज्ञा', "आतश्चोपसर्गे" इति कर्तरि कप्रत्ययः । स्त्रीत्वद्योतकः टाप्प्रत्ययः । त्वं गुरून् सम्यग् जानासि, इत्यर्थः ।

प्रभामण्डलस्था स्थितित्यागसंस्था
स्थलाम्भोजमाला[1] त्वमालग्नकण्ठा ।
शिवश्यामवर्णा महापिंगलार्णा[2]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ १८ ।

चतुर्थश्रुतिस्थाचलश्चन्द्रसंस्था
महावेदभाषा त्वमेका [3]जगत्याम् ।
महाभक्तिभावाश्रितं मां प्रसिद्धे
त्वमेका परब्रह्मरूपेण सिद्धा ॥ १९ ।

जगद्धामचेष्टे जगद्बुद्धिनिष्ठे
जगद्यौवनस्था जगद्भावसंस्था[4] ।
समावर्त्तमध्ये[5] महाघूर्णितं मां
त्वमेका परब्रह्मरूपेण सिद्धा ॥ २० ।

[6]महासृष्टिसंहारकालक्रमस्था
महामांसभक्षा सदानन्दरूपा[7] ।
[8]महाशाक्यमौनीन्द्रपूज्ये सुरेज्ये
त्वमेका परब्रह्मरूपेण सिद्धा ॥ २१ ॥

चतुःषष्टितन्त्रार्णवाह्लादकत्वा-
न्महाभौतिकत्त्वान्महासिद्धिविद्या ।
छलच्छिन्नदेहा छलानन्नसंज्ञा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ २२ ॥

शिवत्त्वं महत्त्वं [9]समत्वागलत्वा-
दनैकान्तिकत्त्वं ददासि त्वमाद्या ।
सुधासागरस्था महामोहनस्था
त्वमेका परब्रह्मरूपेण सिद्धा ॥ २३ ॥

---

१. द्वया–ग० । २. पिङ्गलाक्षीति–क०; ३. त्वमेकासि सारः–क०; ४ समावर्तनेया–क० । ५. जगद्भावनस्था–क०; ६. दृष्टि–क०; ७. सदानन्दसेव्या–क० । सदा आनन्देन सेव्या, अथवा सता नित्यसत्तया आनन्देन च सेव्या । 'नित्यसत्तानित्यानन्दवती, इत्यर्थः । 'सदानन्दरूपा' इति पाठे तु सदानन्दः परतरं ब्रह्म रूपं यस्या इत्यर्थः । ८. महामोक्षमौलीन्द्र''''वरात्वम्–क०, ९. मयत्वामयत्वादिति–ग० ।

महासिंहपृष्ठे पदाम्भोजलक्ष्मी-
　　　　मंम श्रीशिरोमण्डलस्थं[1] प्रपातु ।
भवानन्दसन्तानकल्पेऽवदेहं
　　　　त्वमेका परब्रह्मरूपेण सिद्धा ॥ २४ ॥

स्थिरा सा महाविद्युदाकारहारा
　　　　महाच्चञ्चला चाचला[2] ज्ञानजन्या ।
सदा [3]भावनत्त्वात्सदा ज्ञापनस्था[4]
　　　　त्वमेका परब्रह्मरूपेण सिद्धा ॥ २५ ।

कुलानन्दमोहा[5] महाकौलकन्या
　　　　कुलक्षेत्ररक्षा कुलच्छत्रकारा ।
महाचञ्चलत्त्वान्महावायुघूर्णा[6]
　　　　त्वमेका परब्रह्मरूपेण सिद्धा ॥ २६ ।

चिरंजीविनी भामिनी[7] भूमिबीजा
　　　　भयाभावहन्त्री शरत्कोटिचन्द्रा ।
विभूतिर्भयाहारकर्त्री[8] प्रकृष्टा
　　　　त्वमेका परब्रह्मरूपेण सिद्धा ॥ २७ ।

महावीरभावाश्रया[9] भावरूपा
　　　　विशेषाविशेषे[10] महाशैववीरा ।
विसर्गापवर्गाश्रयार्णोज्ज्वलत्त्वात्[11]
　　　　त्वमेका परब्रह्मरूपेण सिद्धा ॥ २८ ।

---

१. मण्डलस्था–ख०; २. वाननज्ञानजन्येति–क०; ३. सदाभावनत्वां सदाज्ञापनत्वामिति–क०; ४. सदाज्ञानसंस्था ख०; ५. मोदा–क०; ६. अस्मिन् पाठे कुलानन्देन मोदो हर्षो यस्याः सा; 'कुलानन्दमोहा' इति मूलपाठे तु कुलानन्देन मोहयति भक्तान् या सा । न चैवं कर्मण्यण् स्यादिति वाच्यम्, कर्मवाचकपदाभावात्, भक्तपदस्याध्याहारलभ्यत्वात् । एवं च कर्तरि पचाद्यजन्तोऽयं स्त्रीत्वे टाबन्तः; ७. पूर्णं–ख०; ६. भाविनीति–क० । ८. भवानन्द–ख०; ९. साशश्रयेति–क०; १०. विशेषाभिशोक महाशैववीरा–क०; महाशेषवीरा–ग०; ११. श्रयत्वोज्ज्वल–क० ।

महापञ्चमत्त्वान्महामोदकत्वान्महा-
कौलिकत्वादसञ्चारणत्वात् ।
कुलप्रेमभावक्रियानिश्चलत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥ २९ ।

वसोः सिद्धिदात्री शिवानन्दकर्त्री[1]
महामैथुनानन्दसम्भेदनत्वात् ।
सुखाश्वासतत्त्वात्तपः प्राणरक्षा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३० ।

गलत्प्रेमभावा कुलज्ञानतत्त्वात्[2]
प्रिया श्रीकृपात्वं [3]भवाधारमूर्त्तिः ।
महैश्वर्यहेतोर्महाराजकन्या
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३१ ।

महामोक्षविद्या महानिर्मलत्वात्
प्रभापञ्चचूडस्य[4] सिद्धिप्रिया च ।
महानादबिन्दुप्रयासाभिरामा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३२ ।

महाविद्रुमाकारवर्णाभिरामा
कुलाह्लादसूत्रादिसंसाधनत्वात् ।
महद्राज्यविद्याधना[5] संघटत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३३ ।

तवाङ्घ्रिद्वयाम्भोज पूजासुखत्वा-
न्महाकालरूपा स्वयं सर्वविद्या ।
विकारादिसम्बन्धविशेषणत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३४ ।

---

१. निरानन्द–क०; शिवानन्दकर्त्री इति पाठे शिवं कल्याणमानन्दं च करोति या सा । कर्मण्यण् न शङ्क्यः कर्त्री इति तृजन्तेन साधयित्वा पुनः षष्ठीसमासः; २. कुलज्ञानतत्त्व-मिति–क०; ३. भवाधारमुक्तिः–ग०; ४. महापञ्चभूतस्य–ख०; चूतस्येति–ग० । ५. घवैः संचितत्वादिति–ख० ।

शिवत्त्वं शुभत्त्वं महाशैलकन्ये
प्रियत्वं परत्वं महापावनत्वम् ।
समाधेहि तत्त्वादनैकान्तिकत्वा-
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३५ ।

महाचेतनादेवनादोन[1]नत्वाद-
संख्यामतीनां मनोयोगमुख्या ।
विरोधापहन्त्री रिपुप्राणहन्त्री[2]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३६ ।

चतुर्विंशतिक्रोधतत्त्वानुकूले
वियत्खण्डचन्द्रोज्ज्वले कीलकस्थे[3] ।
सदा मां प्रपातु प्रचण्डार्कवर्णा[4]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३७ ।

शुभं कामधेनुस्वरूपं स्वदेहं
सदा दर्शने[5] श्रद्धया चारुवर्णा ।
हिमांशुप्रभाकोटिवर्णेऽत्वपूर्णे[6]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३८ ।

महाकामबीजान्विता खण्डयन्ती
महादोषजालं शनेरावहन्ती ।
शिवाभद्रकाली स्थिरानन्दमाला
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ३९ ।

---

१. नादोलनत्वादिति–क०, संख्यासतीनामिति–क० ।
महच्चेतनादानकात्वमेकाह्यसंख्यामतीनां मनोयोगमुखेनेति–ख० ।
२. रिपुपापाहत्या(हन्या)–क०; ३. वियत्खण्डचण्डाकुले घोलसंस्थेति–ग० ।
४. प्रधानार्कवर्णेति–ग० । अस्मिन् पाठे प्रधानो योऽर्कवर्णः श्वेतो गुणः, सोऽस्ति यस्यामिति बहुव्रीहिः । मूलपाठे तु प्रचण्डः अर्कवर्णा उष्णत्वयुक्तः श्वेतोऽस्ति यस्या इति विग्रहः ।
५. सदानन्ददा–ग०; ६. वर्णात्वपूर्णे–क०; वर्णाह्यपूर्णा–ख० ।

महाकालकूटाशिनं　　तीक्ष्णनेत्रं
　　सदा पाहि शम्भुं भयार्द्रातिवेलम् ।
भवापालनत्वादसंख्यानिवासा
　　त्वमेका　परब्रह्मरूपेण　सिद्धा ।

हरन्ती विषाढ्यं[1] वहन्ती कलाद्यं
　　रटन्ती[2] नटन्ती विशाला भ्रमन्ती ।
श्रियः[3] पालनी पालिका बालिकात्वात्
　　त्वमेका　परब्रह्मरूपेण　सिद्धा ॥ ४० ।

भवानन्दहेतोः[4] सदा श्रद्धया वा
　　पदाम्भोजमध्ये　मनोयोगकाले ।
परासंख्यते　कामसंक्षालनत्त्वा[5]-
　　त्वमेका　परब्रह्मरूपेण　सिद्धा ॥ ४१ ।

क्षितिक्षोभनाशाय[6]　सिद्धादिविद्या
　　कुलाढ्याखिलाढ्याननासूक्ष्ममध्या[7] ।
प्रयत्नं　करोषि　क्षयानन्ददाना
　　त्वमेका　परब्रह्मरूपेण　सिद्धा ॥ ४२ ।

महाधैर्यमाहृत्यजं　जप्यते　यैस्त-
　　वाद्याभिधानानि　कालिप्रभाते ।
तदैवापि　काले　ददासीह　सिद्धिं
　　त्वमेका　परब्रह्मरूपेण　सिद्धा ॥ ४३ ।

---

१. विषान्नमिति-ख०, विषाद्यमिति-ग० । विषेणाढ्यं सम्पन्नं किमपि भक्ष्यम् । अथवा विषान्नमिति पाठे विषमिश्रितमन्नमिति मध्यमपदलोपिसमासः । यदि भक्तेन विषान्नमपि भक्षितं स्यात्तदा तदीयं मारकदोषं हरन्ती भगवती इत्यर्थः ।

२. रटन्ती विलोला भ्रमन्ती जपन्ती-ग०; ३. श्रियः पालिनी पालिके कालिके वा-क० ।

४. तवानन्दहेतोरिति-ग०; ५. कामसंख्याननत्वादिति क० ।

६. क्षितिक्षोभनायेति-क०, सिद्धयादि विद्येति च-क०; ७. शिलामध्यमध्येति-क० ।

चिरं स्थापयन्ती चिरं भासयन्ती[1]
त्वमाख्या गुरूणां[2] कुलानन्दविद्ये ।
[3]स्वधाकारतुष्टा कलावह्निजाया
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४४ ।

सुरानन्दकाले फलोद्भूतचिह्ना
चितामध्यदेशे महासिद्धिदात्री ।
त्रिभि[4]न्नाविभिन्नामहारुद्रविद्ये
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४५ ।

महापूर्वि[5] कात्यायनि क्रोधमूले
विवेकादिकं धर्ममादौ ददासि ।
त्रयाणां सुराणां मुदा रक्षणाय
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४६ ।

विशुद्धस्फुटत्वान्महाकौतुकत्वा-
[6]त्तनुध्यानमोहादनन्ते[7] कृतत्वात् ।
[8]कुलारक्षणात्मा महालक्षणात्मा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४७ ।

दहन्ती रिपूणां [9]कुलश्चात्मदेशं
[10]क्षणादेव सूक्ष्मासुसूक्ष्मा सती सा ।
ममानन्ददेशं सदा पालय श्री[11]
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ४८ ।

---

१. भावयन्ती–ग०; २. गुणानन्दविघे क० ।
३. सुघाकामतुष्टेति–क० । सुघायाः काम इच्छा, तेन तुष्टा । 'स्वधाकारतुष्टा' इति मूलपाठे तु स्वधाकारेण तुष्टा इत्यर्थो बोध्यः; ४. त्रिभिन्नाधिभन्ना–ग० ।
५. महापुष्टि····क०; ६. घ्यानसत्वात्–क०; ७. असन्तैकतत्त्वात्–क० ।
८ कुलारक्षणत्वात्, महालक्षणत्वात्–क० ।
९. कुलच्छत्रदेशं ग० ।
१०. सदाज्ञानगम्याखिलानां जनानाम्–ख०, कुलच्छत्रदेशं कुलं देवसूक्ष्मा मतीनाम्–ग० ।
११. पालयश्रोस्त्व मेका–ख० ।

चतुर्थाश्रमस्थाश्रमं पाहि रुद्रे
महोग्रप्रतापे महारौद्रि भद्रे ।
महापातकादिक्षयत्त्वामृतत्त्वा-[1]
त्वमेका परब्रह्मरूपेण सिद्धा ।। ४९ ।

[2]महावायुरम्ये महाज्ञानगम्ये
[3]महामन्त्रजाप्यादिसिद्धिप्रसिद्धे ।
[4]लयं देहि बाह्यानिलाघातनत्त्वा-
त्वमेका परब्रह्मरूपेण सिद्धा ।। ५० ।

न जानामि किं वामरो वापि विष्णु-
र्महाकौलिको वा न जानाति पूजाम् ।
[5]कुलाद्यासनन्ते सुरेन्द्रादिपाठे
त्वमेका परब्रह्मरूपेण सिद्धा ।। ५१ ।

[6]मदीयं प्रलोभ्यं महाभद्रकालि
प्रकाशेन कर्त्तुं समर्था भव त्वम् ।
पदाब्जे च [7]हन्तुं महापापसर्गे
त्वमेका परब्रह्मरूपेण सिद्धा ।। ५२ ।

वहन्ती कपालं स्खलन्तीमपार्थं
महाहेममाला [8]महाकाशयन्ती ।
[9]शिवो मङ्गलं मे तु वैश्वानरीशे
त्वमेका परब्रह्मरूपेण सिद्धा ।। ५३ ।

---

१. क्षयत्वानृतत्वं क०; २. महावायुवश्ये महाज्ञानवश्ये–ग० ।
३. तन्त्र–ग० । महामन्त्रस्य जाप्येन आदिसिद्धिः प्रमुखसिद्धिः, तया प्रसिद्धा, तत्सम्बोधने एतद्रूपम् । अथवा—महामन्त्रजाप्यमादिर्यस्य तेन सिद्धिः प्रसिद्धा यस्या इति । तन्त्रशब्द-घटिते पाठे तु मन्त्रस्य स्थाने तन्त्रशब्दः पठनीयः; ४. नयम्–क० ।
५. कुलसेवनान्तस्तवेन्द्रादिपाठम्–ग०; ६. यदीयं प्रलोभं ·· ····प्रकर्षेण कर्तुम्–क० ।
७. हर्त्तुम् इति–क०; ८. मनाकालयन्ती–क०, मलाकाशपात्री–ख० ।
९. शिरोऽसत्त्ववैश्यानरीशे–ग०, शिवात्वरूपा च वैश्यानरीशे ।

प्रचण्डा प्रसन्ना भवक्षोभहेतो-
विवादादिघाताय शान्तिः प्रतुष्टिः ।
कियत्कालसंस्था प्रसन्नान्तरात्मा
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५४ ।

[1]महावायुपाना क्रियामोक्षकाले
कुलज्ञान[2]दाना दिवारूपिणी त्वम् ।
प्रभुत्वं विधेहि[3] क्षमे कामकर्त्री
त्वमेका परब्रह्मरूपेण सिद्धा ॥ ५५ ।

यदि श्रीवराद्ये ममाख्या[4]ससिद्धि
[5]विदेहीति चित्ते समाधाय भक्तः ।
समाप्नोति शीघ्रं सदा प्रार्थ्यते यैः[6]
सदा पठ्यते[7] वा मुदा वारमेकम् ॥ ५६ ।

महाकालशम्भो महाज्ञानसिद्धः
सदा[8] कालवश्ये[9] पठेदेकचित्तः ।
महाभक्तिभावं [10]लभेद् वेदमुक्ति
महादेवभक्ति त्रिकालेन योगम् ॥ ५७ ।

मणेः पीठमध्ये [11]महारुद्रकान्तां
महालाकिनीं कुण्डलीं[12] भावयन्ती ।
[13]महापुण्यलाभं स्तवं ब्रह्मसारं
महाकान्तलाभाय पुण्याय सिद्धयै ॥ ५८ ।

---

१. दानक्रिया मोक्षकाले; २. कुलज्ञानदानार्थिनी त्वम्-ग० ।
३. विदेहि । 'विदेहि' इति पाठे विशेषेण देहि इत्यर्थः, अथवा विगतो देहो देहभानं यस्याः सा विदेही तत्सम्बोधने हे विदेहि ! इत्यर्थो बोध्यः ।
४. अभ्याससिद्धिम्-क०; ५. विदेहापि चित्ते-क० ।
६. वै-क० । ७. पाठयते; ८. यदा-क० ।
९. कालवश्यः-ख० । 'कालवश्ये' इति पाठे कालो वश्यो यस्याः सा, तत्सम्बोधने इदं रूपम् । पूर्वं निपातस्यानित्यत्वाद् वश्यशब्दस्य परनिपातः ।
१०. लभस्वाढ्यभक्ति-ख०, लभस्वेदमुक्ति-ग० ।
११. महाब्रह्मकान्तां-ग० । महारुद्रस्य कान्ता, अथवा महती चासौ रुद्रकान्ता च । 'महाब्रह्मकान्तेति' पाठे महती ब्रह्मकान्ता, माया इति; १२. कुण्डलम्; १३. महापुण्यभावं-क० ।

महाकालि रुद्राणि भद्राणि कृष्णे[1]
भवानन्दमूर्त्तिप्रकाशाय कुर्यात् ।
किलानन्दमाकृत्य सम्पूज्यते यै-
र्महादेवि चण्डे तव ध्याननिष्ठा[2] ॥ ५९ ।

महामोक्षभावं[3] समाप्नोति शीघ्रं
महाशुद्धता कामहा कालरूपी[4] ॥ ६० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे मणिपूरभेदनक्रमे भैरवीभैरवसंवादे रुद्रशक्तिलाकिनीस्तोत्रं नाम [5]षट्चत्त्वारिंशः पटलः ॥

●

---

१. पूज्ये–ख० अधिकः पाठः; २. निष्ठः–ग० ।

३. मोक्षे महेति विशेषणेन लेशाविद्याकृतप्रभावस्यापि समाप्तिः सोसूच्यते । यथा ब्रह्मणो मानसपुत्रेषु सनक-सनन्दनादिष्वपि लेशाविद्यायाः प्रभाव आसीदेव, अत एव जयविजययोर्भगवत्पार्षदयोः जन्मत्रितयकृते दैत्ययोनौ जन्मविषयकः शापस्तैः प्रदत्तः । एवं च स्थूलाविद्याकृतबन्धनान्निवृत्तौ सत्यामपि लेशाविद्याजनितः प्रभावो यदा समाप्यते, तदैव महामोक्षावाप्तिः संमन्तव्या ।

४. (क) कालरूप इत्यपि पाठः प्रतिभाति ।
(ख) प्रकाशाय पङ्केरुहातां जनास्ते महायोगिनो भूतनाथा भवन्ति–क० अधिकः पाठः ।

५. सप्तचत्वारिंशत्तमः पटलः–ग० ।

अथ सप्तचत्त्वारिंशः पटलः

श्री-आनन्दभैरवी उवाच—

श्रृणु कैलासनाथाब्ज[1] चक्रमण्डलसंस्थितिम् ।
षट्चक्रभेदमाहात्म्यं सावधानावधारय ॥ १ ।
अप्रकाश्यमिदं यन्त्रं[2] मणिपूरविभेदनम् ।
अष्टैश्वर्यसाधनाय जीवन्मुक्तिप्रदाय[3] च ॥ २ ।

कथयामि महाकाल यज्ज्ञात्त्वा योगिनोऽमराः ।
क्रियासाधनमात्रेण केन योगेन एव हि ॥ ३ ।

साधनादेव सर्वज्ञः सर्वार्थज्ञानवान् भवेत् ।
रुद्राणीसहितं रुद्रं ध्यात्वा सम्पूज्य सञ्जपेत् ॥ ४ ।

अथ वक्ष्ये महामन्त्रं पूजाप्रकरणं तथा ।
मणिपूरे स्थितो मन्त्री रुद्राणीयजनं चरेत् ॥ ५ ।

[4]सम्प्रतिमन्त्रस्योद्धारं करोमि कालकूटप[5] ।
प्रणवं पूर्वमुच्चार्य नमःशब्दं ततो वदेत् ॥ ६ ।

ते शब्दान्ते समुद्धृत्य रुद्रशब्दं ततः परम् ।
[6]रूपिण्यै पदमुच्चार्य रुद्राणीमन्त्रमीरितम् ॥ ७ ।

ततो महारुद्रमन्त्रं वक्ष्यामि तत्त्वतः श्रृणु ।
प्रणवान्ते [7]नमःशब्दं ते महाशब्दमुच्चरेत् ॥ ८ ।
रुद्राय [8]पदमुद्धृत्य महारुद्रमनुः स्मृतः ।
[9]ततोऽन्यत्कालरूपेश रुद्राणी मन्त्रमाश्रृणु ॥ ९ ।

---

१. नाथाद्य–ख०; २. वक्तुं–क०, मन्त्रं–ख०; ३. प्रियाय–क० ।

४. दम्पत्यो मन्त्रमुद्धारम्–ख०, सम्पात्यामन्त्रमुद्धारम्–ख० ।

५. कालकूटं पिबति, कालकूटात् पाति, इति वा, कालकूटपः, तत्सम्बोधने हे कालकूटप ! इति भगवता शिवेन विषपानं कृतम्, ततश्च देवा रक्षिता इति ।

६. रूपिणे–ख०; ७. शब्दः–ग० । मन्त्रस्य स्वरूपं निःसारणीयम् ।

८. मुचार्यं–क०; ९. अन्य–ग० ।

डादिफान्तैः सर्ववर्णैराद्यन्ते पुटितं मनोः ।
सर्वशेषे वलिजाया महामन्त्रोत्तमोत्तमः ॥ १० ।

अस्य जापनमात्रेण षट्पद्म[1]साधने जयी ।
एवं प्रकारं रुद्रस्य चाथवान्यप्रकारकम् ॥ ११ ।

रुद्राणां विविधं मन्त्रं कोटितन्त्रे विनिर्णयम् ।
मणिपूरे सदा ध्यायेद् योगसाधनहेतुना ॥ १२ ।

सर्वत्र मानसं कार्यं ध्यानपूजाविधानकम् ।
प्रमोदाख्यातिमनुभिर्मृत्युञ्जयादिभिस्तथा ॥ १३ ।

चैतन्यं कारयेत् शीघ्रं मणिपूरस्थदेवयोः ।
[2]अथ वक्ष्ये महेशस्य [3]रुद्रस्य परमात्मनः ॥ १४ ।

प्रासादाख्यं महामन्त्रं त्रैलोक्यफलसिद्धिदम् ।
सान्तमोङ्कार[4]संयुक्तं नादबिन्दुविभूषितम् ॥ १५ ।

प्रासादाख्ये मनुः प्रोक्तो भजतां कामदो[5]मणिः ।
प्रणवं पूर्वमुच्चार्य स्वाहान्तं जपते यदि ॥ १६ ।

स्तम्भनादीनि कर्माणि स करोति न संशयः ।
अथवा मृत्युजेतारं महामन्त्रं [6]महामनुम् ॥ १७ ।

जपेन्मानसजापेन[7] यज्जाप्यं प्राणरक्षकम् ।
तारं स्थिरा[8] सकर्णेन्दुर्भृगुः सर्गसमन्वितः ॥ १८ ।

त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः ।
अथवान्यप्रकारेण जपेन्मृत्युञ्जयात्मकम् ॥ १९ ॥

---

१. जापने–ग० । —षट्पद्मसाधने जयति तच्छीलः; २. तत्त्वं–ग० ।
३. परमात्मानमीश्वरम्–ग० । यदरोदीत् तद् रुद्रस्य रुद्रत्वम् । रुदिर् अश्रुविमोचने इति धातोरक्प्रत्ययः, कित्वाद् गुणाभावः ।
४. हान्तमोकार–क०, सान्तमोकार–ग०; ५. मनु–क० ।
६. मुनिः–क० । —महामुनिः मृत्युजेतारं महामन्त्रं जपेत् । अनेन रूपेणान्वये कृते सति अर्थसङ्गत्याऽयमेव पाठो युक्तः प्रतिभाति । महामनुमिति पाठे मनुशब्दस्य मन्त्रार्थकत्वात् पौनरुक्त्यदोष आपतति । मणिः–ग० ।
७. जपन्–क०; ८. स्थिराम्–क० ।

मृत्युञ्जयं समुद्धृत्य पालय द्वितयं ततः ।
मृत्युञ्जयं समुद्धृत्य पुनरेव[1] विलोमतः ॥ २० ।

द्वादशाक्षरमन्त्रोऽयं मृत्युञ्जयाभिधोऽपरः ।
ध्यानं (पूजां) न्यासं तथा शृणु वक्ष्यामि शंकर ॥ २१ ।

रुद्रमन्त्रेण पुटितं योजयेन्मृत्युहारणम् ।
तथा हि रुद्रकान्ताया मन्त्रेण पुटितं शिवम् ॥ २२ ।

जपित्वा पूजयित्वा च नरो गोप्ता भवेद्वशी ।
प्रातःकृत्यादिकं कृत्वा हविष्याशी जितेन्द्रियः ॥ २३ ।

अतिसावधानपरो[2] विधिसेवापरायणः ।
स्नानसन्ध्यादिकं कृत्वा आसनादिकमाश्रयेत् ॥ २४ ।

समाप्य आसनं सर्वं पीतवस्त्रे पिधाय च ।
अथवा शुक्लवस्त्रे द्वे परिधाय मनोहरे ॥ २५ ।

कोमलाद्यासने गत्वा प्रक्षाल्य पादयुग्मकम् ।
द्विराचम्य विधानेन पूजायां स्वस्तिकासने ॥ २६ ।

वीरासने तथा पद्मासनयोन्यासने तथा ।
उपविश्य निर्मलात्मा पूजामार्गपरो भवेत् ॥ २७ ।

सर्वाणि द्रव्यभोज्यानि मनसा कल्पितानि च ।
तदलाभे सलाभे वा मनःकल्पितशोधनम् ॥ २८ ।

करणीयं सर्वदैव निजबाह्येऽपि[3] चालयेत् ।
यथा लभ्यानि द्रव्याणि संशोध्य[4] तत्र योजयेत् ॥ २९ ।

ततः कुर्याद्विशेषेण प्राणायामं मनोरमम् ।
चतुःषष्टिमात्रया वा तथा षोडशमात्रया ॥ ३० ।

---

१. एवम्–क०; २. सावधानपरो भूत्वा–क० ।
३. स्वाजे राजे वा–क०; ४. सन्तोष्य–ग०; 'संशोध्य' इति पाठः साधीयान् । द्रव्यस्य पुष्पधूपादेः संशोधनं भवति, न तु सन्तोषणम्, अचेतनत्वात् । यदि द्रव्यं पश्वादिकम्, तदा 'सन्तोष्य' इति पाठो युक्त एव ।

तद्द्वादशमात्रया वा संख्यया[1] वायुमाश्रयेत् ।
प्राणायामं समाप्याथ रुद्रन्यासं समाचरेत् ॥ ३१ ।

श्रीकण्ठादिमहावीरन्यासं कुर्यात् प्रयत्नतः ।
रुद्रन्यासं प्रवक्ष्यामि [2]मनुयोगादिसिद्धये ॥ ३२ ।

एतन्न्यासाभिकरणे नरो रुद्रसमो भवेत् ।
सदा कुर्यान्महान्यासं सर्वसिद्धिप्रकाशनात् ॥ ३३ ।

शक्तिहीनं शक्तियुक्तं महान्यासं प्रकीर्तितम् ।
शक्तियुक्तं समाकृत्य महाशक्तो भवेद्बली ॥ ३४ ।

शक्तिहीनं तथा कार्यं सर्वविघ्नविनाशनात् ।
मातृकापद्मचक्रे[3] तु मातृकावर्गसंयुतम् ॥ ३५ ।

मातृकापुटितं मन्त्रं किं वा मन्त्रेण संपुटम् ।
कृत्वा मन्त्री न्यासजालं सावधानेन कारयेत् ॥ ३६ ।

विक्रमी सिंहतुल्यः स्यात्तं दृष्ट्वा यान्ति शत्रवः ।
मौनी भूत्वा समाकृत्य कुलचक्रस्य भेदनम्[4] ॥ ३७ ।

मणिपूरे स्थिरो[5] भूत्वा महातेजोमयो भवेत् ।
तेषां नाम प्रवक्ष्यामि पञ्चाशदेकसंख्यया ॥ ३८ ।

पञ्चाशदेकशक्तीनां तथा नाम शृणु प्रभो ।
सर्वेषामभिधानान्ते[6] ईशाय नम उच्चरेत् ॥ ३९ ।

एकैकं मातृकावर्णं नाम्न आद्ये नियोजयेत् ।
शक्तियुक्तं [7]सदा नाम ईशान्तं सन्त्यजे तथा ॥ ४० ।

भेदने शक्तियुक्तस्तु न्यासं कुर्यान्महायतिः ।
कुशासने सिद्धिहेतोश्चैलाजिनकुशोत्तरम् ॥ ४१ ।

---

१. संख्यया–क०; २. महा–क०; ३. वर्णं चक्रे–ग० ।
४. भेदनात्–क० । ५. स्थितो–ग० ।
६. अभिधानार्थम्–ख० ।—एकपञ्चाशत्संख्याकशक्तीनां नामानि उच्चार्य 'ईशाय नमः, इत्युच्चरेत्, इति तात्पर्यम् । अभिधानन्तु–ग० । ७. यदा........तदा–ग० ।

बद्धैकमासनं योगी न्यासजालं समाचरेत् ।
अथवा द्वीपिचर्मादि कोमलाद्यासनेऽपि वा ॥ ४२ ।

योगाभ्यासी न्यासजालं कृत्वा [1]सावमयो भवेत् ।
भद्रकालीगृहे स्थित्त्वा ये कुर्वन्ति निरन्तरम् ॥ ४३ ।

महान्यासं महादेव तत्क्षणादमरो भवेत् ।
आयुरारोग्यसम्पत्ति [2]सम्प्राप्नोति महाश्रियम् ॥ ४४ ।

समायाति मम स्थाने न्यासयोगप्रसादतः ।
न्यासधारणयोगेन मणिपूरे [3]ह्रदो भवेत् ॥ ४५ ।

आदौ [4]तन्नाम वक्तव्यं पश्चात् [5]शक्त्याभिधानकम् ।
श्रीकण्ठश्चाप्यनन्तश्च सूक्ष्मा त्रिमूर्तिरेव च ॥ ४६ ।

अमरेश्वरश्चार्धीशो भावभूतिस्ततः [6]परम् ।
अतिथीशस्थानुकेशो हरो झिष्टीश[7] एव च ॥ ४७ ।

भौतिकः सद्योजातश्चाप्यनुग्रहेश्वरस्तथा ।
अक्रूरोऽपि महासेनो [8]निर्जरादिश्च षोडश ॥ ४८ ।

एते देवा महारुद्र षोडशस्वरविग्रहाः ।
क्रोधीशश्चापि चण्डेशः पञ्चान्तकः शिवोत्तमः ॥ ४९ ।

एकरुद्रस्तथा कूर्म [9]एकनेत्रेश्वरस्ततः ।
चतुराननोऽजेशश्च सर्वः सोमेश एव च ॥ ५६ ।

[10]लाङ्गलीशो दारुकेशोऽर्द्धनारीश्वर एव च ।
वाणीशश्च भुजङ्गेशः पिनाकीशस्ततः परम् ॥ ५१ ।

---

१. सारमयो–ग०; २. समाप्नोति–क०; ३. अपि भो–ग० ।
४. तत्त्वान्तम्–ग०; ५. यथा–ख० । अधिक पाठः; ६. तथा परः–क० ।
७ कोटीश–क०; ८. निजस्वरादि षोडशः–क०; ९. तथा–क० ।
१०. उमाकान्तेश आषाढिः डिण्डीशोऽत्रीश एव च । मीनेशश्चापि मेषेशो लोहितेशः शिखीश्वरः ॥ छगलण्डे द्विरपेडशो महाकालिश्वरस्ततः । अधिकः पाठः–क० ।
लाङ्गलमस्ति यस्य स लाङ्गली, तस्येशः, स चासौ ईशः, स ईशो यस्येति वा त्रिविधः समासः ।

[१]खड्गीशश्चरकेशश्च श्येनो भृग्वीश एव च ।
नकुलीशः शिवेशश्च संवर्त्तकेश एव च ॥ ५२ ।
एते रुद्राः समाख्याताः सर्वकाले [२]कुलेश्वराः ।
यस्य नाम्नश्चान्तभाते ईशशब्दो न विद्यते ॥ ५३ ।
केशान्तं नाम संस्कृत्य न्यासं मौलीशमाचरेत् ।
कामं मोहादिनाशार्थं यः करोति निरन्तरम् ॥ ५४ ।
मातृकावर्णघटितं मातृकास्थलके न्यसेत् ।
[३]शक्तियुक्तं यदा न्यासं तत्कालेऽपीशयोजनम् ।
अथवा रुद्रशक्त्या[४] च तथा रुद्रेण सम्पुटम् ॥ ५५ ।
निजमन्त्रेण वा नाथ पुटितं मातृकास्थले ।
शक्त्या च [५]ग्रथनं कृत्वा संसारं सन्तरेत् क्षणात् ॥ ५६ ।
तत्प्रकारं शृणु प्राणनाथ शङ्कर वल्लभ ।
पूर्णोदरी च गिरिजा शाल्मली तदनन्तरम् ॥ ५७ ।
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा ततः परम् ।
सुदीर्घमुखि[६]गोमुख्यौ दीर्घजिह्वा ततः परम् ॥ ५८ ।
कुण्डोदरी चोद्ध्र्वमुखी तथा विकृतमुख्यपि ।
ज्वालामुखी वह्निमुखी[७] लोलजिह्वा ततः परम् ॥ ५९ ।
विद्यामुखी तथा नाश एताश्च स्वरशक्तयः ।
काद्यार्णशक्तिविद्याश्च वक्ष्यामि पार्वतीश्वर ॥ ६० ।
महाकालीसरस्वत्योर्महालक्ष्म्यास्ततः परम् ।
द्राविणी नागरी भूयः खेचरी चापि मञ्जरी ॥ ६१ ।
रूपिणी बिम्बिनी[८] पश्चात् काकोदरी च पूतना ।
भद्रकाली योगिनी च शङ्खिनी गर्ज्जिनी तथा ॥ ६२ ।

---

१. खड्गीशः सुरकेश–ग०;　२. कुलेश्वर ग० ।
३. यदा न्यासं प्रकुर्वीत–ग०;　४. रुद्रशक्त्या चेति–ग०;　५. प्रथममिति–ग० ।
६. सुदीर्घमुखी गोमुख्या–ग० ।
७. चोल्कामुखी सुश्रीमुखी ततः परम्–क० । वह्निरिव प्रकाशमानं मुखं यस्याः सा । अथवा वह्निर्मुखे यस्या इति व्यधिकरणबहुव्रीहिः समासः;　८. विरली–ख० ।

कालरात्रिः कुञ्जिका च कपर्द्दिनी ततः परम् ।
वज्रा जया [1]ततो नाथ सुमुखेश्वर्यपि प्रभो ॥ ६३ ।

रेवती माधवो चैव वारुणी वायवी तथा ।
वक्षोविदारिणी चैव सुमहालक्ष्म्यथ प्रभो ॥ ६४ ।

व्यापिनी चैव माया च रुद्राङ्कपीठदेवताः ।
सर्वाभरणसंयुक्ता सिन्दूरारुणविग्रहाः ॥ ६५ ।

धृतशूलकपालादि[2] बाणशक्तिप्रखेटकाः ।
वराभयकरा नित्याः सर्ववाहनवाहनाः[3] ॥ ६६ ।

श्रीकण्ठाद्या[4] महारुद्रा धृतशूलकपालकाः ।
खड्गखेटकशक्तीषु गदामूसलधारकाः ॥ ६७ ।

नानास्त्रधारका नित्या बन्धूककोटिसुन्दराः ।
रक्तचन्दनदिग्धांगाः पञ्चचूडधराः पराः ॥ ६८ ।

रक्तोत्पलमहामाला[5]लङ्कारकरपंकजाः ।
पीठन्यासं ततः कुर्यात् मम तन्त्रानुसारतः ॥ ६९ ।

सर्वत्र मूलपुटितमथवा वर्णसम्पुटम् ।
कृत्वा पीठन्यासकार्यं विधानेन वदामि तत् ॥ ७० ।

ॐ [6]अनन्ताय नमश्च नमो हृदि ततः परम् ।
ॐ पद्माय नमःशब्दं हृदये च ततः परम् ॥ ७१ ।

ॐ सूर्यमण्डलाय [7]द्वादशान्ते कलात्मने······ ।
ॐ नमः पदं समुच्चार्य चान्ते च हृदये प्रभो ॥ ७२ ।

ॐ उं सोममण्डलाय षोडशकलात्मने नमः ।
सर्वत्र हृदये कार्यं पीठन्यासं मनोलयम् ॥ ७३ ।

---

१. तथा–क०; २. कपालासि–क०; ३. सर्वस्ववाहनाः–ग०; ४. कण्ठास्या–ग० ।
५. भाला–क० । रक्तानि उत्पलानि (कमलानि) तेषां माला तद्रूपोऽलंकारः करपङ्कजे यस्याः सा । व्यधिकरणबहुव्रीहिः ।
६. अं श्रं न्यन्ताय–ग०; ७. द्वादशकलात्मने तत–ग० ।

ॐ मं वह्निमण्डलाय दशकलात्मने नमः ।
ॐ सं सत्त्वाय नमश्च ॐ रं रजसे नमः ।। ७४ ।

ॐ तं तमसे नमश्च पूर्वादिकेशरेषु च ।
ॐ [1]तं आत्मने नमश्च ॐ सर्वव्यापिने नमः ।। ७५ ।

ॐ [2]अं अन्तरात्मने च ॐ मनोन्मन्यै नमश्च ।
तदुपरि ततो वदेद् नमोऽन्ते शून्यवासिने ।। ७६ ।

ॐ [3]पं परमात्मने च नमोऽन्ते कालरूपिणे ।
ॐ ह्रीं ज्ञानात्मने चान्ते नमोऽन्ते वर्णवासिने ।। ७७ ।

पीठशक्तेस्ततो न्यासं कुर्यात् साधकयोगिराट् ।
हृत्पद्मस्यापि पूर्वादि केशरेषु च संन्यसेत् ।। ७८ ।

ॐ वामायै नमश्चान्ते ॐ ज्येष्ठायै[4] नमो वदेत् ।
ॐ सर्वभूतदमन्यै[5] नमःशब्दं समुच्चरेत् ।। ७९ ।

एता विन्यस्य देवेश मध्ये विन्यासमाचरेत् ।
हृत्पद्मस्य कर्णिकायां कृत्वा भावनमाचरेत् ।। ८० ।

ॐ मनोन्मन्यै नमश्च तदुपरि ततो वदेत् ।
ॐ नमो भगवतेऽन्ते च सकलपदमुच्चरेत् ।
गुणाय[6] शक्तियुक्ताय अनन्ताय पदन्ततः ।। ८१ ।

[7]कहोडमुनिपुत्रश्च ऋषिरस्य प्रकीर्तितः ।
महेश्वरमुखाज्ज्ञात्वा यः साक्षात्तपसा मनुम् ।। ८२ ।

---

१. आम्–क०; २. आम्–क०; ३. पं० नास्ति–ग०; ४. नमः शब्दं पुनर्वदेदिति–ग० ।
५. ॐ रौद्रायै नमश्चान्ते ॐ काल्यै च नमो वदेत्–क० ।
ॐ कलविकरिण्यै नमःशब्दं ततो वदेत् ।
ॐ बलप्रमथन्यै नमो व भोऽन्ते च पुनर्वदेत्–क० अधि० ।
६. गुणार्थं–क० । शक्तियुक्ताय अनन्ताय गुणाय इत्यादिरूपेणान्वयः करणीयः ।
गुणपदमर्शं आद्यजन्ततया गुणिपरतया बोध्यम् ।
७. योगपीठात्मने चान्ते नमःशब्दं समुच्चरेत् ।
ततः कुर्यान्महादेव ऋष्यादिन्यासमेव च ।
रुद्रशक्त्या ऋषेर्विष्णुस्तथा मृत्युञ्जयस्य च ।।

संसाधयति शुद्धात्मा स तस्य ऋषिरीरितः ।
गुरुत्वान्मस्तके चास्य न्यासस्तु[1] परिकीर्त्तितः ।। ८३ ।

सर्वेषां [2]मन्त्रतत्त्वानां छादनाद् छन्द उच्यते ।
अक्षरत्त्वात्पदत्त्वाच्च मुखे च्छन्दः समीरितम् ।। ८४ ।

सर्वेषामेव जन्तूनां प्रेषणात्प्रेरणात्तथा[3] ।
हृदयाम्भोजमध्यस्था देवता [4]तत्र तां न्यसेत् ।। ८५ ।

ऋषिच्छन्दोऽपरिज्ञानान्न मन्त्रः फलभाग्भवेत् ।
दौर्बल्यं याति यन्त्राणां विनियोगमजानताम् ।। ८६ ।

न्यसेन्मूर्ध्नि ऋषिन्यासं छन्दोन्यासं मुखाम्बुजे ।
देवतान्यासमाकुर्याद् हृदयाम्भोरुहे सुधीः ।। ८७ ।

मूके गुह्ये बीजन्यासं शक्तिन्यासन्तु पादयोः ।
सर्वाङ्गे कीलकन्यासमाचरेत्[5] यत्नतः सुधीः ।। ८८ ।

शिवशक्त्यात्मकन्यासं [6]शिरस्येव समाचरेत् ।
शिरसि प्राणरक्षायै महाविष्णुऋषये नमः ।। ८९ ।

मुखे पंक्तिच्छन्दसे वै नमःशब्दं समुच्चरेत् ।
हृदि महारुद्राय शक्तियुक्ताय संवदेत् ।। ९० ।

देवतायै नमः शब्दं करन्यासं ततश्चरेत् ।
ततोऽङ्गन्यासमाकृत्य ध्यानं कुर्यात् प्रयत्नतः ।। ९१ ।

वह्निना दीर्घबीजेन यन्त्रस्याङ्गक्रियां चरेत् ।
रुद्रध्यानं प्रवक्ष्यामि ध्यानाद् भवति भूपति ।।। ९२ ।

---

१. समस्तः परिकीर्तितः–ग०; २. सर्वेषां मन्त्रतत्त्वानां छादनाद् वृन्द उच्यते–ग० ।
३. भाषणात्प्रबलात्तथा–ग० । ४. देवतातत्त्वतां न्यसेदिति–ग० ।
५. कीलकन्यासं शिवन्यासं समाचरेत्–क० ।
६. शिवषोढा समाचरेत्–क० । —शिवश्च शक्तिश्च आत्मा यस्य, तादृशं न्यासं शिरस्येव समाचरेत् ।

रौद्रं रौद्रात्मकं तं प्रकृतिपुरुषं गम्भीरगीताभिधानं
शूलं खड्‌गं दधानं वरमभयकरं पद्‌ममेकं प्रचण्डम् ।
सञ्चारं रश्मिजालं शशिशतकिरणं कामधेनुस्वरूपं
ध्यायेद्रौद्रीं स्वशक्ति[1]प्रलयमयतनुं सूर्यकोटिप्रकाशम् ॥ ९३ ।

एवं ध्यात्वा [2]सुमनसैश्च सम्पूज्यार्घ्यविधिञ्चरेत् ।
कृत्वार्घ्यं रुद्रमन्त्रेण पीठपूजां समाचरेत् ॥ ९४ ।

वामा ज्येष्ठा तथा रौद्री कालो[3]कालपदादिका ।
[4]विकरण्याक्षरा प्रोक्ता बलादिविकरण्यथ ॥ ९५ ।

बलप्रमथनी पश्चात् सर्वभूतदमन्यथ ।
[5]मनोन्मनीति सम्प्रोक्ताः शिवस्य पीठशक्तयः ॥ ९६ ।

[6]पूजयेद् गन्धपुष्पाद्यैः पीठशक्तीः क्रमेण तु ।
प्रणवादि नमोऽन्तेन पूजा कार्या विधानतः ॥ ९७ ।

पुनर्ध्यात्वा च पाद्यार्घ्यैरावाह्य परिपूजयेत् ।
पाद्यमर्घ्यमाचमनीयं स्नानीयं पुनराचमनम् ॥ ९८ ।

[7]गन्धपुष्पबिल्वदलैः पूर्वावरणमर्चयेत् ।
[8]वं हृदयाय नम इत्यादिषडङ्गपूजनम्[9] ॥ ९९ ।

मध्ये चतुर्दिक्षु चैवं शेषे वारद्वयं [10]वदेत् ।
इन्द्रादीन् लोकपालांश्च पूजयित्वा ततोऽर्चयेत् ॥ १०० ।

वज्रादींश्च महाकालधूपदीपैर्निवेदयेत् ।
नैवेद्यं [11]बहु कृत्वा पानार्थं जलदानकम् ॥ १०१ ।

शरीरशोधनं कृत्वा प्राणायामं ततश्चरेत् ।
जपेत् शतत्रयं मन्त्री विशुद्धः शुद्धचेतसा ॥ १०२ ।

---

१. प्रणय--ग०; २. मानसैश्चेति–ग०; ३. कलपदादिका–ग० ।
४. विकरण्यान्तया प्रोक्ताबलादिविकरण्यथा–क०; ५. मन्मयीति स'''''''''क० ।
६. पूजयेन्नन्दपुष्टाद्यैरिति–ख० । पूजयेन्नन्दपुष्पाद्यैरिति–ग० ।
७. गन्धश्च त्रपुष्पं च बिल्वदलानि चेति द्वन्द्वः; ८. वां–क०; ९. पूजम्बरेदिति–क० ।
१०. भवेदिति–क० । ११. वन्दनमिति–ग० ।

अष्टोत्तरं योजयित्वा गजान्तकसहस्रकम् ।
अथवाष्टोत्तरशतं जप्त्वा समर्पणं चरेत् ॥ १०३ ।

प्राणायामत्रयं [1]कुर्यान्निजमन्त्रप्रसिद्धये ।
ततः प्रणाममाकुर्यात् शक्तिचैतन्यहेतुना ॥ १०४ ।

नमो रुद्राय देवाय कोटिसूर्येन्दुमूर्त्तये ।
सर्वाय ज्ञानदानाय नमस्ते शूलधारिणे ॥ १०५ ।

नमस्ते कालरुद्राय कालाय वेदरूपिणे ।
[2]वेदमार्गप्रदर्शाय शत्रुसंक्षयकारिणे ॥ १०६ ।

[3]रौद्राय शक्तियुक्ताय शङ्कराय नमो नमः ।
चतुर्भुजाय वेदाय महाकाशस्वरूपिणे ॥ १०७ ।

वरपद्मशूलखड्गधारिणे [4]ब्रह्मणे नमः········ ।
रुद्रशक्त्यर्चनं कृत्वा महारुद्रेण संयुतम् ॥ १०८ ।

मणिपूरे दृढो[5] याति सत्यं सत्यं कुलेश्वर ।
शक्त्यर्च्चनविधिं वक्ष्ये मूलमन्त्रेण पूजनम् ॥ १०९ ।

सर्वत्र कारयेन्मन्त्री अष्टैश्वर्यजयाय च ।
आदौ ऋषिन्यासकार्यं वक्ष्यामि शृणु तत्त्वतः ॥ ११० ।

शिरसीहरुद्रशक्तिर्महाविष्णुपदन्ततः ।
ऋषये नम उच्चार्य मुखे हस्तं नियोजयेत् ॥ १११ ।

पंक्तिछन्दसे नमश्च हृदि हस्तं नियोजयेत् ।
महारुद्राणीति पदं लाकिनीपदमेव च ॥ ११२ ।

त्रिशक्त्यन्ते महाविद्या देवतायै नमस्ततः ।
गुह्ये ॐ पदमुच्चार्य निजबीजाय ते नमः ॥ ११३ ।

सर्वाङ्गे सकलायैव वज्राय कीलकाय च ।
नमः पदं समुच्चार्य ऋष्यादिन्यासमेव च ॥ ११४ ।

---

१. प्रवृद्धये–क०; २. प्रज्ञानायेति–ग० ।
वेदैरुक्तो मार्गः, वेदमार्गः, तस्य प्रदर्शाय (दर्शकाय) इति षष्ठीतत्पुरुषसमासः ।
३. विद्रायेति–ग०; ४. धारिणेयनमोनमः–ग०; ५. दृढा–क० ।

रुद्रवत्सकलं कार्यं कराङ्गन्यासकर्मणि ।
[1]आदावृष्यादिकन्यासः करशुद्धिस्ततः परम् ॥ ११५ ।
अङ्गुलिव्यापकन्यासो हृदादिन्यास एव च ।
रुद्रशक्तिमहाषोढान्यासञ्च तदनन्तरम् ॥ ११६ ।
मन्त्रन्यासं ततः कृत्वा व्यापकन्यासमाचरेत् ।
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम् ॥ ११७ ।
ध्यानं कुर्याद्विशेषेण रुद्रशक्त्या महाप्रभो ॥ ११८ ।
रुद्राणीं रुद्रकान्तां नवरसजडितां कुंकुमाशक्तगात्रां[2]
लोकेशीं षड्भुजान्तां [3]त्रिभुवनयजितां कोटिसौदामिनीभाम् ।
पद्मस्थां पद्महस्तां वरभयकरां खड्गशक्तिं दधानां
ध्यायेद् रौद्रीं [4]त्रिनेत्रां शवदमनशशिश्रेणिभूषामलाङ्गीम्[5]॥११९।
रुद्रवत् पूजनं कार्यं रुद्रशक्त्याश्च[6] शंकर ।
दशोपचारैः पूजा वा तथा पञ्चोपचारकैः ॥ १२० ।
अष्टादशोपचारैर्वा षोडशाद्युपचारकैः ।
अलाभे तु प्रकर्त्तव्यं मानसेन निवेदयेत् ॥ १२१ ।
सर्वत्र मानसं कार्यं कोटि कोटिगुणं भवेत् ।
पूजां समाप्य विधिना जलं दत्त्वा जपादिके ॥ १२२ ।
प्राणायामत्रयं कृत्वा जप्त्वाष्टोत्तरकं शतम् ।
सहस्रं वा मुहुर्जप्त्वा अष्टोत्तरसमन्वितम् ॥ १२३ ।
जपं समर्पयेद्विद्वान् गुह्यातिगुह्यमन्त्रकैः ।
प्राणायामत्रयं पश्चात् कुर्यात् साधकसत्तमः ॥ १२४ ।
वन्दनं भक्तियुक्तेन कुर्याद् योगादिसिद्धये ।
महारौद्र नमस्तेऽस्तु लाकिन्यै ते नमो नमः ॥ १२५ ।

---

१. आदावङ्गादिन्यासः–ग०; २. कुङ्कुमेनासक्तं गात्रं यस्याः सा ।
३. महितामिति–ख०; ४. शरदमल–क० ।
५. अनङ्गामिति–क० । शवानां दमनी, शशिनां श्रेणयो भूषा यस्याः सा, अमलानि अङ्गानि यस्याः सा । त्रयाणां कर्मधारयद्वयम् । ६. रुद्रशक्त्या चेति–ख० ।

शान्त्यै तुष्ट्यै नमो नित्यं दुर्गायै[1] ते नमो नमः ।
रुद्रशक्त्यै नमो नित्यं मणिपूरनिवासिनी ॥ १२६ ।

अष्टसिद्धिं योगसिद्धिं [2]देहि तुभ्यं नमो नमः ।
सर्वग्रन्थिच्छेदिकायै परब्रह्मस्वरूपिणी[3] ॥ १२७ ।

मां रक्ष पालय त्वं हि मणिपूरे नमो नमः ।
प्रणम्य विधिनानेन पूजासमापनञ्चरेत् ॥ १२८ ।

पुनस्तत्र पूजयेद् वै प्रासादाख्यं महाप्रभुम् ।
तथा [4]मृत्युञ्जयं देवं मणिपूरे प्रपूजयेत् ॥ १२९ ।

प्राणायामादिकं कृत्वा श्रीकण्ठन्यासमाचरेत् ।
[5]पूर्णोदर्यादिसहितं कृत्वा पीठं न्यसेत्सुधीः ॥ १३० ।

पीठमनुं प्रविन्यस्य ऋष्यादिन्यासमाचरेत् ।
ऋषिरस्य [6]वासुदेवः पङ्क्तिश्छन्द उदाहृतम् ॥ १३१ ।

सदाशिवो देवता च अङ्गुलिन्यासमाचरेत् ।
ह्रामङ्गुष्ठाभ्यां नमः पश्चात् ह्रींतर्जनीभ्यां[7] ततः परम् ॥
खां नमः पदमन्ते च षड्दीर्घभाजयान्वितम् ॥ १३२ ।

एवं करन्यासमाकार्यं विधानेन समाचरेत् ।
शूद्रस्तु एतत्पर्यन्तं कार्यं होमादिकं च यत् ॥ १३३ ।

न कुर्यात् पार्वतीनाथ तथा [8]स्त्रीलोक इत्यपि ।
यदि ज्ञानी भवेद्देव स देवो न तु मानुषः ॥ १३४ ।

चाण्डालादीनि वा जातौ [9]स्थितो ब्राह्मणोत्तमः ।
ज्ञानवान् [10]वादसंवादे वर्जितो न्यासमाचरेत् ॥ १३५ ।

न्यासस्तन्मयता बुद्धिः सोऽहंभावेन पूजयेत् ।
स एव ज्ञानी परमो वेदशास्त्रविशारदः ॥ १३६ ।

---

१. श्रद्धायै इति–ख०; २. तस्यै इति–ख० ।
३. परं च तद् ब्रह्म चेति परब्रह्म तस्य स्वरूपम्, तदस्ति यस्यां सा ।
४. मृत्युं जयति, इति पूर्वपदस्य मुमागमः ।
५. पूर्णादिव्यादिसहितमिति–ख०; ६. वामदेव–ख०; ७. तर्जनीपदं ततः–ख० ।
८. तथास्त्रिलोक इत्यपि–ख०; ९. स्थिरो वेति–ख०; १०. रायसंवाद–ग० ।

न्यासपूजादिकं तस्य सर्वदा नात्र संशयः ।
यावद्देहे ह्यहंबुद्धिस्तावन्मरणधारकः[1] ॥ १३७ ।
तद्वर्जितो [2]मृत्युजेता न्यासपूजादिकं कृतः ।
षड्दीर्घभाजा बीजेन [3]हकारेण सबिन्दुना ॥ १३८ ।
[4]करयोरंगुलिद्वन्द्वं विन्यसेत् संक्रमेण तु ।
ईशानाद्याः पञ्चमूर्त्तीर्विन्यसेत् साधकोत्तमः ॥ १३९ ।
ततः कुर्यान्महादेव ऊर्द्ध्वः प्राग्दक्षिणोत्तरे ।
मुखेषु विन्यसेन्मन्त्री चांगुलिभिः परस्परम् ॥ १४० ।
तत्तद्बीजैः प्रयत्नेन तत्तन्मूर्त्तीः प्रविन्यसेत् ।
अंगुष्ठयोः शेषभागे हौँ ईशानाय ॐ नमः ॥ १४१ ।
षड्दीर्घभाजा बीजेन हकारेण सबिन्दुना ।
तत्पुरुषमघोरञ्च वामदेवं ततः परम् ॥ १४२ ।
सद्योजातं क्रमेणैव अंगुली[5] द्वे ततः परम् ।
विन्यसेत्साधकश्रेष्ठो नमोऽन्तं परमेश्वर ॥ १४३ ।
[6]शिरोवदनहृद्गुह्यपादेषु विन्यसेत्सुधीः ।
[7]तत्तदंगुलिभिश्चैव तत्क्रमेण प्रविन्यसेत् ॥ १४४ ।
पञ्चमूर्त्तीर्न्यसेन्नाथ तत्प्रकारं शृणुष्व तत् ।
ईशानादिस्वबीजन्तु प्रकारेण प्रविन्यसेत् ॥ १४५ ।
शूद्रः कुर्यान्न्यासजालमेतत्[8] पर्यन्तमेव हि ।
तत ऊर्ध्वप्राग्दक्षिणपश्चिमोत्तरसंमुखे ॥ १४६ ।
ईशानस्य पञ्चकला ब्रह्मऋग्[9]वेदसंयुताः ।
पञ्चपादादिका नाथ प्रणवादिनमोऽन्तिकाः ॥ १४७ ।

---

१. धारण—ग० । मरणं धरतीति, मरणधारकः । यावद्देहे अहंबुद्धिस्तावद् जननं मरणं च ।
२. चेता—ग०; ३. हःकारेण—ख०; ४. दग्घ ख०; ५. अङ्गुलिषु परस्परम्—ग० ।
६. शिरसि वदने हृदि गुह्ये पादे इति इतरेतरयोगद्वन्द्वसमासः ।
७. एतत्पद्यार्धं—ख० पुस्तके नास्ति; ८. एतत्पद्मान्तमेवहीति—ख० ।
९. नित्यमृग्वेदसंयुताः—ख० ।

ईशानं सर्वविद्यानां उँ नलिन्यै[1] ततः परम् ।
कलायै नम एवापि सर्वत्रैवं क्रमेण तु ॥ १४८ ।

ईश्वरः सर्वभूतानां [2]तदङ्गं पदकं ततः ।
दयायै कलायै नमश्चापि ब्रह्मादिपदन्ततः ॥ १४९ ।

उँ ब्रह्मेष्टदायै चान्ते कलायै नम इत्यपि ।
ततः शिवोऽस्तु[3] मे पदं ॐ सावित्र्यै पदं वदेत् ॥ १५० ।

कलायै नम एवं हि सदाशिवो[4] पदन्ततः ।
ओमन्ते चांशु[5]मालिन्यै कलायै पद इत्यपि ॥ १५१ ।

दिङ्मुखे स न्यसेन्मन्त्री पूर्वादिक्रमयोगतः ।
तत्पुरुषस्य चतस्रः कला न्यसेत् सदा वशी ॥ १५२ ।

ॐ तत्पुरुषायपदं विद्महे तदनन्तरम् ।
ॐ शान्त्यै पदस्यान्ते कलायै नम इत्यपि ॥ १५३ ।

महादेवाय शब्दान्ते धीमहीति ततः पदम् ।
ॐ विद्यायै पदस्यान्ते कलायै नम इत्यपि ॥ १५४ ।

तन्नो रुद्रः पदं पश्चात् ॐ प्रतिष्ठायै पदं लिखेत् ।
[6]श्री दुर्गायै कलायै नमश्चाथ प्रचोदयात् ॥ १५५ ।

ॐ[7] निवृत्यै कलायै च नमः पदं समुच्चरेत् ।
ततोऽष्टस्थानमध्ये तु अघोराष्टकलां न्यसेत् ॥ १५६ ।

[8]हृद्ग्रीवां मध्यगतलं तथा नाभिषु पृष्ठके ।
तथा वक्षसि चाघोरा अष्टौ कला न्यसेत् सुधीः ॥ १५७ ।

---

१. शशिन्यै–ख०; २. ओमङ्गं पदकं ततः–ख० ।
३. ततः शिरोमेष्ष्तु पदं नमोवीर्ये पदं वदेत्–ख० । सवित्रे पदं ततः–क० ।
४. सदाशिवपदं ततः–ख०; ५. चान्तमालिन्यै–ग० ।
६. ॐ कलायै नमः पश्चात् प्रचोदयात् पदं वदेत्–ख०; ७. ॐ निचुत्यै ।
८. अघोरा चासौ अष्ढकला चेति कर्मधारयः, ततो द्वितोया, न्यसनक्रियाकर्मत । अष्टौ कला यस्यां सा ।

[1]अघोरेभ्य उमान्ते वै उमायै पदमुच्चरेत् ।
कलायै नम एवाथ अघोरेभ्यः पदं वदेत् ॥ १५८ ।
ॐ मोहायै पदस्यान्ते कलायै नम इत्यपि ।
अघोरपदमुच्चार्य क्षमायै शब्दमुच्चरेत् ॥ १५९ ।
कलायै [2]नम एवाथ घोरतरेभ्य एव च ।
ॐ निद्रायै पदस्यान्ते कलायै नम इत्यपि ॥ १६० ।
सर्वतः सर्व ॐ अन्ते व्याधये शब्दमुच्चरेत् ।
कलायै नम एवाथ सर्वेभ्यः पदमुच्चरेत् ॥ १६१ ।
ॐ मृत्यवे पदस्यान्ते कलायै नम इत्यपि ।
नमस्तेऽस्तु पदस्यान्ते ओम् क्षुधायै पदं वदेत् ॥ १६२ ।
कलायै [3]नम एवाथ रुद्ररूपेऽथ एव च ।
ओम् कृष्णायै पदस्यान्ते कलायै नम इत्यपि ॥ १६३ ।
वामदेवस्य देवस्य[4] त्रयोदश कला न्यसेत् ।
एतेषु स्थानपद्मेषु तत्प्रकारं शृणु प्रभो ॥ १६४ ।
गुह्येऽण्ड[5]शेषमध्ये तु उरुयुग्मे ततः पदम् ।
जानुद्वये तथा जंघायुगलेस्फिग्द्वये[6] तथा ॥ १६५ ।
[7]कटचां पार्श्वयुगे चैव क्रमेण भावको न्यसेत् ।
आदौ प्रणवमुच्चार्य ततो मन्त्रं स्मरेत्सुधीः ॥ १६६ ।
[8]सद्योजातं प्रपद्यामि ओम् वृद्ध्यै पदमुच्चरेत् ।
कलायै नम एवाथ सद्योजाताय वै नमः ॥ १६७ ।

---

१. चिह्नितं श्लोकयुग्मं–ख० ।
२. मनस एवाघोरतरेभ्य एव चेति–ख०; ३. मनसा एव रुद्ररूपेभ्य एव चेति–ख० ।
४. देवेश–क०; ५. गुह्येऽण्डकोशमध्ये तु–ख ।
६. स्फीग्द्वय–ख० । जङ्घयोर्युगले, स्फिचोर्द्वयोः षष्ठीतत्पुरुषौ । नितम्बस्याधोभागः स्फिच्-पदेनोच्यते ।
७. कोट्याः–ग० ।
८. चिह्नितं पदत्रयं–ख० पुस्तके नास्ति; किन्तु ॐ वामदेवाय नमः, ॐ वज्रायै ततः परम् । कलायै नम एवाय अष्टाटा नम इत्यपि, इति पाठभेदेन सह अधिकः पाठः ।

[1]ओम् वृद्ध्यै पदकस्यान्ते कलायै नम इत्यपि ।
भवे पदे ततः पश्चाद् ओम् सद्यः पदमुच्चरेत् ।। १६८ ।

कलायै नम एवाथ अभवे ओम् ततः परम् ।
ओम् मेधायै पदस्यान्ते कलायै नम उच्यते ।। १६९ ।

ततो भजस्व मां शब्दं ओम् प्रज्ञायै पदं वदेत् ।
कलायै नम एवाथ भव ओम् शब्दमुच्चरेत् ।। १७० ।

प्रभायै पदमुच्चार्य कलायै नम इत्यपि ।
तद्भवाय नमः पश्चात् ओम् सुधायै नमस्ततः ।। १७१ ।

कलायै नम उच्चार्य न्यसेदष्टौ कलाः प्रभोः[2] ।
[3]ईशानाख्यास्ततो नाथ भक्तः पञ्च ऋचो न्यसेत् ।। १७२ ।

पञ्चांगुलिषु योगेश[4] क्रमशः कामनाशनात् ।
प्रणवं पुर्वमुच्चार्य ततो मन्त्रं स्मरेत्सुधीः ।। १७३ ।

ईशानः सर्वविद्यानां ईश्वरस्तदनन्तरम् ।
उच्चरेत्सर्वभूतानां ब्रह्माधिपतिरित्यपि[5] ।। १७४ ।

ब्रह्मणोऽधिपतिः पश्चात् शिवो मेऽस्तु सदाशिवः ।
प्रणवं पूर्वमुच्चार्य ततस्तत्पुरुषाय च ।। १७५ ।

विद्महे पदतः पश्चात् महादेवाय धीमहि ।
ततो रुद्रः पदस्यान्ते प्रचोदयात्पुनर्वदेत् ।। १७६ ।

प्रणवं पूर्वमुद्धृत्य ततो मन्त्रं स्मरेत् सुधीः ।
अघोरेभ्योऽथ घोरेभ्यो घोरशब्दं समुच्चरेत् ।। १७७ ।

घोरतरेभ्य एवान्ते सर्वतः सर्वशब्दकम् ।
सर्वेभ्योऽन्ते नमस्तेस्तु रुद्ररूपेभ्य एव च ।। १७८ ।

ततः प्रणवमुच्चार्य मन्त्रं पश्चात् स्मरेद्बुधः ।
वामदेवाय शब्दान्ते नमो ज्येष्ठायशब्दतः ।। १७९ ।

---

१. ॐ रक्षायै पदस्यान्ते–ख०; २. प्रभा–ग०; ३. ईशानाद्यास्ततो नाथ–क० ।
४. योगेन–ख०; ५. अनेन क्रमेण मन्त्रस्य स्वरूपं संकेतितमस्ति ।

नमो रुद्राय शब्दान्ते नमः शब्दं समुच्चरेत् ।
कालाय नम एवान्ते कालविकरणाय च ॥ १८० ।
नमो बलविकरणाय बलप्रमथनाय च ।
ओम् वामदेवाय नमः ओम् वज्राय ततः परम् ॥ १८१ ।
कलायै नम एवाथ ज्येष्ठाय नम इत्यपि ।
ओम् रक्षायै पदस्यान्ते कलायै नम इत्यपि ॥ १८२ ।
रुद्राय नम ओम् रत्यै कलायै नम इत्यपि ।
कालाय नम इत्यन्ते पालिन्यै शब्दमुच्चरेत् ॥ १८३ ।
कलायै नम एवाथ कल ओम् शब्दमुच्चरेत् ।
[1]कामायै शब्दमुच्चार्य कलायै नम एव हि ॥ १८४ ।
विकरणाय नमोन्ते प्रणवञ्चोच्चरेद्बुधः ।
संयमिन्यै पदान्ते च कलायै नम इत्यपि ॥ १८५ ।
बल ओम् शब्दमुच्चार्य क्रोधायैपदमुच्चरेत् ।
कलायै नम एवाथ [2]विकलायै नमस्ततः ॥ १८६ ।
ॐ वृद्धयै पदकस्यान्ते कलायै नम इत्यपि ।
बल ॐ शब्दमुच्चार्य स्थिरायै शब्दमुच्चरेत् ॥ १८७ ।
कलायै नम एवाथ प्रमथनाय नमस्ततः ।
ॐ रौद्रपदस्यान्ते कलायै नम इत्यथ ॥ १८८ ।
सर्वभूतदमनाय नम ॐ पदमुच्चरेत् ।
भ्रामिन्यैं पदकस्यान्ते कलायै नम इत्यपि ॥ १८९ ।
नम ॐ शब्दमुच्चार्य मोहिन्यै पदकं स्मरेत् ।
कलायै नम एवाथ उन्मनाय नमस्ततः ॥ १९० ।
ॐ जयायै पदस्यान्ते कलायै नम उच्चरेत् ।
ततो न्यासं महाकाल सद्योजातस्य ताः कलाः ॥ १९१ ।

---

१. मायायै–ख० ।

२. विकरणाय–ख० । कस्मिन् पदे उच्चारिते किं पदमुच्चारणोयमिति व्यवस्था विहिता एषु पद्येषु ।

अष्टौ स्थानेषु चैतेषु सर्वपापनिवृत्तये ।
[1]पार्श्वयोर्हस्तयोश्चैव नासिकायाञ्च मस्तके ॥ १९२ ।

बाहुयुग्मे महावीर मणिपूरविभेदकः ।
तत्प्रकारं प्रवक्ष्येऽहं सावधानोऽवधारय ॥ १९३ ।

बलप्रमथनाय नमोन्ते च सर्वभूतपदं वदेत् ।
दमनाय नमोऽन्ते तु नमः शब्दं समुच्चरेत् ॥ १९४ ।

उन्मनाय नमः पश्चात् पुनः प्रणवमुद्धरेत् ।
सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥ १९५ ।

भवे भवेनादिभवे भजस्व मां ततः परम् ।
भवोद्भवाय शब्दान्ते नमो मन्त्रं मुदा न्यसेत् ॥ १९६ ।

अङ्गुलीभ्यां समाहृत्य पञ्च ऋचानया प्रभो ।
एवं क्रमेण सन्न्यासं कुर्यादेषु स्थलेषु च ॥ १९७ ।

मूर्ध्निहृद्गुह्यपादेषु न्यसेदेता ऋचो मुदा ।
ततः कुर्यान्महाकाल चाङ्गन्यासान्तरं शुभम् ॥ १९८ ।

तत्प्रकारं प्रवक्ष्यामि सावधानोऽवधारय ।
वाग्भवं पूर्वमुच्चार्य कामबीजं ततः परम् ॥ १९९ ।

वकारं शत्रुसंयुक्तं दक्षकार्णेन्दुसंयुतम् ।
चन्द्रबीजं [2]वामनेत्रथान्तवह्निविधून्नतम् ॥ २०० ।

केवलं चन्द्रबीजन्तु सविसर्गमनुं ततः ।
सर्वज्ञाय पदस्यान्ते हृदयाय नमः पदम् ॥ २०१ ।

[3]अमृते पदमुच्चार्य कामबीजं ततः पदम् ।
तेजोज्वालापदं मालिनेऽन्ते च [4]क्लृप्ताय ब्रह्मणेऽपि वसेत्ततः ॥२०२।

---

१. स्तनयोश्चैवेति–ख० । अस्मिन्नपि पत्रे पूर्ववदेव मन्त्रपूर्तये शब्दानां क्रमिकत्वव्यवस्था विहिताऽस्ति ।

२. खान्त–ख० ।

३. अमृतं पदमुच्चार्य तेजोज्वाला पदं ततः ।
मानिनेऽन्ते च तृप्ताय ब्राह्मणः शिवमेततः ॥ ख० ।

४. तृप्ताय ब्रह्मणो शिरसे ततः–क० ।

स्वाहान्तं तत एवाथ [1]ज्वलितशिखिशब्दकम् ।
शिखायानादिबोधाय शिखायै[2] वषडित्यथ ॥ २०३ ।

वज्रिणे वज्रहस्ताय स्वतन्त्राय पदं वदेत् ।
कवचाय तारशब्दं ततोऽन्यद्बीजमुच्चरेत् ॥ २०४ ।

नाकारं बिन्दुसंयुक्तं वामनेत्रं सबिन्दुकम् ।
[3]पशुशब्दं तारमन्त्रं अनन्तशक्तये पदम् ॥ २०५ ।

अस्त्राय फडिति प्रोच्य एवं विन्यस्य योगिराट् ।
मणिपूरे मनो योज्य [4]ध्यायेच्चैतन्यमुत्तमम् ॥ २०६ ।

ओम् मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पञ्चभिः
[6]त्र्यक्षैरञ्चितमीशमिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् ।
शूलं टंककृपाणवज्रदहनान्नागेन्द्रघण्टाङ्कुशान्
पाशं भीतिहरं [5]दधानममिताकल्पोज्ज्वलाङ्गं भजे ॥ २०७ ।

एवं ध्यात्त्वा मानसोपचारैः सम्पूज्य पूजकः ।
[7]अर्घ्यस्थापनमाकुर्यान्निजमन्त्राभिशोधनम् ॥ २०८ ।

शैवोक्तपीठमन्वन्तां पीठपूजां ततश्चरेत् ।
पुनर्ध्यात्त्वा समावाह्य चावाहनादिमुद्रया ॥ २०९ ।

पञ्चपुष्पाञ्जलिदानपर्यन्तं परिपूजयेत् ।
पञ्चपुष्पाञ्जलिं दत्त्वा [8]वदनार्चनमाचरेत् ॥ २१० ।

---

१. जनित शिखि–ख०; २. शिवायै षट् इत्यपि–ख० ।
३. शकारं बिन्दुसंयुक्तमवरेददलसमन्वितम् ।
चकारञ्च हकारञ्च दीर्घप्रणवसंयुतम् ॥
परतो लुप्तशब्दान्ते शक्तये पदमुच्चरेत् ।
नेत्रत्रयाद्य शब्दान्ते वौषट् पदमुदीरयेत् ॥
शकारं शत्रुसंयुक्तं वामनेत्रं सबिन्दुकम् ।
पशुशब्दं तारशब्दं अनन्तशत्रुभेपदम् ॥ ख० अधि० ।
४. ध्यायेच्चैतन्यरूपकमिति ख०; ५. दधानमसिता–ख० ।
६. त्र्यक्ष्यैरिति–ग०; ७. बीजमन्त्राभिशोधकमिति–ख० ।
८. आवरणार्चनमाचरेदिति–ख० । वरुणार्चनमाचरेदिति–ग० ।

[1]शिवावरुणदेवांश्च पूजयेत्तत् क्रमं शृणु ।
ऐशान्यां पूजयेद्विद्वान् ईशानाय नमस्ततः ॥ २११ ।

पूर्वे ॐ तत्पुरुषाय नमः शब्दं समुच्चरेत् ।
दक्षिणे ॐ अघोराय नमः शब्दं समुच्चरेत् ॥ २१२ ।

उत्तरे ॐ वामशब्दं देवाय नम उच्चरेत्[2] ।
पश्चिमे प्रणवं पश्चात् सद्योजाताय एव हि ॥ २१३ ।

नमोऽन्तं पूजनं कृत्वा सर्वसिद्धीश्वरो भवेत् ।
ईशानादिचतुष्केषु [3]निवृत्तीत्त्यादीन् प्रपूजयेत् ॥ २१४ ।

प्रणवान्ते [4]निवृत्यै स नमश्चान्ते ततोऽर्चयेत् ।
एवं [5]प्रतिष्ठां विद्यां च शान्ति सम्पूज्य यत्नतः ॥ २१५ ।

प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ।
योजयित्वा महापूजाविधौ कुर्यात् [6]समर्पणम् ॥ २१६ ।

दशदलस्य मध्ये तु विभाव्याष्टदलं[7] सुधीः ।
तत्रैव पूजनं कुर्यात् अष्टाङ्गयोगसिद्धये ॥ २१७ ।

प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ।
पूजयेद्देवदेवेशं गन्धपुष्पाक्षतादिभिः ॥ २१८ ।

अनन्तेशं पूजयेद्वै तथा [8]सूक्ष्मेशमेव च ।
शिवोत्तमेशं सम्पूज्य एकनेत्रेशमेव च ॥ २१९ ।

एकरुद्रेशमेवं हि त्रिमूर्त्तीशं ततोऽर्चयेत् ।
भक्त्या समर्चयेत्तत्र श्रीकण्ठेशं शिखण्डिनम् ॥ २२० ।

तद्बाह्यपत्रिकाग्रेषु उत्तरादिक्रमेण तु ।
उमाद्या देवताः पूज्याः प्रणवादिनमोऽन्तिकाः ॥ २२१ ।

---

१. शिवावरुणदेवाश्चेति–ग० ।
२. वामशब्दमुच्चार्य देवाय नम इत्युच्चारणीयम्, अर्थात् 'वामदेवाय नमः' इत्यत्र तात्पर्यम् ।
३. निवृत्त्यादीनिति–ख०; ४. निवृत्तौ चेति–ख० ।
५. प्रतिष्ठा विद्या चेति–ख०; ६. समर्चनमिति–ख० ।
७. द्विदलमिति–ख०; ८. शम्भुं त्रिलिङ्गकमिति ख० ।

उमादेवीं समभ्यर्च्य तथा चण्डेश्वरं ततः ।
नन्दिनञ्च महाकालं गणेशं वृषभं तथा ॥ २२२ ।

[1]भृङ्गरीटः स्कन्दपुत्रौ तद्बाह्ये क्रमतोऽर्चयेत् ।
इन्द्रादीन् लोकपालाँश्च गन्धदीपैः समर्चयेत् ॥ २२३ ।

वज्रादींश्च क्रमेणैव पूजयेत्साधकोत्तमः ।
धूपदीपादिनैवेद्यपानार्थं [2]पुनराचमनम् ॥ २२४ ।

संहारमुद्रया चोर्ध्वे स्थापयेद्रुद्ररूपिणम् ।
विसर्जनान्तं तत्कर्म [3]उत्सृष्टपूजनादिकम् ॥ २२५ ।

समाप्य विधिनानेन पूजाकर्म समापयेत् ।
प्रत्यहं मानसं जापं होममर्चनतर्पणे ॥ २२६ ।

वर्धयेत् साधकश्रेष्ठो भक्तिभावपरायणः ।
पञ्चलक्षजपेनास्या पुरश्चरणमिष्यते ॥ २२७ ।

एवं ध्यात्त्वा जपेन्मन्त्रं पञ्चलक्षं मधुप्लुतैः ।
प्रसूनैः करवीरोत्थैरथवा जुहुयात् सुधीः ॥ २२८ ।

सर्वदा मानसं कार्यं [4]द्रव्यालाभेऽनिशं चरेत् ।
तद्दशांशं [5]प्रजुहुयात्तद्दशांशञ्च तर्पणम् ॥ २२९ ।

*तद्दशांशं चाभिषेकं दशांशं विप्रभोजनम् ।
एवं जपं साधनञ्च पुरा [6]नारायणो मुनिः ॥ २३० ।

कृत्वा [7]सर्वसत्त्वमयः शीतलो योगिराड् [8]भवेत् ।
यः करोति साधनानि सोऽचिरादमरो भवेत् ॥ २३१ ।

[9]पूजान्ते पूजाशेषे च पूजामध्यक्रमेण च ।
प्रणमेत् साधकश्रेष्ठो [10]वरुणात् पापभूपतेः ॥ २३२ ।

---

१. भृङ्गरीटिस्कपुत्रौ–ग०; २. पुनराचममिति–ख०; ३. तच्छिष्टपूजनादिकमिति–ख० ।
४. द्रव्यालाभेऽपि संचरेदिति–ख०; ५. चाभिषेकं दशांशं विप्रभोजनमिति–ख० ।
* एषश्लोको–ख० पु० नास्ति; ६. नारायणेन च–ग०; ७. सर्वमन्त्रमय–ख० ।
८. भवेदिति–ग० ।
९. पूजाद्यैश्चैव शेषे च पूजामध्ये क्रमेण तु–ख०; १०. वारणादिति–ख० ।

[1]ॐ नमः परमकल्याण नमस्ते विश्वभावन।
नमस्ते पार्वतीनाथ [2]उमाकान्त नमोऽस्तु ते ॥ २३३ ।

विश्वात्मने विचिन्त्याय गुणाय निर्गुणाय च।
धर्माय ज्ञानमोक्षाय नमस्ते सर्वयोगिने ॥ २३४ ।

नमस्ते कालरूपाय त्रैलोक्यरक्षणाय च।
[3]गोलोकघातकायैव चण्डेशाय नमोऽस्तु ते ॥ २३५ ।

सद्योजाताय देवाय नमस्ते शूलधारिणे।
कालान्ताय च कान्ताय चैतन्याय नमो नमः ॥ २३६ ।

कुलात्मकाय कौलाय चन्द्रशेखर ते नमः।
[4]उमानाथ नमस्तुभ्यं योगीन्द्राय नमो नमः ॥ २३७ ।

सर्वाय सर्वपूज्याय ध्यानस्थाय गुणात्मने।
पार्वतीप्राणनाथाय नमस्ते परमात्मने ॥ २३८ ।

एतत् स्तोत्रं पठित्वा च स्तौति यः परमेश्वरम्।
याति [5]रुद्रकुलस्थानं मणिपूरं विभिद्यते ॥ २३९ ।

एतत् स्तोत्रप्रपाठेन तुष्टो भवति शंकरः।
[6]खेचरत्वं पदं नित्यं ददाति परमेश्वरः ॥ २४० ।

ततो वक्ष्ये महादेव मृत्युञ्जयविधानकम्।
यत् कृत्वा परमब्रह्ममयो भवति साधकः ॥ २४१ ।

मृत्युञ्जयस्य मन्त्रं वै जपते यदि मानुषः।
कोटिवर्षशतं स्थित्वा लीनो भवति ब्रह्मणि ॥ २४२ ।

सर्वव्यापकरूपेण स तिष्ठति सदाशिव।
तत्प्रकारं प्रवक्ष्यामि [7]सावधानोऽवधारय ॥ २४३ ।

[8]आदौ पूजां विधानेन वक्ष्यामि सारनिर्मिताम्।
[9]श्रीकण्ठपूर्णोदर्याश्च न्यासं चास्ये समाचरेत् ॥ २४४ ।

---

१. ओमिति–ख पु० नास्ति; २. उमानाथेति–ख०; ३. त्रैलोक्यघातकायैवेति–ख०।
४. उमाकान्तेति–ख०; ५. रुद्रकुलस्थाने–ग०; ६. खेचरत्वपदमिति–ख०।
७. सावधानावधारयेति–क०; ८. आदौपूजा विधानं च वक्ष्यामि सारनिर्णीतं–ख०।
९. पुर्तोदर्याश्चेति–ख०।

ततो हृदयमध्ये तु स्वहस्ताङ्गुलिमुद्रया[1] ।
[2]तद्वयान्यस्य देवेश तत्प्रकाशं [3]प्रचक्ष्यते ॥ २४५ ।
प्रणवादि नमोऽन्तेन चतुर्थ्यन्तपदेन च ।
योजयित्वा न्यसेन्मन्त्री मन्त्रभावपरायणः ॥ २४६ ।
आधारशक्तिमेवं हि प्रकृतितदनन्तरम् ।
कूर्ममनन्तं तत्पश्चात् पृथिवीं क्षीरसागरम् ॥ २४७ ।
श्वेतद्वीपं ततः पश्चान्मणिमण्डपमेव च ।
[4]कल्पवृक्षे ततो नाथ विन्यसेन्मणिवेदिकाम् ॥ २४८ ।
रत्नसिंहासनं तत्र हृदयाम्भोजमण्डले ।
दक्षवामस्कन्धभागे वामोरौ दक्षिणे तथा ॥ २४९ ।
मुखे वामपार्श्वभागे नाभौ दक्षपार्श्वके ।
प्रणवादिनमोऽन्तेन चतुर्थ्यन्तपदेन च ॥ २५० ।
सर्वत्र न्यासमाकुर्यात्तेषां नाम शृणु प्रभो ।
क्रमेण सर्वं कर्त्तव्यं [5]क्रमभङ्गो न चाचरेत् ॥ २५१ ।
धर्मं ज्ञानञ्च वैराग्यमैश्वर्यं तदनन्तरम् ।
अधर्ममपि चाज्ञानमवैराग्यं ततः परम् ॥ २५२ ।
अनैश्वर्यं क्रमेणापि विन्यसेत् साधकोत्तमः ।
पुनर्वारं हृदम्भोजे न्यसेदेकमनाः सुधीः ॥ २५३ ।
अनन्तपद्ममेवन्तु [6]अं सूर्यमण्डलं तथा ।
[7]द्विषट्कलात्मना सार्धं सं सोममण्डलं तथा ॥ २५४ ।
षोडशकलात्मानञ्च मं वह्निमण्डलं तथा ।
दशकलात्मना सार्धं सं [8]सत्वं तदनन्तरम् ॥ २५५ ।

---

१. हस्ताङ्गुलीसमुद्रया–ख०; २. त स्वयाख्यस्येति–ख; तत्त्वायान्यस्येति–ग० ।
३. प्रचत्रते–ख०; ४. कल्पवृक्षमिति–ग० ।
५. क्रमभङ्गेन चाचरेदिति–ख; ६. तं–ख० ।
७. द्वादशकात्मना सायं सुं सोममण्डल तथेति–ख०; ८. सत्त्व–ग० ।

रं [1]बीजं रजसं तत्र तं तमसमेव च ।
आं [2]आत्मने न्यसेन्मन्त्री अं अन्तरात्मने नमः ।। २५६ ।
पं बीजं परमात्मानं मायाज्ञानात्मने नमः ।
इत्यन्तं न्यस्य देवेश मन्त्रसिद्धिमवाप्स्यसि ।। २५७ ।
मणिपूरे मन्त्रसिद्धिं सर्वसिद्धिमवाप्नुयात् ।
यः करोति सदान्यासं ध्यानपूजापरायणः ।। २५८ ।
[3]वामां ज्येष्ठां तथा रौद्रीं कालीं कलपदादिकाम् ।
विकरण्याह्वया युक्ता बलविकरणीं तथा ।। २५९ ।
बलप्रमथिनीं चैव न्यसेत् साधकसत्तमः ।
ततः सर्वभूतदमनीं मनोन्मनीं ततो न्यसेत् ।। २६० ।
तदुपरि न्यसेन्नाथ ॐ नमो भगवते पदम् ।
[4]सकलगुणात्मनः शक्ति चान्ते युक्ताय पदमावदेत् ।। २६१ ।
अनन्ताय पदस्यान्ते योगपीठात्मने पदम् ।
नमोऽन्तोऽयं महामन्त्रः सर्वोपरि न्यसेत्सुधीः ।। २६२ ।
ततो नाथ समाकुर्यात् साधको गतभीः स्वयम् ।
ऋष्यादिन्यासमाकुर्यात् तत्प्रकारं शृणु प्रभो ।। २६३ ।
शिरसि पदमुच्चार्य कहोडऋषये नमः ।
तदुपरि ततो नाथ महाविष्णुपदं वदेत् ।। २६४ ।
ऋषये नम इत्युक्त्वा मुखे देवीपदं वदेत् ।
गायत्रीच्छन्दसे पश्चान्नमः शब्दं समुच्चरेत् ।। २६५ ।
हृदि मृत्युञ्जयायैवं देवतायै नमः पदम् ।
ऋषिः कहोडो देव्याश्च गायत्रीच्छन्द ईरितम् ।। २६६ ।
मृत्युञ्जयो महादेवो देवतास्य [5]प्रकीर्तिता ।
कराङ्गन्यासकौ कुर्यात् षड्दीर्घभाजया सह ।। २६७ ।

---

१. राजसमिति–ख०; २. आत्मानमिति–ख० ।
३. वामा ज्येष्ठा तथा रौद्री काली कलपदाविकमिति–ग० ।
४. सकलगुणात्मशक्तिचान्ते भुक्ताय पदमावदेत्–ख०; ५. प्रकीर्तितः–क० ।

सकारेण महाकाल तत्प्रकारं शृणु प्रभो ।
सामङ्गुष्ठाभ्यां चान्ते च नमः शब्दं क्रमेण तु ।। २६८ ।

एवं कराङ्गुलीन्यासं कुर्यादेव महाप्रभो ।
[1]षड्दीर्घभाजा मन्त्रेण सकारेण सबिन्दुना ।। २६९ ।

कराङ्गन्यासमाकुर्यात् कुलतन्त्रक्रमेण तु ।
ततो ध्यानं समाकुर्यात् शुभभावपरायणः ।। २७० ।

इन्द्वर्कानललोचनं स्मितमुखं [2]पद्मद्वयान्तास्पदं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुच्छविम् ।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं[3]
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ।। २७१ ।

एवं ध्यात्वा मानसोपचारद्रव्यैः प्रपूजयेत् ।
अर्घ्यस्थापनामाकृत्य तत्तन्मन्त्रेण साधकः ।। २७२ ।

[4]पूजयेत्पीठमन्वन्ता तत्तन्मन्त्रेण साधकः ।
पुनर्ध्यात्वा समावाह्य मूलमन्त्रेण मन्त्रवित् ।। २७३ ।

पाद्यादिभिः पूजयेद्वै गन्धपुष्पादिशोभितैः ।
पञ्चपुष्पाञ्जलिं दत्वा परिवारान् प्रपूजयेत् ।। २७४ ।

केशरेष्वग्निनिरृतिवाय्वीशानेषु पूजयेत् ।
मध्ये दिक्षु च तन्मध्ये सा बीजं तत्र चोच्चरेत् ।। २७५ ।

हृदयाय नमश्चान्ते सीं बीजं तदनन्तरम् ।
शिरसे स्वाहया सार्धं सु बीजं तदनन्तरम् ।। २७६ ।

शिखायै वषडित्यादि सैं बीजं तदनन्तरम् ।
कवचाय पदस्यान्ते तारबीजं समुच्चरेत् ।। २७७ ।

सों बीजं पूर्वमुच्चार्य नेत्रत्रयाय इत्यपि ।
वौषडादिमध्यपदं चतुर्दिक्षु ततः परम् ।। २७८ ।

---

१. बीजेनेति–ख०; २. पद्मन्वयान्तास्पदं–ग० ।
३. भूषाकुलमिति–ख०; ४. एतत्पद्यत्रयं–ख पुस्तके नास्ति ।

[1]सश्चान्तेऽस्त्रायशब्दान्ते फडित्येव समर्चयेत् ।
षडङ्गानि पूजयित्वा तद्बहिः प्रतिपूजयेत् ।। २७९ ।
इन्द्रादींल्लोकपालांश्च [2]वज्रादींश्च तथा प्रभो ।
धूपदीपादिनैवेद्यपानादीनि प्रदापयेत् ।। २८० ।
विधिना वादनं कुर्यान्मृत्युञ्जयसुतोषणात्[3] ।
विसर्जनान्तं यत्कर्म समाप्य विधिनामुना ।। २८१ ।
संहारमुद्रया [4]चैव हृदये [5]चानयेद्बुधः ।
प्रसन्नहृदयो भूत्वा चरणोदकमापिबेत् ।। २८२ ।
एतन्मात्रेण देवेश सर्वसिद्धिं समाप्नुयात् ।
पिबामि चरणद्वन्द्वाम्भोजनिःसृतकं भजे ।। २८३ ।
अमरत्वं सदा देहि मृत्युञ्जय नमोऽस्तु ते ।। २८४ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे मन्त्रप्रकाशो नाम [6]सप्तचत्वारिंशः पटलः ।।

---

१. मश्चान्ते–क०; २. पूजयेत्तु तथा–ख०; ३. सुभूषणात्–ख ।
४. देवमिति–ख०; ५. चालयेदिति–ख०; ६. अष्टचत्वारिंशदिति–ख० ।

अथाष्टचत्वारिंशः पटलः

आनन्दभैरव उवाच—

श्रुतं च साधनं पुण्यं महारुद्रस्य सुन्दरि ।
मणिपूरे प्रकाशञ्च कथितं ज्ञाननिर्णयम् ॥ १ ॥

अकस्मात् सिद्धिसम्पत्ति[1] नुतिं वद महाप्रियाम् ।
यस्य श्रवणमात्रेण पाठेन योगिनीवशम् ॥ २ ॥

श्री-आनन्दभैरवी उवाच—

परमानन्ददेवेश योगानामधिप प्रभो ।
स्तोत्रं रुद्रस्य वक्ष्यामि सारात्सारं परात्परम् ॥ ३ ॥

यज्ज्ञात्वा योगिनः सर्वे षट्चक्रपरिभेदकाः ।
आकाशगामिनः सर्वे स्वर्गमोक्षाभिलाषुकाः[2] ॥ ४ ॥

महादेवसमाः सर्वे देवाश्च स्वर्गभोगिनः[3] ।
सर्वरक्षाकरं स्तोत्रं ये पठन्ति निरन्तरम् ॥ ५ ॥

ते यान्ति ब्रह्मसदनं सिद्धमुख्या महीतले ॥ ६ ॥

[4]ॐ भजामि शम्भुं सुखमोक्षहेतुं
रुद्रं महाशक्तिसमाकुलाङ्गम् ।
[5]रौद्रात्मकं चारुहिमांशुशेखरं
कालं गणेशं सुमुखाय शङ्करम् ॥ ७ ॥

मृत्युञ्जयं जीवनरक्षकं परं
शिवं परब्रह्मशरीरमङ्गलम् ।
हिमांशुकोटिच्छविमादधानं
भजामि पद्मद्वयमध्यसंस्थितम् ॥ ८ ॥

---

१. सम्पत्तिः स्यात्त्वं वद महाप्रिये—ख०;
२. अभिनासकाः—ग० ।
३. सर्गभोगिनः—ख०;
४. ओमिति—ख० पु० नास्ति ।
५. रौद्रार्थकं रुद्रहिमांशुशेखरं कालं कुलेशं शिवशङ्करञ्चेति—ख० ।

[1]सर्वात्मकं कामविनाशमूलं
तं चन्द्रचूडं मणिपूरवासिनम् ।
चतुर्भुजं ज्ञानसमुद्रयाढ्यं
पाशं मृगाक्षं गुणसूत्रव्याप्तम् ।। ९ ।

धरामयं तेजसमिन्दुकोटिं
वायुं जलेशं [2]गगनात्मकं परम् ।
भजामि रुद्रं कुललाकिनीगतं
सर्वाङ्गयोगं जयदं सुरेश्वरम् ।। १० ।

शुक्रं [3]महाभीमनयं पुराणं
प्राणात्मकं व्याधिविनाशमूलम् ।
[4]यज्ञात्मकं कामनिवारणं गुरुं
भजामि विश्वेश्वरशङ्करं शिवम् ।। ११ ।

वेदागमानामतिमूलदेशं
तदुद्भवं [5]भद्रहितं [6]परापरम् ।
कालान्तकं [7]ब्रह्मसनातनप्रियं
भजामि शम्भुं [8]गगनादिरूढम् ।। १२ ।

शिवागमं शब्दमयं विभाकरं
[9]भास्वत्प्रचण्डानलविग्रहं ग्रहम् ।
ग्रहस्थितं ज्ञानकरं करालं
भजामि शम्भुं प्रकृतीश्वरं हरम् ।। १३ ।

छायाकरं योगकरं सुखेन्द्रं
मत्तं महामत्तकुलोत्सवाढ्यम् ।
योगेश्वरं योगकलानिधिं विधिं
विधानवक्तारमहं भजामि ।। १४ ।

---

१. सर्वार्थकमिति–ख०; २. गगणात्मकमिति–ख०; ३. लयमिति–ख० ।
४. यज्ञार्थकमिति–ख०; ५. तद्रहितमिति–ख०; ६. परात्परमिति–ख० ।
७. निरूपणमिति–ख०; ८. गगणादिकरूढमिति–ख० ।
९. प्रचण्डामन्तविग्रहं विभुमिति–ख० ।

हेमाचलालङ्कृतशुद्धवेशं
वराभयादाननिदानमूलम् ।
भजामि कान्तं वनमालशोभित
[1]चामूलपद्मामलमालिनं कुलम् ॥ १५ ।
स्वयं [2]पुराणं पुरुषेश्वरं गुरुं
[3]मिथ्याभयाह्लादविभाविनं भजे ।
भावप्रियं प्रेमकलाधरं शिवं
गिरीश्वरं चारुपदारविन्दम् ॥ १६ ।
ध्यानप्रियं ज्ञानगभीरयोगं
भाग्यास्पदं [4]भाग्यसमं सुलक्षणम् ।
शूलायुधं शूलविभूषिताङ्गं
श्रीशङ्करं मोक्षफलक्रियं भजे ॥ १७ ।
नमो नमो रुद्रगणेभ्य एवं
मृत्युञ्जयेभ्यः कुलचञ्चलेभ्यः ।
शक्तिप्रियेभ्यो विजयादिभूतये
शिवाय धन्याय नमो नमस्ते ॥ १८ ।
[5]बाह्यं त्रिशूलं वरसूक्ष्मभावं
विशालनेत्रं तनुमध्यगामिनम् ।
[6]महाविपद्दुःखविनाशबीजं
[7]प्रज्ञादयाकान्तिकरं भजामि ॥ १९ ।
पुरान्तकं पूर्णशरीरिणं गुरुं
स्मरारिमाद्यं निजतर्कमार्गम् ।
अनादिदेवं दिवि दोषघातिनं
भजामि [8]पञ्चाक्षरपुण्यसाधनम् ॥ २० ।

---

१. चाम्लानपद्मासनमानिनं कुलमिति–ख० ।
२. प्रधानमिति–ख०; ३. सुरमिति–ख० गुरुम् ?
४. सिद्धाभवाह्लादिविभाविनमिति–ख०; ५. भाग्यमयमिति–ख० ।
६. भाव्यमिति–ख०; ७. महाविपद्भस्मविलासबीजमिति–ख० ।
८. शुद्धोदयं शान्तिकरमिति–ख० ।

दिगम्बरं [1]पद्ममुखं [2]करस्थं
स्थितिक्रियायोगनियोजनं भवम् ।
भावात्मकं भद्रशरीरिणं शिवं
भजामि पञ्चाननमर्कवर्णम् ॥ २१ ॥

मायामयं पङ्कजदामकोमलं
दिग्व्यापिनं दण्डधरं [3]हरेश्वरम् ।
त्रिपक्षकं [4]त्र्यक्षरबीजभावं
त्रिपद्ममूलं त्रिगुणं भजामि ॥ २२ ॥

विद्याधरं [5]वेदविधानकार्यं
कायागतं नीतनिनादतोषम् ।
नित्यं चतुर्वर्गफलादिमूलं
वेदादिसूत्रं प्रणमामि योगम् ॥ २३ ॥

वेदान्तवेद्यं कुलशास्त्रविज्ञं
क्रियामयं [6]योगस्वधर्मदानम् ।
भक्तेश्वरं भक्तिपरायणं वरं
[7]भक्तं महाबुद्धिकरं भजाम्यहम् ॥ २४ ॥

गतागतं गम्यमगम्यभावं
[8]समुल्लसत्कोटिकलावतंसम् ।
[9]भावात्मकं भावमयं सुखासुखं
भजामि भर्गं प्रथमारुणप्रभम् ॥ २५ ॥

बिन्दुस्वरूपं परिवादवादिनं
मध्याह्नसूर्यायुतसन्निभं नवम् ।
विभूतिदानं [10]निजदानदानं
दानात्मकं तं प्रणमामि देवम् ॥ २६ ॥

---

१. सुखमिति–ख०; २. करस्थितमिति–ख० ।
३. सुरेश्वरमिति–ग०; ४. अक्षरबीजभावमिति–ख० ।
५. देव·········ख०; ६. सुधर्म·········ख०; ७. शक्तिकरमिति–ग० ।
८. शरद्विषोः कोटिकलावतंसमिति–ख०; ९. भावार्थकमिति–ख०; १०. योग–ख० ।

कुम्भापहं शत्रुनिकुम्भघातिनं
दैत्यारिमीशं कुलकामिनीशम् ।
प्रीत्यान्वितं चिन्त्यमचिन्त्यभावं
प्रभाकराह्लादमहं भजामि ॥ २७ ।

त्रिमूर्त्तिमूलाय जयाय शम्भवे हिताय लोकस्य [1]वपुर्धराय ।
नमो [2]भयाच्छिन्नविघातिने पते नमो नमो विश्वशरीरधारिणे ॥ २८ ।

तपःफलाय प्रकृतिग्रहाय [3]गुणात्मने सिद्धिकराय योगिने ।
नमः प्रसिद्धाय [4]दयातुराय वाञ्छाफलोत्साहविवर्धनाय ते[5] ॥ २९ ।

[6]शिवममरमहान्तं पूर्णयोगाश्रयन्तं
धरणिधरकराब्जैर्वर्धमानं[7] त्रिसर्गम् ।
[8]विसममरणघातं [9]मृत्युपूज्यं जनेशं
विधिगणपतिसेव्यं पूजये भावयामि ॥ ३० ।

एतत्स्तोत्रं [10]पठेद्विद्वान् मुनिर्योगपरायणः ।
नित्यं जगन्नाथगुरुं भावयित्वा पुनः पुनः ॥ ३१ ।

मणिपूरे [11]वायुनिष्ठो नित्यं स्तोत्रं पठेद् यदि ।
जीवन्मुक्तश्च देहान्ते परं निर्वाणमाप्नुयात् ॥ ३२ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने रुद्रमृत्युञ्जयस्तवनं नाम [12]अष्टचत्वारिंशत्तमः पटलः ॥

---

१. सुधायुषे मुदा–ख०; २. भवाच्छन्ननिघातिने ते–ख०; ३. गुणार्थिने–ख० ।
४. दयार्घावाय–ख०; ५. ते ख० पु० नास्ति; ६. शिववरहस्तं पुष्पयोगाश्रयन्तमिति–ख० ।
७. रम्यमायामिति; ८. चरण–ख०; ९. मृत्युघातं नरेशमिति–ख० ।
१०. मणियोगपरायणः–ख०; ११. पयोनिष्ठो–ख०; १२. एकोनपञ्चाशदिति–ख० ।

अथैकोनपञ्चाशत्तमः पटलः

आनन्दभैरवी उवाच—

षट्चक्रभेदनार्थाय सर्वसिद्धसुसिद्धये ।
वक्ष्यामि लाकिनीदेवीस्तोत्रं परमदुर्लभम् ।। १ ।

यत्पाठादतिसन्तोषं प्राप्नोति यतिरीश्वर ।
तत्क्रियासारसम्पन्नं स्तवनं लाकिनीप्रियम् ।। २ ।

अस्य श्रीलाकिनीस्तोत्रस्य महाविष्णुकहोड-ऋषि-
र्गायत्रीच्छन्दो महासिद्धिदमृत्युञ्जयमहारुद्र[1]लाकिनी
सरस्वतीदेवता मणिपुरभेदने[2] जपे विनियोगः ।

ओम् [3]बीजाक्षरमूर्तिमार्तिहरिणीमार्यां जयां[4]बुद्धिदां
दीनानामपराधकोटिहननीं संज्ञामणिं योगिनाम्[5] ।
त्वामाद्यामनुरागिणीं गुणगणामोदैकहेतुस्थलां
स्थित्यन्तःकृतकौतुकीम[6]वरदे वन्दे मुदा लाकिनीम् ।। ३ ।

हेरम्बार्चनसिद्धिदा द्वयगता कोटिप्रभा भास्करा
साकारा किरणोज्ज्वला सुखमयी वेदध्वनिप्राणिनी ।
कोपाको[7]पितलक्षणा तरुतराकल्पाशया संशया
[8]कृत्वैवं वरवर्णिनी समवतु श्रीलाकिनी कङ्किनी ।। ४ ।

केयुरामलहारमालशुभगा वीरासना[9] स्थायिनी
भार्या रुद्रपतेः प्रवालविमला [10]वक्त्रोत्पलस्रग्धरा ।
माता योगवतां सती परा[11]परपदा माध्वीरसाच्छादिता
त्वं मां पाहि कृपामयो यमगतं मृत्युञ्जये श्रीधरे ।। ५ ।

---

१. डाकिनी–ख०; २. मणिपूरभेदग्रन्थिभेदन–ख०; ३. मुक्ति–ख० ।
४. हरिणीमार्यां जयां वृद्धिदाम्–ख०; ५. योगिनीम्–ख० ।
६. शुभकरीम्–ख०; ७. कोपाकायिका–ख० ।
८. त्वञ्चैकावरवर्णिनी समवतु किङ्किणी श्रीलाकिनी–ख० ।
९. वीरासनस्थायिनो–ख०; १०. रक्तोपलासुन्दरी–ख०; ११, परपदाम्–ख० ।

आकाङ्क्षीकुलसङ्ख्यका क्षयकरी [1]शत्रुप्रभादेर्दया
भक्तानामतिदुःखहा शशिमुखो योन्यानना कामुकी ।
कामस्थानम[2]कामदोषशतकं शीघ्रं त्वलक्षेमदा[3]
जीवन्मुक्तिपदं विधेहि समरे सर्गद्रुहस्य प्रियम् ॥ ६ ॥

त्वं पञ्चाननपूजिता त्वमशिता त्वं बालविद्यागति-
स्त्वं सत्यं[4] कवितासु वाक्यकविता त्वं केवलानन्ददा ।
त्वं लाक्षारुणरूपिणी[5] त्वमवरा त्वं लिङ्गसंहारिणी
त्वं साक्षादमृतप्रदा त्वमजरा त्वं लाकिनी पातु[6] माम् ॥ ७ ॥

नानामङ्गलधर्मराज्यजडिता संस्कारबोधाश्रया
लिङ्गस्थाचलपुत्रिका नवगृहे [7]संकामयन्ती शिवा ।
मे लिङ्गोपरि रुद्रनाथ विपथव्याभेदनं सङ्गमं
शीघ्रं कारय देवि [8]मोक्षतुरिकं कोटीव चन्द्रोज्ज्वला ॥ ८ ॥

चन्द्राभासकलाश्रया[9] श्रयति या शब्दच्छटा या समा[10]
माया मोहभिदा[11] दया दयति या कृष्णक्रियामोहिनी ।
लक्ष्मीर्नीलकलेवरामलमणेः पूर्वं[12] सदा रक्षतु
श्रीविद्या भयदायिनी त्वमपि सा मे नाभिमूलोदया ॥ ९ ॥

मात्रा [13]मुद्रामननिलया मालिनी मन्त्रविद्या
विश्वेशानी शयनरहिता शीतवातातपस्था ।
सत्यासत्या वचनभवगा[14] गौरि माता त्वमेव
प्राणान् रक्ष प्रथमकिरणामाश्रये त्वामनन्ताम् ॥ १० ॥

सिद्धासिद्धा शशिरविकला केवलाम्भोजसंस्था
स्थित्यानन्दा नयनस्वचलाम्भोजमध्यप्रकाशा ।
नित्यं श्रद्धागतिपथकरा[15] कर्त्री कामानहर्त्री
[16]नाद्यस्तोत्रं भज भज भजे त्वामनन्तां स्वरूपे ॥ ११ ॥

---

१. शत्रुप्रभानाशिनी–ख०; २. मम–ख०; ३. हन–ख० ।
४. सत्या मुखसत्यवाम्य कलिता–ख०; ५. कायिका विषधरा–ख०; ६. पाहि–ख० ।
७. संकाशयन्ती–ख०; ८. मोदभविकम्–ख०; ९. चन्द्राभाकरणाश्रयो–ख० ।
१०. उमा–ख०; ११. महोदयो दयति या–ख०; १२. पूरम्–ख०: १३. मथन–ख० ।
१४. सुभगा–ख०; १५. दतकामानवद्या–ख०; १६. नाम्यम्भोजम्–ख० ।

पीतापीता पवनगमना धारणध्यानयोगा
कालाकाला कलिकुलकला निष्कला ज्ञानरूपा[1] ।
कृष्णानन्दा मदनकुहरा केकरा शङ्करी वा[2]
त्वं श्रीधात्री धवलकमलं नाभिमूले प्रवक्ष्ये[3] ॥ १२ ।
श्वेता श्वेतारुणशतकरा भावनाज्ञानसिद्धिः
प्रीताप्रीता परमगहना[4] चारुणामाननायाः ।
[5]त्वं सा विद्या विधिबुधवरा धारणाज्ञानगम्या
रम्यारम्या [6]रमणनिरता नीरदा पातु नाभिम् ॥ १३ ।
[7]मन्दोद्बन्धप्रियवधुलता नीरवानावहन्त्री
क्षेत्राक्षेत्रा परचरगता भुक्तिमुक्तिप्रकाशा ।
कौलाकौलाज्ञापितनयना[8] गञ्जना वातमुग्धा
[9]मुग्धामुग्धामतिधनपतेर्नाभिसंस्थेऽवनाभिम् ॥ १४ ।
हंसी सिंहासनगतपदा चक्रविद्या सुसूक्ष्मा
श्रीविद्या त्वं नवविलचरा सुन्दरी रक्तवर्णा ।
स्वर्णाम्भोजोपरि शुभमना चक्रमध्ये प्रतिष्ठा
[10]सर्वा वर्णा परिजनदयानाभिपद्मं च रक्षा ॥ १५ ।
ब्रह्मानन्दा नृपगणमहापूजया शोभिताङ्गी
श्रीश्रीविद्यासकलविभवा भावनीया महेन्द्रैः ।
सिद्धस्थाने मणिमयगृहे मूलसिंहासनस्था[11]
पद्मे चाष्टान्वितयुगदले नाभिमूले[12]ममाव ॥ १६ ।
योगज्ञानं [13]द्विविधविभवं वेदविद्याप्रकाशं
मे चाष्टाङ्गं[14] समवतु मुदा षोडशी भैरवस्था ।
चन्द्रोल्का त्वं[15] भवभयहरा शोकतापापहन्त्री
नाभावब्जे[16]उदयति सुरो यस्तमीशे प्ररक्ष ॥ १७ ।

१. निष्कलाज्ञाकपाला ख०; २. या ख०; ३. प्ररक्ष ख० ।
४. पवनगठना तारणा मारणा या–ख०; ५. हंसा–ख०; ६. वसन–ख० ।
७. सेन्दीर्गन्धप्रियविधुनितानीखा वा वाहन्ती–ख०; ८. क्षपितकलुषाज्ञानगम्या चिराय–ख० ।
९. शुद्धाशुद्धा.......नाभिसंस्था व नाभिम्–ख०; १०. सर्वच्छन्ना.......ज्ञानपदं प्ररक्ष–ख० ।
११. आसनस्थे–ख०; १२. रुद्ररूपात्वमेव–ख०; १३. विविध–ख० ।
१४. चाष्टाङ्गैर्मां प्रणतशिरसं–ख०; १५. चन्द्राङ्गा–ख०; १६. नाभेरब्जे–ख० ।

संश्लिष्टा[1] त्वं विरत करुणे शीतले शीतशैले
साक्षादन्यप्रचयवचना[2] पार्वणा पर्वपूरा ।
विद्युत्पूरं [3]समसुखमयं पाहि पञ्चानना या
त्वं सा देवी शुभमणिगृहे शीतलत्वं[4] विधेहि ।। १८ ।
छन्दोगानां सकलविषयच्छेदिनी चार्णमाता
माला लाक्षारुणकिरणगा गोपपूज्या गिरीज्या[5] ।
मातस्त्वं मे स्वमणिभवनं पाहि सूक्ष्मा भवानी
[6]वानस्थानाश्रय जय कराचाङ्गिरा चान्नपूर्णा ।। १९ ।
चन्दोल्लासाऽवयवसुखदा दीर्घकेशी विशाला
त्वं मातङ्गी जननि [7]जगतां बालिका विप्रचण्डा ।
ज्योत्स्नाजाले उदयति सदा रक्तभाषप्रभासा[8]
त्वं मे रुद्र हरिहरतनुं नाभिमूले प्ररक्ष ।। २० ।
वाणीनाम्ना रचयति वचः सुन्दरी वर्णनस्था
स्थित्यन्तस्था चलतनुधरा [9]धामसन्धामरा सा ।
बोधानन्दप्रकृतितनुभिर्व्यापिनी ज्ञानमुग्धा
मातस्त्वं मे [10]मणिदलगृहं पाहि सर्वाङ्गविद्ये ।। २१ ।
विद्या [11]चण्डामलसितसृजा चन्दनालिप्तदेहा
विश्वेशानि भगवति शिवे त्वं [12]क्षयामोघरूपा ।
[13]जाया शम्भोर्जटिलशिवगता मोक्षदा मानसंस्था
चित्तं शुभ्रं कुरु विषयछेदनं [14]छेदिनि त्वम् ।। २२ ।
मणिमयकुलगेहे कोटिविद्युत्प्रकाशोऽ-[15]
भयवरमपि देहि क्रोधविद्ये मयि त्वम् ।
सकलसुखविभोगं पालय प्राणरूपं
चरणतलविलग्नं मामनाथं परेशि ।। २३ ।

---

१. सुश्लिष्टा त्वं विभव–ख०; २. अर्थप्रचय–ख०; ३. मम–ख० ।
४. शीलता–ख०; ५. पूज्यादिविद्या–ख०; ६. बालस्थानाप्रचुरप्रखरा–ख० ।
७. गजमुनिमतां मालिका–ख०; ८. भाषाप्रकाशा–ख० ।
९. फुल्लमन्दारवासा–ख०; १०. मणिकुलगृहं–ख०; ११. वेद्यावर्णामनसिजरुजा–ख० ।
१२. क्षपाघोररूपा–ख०; १३. जये–ख०, —प्रकुरु–ख०; १४. छेदनाच्छेदिनी त्वम्–ख० ।
१५. प्रकाशा–ख० ।

भुवनगहनहेतोः[1] कायसर्गा विनास्ते
विधिमखसुरनाथं मानुषादि त्रिसर्गम्[2] ।
मम मणिकुलपद्मे नित्यरूपाभिधानं
जयति खलु [3]तदानीं स्तोत्रसारप्रकारम् ॥ २४ ।

भवतु[4] चरणपद्मे लाकिनी देवकन्ये
[5]विरचय मनुशास्त्रं सिद्धमन्त्रप्रकारम् ।
[6]वह वह भवभावं त्राहि मां चन्द्रगेहे
कठिनहृदयनाशं शङ्करि त्वं[7] कुरुष्व ॥ २५ ।

कमलवनसमीपे [8]वन्यमध्येऽतिगुह्ये
विषयविषयिनाशं कौलिके त्वं विकृत्य ।
[9]भवनिजमणिपीठे स्थापयित्वा निदानं
हर हरदयिते त्वं दोषषट्कं विवादम् ॥ २६ ।

घोरे सान्द्रान्धकारे[10]मम निजकुलदृग्दानकर्त्रि प्रसन्ने
वाञ्छाकल्पद्रुमस्था त्वमिह कुशलदा[11]दायभागाविभागा ।
त्वं काली[12]नन्दिनीस्था नयकरुणघटा मध्यगा माघका त्वं
भीमा भीत्यापहन्त्री हरपदनयनो[13]लाकिनी नाभिमाव ॥ २७ ।

एतत्स्तोत्रं पठेद् विद्वान् योगज्ञानी निराश्रयः ।
महासुखगतो[14] वीरो विभवायामृताय च ॥ २८ ।

भोगमोक्षौ करे तस्य चैहिके योगिराड् भवेत् ।
परे याति महादेवी पादपद्मे न संशयः ॥ २९ ।

---

१. गठनहेतो कायशङ्का विनाशात्–ख० ।
२. मानुषादित्यसर्गम्–ख०; ३. तदा मे–ख० ।
४. तव तु–ख०; ५. विरचय–ख०; ६. भुवननिखिलतापात्–ख० ।
७. शङ्करि–ख०; ८. अरण्य–ख०; ९. हर–ख० ।
१०. अखिलनिजकुलमुद्धारकर्त्रीप्रसन्ने–ख०; ११. भागातिभागा–ख० ।
१२. लाङ्गलीस्थालयकर्णघटामध्यगामातृका त्वम्–ख०; १३. विलयालाकिनी नाभिसार–ख० ।
१४. पुण्यगतो घोरो विभवेनामृतेन च–ख० ।

ऐहिके चिरजीवित्वं ददाति कामदायिनी ।
मणिपुरे स्थितो याति[१] कुलमार्गप्रसादतः ।। ३० ।

कुलमार्गेण यत्स्थानं लयं विश्वेश्वरीपदम् ।
[२]तल्लया मणिपूरस्था देवता पश्यति ध्रुवम् ।। ३१ ।

पूजान्ते प्रपठेत् स्तोत्रं भक्तिभावपरायणः ।
शीघ्रमेव हि योगी स्यात् कुलमार्गप्रसादतः ।। ३२ ।

।।[३]इति श्रीरुद्रयामले उत्तरतन्त्रे लाकिनीशस्तवनं नाम एकोनपञ्चाशत्तमः पटलः ।।

●

१. स्थिरो–ख०; २. उल्लयान्मणिपूरस्था–ख० ।
३. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंबादे लाकिनीशस्तवनं नाम पञ्चाशत्तमः पटलः ।

अथ पञ्चाशत्तमः पटलः

आनन्दभैरवी उवाच—

नाथ कान्त प्रवक्ष्यामि सिद्धसाधनमुत्तमम् ।
येन साधनमात्रेण नरो योगी भवेद् ध्रुवम् ॥ १ ।
त्रिवीरं[1] त्रिविधं प्रोक्तमुत्तमाधममध्यमम् ।
तत्रैव त्रिविधं [2]सङ्गमूर्ध्वपातालभूतलम् ॥ २ ।
[3]सप्त ऊर्ध्वं तथा नाथ सप्त भूतलमेव च ।
सप्त पातालमेवं हि सप्तत्रिसप्तसंख्यकम् ॥ ३ ।
तन्मध्ये त्रिविधं भावं दिव्यवीरपशुक्रमम् ।
दिवि तिष्ठन्ति देवाश्च वीरास्तिष्ठन्ति भूतले ॥ ४ ।
पशवः सन्ति पाताले क्रमशः क्रमशः प्रभो ।
सर्वत्र त्रिगुणच्छन्नं[4] सत्त्वरजस्तमादिकम् ॥ ५ ।
सत्त्वगुणं स्वर्गमध्ये सर्वे [5]विष्णुपरायणाः ।
[6]तदा सर्वे दृढाः स्वर्गे भूतले च रजोगुणम् ॥ ६ ।
ब्रह्मसेवापराः सर्वे ब्रह्मज्ञानिन एव च ।
पाताले शिवसेवाश्च[7] शिवरूपिण एव च ॥ ७ ।
तमोगुणात् पशोर्भावं तमोदृष्टिं समाप्य च ।
ततो विहाय तज्ज्ञानं वीरो भवति साधकः ॥ ८ ।
वीरभावे ज्ञानदृष्टिं ब्रह्मसिद्धिं समाप्य च ।
देवता भवति क्षिप्रं सत्त्वे निर्मलभावके ॥ ९ ।

---

१. शरीरम्–ख०; २. प्रोक्तमुत्तमाधममध्यमम्–ख० ।
३. सप्त ऊर्ध्वमित्यतः पशुक्रममिति यावत् 'ख' पुस्तके नास्ति ।
४. द्विगुणाच्छन्नं–ख०; ५. विष्णुसेवापरायणे–ख० ।
६. सदा–ख०; ७. शिवसेवी च शिवरूपी स एव च–ख० ।

स्थिरो भूत्वा महादेवो भवत्येव क्रमेण तु ।
आकाशगामिनी सिद्धिः क्रमशो भवति ध्रुवम् ।। १० ।

मूलाधारस्य चाधो वै पातालतलवासिनः ।
तदूर्ध्वे ब्रह्मलोके तु भूतलादिनिवासिनः ।। ११ ।

तदूर्ध्वे सत्त्वनिलयं स्वाधिष्ठानं हि दैवतम् ।
विधिविद्याप्रकाशश्च वरदेवस्य सम्पदम् ।। १२ ।

तदूर्ध्वे[1] सर्वरूपञ्च सर्वज्ञानाश्रयं परम् ।
परस्थानं महादेव मणिपुरं मनोहरम् ।। १३ ।

रुद्रशक्त्यात्मकं चक्रं श्रीविद्याचक्रमण्डलम् ।
लाकिनी परमा माया महारुद्रेण सेविता ।। १४ ।

मणिपुरप्रकाशाय रुद्रशक्तिर्विभाति च ।
सर्वज्ञानानन्दमयं सर्वसिद्धिप्रकारकम्[2] ।। १५ ।

महासूक्ष्मशब्दमयं[3] कुण्डलं[4] ज्ञानसाधनम् ।
यस्याः साधनमात्रेण योगी भवति भैरव ।। १६ ।

प्रकार[5] एव सेवायां महासिद्धीश्वरो भवेत् ।
सर्वे च पशवः सन्ति तलवद् भूतले नराः ।। १७ ।

तेषां ज्ञानप्रकाशाय वीरभावः प्रकाशितः ।
वीरभावं मुदा[6] प्राप्य क्रमेण देवता भवेत् ।। १८ ।

यत्काले वीरभावादिसिद्धिं प्राप्नोति मानवः ।
तत्कालनिर्णयं वक्ष्ये वीराद्देवत्वमाप्नुयात् ।। १९ ।

मासेनाकर्षिणी सिद्धिर्मासेन[7] वाक्पतिर्भवेत् ।
मासत्रयेण संयोगाज्जायते सुरवल्लभः ।। २० ।

एवं चतुष्टये मासि भवेद् दिक्पालगोचरः ।
पञ्चमे पञ्चबाणः स्यात् षष्ठे रुद्रो न संशयः ।। २१ ।

---

१. तु–ख०; २. प्रकाशकम्–ख०; ३. शब्दलयम्–ख० ।
४. कुण्डली–ख०; ५. प्रकारत्रय–ख०; ६. सदा–ख०; ७. च–ख० ।

वीरभावं समाश्रित्य सर्वदा योगमाश्रयेत् ।
पशोरधीनं देवेश वीरभावं मनोहरम् ।। २२ ।
[1]वीराधीनं दिव्यभावं दिव्येन रुद्रतर्पणम् ।
[2]रुद्रदर्शनमात्रेण जीवन्मुक्तो भवेद् ध्रुवम् ।। २३ ।
जीवन्मुक्तिपदं प्राप्य किन्न सिध्यति भूतले ।
मनोनिवेशमाकृत्य पशुभावाश्रितो नरः ।। २४ ।
वीरभावं समाश्रित्य चादौ योगं समाश्रयेत् ।
सर्वदा चाभ्यसेद् योगं मन्त्रन्यासपरायणः ।। २५ ।
[3]योगसिद्धि ज्ञानसिद्धि मोक्षसिद्धि ततः परम् ।
यदि मोक्षमिहेच्छन्ति पशवः शास्त्रमोहिताः ।। २६ ।
[4]समज्ञानं वीरभावमाश्रित्य योगमाप्नुयात् ।
योगाभ्यासस्य चाद्ये च[5] शरीरं परिशोधयेत् ।। २७ ।
आदौ पञ्चामराः[6] कार्याः सर्वकार्यनिराश्रयाः ।
केवलं योगमाश्रित्य सदा पञ्चामरा[7] भवेत् ।। २८ ।
द्विप्रकारं [8]महाकालपञ्चामराभिधानकम् ।
नेती दन्ती तथा धौती [9]नेउली क्षालनं तथा ।। २९ ।
एकप्रकारमेवं हि कथितं परमेश्वर ।
दन्ती नेती तथा धौति नेउली क्षालनक्रमात् ।। ३० ।
एवं वा नित्यमाकुर्याद् योगसिद्धिसमृद्धये ।
[10]पञ्चामरासाधनादिकाले कुर्यान्निजक्रियाम् ।। ३१ ।
ओषधी [11]पञ्चमं ग्राह्यं पञ्चयोगसुसिद्धये ।
बिल्वपत्रं जयापत्रं तुलसीश्यामपत्रकम् ।। ३२ ।

---

१. वीरो योगी भवेद्ध्रुवम्–ख० ।
२. योगाधीनं दिव्यभावं दिव्येन रुद्रदर्शनम्–ख० पुस्तके अधिकः पाठः ।
३. मन्त्रसिद्धि योगसिद्धि–ख ।
४. ममज्ञानं वीरभावञ्चाश्रित्य–ख०; ५. वै–ख०; ६. पञ्चासवाः–ख० ।
७. पञ्चासवो–ख०; ८. पञ्चासवा–ख०; ९. कुलनं तथा–ख० ।
१०. पञ्चासवा–ख०; ११. पञ्चकम्–ख० ।

निर्गुण्डीपत्रमेवं तु [1]दूर्वाग्रन्थिरसेन च ।
एषां प्रकृतिनामानि वक्ष्यामि शृणु शङ्कर ॥ ३३ ।
[2]अमरा बिल्वपत्रं तु चामरा विजयादलम् ।
[3]अमरलता ग्रन्थिदूर्वा निर्गुण्डी चामरेश्वरी ॥ ३४ ।
अमरा श्यामतुलसी पञ्चामरास्तरूद्भवाः ।
कथिता योगसिद्ध्यर्थं तत्प्रमाणं क्रमात् शृणु ॥ ३५ ।
पञ्चतोलकमानं तु विजयापत्रमेव च ।
अन्येषां तोलकं चैकं संशोध्य भक्षणं चरेत् ॥ ३६ ।
एतद्भक्षणमात्रेण पञ्चयोगे जयी भवेत् ।
पुनस्तेषां महाकाल मनुं वक्ष्यामि तत्त्वतः ॥ ३७ ।
सकलं चामरायोगं मन्त्रेणानेन भक्षयेत् ।
तातद्वयं समुद्धृत्य ऋयुगं तदनन्तरम् ॥ ३८ ।
विसर्गबिन्दुसंयुक्तं तत्पश्चादमृतामुखि ।
मरणं [4]मारयद्वन्द्वं योगसिद्धिं ततः परम् ॥ ३९ ।
देहि देहि पदस्यान्ते स्वाहान्तं मन्त्रमुत्तमम् ।
एतन्मन्त्रेण चोत्पाट्य मन्त्रयित्वा [5]प्रभक्षयेत् ॥ ४० ।
एतत्काण्डस्य [6]मन्त्रं तु तत्रैव परियोजयेत् ।
निर्गुण्डीमन्त्रराजं तु शृणु वक्ष्यामि भैरव ॥ ४१ ।
कामबीजत्रयं पश्चात् कालीबीजत्रयं तथा ।
सर्वयोगं ततः पश्चात् साधय-द्वयमेव च ॥ ४२ ।
[7]अमृतत्त्वं मयि शक्तं समर्पयद्वयं ततः ।
स्वाहान्तमनुना चाथ[8] चोत्पाट्य भक्षणं चरेत् ॥ ४३ ।
बिल्वपत्रं प्रगृह्णीयात्तन्मन्त्रं शृणु [9]भैरव ।
लज्जाबीजं कामबीजं शक्तिबीजं ततः परम् ॥ ४४ ।

---

१. द्रव्यग्रन्थि–ख०; २. अमरी–ख०; ३. वासवेश्वरी–ख० ।
४. हावयद्वन्द्वं–ख०; ५. प्रवन्दयेत्–ख०; ६. मन्त्रार्णं–ख० ।
७. अमृतत्वे मयिशब्दं–ख०; ८. नाथ !–ख०; ९. कौलिक–ख० ।

ब्रह्मबीजं ततः पश्चाद् गौरसुन्दरि चावदेत् ।
मां स्थापय महायोगे पालयद्वयमेव च ॥ ४५ ।

शङ्करप्रेमगलिते[1] स्वाहान्तं मन्त्रमुच्चरेत् ।
तुलसीपत्रं संशोध्य चोत्पाटच मनुनाऽमुना ॥ ४६ ।

विष्णुप्रिये महामाये[2] शिवयोगप्रसाधिनि ।
मायाच्छेदं ततः पश्चात् संसारं [3]हारयद्वयम् ॥ ४७ ।

अमरत्वं देहि देहि स्वाहान्तं प्रगवादिकम् ।
शृणु श्रीविजयापत्रशोधनं हि चतुर्विधम् ॥ ४८ ।

[4]चतुर्वर्णं स्वमन्त्रेण परिशोध्य कुलाकुलम् ।
तत्क्रमं परिवक्ष्यामि सावधानाऽवधारय ॥ ४९ ।

[5]प्रणवं पूर्वमुच्चार्य देवीबीजं ततः परम् ।
स्वाहान्तं मन्त्रमुद्धृत्य संशोध्य भक्षयेत् सुधीः ॥ ५० ।

एकीकृत्य महादेव चैतन्मन्त्रेण मन्त्रयेत् ।
अमृतेऽमृतशब्दान्ते तद्भवे पदं ततः ॥ ५१ ।

श्रीबीजं मन्मथं बीजं लज्जाबीजद्वयं क्रमात् ।
क्रमेण च समुद्धृत्य विजये ज्ञानसुन्दरि ॥ ५२ ।

योगमोक्षप्रदे पश्चात् कायशोधिनि पावनि ।
मम पश्चात् कायसिद्धि देहि देहि ततः परम् ॥ ५३ ।

अमृतवर्षिणि शब्दान्ते अमृतं तदनन्तरम् ।
आकर्षयद्वयं पश्चात् सिद्धि देह्यनलप्रिये[6] ॥ ५४ ।

एतन्मन्त्रेण संशोध्य सावधानेन भक्षयेत् ।
न्यूनाधिकं न कर्तव्यं शनैरभ्यासमाचरेत् ॥ ५५ ।

---

१. गलितः–ख०; २. महाप्रिये–ख०; ३. हावय–ख०; ४. चतुर्वर्णेषु मन्त्रेण–ख० ।
५. एतत्श्लोकद्वयं अमृतवर्षिणिशब्दान्ते इत्यतः प्राक् 'ख'पुस्तके पठ्यते ।
६. देह्यनलप्रिया–ख० ।

यावत् प्रमाणभक्षः स्यात् प्रमाणे चाधिकं न च ।
एतद्भोजनमाकृत्य पय.पानं [१]समाचरेत् ।। ५६ ।
तत्प्रकारं शृणु प्राणनाथ ईश्वर शङ्कर ।
मरीचबीजं संशोध्य दुग्धशोधनमाचरेत् ।। ५७ ।
[२]एतत्प्रकारं द्विविधं तत्प्रकारं वदाम्यहम् ।
वाञ्छाकल्पतरोर्मूले गुरुं ध्यात्वा पुनः पुनः ।। ५८ ।
मानसोपचारद्रव्यैः पूजयित्वा विधानतः ।
मरीचं तोलकार्धं तु शोधयेन्मनुनामुना ।। ५९ ।
श्रीकृष्णबीजमुद्धृत्य पृथ्वीबीजत्रयं तथा ।
घोरघोरतरे पश्चान्मरीचकुलसुन्दरि ।। ६० ।
नीला त्वं भव देहे मे शरीरं शोधय द्वयम् ।
द्विठान्तोऽयं मनुः प्रोक्तस्तत्पश्चाद् दुग्धशोधनम् ।। ६१ ।
आदौ मरीचं भुक्त्वा तु दुग्धपानं [३]महाबलम् ।
चर्वयित्वा मरीचं तु दुग्धपानं महाबलम् ।। ६२ ।
कृष्णबीजं समुद्धृत्य कामेश्वरीमनुं ततः ।
[४]शिवबीजद्वयं पश्चात् [५]कृष्णगोवसवासिनी ।। ६३ ।
योगविग्रहमुद्धृत्य मम कामप्रसाधिनि ।
तत्पश्चाद् [६]योगसिद्धीनामीश्वरि क्षेत्रवासिनि[७] ।। ६४ ।
शरीरं वसमन्ते च चालयद्वयमेव च ।
विघ्नान् वारय युग्मं तु स्वाहान्तोऽयं महामनुः ।। ६५ ।
द्वादशवारमुच्चार्य चाथवा पञ्चवारकम् ।
वारत्रयं [८]मुदा शोध्य सर्वत्रायं विधिः स्मृतः ।। ६६ ।
यदि पिबेत् खेचरत्वं तथा दुग्धं द्विपादकम् ।
यदि चेत् केवलं दुग्धं तदा प्रस्थं चतुर्दश ।। ६७ ।

---

१. समारभेत्–ख०; २. प्रमाणमिति–ख०; ३. महाफलम्–ख०; ४. त्रयम्–ख० ।
५. गोरस–ख०; ६. ईश्वरी–ख०; ७. वासिनी–ख०; ८. मृदा–ख० ।

लघ्वाहारी महाज्ञानी पञ्चमादिविरागवित् ।
मणिपुरे मनोयोगं समाकृत्यामरो भवेत् ।। ६८ ।
चतुर्वर्गः करे तस्य यो मणेः पीठमाश्रयेत् ।

[1]श्रीआनन्दभैरव उवाच—

मणिपुरभेदनार्थं मनोयोगसुसिद्धये ।। ६९ ।
खेचरादिमहायोगसिद्धये सर्वसिद्धये ।
मृत्युञ्जयस्य देवस्य रुद्रशक्त्याश्च दर्शनात् ।। ७० ।
तथा पीठस्थिरार्थाय कालजालवसाय च ।
सहस्रनामबीजानि चाष्टोत्तरशतानि च ।। ७१ ।
मृत्युञ्जयस्य लाकिन्याः स्तोत्रं [2]मकारकूटकम् ।
कथयस्व [3]वरारोहे यदि स्नेहोऽस्ति मां प्रति ।। ७२ ।
ज्ञानदे परमेशानि शरीरं मम रक्षतु ।। ७३ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने [4]सिद्धमन्त्रप्रकरणे भैरवभैरवीसंवादे मणिभेदप्रकाशो नाम पञ्चाशत्तमः पटलः ।।

---

१. आनन्दभैरवो उवाच–ख०; २. परमदुर्लभम्–ख०; ३. वरावोहे-ख० ।
४. सिद्धिमन्त्र ''''''षट्चक्रप्रकाशे''''''मणिपूरभेदप्रकाशे एकपञ्चाशत्तमः पटलः–ख० ।

अथैकपञ्चाशत्तमः पटलः

आनन्दभैरवी उवाच—

अथ सम्भेदनार्थाय वक्ष्ये षट्पङ्कजस्य च ।
महारुद्रस्य देवस्य[1] श्रीश्रीमृत्युञ्जयस्य च ॥ १ ।

लाकिनीशक्तिसहितं सहस्रनाममङ्गलम् ।
अष्टोत्तरशतव्याप्तं निगूढं भव[2] सिद्धये ॥ २ ।

धारयित्वा पठित्वा च श्रुत्वा वा नाममङ्गलम् ।
शृणुष्व परमानन्द योगेन्द्र चन्द्रशेखर ॥ ३ ।

तवाह्लादप्रणयनात् सर्वसम्पत्तिप्राप्तये[3] ।
मणियोगसुसिद्ध्यर्थं सावधानाऽवधारय ॥ ४ ।

[4]अष्टोत्तरसहस्रनाममङ्गलस्य कहोडऋषि-
र्गायत्रीच्छन्दो महारुद्रमृत्युञ्जयलाकिनी-
सरस्वतीदेवता सर्वाभीष्टशचीपीठयोगसिद्ध्यर्थे
विनियोगः ॥

ॐ मृत्युञ्जय रुद्रादि लाकिन्यादि सरस्वती ।
मृत्यु[5]जेता महारौद्री महारुद्रसरस्वती ॥ ५ ।

महारौद्रो मृत्युहरो महामणिविभूषिता ।
महादेवो महावक्त्रो महामाया महेश्वरी ॥ ६ ।

महावीरो महाकालो महाचण्डेश्वरी[6] स्नुषा ।
[7]महावातो महाभेदो वीरभद्रा महातुरा ॥ ७ ।

---

१. च–ख०; २. तव–ख०; ३. प्रियाप्तये–ख० ।
४. अस्य अष्टोत्तरशतसहस्रनाममङ्गलस्य महाविष्णुः...............मणिपीठयोनिसिद्धयर्थे विनियोगः–ख०; ५. मृत्युतेजो–ख० ।
६. चण्डेश्वरीश्वराः–ख०; ७. महारात्रो महाभद्रो वीरभद्रा महान्तरा–ख० ।

महाचण्डेश्वरो मीनो मणिपूरप्रकाशिका ।
महामत्तो [1]महारात्रो महावीरासनस्थिता ॥ ८ ।

मायावी मारहन्ता च मातङ्गो मङ्गलेश्वरी ।
मृत्युहारी मुनिश्रेष्ठा मनोहारी मनोयवा ॥ ९ ।

[2]मण्डलस्थो मनीलाङ्गो मान्या मोहनमौलिनी ।
मत्तवेशो महाबाणो [3]महाबला महालया ॥ १० ।

मारी हारी महामारी मदिरामत्तगामिनी ।
महामायाश्रयो मौनी [4]महामाया मरुत्प्रिया ॥ ११ ।

[5]मुद्राशी मदिरापी च मनोयोगा महोदया ।
मांसाशी मीनभक्षश्च मोहिनी मेघवाहना ॥ १२ ।

मानभङ्गप्रियो मान्या[6] महामान्यो महाबला ।
महाबाणधरो[7] मुख्यो महाविद्या महीयसी ॥ १३ ।

महाशूलधरोऽनन्तो[8] महाबली महाकुला ।
मलयाद्रिनिवासी च [9]मतिर्मालासनप्रिया ॥ १४ ।

मायापतिर्महारुद्रो मरुणाहतकारिणी[10] ।
मालाधारी[11]शङ्खमाली मञ्जरी मांसभक्षिणी ॥ १५ ।

महालक्षणसम्पन्नो महालक्षणलक्षणा ।
महाज्ञानी महावेगी मौषली मुषलप्रिया ॥ १६ ।

[12]महोख्यो मालिनीनाथो मन्दराद्रिनिवासिनी ।
[13]मौनीनामन्तरस्थश्च मानभङ्गा[14]मनःस्विनी ॥ १७ ।

महाविद्यापतिर्मध्यो [15]मध्ये पर्वतवासिनी ।
मदिरापो मन्दहरो मदनामदनासना ॥ १८ ।

---

१. महामत्ता–ख०; २. मण्डलस्थो मलानन्दो–ख०; ३. महाबालो महाबाला–ख० ।
४. महानन्दा–ख०; ५. मुद्रापी–ख०; ६. मान्यो–ख० ।
७. धरामुख्या–ख०; ८. मत्ता महावाणी–ख०; ९. महिमा चानलप्रिया–ख० ।
१०. कामिनी–ख०; ११. शङ्खपालो–ख०; १२. महाक्षो–ख० ।
१३. मुनीनाम्–ख०; १४. मलम्बिनी–ख०; १५. मध्य–ख० ।

मदनस्थो मदक्षेत्रो महाहिमनिवासिनी ।
महान् महात्मा माङ्गल्यो महामङ्गलधारिणी ।। १९ ।

[1]महाहीनशरीरश्च [2]मनोहरतदुद्भवा ।
मायाशक्तिपतिर्मोहा[3] महामोहनिवासिनी ।। २० ।

महच्चित्तो निर्मलात्मा [4]महतामशुचिस्थिता ।
मत्तकुञ्जरपृष्ठस्थो मत्तकुञ्जरगामिनी ।। २१ ।

मकरो मरुतानन्दो माकरी [5]मृगपूजिता ।
[6]मणोपूज्या मनोरूपी मेदमांसविभोजिनी ।। २२ ।

[7]महाकामो महाधीरो महामहिषमर्दिनी ।
महिषासुरबुद्धिस्थो महिषासुरनाशिनी ।। २३ ।

महिषस्थो [8]महेशस्थो मधुकैटभनाशिनी ।
मधुनाथश्च मधुपो मधुमांसादिसिद्धिदा ।। २४ ।

महाभैरवपूज्यश्च महाभैरवपूजिता ।
महाकान्तिप्रियानन्दो महाकान्तिस्थितामरा ।। २५ ।

मालाकोटिधरो [9]मालो मुण्डमालाविभूषिता ।
मण्डलज्ञाननिरतो मणिमण्डलवासिनी ।। २६ ।

[10]महाविभूतिक्रोधस्थो मिथ्यादोषसरस्वती ।
मेरुस्थो मेरुनिलयो [11]मैनाकानुजरूपिणि ।। २७ ।

महाशैलासनो [12]मेरुमोहिनी मेघवाहिनी ।
मञ्जुघोषो मञ्जुनाथो[13]मोहमुद्गरधारिणी ।। २८ ।

[14]मेढ्रस्थो मणिपीठस्थो मूलरूपा मनोहरा ।
मङ्गलार्थो महायोगी [15]मत्तमेहसमुद्भवा ।। २९ ।

---

१. मायाहोनशरीरश्च–ख०; २. मनोहरतनूद्भवा–ख०; ३. मोहो–ख० ।
४. महतामायुषि स्थितिः–ख०; ५. मृकु–ख०; ६. मुनिपूज्यो-ख० ।
७. महाकामो–ख०; ८. महिषारिः–ख०; ९. मायो मृत्युमाला–ख० ।
१०. कोध्रस्थामिथ्यादोष–ख०; ११. मैनाकालय–ख०; १२. मेदिनीमेघवाहना–ख० ।
१३. मोहमुग्घवरासिनी–ख०; १४. मेरुस्थो–ख०; १५. मत्तदेह–ख० ।

[1]मतिस्थितो मनोमानो मनोमाता महोन्मनी ।
मन्दबुद्धिहरो मृत्युर्मृत्युहन्त्री मनःप्रिया ॥ ३० ।
महाभक्तो महाशक्तो [2]महाशक्तिर्मदातुरा ।
मणिपुरप्रकाशश्च मणिपुरविभेदिनी ॥ ३१ ।
[3]मकारकूटनिलयो माना मानमनोहरी ।
माक्षरो मातृकावर्णो मातृकाबीजमालिनी ॥ ३२ ।
महातेजा महारश्मिर्मन्युगः[4] स्यान्मधुप्रिया ।
मधुमांससमुत्पन्नो मधुमांसविहारिणी ॥ ३३ ।
मैथुनानन्दनिरतो [5]मैथुनालापमोहिनी ।
मुरारिप्रेमसन्तुष्टो [6]मुरारिकरसेविता ॥ ३४ ।
माल्यचन्दनदिग्धाङ्गो मालिनीमन्त्रजीविका ।
मन्त्रजालस्थितो मन्त्री मन्त्रिणां मन्त्रसिद्धिदा ॥ ३५ ।
मन्त्रचैतन्यकारी च मन्त्रसिद्धिप्रिया सती ।
महातीर्थप्रियो मेषो[7] महासिंहासनस्थिता ॥ ३६ ।
[8]महाक्रोधसुसम्पन्नो महती बुद्धिदायिनी ।
मरणज्ञानरहितो महामरणनाशिनी ॥ ३७ ।
मरणोद्भूतहन्ता च महामुद्रान्विता मुदा ।
महामोदकरो मारो मारस्था मारनाशिनी ॥ ३८ ।
[9]महाहेतुहरो हर्ता महापुरनिवासिनी ।
महाकौलिकपालश्च [10]महादैत्यनिवारिणी ॥ ३९ ।
मार्तण्डकोटिकिरणो मृतिहन्त्री मृतिस्थिता ।
[11]महाशैलोऽमलो मायी महाकालगुणोदया ॥ ४० ।

---

१. मतिस्थाता मनोमादी–ख०; २. मदान्तरा–ख० ।
३. मंकार……मणिमाला–ख०; ४. महातेजो…… मन्दहास्या–ख० ।
५. मैथुनाह्लादहारिणी–ख०; ६. स्मरारि–ख०; ७. मेचो–ख०; ८ समुत्पन्नो–ख० ।
९. मार्गो–ख०; १०. निवासिनी–ख०; ११. शैलासनो मायी–ख० ।

महाजयो महारुद्रो महारुद्रारुणाकरा ।
[1]मनोवर्णमृजोमाख्यो मुद्रा तरुणरूपिणी ॥ ४१ ॥

मुण्डमालाधरो [2]मार्यो मार्यपुष्पमृजामनी ।
मङ्गलप्रेमभावस्था[3] महाविद्युत्प्रभाचला ॥ ४२ ॥

[4]मुद्राधारी मतस्थैर्यो मतभेदप्रकारिणी ।
महापुराणवेत्ता च महापौराणिकामृता ॥ ४३ ॥

मौनविद्यो [5]महाविद्या महाधननिवासिनी ।
मघवा माघमध्यस्था[6] महासैन्या महोरगा ॥ ४४ ॥

महाफणिधरो मात्रा[7] मातृका मन्त्रवासिनी ।
महाविभूतिदानाढ्यो मेरुवाहनवाहना ॥ ४५ ॥

महाह्लादो महामित्रो महामैत्रेयपूजिता ।
मार्कण्डेयसिद्धिदाता मार्कण्डेयायुषिस्थिता ॥ ४६ ॥

मार्कण्डेयो मुहुः[8] प्रीतो मातृका मण्डलेश्वरी ।
[9]मानसंस्थो मानदाता मनोधारणतत्परा ॥ ४७ ॥

मयदानवचित्तस्थो मयदानवचित्रिणी ।
महागुणधरानन्दो [10]महालिङ्गविहारिणी ॥ ४८ ॥

महेश्वरस्थितो मूलो मूलविद्याकुलोदया ।
मायापो मोहनोन्मादी[11] महागुरुनिवासिनी ॥ ४९ ॥

महाशुक्लाम्बरधरो मलयागुरुधूपिता ।
[12]मधूपिनीमधूल्लासो माध्वीरससमाश्रया ॥ ५० ॥

महागुरुर्महादेहो महोत्साहा [13]महोत्पला ।
मध्यपङ्कजसंस्थाता मध्याम्बुजनिवासिनी[14]॥ ५१ ॥

---

१. मनोवर्त्ममृजोमाख्यो–ख०; २. माद्या मा च पुष्पमृजामला–ख०; ३. भावस्थो–ख० ।
४. मात्राधारो मतेस्थैर्यो–ख०; ५. महामन्त्रो–ख०; ६. मासस्थो महाशैत्या–ख० ।
७. मायो...... यन्त्रवासिनी–ख०; ८. मृकुप्रीतो–ख०; ९. मानसस्थो–ख० ।
१०. महानिन्दा–ख०; ११. मोहनन्यासी–ख०; १२. मधुपेशो–ख० ।
१३. महोल्वणा–ख०; —'महोत्पला' इति पाठे तु महान्ति उत्पलानि यस्यां सा इति विग्रहे बहुव्रीहिः । 'महोल्वणा' इति पाठे तु महदुल्वणं यस्यां सा इति लौकिके विग्रहे साधुता बोध्या; १४. विनोदिनी–ख० ।

मारीभयहरो मल्लो मल्लग्रहविरोधिनी ।
[1]महामुण्डलयोन्मादी मदघूर्णितलोचना ।। ५२ ।
[2]महासद्योजातकालो महाकपिलवर्तिनी ।
[3]मेघवाहो महावक्त्रो मनसामणिधारिणी ।। ५३ ।
मरणाश्रयहन्ता च [4]महागुर्वीगणस्थिता ।
महापद्मस्थितो मन्त्रो[5] मन्त्रविद्यानिधीश्वरी ।। ५४ ।
मकरासनसंस्थाता[6] महामृत्युविनाशिनी ।
मोहनो मोहिनीनाथो मत्त [7]नर्तनवासिनी ।। ५५ ।
[8]महाकालकुलोल्लासी महाकामादिनाशिनी ।
मूलपद्मनिवासी च महामूलकुलोदया[9] ।। ५६ ।
मासाख्यो[10]मासनिलया मङ्गलस्था महागुणा ।
मायाच्छन्नतरो[11] मोनो मीमांसागुणवादिनो ।। ५७ ।
मीमांसाकारको मायी मार्जारसिद्धिदायिनी ।
मेदिनीवल्लभक्षेमो मेदिनीज्ञानमोदिनी[12]।। ५८ ।
मौषलीशो [13]मृषार्थस्थो मनःकल्पितकेशरी ।
मनसः श्रीधरो जापो[14]मन्दहाससुशोभिता ।। ५९ ।
मैनाको मेनकापुत्रो मायाच्छन्ना[15]महाक्रिया ।
महाक्रिया[16]च लोमाण्डो मण्डलासनशोभिता ।। ६० ।
मायाधारणकर्ता च महाद्वेषविनाशिनी ।
[17]मुक्तकेशी मुक्तदेहो मुक्तिदा मुक्तिमानिनी ।। ६१ ।

---

१. मण्डलयोन्यादि–ख०; २. महासह्यो मत्तकालो–ख० ।
३. मेषावहो–ख०; ४. महागुरू–ख०; ५. मन्त्री मन्त्रविद्याविधीश्वरी–ख० ।
६. संस्थश्च–ख; ७. मण्डल–ख०; ८. कुलश्रीशो–ख० ।
९. फलोदया–ख०; १०. माननिलयो–ख०; ११. हरो····वासिनी–ख० ।
१२. भेदिनी–ख०; १३. मुषार्थस्थो–ख० ।
१४. मन्दाहहासशोभिता–ख० ।—मन्देन हासेन सुशोभिता, कर्मधारयगर्भस्तृतीयातत्पुरुषः । 'मन्दाहहासशोभिता' इति पाठे तु मन्दमह्नोतीति व्याप्नोतीति मन्दाहः, स चासौ हासश्चेति कर्मधारयः ।
१५. महत्क्रिया–ख०; १६. महाक्रियश्च लोमार्णो–ख०; १७. मुक्ताकाशो मुक्तदेहो–ख० ।

मुक्ताहारधरो मुक्तो मुक्तिमार्गप्रकाशिनी ।
महामुक्ति क्रियाच्छन्नो[1] महोच्चगिरिनन्दिनी ॥ ६२ ।

मूषलाद्यस्त्रहन्ता[2] च महागौरीमनःक्रिया ।
महाधनी महामानी मनोमत्ता[3] मनोलया ॥ ६३ ।

महारणगतः [4]सान्तो महावीणाविनोदिनी ।
महाशत्रुनिहन्ता च महास्त्रजालमालिनी ॥ ६४ ।

[5]शिवो रुद्रो वलीशानी कितवामोदवर्द्धिनी ।
[6]चन्द्रचूडाधरो वेदो मदोन्मत्ता महोज्ज्वला ॥ ६५ ।

विगलत्कोटिचन्द्राभो विधुकोटिसमोदया ।
अग्निज्वालाधरो वीरो ज्वालामालासहस्रधा ॥ ६६ ।

भर्गप्रियकरो धर्मो महाधार्मिकतत्परा ।
धर्मध्वजो धर्मकर्ता धर्मगुप्तिप्रसृत्त्वरी ॥ ६७ ।

महाविद्रुमपूरस्थो विद्रुमाभायुतप्रभा ।
पुष्पमालाधरो मान्यः शत्रूणां कुलनाशिनी ॥ ६८ ।

[7]कोजागरो विसर्गस्थो बीजमालाविभूषिता ।
[8]बोजचन्द्रो बीजपुरो बीजाभा विघ्ननाशिनी ॥ ६९ ।

[9]विशिष्टो विधिमोक्षस्थो वेदाङ्गपरिपूरिणी ।
किरातिनीपतिः श्रीमान् विज्ञाविज्ञजनप्रिया ॥ ७० ।

[10]वर्धस्थो वर्धसम्पन्नो वर्णमालाविभूषिता ।
महाद्रुमगतः शूरो विलसत्कोटिचन्द्रभा ॥ ७१ ।

---

१. क्रमाच्छन्नो महागिरिनिवासिनी–ख० ।
२. हस्तश्च········प्रिया–ख०; ३. मनोन्मत्ता–ख०; ४. मान्तो–ख०;
५. महारुद्रो महाशाल–ख०; ६. चन्द्रचूणाधरो इत्यतो विद्रुमाभायुतप्रभापर्यन्तः पाठ – ख० पुस्तके नास्ति; ७. कोजागरा विसर्गस्था इति–ख० ।—को जागर्ति इति विवरणे कोजागरो विसर्गस्थ इत्यादि बोध्यम् ।
८. बीजचन्द्रा–ख०; ९. विशिष्टा विधिमोक्षस्था–ख० ।
१०. वर्गस्थो वर्गसम्पर्को वर्गमालाविभूषिता–ख० ।

महाकुमारनिलयो महाकामकुमारिका ।
कामजालक्रियानाथो [1]विकला कमलासना ॥ ७२ ।

खण्डबुद्धिहरो भावो भवतीति [2]दुरासना ।
असंख्यको रूपसंख्यो नामसंख्यादिपूरणी ॥ ७३ ।

[3]सद्मनाद्यमनाः कोषकिङ्किणीजालमालिनी ।
[4]चन्द्रायुतमुखाम्भोजो विभायुतसमानना ॥ ७४ ।

कालबुद्धिहरो [5]बालो भगवत्यम्बिकाण्डजा ।
[6]मुण्डहस्तश्चातुराद्यः विवादरहितावृता ॥ ७५ ।

पञ्चमाचारकुशलो महापञ्चमलालसा ।
[7]विकारशून्यो दुर्धर्षो द्विपदा मानुषक्रिया ॥ ७६ ।

मयदानवकर्मस्थो विधातृकर्मबोधिनो ।
कलिकालक्रियारूढो वायवीघर्घरध्वनिः ॥ ७७ ।

सर्वसञ्चारकर्ता च सर्वसञ्चारकर्त्रिका ।
मन्दमन्दगतिप्रेमा मन्दमन्दगतिस्थिता ॥ ७८ ।

[8]साट्टहासो विधुकला चाघोराघोरयातना ।
महानरकहर्ता च [9]नरकादिविपाकहा ॥ ७९ ।

पञ्चरश्मिसमुद्भूतो [10]नगादिबलघातिनी ।
[11]गरुडासनसंपूज्यो गरुडप्रेमवर्धिनी ॥ ८० ।

अश्वत्थवृक्षनिलयो वटवृक्षतलस्थिता ।
[12]चिराङ्गो प्रथमाबुद्धिः प्रपञ्चसारसङ्गतिः ॥ ८१ ।

---

१. विफला–ख०; २. भवभीतिदुरापहा–ख० ।
३. कम्बलाद्यासनः–ख० । —कम्बलादि असनं क्षेपणं यस्य । असु क्षेपणे ल्युडन्तः । 'सद्मनाद्यपना' इति पाठे तु सद्मनादि अमनो यस्येत्यर्थो बोध्यः ।
४. चन्द्रयुक्तमुखाम्भोजो–ख०; ५. कालो–ख०; ६. अण्डस्थको अण्डबाह्यस्थो–ख० ।
७. वृरन्ये–ख०; ८. साट्टहासो विधुकलशः–ख०; ९. विनाशिनी–ख० ।
१०. रणघातिनी–ख०; ११. संयुक्ता–ख०; १२. चित्राङ्ग–ख० ।

स्थितिकर्ता स्थितिच्छाया विमदा च्छत्रधारिणी।
दाडिमाभासकुसुमो दाडिमोद्भवपुष्पिका ॥ ८२ ।
[1]द्राढ्यो द्रवीभरतिका रतिकालापवर्धिनी ।
रत्नगर्भो रत्नमाला रत्नेश्वर इवागतिः ॥ ८३ ।
[2]प्रसिद्धः पावनी पुच्छा पुच्छसुस्थः परापरा ।
खेचरी खेचरः [3]स्वस्थो महाखड्गधरा जया ॥ ८४ ।
किशोरभावखेलस्थो [4]विखनादिप्रकारिका ।
महाशब्दप्रकाशश्च महाशब्दप्रकाशिका ॥ ८५ ।
चारुहासो विपद्हन्ता शत्रुमित्रगणस्थिता ।
वज्रदण्डधरो व्याघ्रो वियत्खेलनखञ्जना ॥ ८६ ।
गदाधरः [5]शीलधारी शशिकूर्परगाबला ।
वसनासनकारी च वसनावसनप्रिया ॥ ८७ ।
महाविद्याधरो गुप्तो विशिष्टगोपनक्रिया ।
[6]गुप्तगीतागायनस्थो गुप्तशास्त्रगलप्रदा[7] ॥ ८८ ।
योगविद्यापुराणश्च यागविद्या विभाकला ।
एककालो द्विकालश्चात्र[8] कालफलाम्बुजा ॥ ८९ ।
अष्टादशभुजो रौद्रो भुजगा विघ्ननाशिनी ।
विद्यागोपनकारी च विद्यासिद्धिप्रदायिनी ॥ ९० ।
विजयानन्दगो मन्दो महाकालमहेश्वरी ।
[9]भूतिदानरतो मार्गो महद्गीताप्रकाशिनी ॥ ९१ ।
[10]केशाद्यावेशसन्तानो मङ्गलाभा कुलान्तरा ।
द्विभुजो वेदबाहुश्च षड्भुजा कामचारिणी ॥ ९२ ।

---

१. द्राढ्या द्रविणदेशस्था–ख०; २. प्रसिद्धा पावनी····सुस्थ सर्गपराचरा–ख० ।
३. सुस्थो···घराघ्यया–ख०; ४. विखलादि–ख०; ५. शूलधारो–ख०; ६. गुप्तगीतो–ख० ।
७. गुप्तं यच्छास्त्रं तस्य गलमन्तर्देशं मुखं वा प्रदयते रक्षति या सा, "आतश्चोपसर्गे" इति कर्तरि कप्रत्यये साधुत्वम् ।
८. त्रिकालफलाम्बुदा–ख०; ९. भूरि···महागीताप्रकाशिनी–ख०; १०. वेशाद्यावेश–ख० ।

चन्द्रकान्तमाल्यधरो[1] लोकातिलोकरागिणी ।
त्रिभङ्गदेहनिकरो विभाङ्ग[2]स्था विनोदिनी ॥ ९३ ।
त्रिकूटस्थस्त्रिभावस्थस्त्रिशरीरा[3] त्रिकालजा ।
एकवक्त्रो द्विवक्त्रश्च वक्त्रशून्या शिशुप्रिया ॥ ९४ ।
श्रीविद्यामन्त्रजालस्थो विज्ञानी कुशलेश्वरी ।
[4]घटासरगतो गौरा गौरवो गौरिकाचला ॥ ९५ ।
गुरुज्ञानगतो गन्धो गन्धभोग्या गिरिध्वजा ।
[5]छायामण्डलमध्यस्थो विकटा पुष्करानना ॥ ९६ ।
कामाख्यो निरहङ्कारः [6]कामरूपनृपाङ्गजा ।
सुलभो दुर्लभो [7]दुःखी सूक्ष्मातिसूक्ष्मरूपिणी ॥ ९७ ।
[8]बीजजापपशोः क्रूरो विमोहगुणनाशिनी ।
[9]अर्धरो निपुणोल्लाशो विभुरूपा सरस्वती ॥ ९८ ।
[10]अनन्तघोषनिलयो विहङ्गगणगामिनी ।
अच्युतेशः प्रकाण्डस्थः प्रचण्डफालवाहिनी[11]॥ ९९ ।
अभ्रान्तो भ्रान्तिरहिता[12]श्रान्तो यान्ति प्रतिष्ठिता।
अव्यर्थो व्यर्थवाक्यस्थो[13]विशङ्काशङ्कयान्विता ॥ १०० ।
यमुनापतिपः पीनो महाकालवसावहा ।
जम्बुद्वीपेश्वरः पारः [14]पारावारकृतासनी ॥ १०१ ।
वज्रदण्डधरः शान्तो मिथ्यागतिरतीन्द्रिया ।
अनन्तशयनो [15]न्यूनः परमाह्लादवर्धिनी ॥ १०२ ।

---

१. अलकातिलकरागिणी–ख०; २. विभङ्गस्था–ख०; ३. त्रितारस्थस्त्र्यशरेणुस्त्रिकालजा–ख० ।
४. घटासवगतो गौगो गौरवी गौरिकाचला–ख०; ५. हारमण्डल–ख० ।
६. कामाकामविकाशजा–ख० । —कामेन स्वेच्छया रूपं यस्य सनृपस्तस्याङ्गाज्जाता इति कामरूपनृपाङ्गजा इति ।
७. दुर्लभाक्षीण–ख० ।
८. श्रीबीजजापको क्रूरो–ख०; ९. अकुलोऽतिकुलोद्वासो–ख०; १०. अनन्ताघारनिलयो–ख० ।
११. फलवासिनी–ख०; १२. भ्रान्तिरहितो भ्रान्तो भ्रान्ति–ख०; १३. बाह्यस्थो–ख० ।
१४. पारापारहुतासनी–ख०; १५. शयनोन्मूलः ।

[1]शिष्टाश्रणिलयो व्याख्यो वसन्तकालसुप्रिया ।
विरजान्दोलितो भिन्नो विशुद्धगुणमण्डिता ॥ १०३ ।
[2]अञ्जनेशः खञ्जनेशः पललासवभक्षिणी[3] ।
अङ्गभाषाकृतिस्नाता[4] सुधारसफलातुरा ॥ १०४ ।
फलबीजधरो दौर्गो द्वारपालनपल्लवा ।
पिप्पलादः[5] कारणश्च विख्यातिरतिवल्लभा ॥ १०५ ।
संहारविग्रहो विप्रो [6]विषण्णा कामरूपिणी ।
अवलापो नापनापो[7] विक्लृप्ता कंसनाशिनी ॥ १०६ ।
हठात्कारेण[8] तो चामो नाचामो विनयक्रिया ।
सर्वः सर्वसुखाच्छन्नो[9] जिताजितगुणोदया ॥ १०७ ।
भास्वत्किरीटो [10]राङ्कारी वरुणेशीतलान्तरा ।
अमूल्यरत्नदानाढ्यो दिवारात्रिस्त्रिखण्डजा ॥ १०८ ।
मारबीजमहामानो[11] हरबीजादिसंस्थिता ।
अनन्तवासुकीशानो लाकिनी काकिनी द्विधा ॥ १०९ ।
कोटिध्वजो बृहद्गर्गश्चामुण्डा रणचण्डिका ।
उमेशो रत्नमालेशी विकुम्भगणपूजितः ॥ ११० ।
निकुम्भपूजितः कृष्णो विष्णुपत्नी सुधात्मिका ।
[12]अल्पकालहरः कुन्तो महाकुन्तास्त्रधारिणी ॥ १११ ।
ब्रह्मास्त्रधारकः क्षिप्तो[13] वनमालाविभूषिता ।
एकाक्षरो द्व्यक्षरश्च षोडशाक्षरसम्भवा ॥ ११२ ।

---

१. सिताभ्रनिलयो ध्येयो; २. आञ्जनेशः खाण्डनेशः-ख० ।
३. पललं च आसवश्चेति पललासवम् 'मांसमद्यम्', तद् भक्षयति तच्छीला, कर्तरि णिनिप्रत्ययः ।
४. कृतस्नानः सुधारस कलान्तरा-ख०; ५. पिघलादो वारुणश्च विख्याता-ख० ।
६. विषणा-ख०; ७. लापलापो-ख० ।
८. हठात्कारगती चाभो वाचामो विनयप्रिया-ख०; ९. सर्वकालसुखाच्छन्नो-ख० ।
१०. झङ्कारी करणेशी-ख०; ११. महामानी-ख० ।
१२. कल्पकालहरो कुम्भो महाकुम्भास्त्र-ख०; १३. क्षिप्रो-ख० ।

अतिगम्भीरवातस्थो महागम्भीरवाद्यगा ।
त्रिविधात्मा[1]त्रिदेशात्मा [2]तृतीया त्राणकारिणी ।। ११३ ।

कियत्कालचलानन्दो[3] विहङ्गगमनासना ।
गीर्वाणो बाणहन्ता[4] च बाणहस्ता विधूच्छला ।। ११४ ।

बिन्दुधर्मोज्ज्वलोदारो वियज्ज्वलनकारिणी ।
विवासा[5] व्यासपूज्यश्च नवदेशीप्रधानिका ।। ११५ ।

विलोलवदनो वामो[6] विरोमा मोदकारिणी ।
हिरण्यहारभूषाङ्गः [7]कलिङ्गनन्दिनीशगा ।। ११६ ।

अनन्यक्षीणवक्षश्च क्षितिक्षोभविनाशिका ।
क्षणक्षेत्रप्रसादाङ्गो [8]वशिष्ठादिऋषीश्वरी ।। ११७ ।

रेवातीरनिवासी च गङ्गातीरनिवासिनी ।
[9]चाङ्गेशः पुष्करेशश्च व्यासभाषाविशेषिका ।। ११८ ।

[10]अमलानाथसंज्ञश्च रामेश्वरसुपूजिता ।
रमानाथः प्रभुः प्राप्तिः कीर्तिदुर्गाभिधानिका[11] ।। ११९ ।

लम्बोदरः प्रेमकालो लम्बोदरकुलप्रिया ।
[12]स्वर्गदेहो ध्यानमानो लोचनायतधारिणी ।। १२० ।

अव्यर्थवचनप्रक्ष्यो[13] विद्यावागीश्वरप्रिया ।
[14]अब्दमानस्मृतिप्राणः कलिङ्गनगरेश्वरी ।। १२१ ।

---

१. त्रिदिवेशस्त्रिदशात्मा–ख० ।

२. त्रिदेशात्मा इत्यस्य स्थाने दशात्मा इति पाठो युक्तः । तिस्रो दशा अवस्था भवन्ति येषां ते त्रिदशा देवाः, तेषामात्मा ।

३. बलानन्दो......मार्गनासना–ख०; ४. बाणहस्तश्च–ख०; ५. विरामव्यासपूज्यश्च–ख० ।

६. व्यासो विरामो–ख०; ७. कलिन्दनन्दिनीनगा–ख०; ८. विशिष्टानामधीश्वरी–ख० ।

९. गङ्गेशः–ख०; १०. आतुरानाथसंज्ञश्च–ख०; ११. कीर्तिश्रद्धाभिधारिणी–ख० ।

१२. अर्धदेहो–ख०; १३. प्राज्ञो तथा–ख०;

१४. ॐ ॐ अब्दमणेस्मृतिप्राणकलिङ्ग–ख० । —अब्दः कालो मानं प्रमाणं यस्य सः, स्मृतिः प्राणो यस्य सः । द्वयोः कर्मधारयः ।

[1]अतिगुह्यतरज्ञानी गुप्तचन्द्रात्मिकाव्यया ।
मणिनागगतो गन्ता वागीशानी बलप्रदा ॥ १२२ ।

कुलासनगतो नाशो [2]विनाशा नाशसुप्रिया ।
विनाशमूलः कूलस्थः संहारकुलकेश्वरी ॥ १२३ ।

त्रिवाक्यगुणविप्रेन्द्रो महदाश्चर्यचित्रिणी ।
आशुतोषगुणाच्छन्नो मदविह्वलमण्डला[3] ॥ १२४ ।

विरूपाक्षी लेलिहश्च महामुद्राप्रकाशिनी ।
अष्टादशाक्षरो रुद्रो मकरन्दसुबिन्दुगा ॥ १२५ ।

छत्रचामरधारी च छत्रदात्री त्रिपौण्ड्रजा[4] ।
इन्द्रात्मको विधाता च धनदा नादकारिणी[5] ॥ १२६ ।

कुण्डलोपरमानन्दो मधुपुष्पसमुद्भवा ।
बिल्ववृक्षस्थितो रुद्रो नयनाम्बुजवासिनी[6] ॥ १२७ ।

हिरण्यगर्भः कौमारो विरूपाक्षा [7]ऋतुप्रिया ।
श्रीवृक्षनिलयश्यामो महाकुलतरूद्भवा ॥ १२८ ।

कुलवृक्षस्थितो विद्वान् हिरण्यरजतप्रिया ।
कुलपः[8] प्राणपः प्राणा पञ्चचूडधराधरा ॥ १२९ ।

उषती वेदिकानाथो [9]नर्मधर्मविवेचिका ।
शीतलाशः शीतहीनो मनःस्थैर्यकरी क्षया ॥ १३० ।

कुक्षिस्थः क्षणभङ्गस्थो गिरिपीठनिवासिनी ।
[10]अर्धकायः प्रसन्नात्मा प्रसन्नवनवासिनी ॥ १३१ ।

---

१. ॐॐअतिभोजतरङ्गिणी गुप्तचक्रात्मिकात्मदा–ख०; २. त्रिनाशनाथ–ख० ।
३. सुन्दरी–ख०; ४. त्रिपुण्ड्रजा–ख०; ५. घनदानादि–ख०; ६. रागिणी–ख० ।
७. क्रतुप्रिया–ख०; ८. कुलेशः घरोघरा–ख० ।
९. धर्माधर्मविवेचका–ख० । —नर्म हास्यादि, धर्मो वेदविहितो विधिः, आगमविहितो विधिर्वा, तयोः विवेचिका ।
१०. स्वर्गकायः–ख० ।

प्रतिष्ठेशः[1] प्राणधर्मा ज्योतीरूपा ऋतुप्रिया ।
धर्मध्वजपताकेशो वलाका [2]रसवर्धिनी ॥ १३२ ।

मेरुशृङ्गगतो धूर्तो धूर्तमत्ता खलस्पृहा ।
सेवासिद्धिप्रदोऽनन्तोऽनन्तकार्यविभेदिका[3] ॥ १३३ ।

[4]भाविनामत्त्वजानज्ञो विराटपीठवासिनी ।
विच्छेदच्छेदभेदश्च [5]छलन्शास्त्रप्रकाशिका* ॥ १३४ ।

[6]चारुकर्म्या संस्कृतश्च तप्तहाटकरूपिणी ।
परानन्दरसज्ञानी रससन्तानमन्त्रिणी ॥ १३५ ।

प्रतीक्षः सूक्ष्मशब्दश्च प्रसङ्गसङ्गतिप्रिया ।
अमायी सागरोद्भूतो वन्ध्यादोषविवर्जिता ॥ १३६ ।

जितधर्मो [7]ज्वलच्छत्री व्यापिका फलवाहना ।
व्याघ्रचर्माम्बरो योगी महापीना[8] वरप्रदा ॥ १३७ ।

---

१. प्रतिष्ठेशः प्राणधर्मो ज्योतिरूपा भृगुप्रिया–ख० ।
२. शत–ख०; ३. कार्या विभेदिका–ख० ।
४. ब्रह्मबीजं ततः पश्चात्–ख०; ५. छलशास्त्रप्रकाशिका–ख० ।
* अन्येषां तोलकं चैकं संशोध्य भक्षणं चरेत् ।
पुनस्तेषां महाकालमनुं वक्ष्यामि तत्त्वतः ॥ १३२ ।
सकलं चामरायोगं मन्त्रेणानेन भक्षयेत् ।
तारद्वयं समुद्धृत्य श्रीयुग्मं तदनन्तरम् ॥ १३३ ।
विसर्गबिन्दुसंयुक्तं तत्पश्चादमृतामुखि ।
मारय हारय द्वन्द्वं योगसिद्धिं ततः परम् ॥ १३४ ।
देहि देहि पदस्यान्ते स्वाहान्तं मन्त्रमुत्तमम् ।
एतन्मन्त्रेण चोद्धृत्य मन्त्रयित्वा प्रभक्षयेत् ॥ १३५ ।
एतत्काण्डस्य मन्त्रं तु तत्रैव परियोजयेत् ।
निर्गुण्डो मन्त्रबीजेन्द्रं शृणु वक्ष्यामि भैरव ॥ १३६ ।
कामबीजत्रयं पश्चात् कालीबीजत्रयं तथा ।
सर्वयोगं ततः पश्चात् साधय द्वयमेव च ॥ १३७ ।
अमृतत्वं मयि शब्दं समर्पयद्वयं तथा । —इति ख० पुस्तके अधिकः पाठः ।
६. चारुकान्तालङ्कृतश्च सप्त–ख०; ७. कुलवृतो······भटवाहना–ख० ।
८. महापीठा बलप्रदा–ख० ।

वरदाता सारदाता ज्ञानदा [1]वरवाहिनी ।
चारुकेशधरो [2]मा पो विशाला गुणदाम्बरा ॥ १३८ ।

ताडङ्कमालानिर्मल[3]धरस्ताडङ्कमोहिनी ।
पञ्चालदेशसम्भूतो [4]विशुद्धस्वरवल्लभा ॥ १३९ ।

किरातपूजितो व्याधो मनुचिन्तापरायणा ।
शिववाक्यरतो [5]वामो भृगुरामकुलेश्वरी ॥ १४० ।

स्वयम्भुकुसुमाच्छन्नो विधिविद्याप्रकाशिनी ।
प्रभाकरतनूद्भूतो विशल्यकरणेश्वरी ॥ १४१ ।

उषतीश्वरसम्पर्की योगविज्ञानवासिनी ।
उत्तमो मध्यमो [6]व्याख्यो वाच्यावाच्यवराङ्गना ॥ १४२ ।

आंबीजवादरोषाढ्या[7] मन्दरोदरकारिणी ।
[8]कृष्णसिद्धान्तसंस्थानो युद्धसाधनचर्चिका ॥ १४३ ।

[9]मथुरासुन्दरीनाथो मथुरापीठवासिनी ।
पलायनविशून्यश्च प्रकृतिप्रत्ययस्थिता ॥ १४४ ।

प्रकृतिप्राणनिलयो विकृतिज्ञाननाशिनी ।
सर्वशास्त्रविभेदश्च मत्तसिंहासनासना ॥ १४५ ।

इतिहासप्रियो धीरो विमलामलरूपिणी ।
मणिसिंहासनस्थश्च मणिपूरजयोदया ॥ १४६ ।

भद्रकालीजपानन्दो भद्राभद्रप्रकाशिनी ।
श्रीभद्रो भद्रनाथश्च भयभङ्गविहिंसिनी ॥ १४७ ।

---

१. ज्ञानदानन्दवाहिनी–ख० ।
२. मान्यो·······विशालगुण–ख०; ३. निर्माल्य–ख०; ४. विशुद्धेश्वरवल्लभा–ख० ।
५. रामो–ख०; ६. वाच्यो····वराङ्गना ख०; ७. वोटाढ्यो–ख० ।
८. कृष्णसिद्धान्तेषु आगमोक्तसिद्धान्तेयु संस्थानं यस्य स इति विवेकः ।
९. मथुरेत्यतः मणिसिंहासनात्प्राक् श्लोकद्वयं 'ख'पुस्तके नास्ति ।

आत्मारामो विधेयात्मा शूलपाणिप्रियान्तरा ।
[1]अतिविद्यादृढाभ्यासो विशेषवित्त[2]दायिनी ॥ १४८ ॥

[3]अजरामरकान्तिश्च कान्तिकोटिधरा शुभा ।
पशुपालः पद्मसंस्थः श्रीशपाशुपतास्त्रदा ॥ १४९ ॥

सर्वशास्त्रधरो दृप्तो ज्ञानिनी ज्ञानवर्धिनी ।
द्वितीयानाथ ईशार्द्धो बादरायणमोहिनी ॥ १५० ॥

[4]शवमांसाशनो भीमो भीमनेत्रा भयानका ।
शिवज्ञानक्रमो दक्षः क्रियायोगपरायणा[5] ॥ १५१ ॥

दानस्थो[6] दानसम्पन्नो दन्तुरा पार्वतीपरा ।
प्रियानन्दो दिवाकर्ता निशानिषादघातिनी[7] ॥ १५२ ॥

अष्टहस्तो विलोलाक्षो मनःस्थापनकारिणी ।
मृदुपुत्रो मृदुच्छत्रो विभाङ्गपुण्यनन्दिनी[8] ॥ १५३ ॥

अन्तरिक्षगतो मूलो [9]मूलपुत्रप्रकाशिनी ।
अभीतिदाननिरतो विधुमालामनोहरी ॥ १५४ ॥

[10]चतुरास्रजाह्नवीशो गिरिकन्या कुतूहली ।
शिशुपालरिपुप्राणो विदेश[11]पदरक्षिणी ॥ १५५ ॥

[12]विलक्षणो विधिज्ञाता मानहन्त्री त्रिविक्रमा ।
त्रिकोणाननयोगीशो निम्ननाभिर्नगेश्वरी ॥ १५६ ॥

---

१. अभिविद्या–ख॰; २. विघि–ख॰ ।

३. अजरेत्यारभ्य ज्ञानवर्धिनीपर्यन्तं 'ख'पुस्तके नास्ति ।

४. मृगमांसाशनो–ख॰; ५. परायणाः–ख॰; ६. कुलस्थो दानसम्मानो–ख॰ ।

७. निशायां ये निषादाश्चाण्डालास्तान् घातयति तच्छीला । अथवा निशामन्धकारमज्ञानं निषादं चण्डालकर्म च घातयति तच्छीला ।

८. कुलनन्दिनी–ख॰; ९. मनःसूत्रप्रकाशिनी–ख॰; १०. चतुरस्रो हृषीकेशो घनि–ख॰ ।

११. विद्वेषिज्वरदायिनी-ख॰ ।

१२. विलक्षणो विध्येतरारभ्य ज्वरदायिनीपर्यन्तं 'ख'पुस्तके नास्ति ।

नवीनगुणसम्पन्नो नवकन्याकुलाचला ।
त्रिविधेशो विशङ्कतो विज्वरा ज्वरदायिनी ॥ १५७ ।

अतिधार्मिकपुत्रश्च चारुसिंहासनस्थिता ।
[1]स्थापकोत्तमवर्गाणां सतां सिद्धिप्रकाशिनी ॥ १५८ ।

सिद्धप्रियो[2] विशालाक्षो ध्वंसकर्त्री निरञ्जना ।
शक्तीशो विकलेशश्च क्रतुकर्मफलोदया ॥ १५९ ।

विफलेशो वियद्गामी ललिता बुद्धिवाहना ।
मलयाद्रितपःक्षेमः [3]क्षयकर्त्री रजोगुणा ॥ १६० ।

द्विरुण्डको द्वारपालो [4]बलेर्विघ्नविनाशिनी ।
मायापद्मगतो मानो [5]मारीविद्याविनाशिनी[6] ॥ १६१ ।

हिङ्गुलाजस्थितः सिद्धो विदुषां वादसारिणी[7] ।
श्रीपतीशः श्रीकरेशः श्रीविद्या भुवनेश्वरी ॥ १६२ ।

मतिप्रथमजो[8] धन्यो मिथिलानाथपुत्रिका ।
रामचन्द्रप्रियः प्राप्तो रघुनाथकुलेश्वरी ॥ १६३ ।

[9]कूर्मः कूर्मगतो वीरो वसावर्गा गिरीश्वरी ।
[10]राजराजेश्वरीबालो रतिपीठगुणान्तरा ॥ १६४ ।

कामरूपधरोल्लासो विदग्धा कामरूपिणी ।
अतिथीशः [11]सर्वभर्ता नानालङ्कारशोभिता ॥ १६५ ।

नानालङ्कारभूषाङ्गो [12]नरमालाविभूषिता ।
जगन्नाथो जगद्व्यापी जगतामिष्टसिद्धिदा ॥ १६६ ।

---

१. स्थापको गुणवर्गाणां–ख०; २. सिद्धिप्रियो–ख०; ३. क्षयकर्त्ता–ख० ।
४. नानाविघ्न–ख०; ५. मायी–ख० ।
६. मारी महामारी तत्सम्पादिका या विद्या, तां विनाशयति, तच्छीला ।
७. साधिनी–ख०; ८. प्रथमतो–ख० ।
९. कर्मकुलगतो धीरो वनदुर्गा गिरीश्वरी–ख०; १०. राजेश्वरो–ख० ।
११. सुखभर्ता–ख०; १२. वनमालाविभूषणा–ख० ।

जगत्कामो [1]जगद्व्यापी जयन्ती जयदायिनी ।
जयकारी जीवकारी [2]जयदा जीवनी जया ॥ १६७ ।

जयो गणेशः श्रीदाता [3]महापीठनिवासिनी ।
विषमः सामवेदस्थो यजुर्वेदांशयोगया ॥ १६८ ।

त्रिकालगुणगम्भीरो द्वाविंशतिकराम्बुजा[4] ।
सहस्रबाहुः [5]सारस्थो भागगा भवभाविनी ॥ १६९ ।

[6]भवनादिकरो मार्गो विनीता नयनाम्बुजा ।
सर्वत्राकर्षकोऽखण्डः सर्वज्ञानाभिकर्षिणी ॥ १७० ।

जिताशयो [7]जितविप्रः कलङ्कगुणवर्जिता ।
निराधारो निरालम्बो विषया ज्ञानवर्जिता ॥ १७१ ।

अतिविस्तारवदनो विवादखलनाशिनी ।
[8]भार्यानाथः क्षोभनाशो रिपूणां कुलपूजिता ॥ १७२ ।

[9]आशवो भूरिवर्गाणां चारुकुन्तलमण्डिता ।
अतिबुद्धिधरो सूक्ष्मो रजनीध्वान्तनाशिनी ॥ १७३ ।

ज्योत्स्नाजालकरो योगी[10]वियोगशायिनी युगा ।
युगगामी योगगामी[11]जयदा लाकिनी शिवा ॥ १७४ ।

संज्ञाबुद्धिकरो भावो भवभीतिविमोहिनी ।
सुन्दरः सुन्दरानन्दो रति[12]का रतिसुन्दरी ॥ १७५ ।

रतिज्ञानी रतिसुखो रतिनाथ[13]प्रकाशिनी ।
[14]बुद्धरूपी बोधमात्रो वैरोधो द्वैतवर्जिता ॥ १७६ ।

---

१. जगज्जायो जयन्ती–ख०; २. जीवनी जयी–ख०; ३. मञ्चपीठ–ख० ।
४. वेदांशमयाख्या–ख० । द्वाविंशतिः करा हस्ता अम्बुजानि कमलानि इव यस्याः सा ।
५. भावस्थो भावना–ख० ।
६. भवनादकरो मार्गो–ख०; ७. जितरिपुः कलङ्कदोषवर्जिता–ख० ।
८. आर्यनाथः·······कुलनाशिनी–ख०; ९. आश्रयो–ख०; १०. वियोगगामिनीयुता–ख० ।
११. जयदानकारी–ख०; १२. रतिकामातिसुन्दरी–ख०; १३. रतिसुख–ख० ।
१४. बुद्धिरूपी बोधमात्रा द्विबोधा द्वैतवर्जिता–ख० ।

भूरिभावहरानन्दो भूरिसन्तानदायिनी ।
यज्ञसाधनकर्ता च सुयज्ञः पञ्चमोचना[1] ॥ १७७ ॥

कोटिकोटिचन्द्रतेजः[2] कोटिकोटिरुचिच्छटा ।
कोटिकोटिचञ्चलाभो[3] द्विकोटचयुतचञ्चला ॥ १७८ ॥

कोटिसूर्याच्छन्नदेहः कोटिकोटिरविप्रभा ।
कोटिचन्द्रकान्तमणिः कोटीन्दुकान्तनिर्मला ॥ १७९ ॥

शतकोटिविधुमणिः शतकोटीन्दुकान्तगा ।
विलसत्कोटिकालाग्निः कोटिकालानलोपमा ॥ १८० ॥

कोटि[4]वह्निगतो वह्निवह्निजाया द्विगोद्भवा ।
महातेजोवह्निवारिः[5] कालाग्निहारधारिणी ॥ १८१ ॥

कालाग्निरुद्रो भगवान्[6] कालाग्निरुद्ररूपिणी ।
कालात्मा कलिकालात्मा कलिकाकुललाकिनी[7]॥ १८२ ॥

मृत्युजितो[8] मृत्युतेजा मृत्युञ्जयमनुप्रिया ।
महामृत्युहरो मृत्युरपमृत्युविनाशिनी ॥ १८३ ॥

जयो जयेशो जयदो जयदा जयवर्धिनी ।
जयकरो जगद्धर्मो जगज्जीवनरक्षिणी ॥ १८४ ॥

सर्वजित्सर्वरूपी च सर्वदा सर्वभाविनी ।
[9]इत्येतत् कथितं नाथ महाविद्याभिधानकम्[10]॥ १८५ ॥

---

१. परमासना–ख० । – परममासनं यस्याः सा 'पञ्चमोचना' इति पाठे तु पञ्चभ्यः शब्दादि विषयेभ्यो मोचयति या सा । नन्द्यादित्वाल्ल्युः प्रत्ययः, अनादेशः ।

२. तेजाः·······रविच्छटा–ख०; ३. चन्द्रनाभो द्विकोटियुत–ख० ।

४. कोटि कोटि वह्निनिभो–ख०; ५. राशिः–ख०; ६. कालाग्निरुद्रो–ख ।

७. कुलनाशिनी–ख०; ८. मृत्युजित् मृत्युजेता–ख० ।

९. ॐ ॐ ॐ ख०—पु० अधिकः पाठः ।

१०. महाविद्या अभिधानं यस्य तदिति बहुव्रीहिः । महाविद्याया वर्णनं तत्र तत्रोपलभ्यते ।

शब्दब्रह्ममयं साक्षात् कल्पवृक्षस्वरूपकम्[1] ।
अष्टोत्तरसहस्राख्यं शतसंख्यासमाकुलम् ।। १८६ ।

त्रैलोक्यमङ्गलक्षेत्रं सिद्धविद्याफलप्रदम् ।
सकलं निष्कलं साक्षात् कल्पद्रुमकलान्वितम्[2] ।। १८७ ।

योगिनामात्मविज्ञानमात्मज्ञानकरं[3] परम् ।
यः पठेद् भावसम्पूर्णो मिथ्याधर्मविवर्जितः ।। १८८ ।

रुद्रपीठे स्वयं[4] भूत्वा महायोगी भवेद्ध्रुवम् ।
अकस्मात्सिद्धिमाप्नोति चाधमां[5]माल्यदायिनीम्।। १८९ ।

[6]राजलक्ष्मीधनैश्वर्यमतिधैर्यं हयादिकम् ।
कुञ्जरं सुन्दरं [7]वीरं पुत्रं राज्यं सुखं जयम् ।। १९० ।

राजराजेश्वरत्वं च दिव्यवाहनमेव च ।
अक्लेशपञ्चमासिद्धिं[8] ततः प्राप्नोति मध्यमाम् ।। १९१ ।

अत्यन्तदुःखहननं गुरुत्वं लोकमण्डले ।
देवानां भक्तिसंख्याञ्च[9] दिव्यभावं सदासुखम् ।। १९२ ।

आयुर्वृद्धिं लोकवश्यं पूर्णकोशं हि गोधनम् ।
देवानां [10]राज्यभवनं प्रत्यक्षे स्वप्नकालके ।। १९३ ।

दीर्घदृष्टिभयत्यागं चाल्पकार्यविवर्जितम् ।
सदा धर्मप्रियत्वं च धर्मज्ञानं महागुणम् ।। १९४ ।

विवेकाङ्कुरमानन्दं [11]श्रीवाणीसुकृपान्वितम् ।
तत उत्तमयोगस्थां सिद्धिं[12]प्राप्नोति साधकः ।। १९५ ।

[13]अनन्तगुणसंस्थानं मायार्थभूतिवर्जनम् ।
एकान्तस्थानवसतिं योगशास्त्रनियोजनम् ।। १९६ ।

---

१. कल्पवृक्षफलान्वितम्—ख०; २. फलान्वितम्—ख०; ३. मोक्षज्ञानकरं परम्—ख० ।
४. रुद्रपीठे स्वयंभूयो—ख०; ५. चाधिकं—ख०; ६. राजलक्ष्मीं—ख० ।
७. धीरम्—ख०; ८. पञ्चमाम्—ख०; ९. भावञ्च ख० ।
१०. वाक्यश्रवणम्—ख० । —वाक्यस्य श्रवणमत्यन्तं महत्त्वमादधाति । एतेन महनीयं रहस्यमुद्घाटितं भवति । ११. श्रावणीसुकृपान्वितम्—ख० ।
१२. प्राप्नोति साधकोत्तमः—ख०; १३. अत्यन्तगुणसंस्थानम्—ख० ।

सर्वाकाङ्क्षाविशून्यत्वं दैवतैकान्तसेवनम् ।
खेचरत्वं सर्वगतिं भावसिद्धिं सुरप्रियम्[1] ॥ १९७ ।
सदा [2]रौद्रक्रियायोगं विभूत्यष्टाङ्गसिद्धिदम् ।
दृढज्ञानं [3]सर्वशास्त्रकारित्वं रससागरम् ॥ १९८ ।
एकभावं द्वैतशून्यं महापदनियोजनम् ।
महागुणवतीविद्यापतित्वं शान्तिमेव च ॥ १९९ ।
प्राप्नोति साधकश्रेष्ठो यः पठेद् भावनिश्चलः ।
त्रिकालमेककालं वा द्विकालं वा पठेत् सुधीः ॥ २०० ।
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ।
पुरश्चरणमाकृत्य पठित्वा च पुनः पुनः ॥ २०१ ।
अष्टैश्वर्ययुतो भूत्वा [4]मनोगतिमवाप्नुयात् ।
[5]सर्वत्र कुशलं व्याप्तं यः पठेन्नियतः शुचिः ॥ २०२ ।
षट्चक्रमणिपीठञ्च भित्त्वाऽनाहतगो भवेत् ।
अनाहतं ततो भित्त्वा विशुद्धसङ्गमो भवेत् ॥ २०३ ।
विशुद्धपद्मं भित्त्वा च शीर्षे[6] द्विदलगो भवेत् ।
द्विदलादिमहापद्मं भित्त्वैतत् स्तोत्रपाठतः ॥ २०४ ।
चतुर्वर्गां[7] क्रियां कृत्वा चान्ते निर्वाणमोक्षभाक् ।
योगिनां योगसिद्ध्यर्थे सर्वभूतदयोदयम्[8] ॥ २०५ ।
निर्वाणमोक्षसिद्ध्यर्थे कथितं परमेश्वर ।
एतत्स्तवनपाठेन किं न सिद्ध्यति भूतले ॥ २०६ ।
कुलं [9]कुलक्रमेणैव साधयेद् योगसाधनम् ।
योगान्ते योगमध्ये च योगाद्ये प्रपठेत् स्तवम् ॥ २०७ ।

---

१. सुरप्रियम्–ख०; २, सदायोग–ख०; ३. धर्मशास्त्रे कवित्वम्–ख० ।
४. विशुद्धसङ्गमो भवेत्–ख० । —मनसो गतिः । सा च वायोर्गतितोऽपि अत्यन्तं सूक्ष्मा भवति । अत एव भगवतो हनुमतो विषये मनोजव इति शब्दः प्रयुज्यते ।
५. सर्वत्रेत्यारभ्य भवेदितिपर्यन्तं ख-पुस्तके नास्ति; ६. शीघ्रम्–ख० ।
७. चतुर्वर्गक्रियाम्–ख०; ८. शुभोदयात्–ख०; ९. कुलाकुलक्रमेणैव–ख० ।

कृत्तिकारोहिणीयोगयात्रायां[१] मिथुने तथा ।
श्रवणायां मेषगणे[२] कुजे चेन्दुसमाकुले ।। २०८ ।

शनिवारे च सङ्क्रान्त्यां कुजवारे पुनः [३]पुनः ।
सन्ध्याकाले लिखेत् स्तोत्रं ध्यानधारणयोगिराट्[४]।। २०९ ।

भूर्जपत्रे लिखित्वा च कण्ठे शीर्षे [५]प्रधारयेत् ।
अथवा रात्रियोगे च कुलचक्रे लिखेत् सुधीः ।। २१० ।

सर्वत्र कुलयोगेन पठन्[६] सिद्धिमवाप्नुयात् ।
एतन्नाम्ना प्रजुहुयात् कालिकाकृतिमान्[७] भवेत् ।। २११ ।

तद्दशांशक्रमेणैव हुत्वा योगीह सर्वदा ।
मणिपूरे दृढो भूत्वा रुद्रशक्तिकृपां[८] लभेत् ।। २१२ ।

।।[९]इति श्रीरुद्रयामले लाकिनीशाष्टोत्तरसहस्रनाम-
विन्यासे एकपञ्चाशत्तमः पटलः ।।

●

१. योगे आर्द्रायां–ख०; २. लग्ने कुब्जे कुहु–ख०; ३. पुनर्वसौ-ख० ।

४. वित्–ख०; —ध्यानं च धारणं च ध्यानधारणे, तयोर्योगी, तत्र राजमानः । ध्यानधारणयोः सिद्धिं सम्पाद्य विराजमानो योगी इत्यर्थः ।

५. प्रदापयेत्–ख०; ६. पठित्वा–ख०; ७. कालिकाहुतिदानवत्–ख० ।

८. रुद्रस्य भगवतो या शक्तिः भगवती भवानी रुद्राणी, तस्याः कृपा ।

९. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे महारुद्रमृत्युञ्जयलाकिनीशाष्टोत्तरशतसहस्रविन्यासो नाम द्विपञ्चाशत्तमः पटलः ।

अथ द्विपञ्चाशत्तमः पटलः

आनन्दभैरव उवाच—

कथयस्व वरारोहे मणिपूरमनुक्रमम् ।
यज्ज्ञात्वा मुनयः सर्वे चाष्टसिद्धिमवाप्नुयुः ॥ १ ।
प्रजपन् गच्छति क्षिप्रं अनायास[1]मनाहते ।
मन्त्रार्थं [2]मन्त्रचैतन्यं निजविग्रहरक्षणम् ॥ २ ।
तत्परापरग्रन्थिस्थं विचार्य वक्तुमर्हसि ।

श्रीआनन्दभैरवी उवाच—

महाभैरवकालाग्ने मनुज्ञानं [3]निशामय ॥ ३ ।
कथयामि तव स्नेहादतिकोमलसाधनम् ।
मन्त्राणां [4]मन्त्रचैतन्यं विषयानि शृणु प्रभो ॥ ४ ।
मणिपूरे त्वनायासे[5] यत्प्रसादात् [6]स्थिरो भवेत् ।
एतत्करणमात्रेण योगी भवति निश्चितम् ॥ ५ ।
कोटिकोटिमन्त्रजालं[7] तदर्थकोटयः स्मृताः ।
एतन्मध्ये सारभागं कथयामि कुलार्णव ॥ ६ ।
सर्वत्र समभावेन संस्मरन्[8] मन्त्रमुत्तमम् ।
शरीरमपरिच्छिन्नं ब्रह्माण्डं सचराचरम् ॥ ७ ।
मूलादिमणिपूरान्तं त्रिगुणं मनुरूपकम् ।
वर्णमालामुपादाय[9] मुहुर्मुहुर्जपेत् सुधीः ॥ ८ ।
पूर्णतेजोमयीं ध्यायेत् [10]कोटिकालाग्निरूपिणीम् ।
स्वदेवतां सदा ध्यायेन्मूलादिब्रह्मरन्ध्रके ॥ ९ ।

---

१. प्राणायामैरनाहते—ख०; २. मनु—ख०; ३. नां मनशाय—क० ।
४. मनुना मन्त्रचैतन्यं विविधानि—ख०; ५. तव ज्ञाने—ख०; ६, शिवो—ख० ।
७. मन्त्रजापात् तदर्थे—ख०; ८. संस्मरेत् मूर्तिमुत्तमाम्—ख० ।
९. वर्णमालानुसारेण—ख०; १०. कोटिकामग्निरूपिणीम्—ख० ।

तन्मूर्तिमपरिच्छिन्नां [1]गूढस्थाननिवासिनीम् ।
[2]गभीरोर्ध्वगलानन्दां सुधासागरवासिनीम् ।। १० ।

[3]यज्ज्ञात्वा ब्रह्मतुल्यं स्याद् ब्रह्मरन्ध्रे विभावनात् ।
मूलरन्ध्रे मुदा ध्यायेत् कोटिकालानलोज्ज्वलम्[4] ।। ११ ।

ज्वलन्तं ध्यानमाकुर्यादूर्ध्वशिखाप्रभाकरम् ।
[5]सुधारसमोदमुग्धं हव्याग्निसदृशोज्ज्वलम् ।। १२ ।

ललाटं चिन्तयेत् कान्तं पूर्णेन्दुकोटिसङ्कुलम्[6] ।
विगलद्रसपुञ्जं तु [7]तद्रसप्रोज्ज्वलाननम् ।। १३ ।

[8]स्थिरवायुस्थिराकारं मन्त्रार्थं चेति भावयेत् ।
अथवा शुद्धसङ्काशं [9]पूर्णब्रह्ममयूखगम् ।। १४ ।

[10]मूलादिब्रह्मरन्ध्रान्तं मूलं ध्यात्वा पुनः पुनः ।
विचिन्तयेत् सूक्ष्मरूपां महागुर्वीं स्वदेवताम् ।। १५ ।

मन्त्रार्थं चेति तज्ज्ञानं तज्ज्ञानान्मोक्षमाप्नुयात् ।
[11]मन्त्रार्थज्ञानमात्रेण सिद्धिनिर्वाणमाप्नुयात् ।। १६ ।

न स्थूलं नातिसूक्ष्मं गुणमयवपुषं विश्वनाथं[12]स्वशक्ति
स्वानन्दानन्दचित्तं कलिफलमचलं चञ्चलं शुक्लरक्तम् ।
पीनापीनादिरूपं त्रिगुणगगमनं मूलपद्मादिवक्त्रे[13]
विश्वात्मानं कुलाख्यं मनुगुणजडितं भावयेत्सिद्धलोकः[14] ।।१७।

---

१. गृह–ख०; २. गभीराह्लादनानन्दाम्–ख०; ३. यज्ज्ञात्वेति पुस्तके नास्ति–ख० ।
४. ज्वलाम्–ख०; ५. रसामोदिमुग्धम्–ख०; ६. सङ्गमम्–ख० ।
७. रसात्प्रोज्वलानलम्–ख०; ८. वायुं स्थिराकारं–ख०; ९. मयं शुभम्–ख० ।
१०. मूलादिब्रह्मरन्ध्रान्तं मूलम् । मूलमाद्यचक्रं तदादिर्यस्य, ब्रह्मरन्ध्रं शिरोदेशस्थं चक्रं तदन्तो यस्य तत् ।
११. मन्त्रार्थज्ञानेति पुस्तके नास्ति–ख० ।
१२. सानन्दा.........सकलं शुक्लवक्त्रं विशुद्धम्–ख० ।
१३. रन्ध्रे–ख०; १४. सिद्धिहेतोः–ख० ।

चतुःषष्टिक्षेत्रे त्रिगुणजननीं ध्याननिपुणां
(महा) [1]मन्त्राकारां भुवनकरुणां बोधविषये ।
महाविद्यामाद्यां [2]मनुमयरसाच्छन्नतनुता-
[3]मवाप्यामन्दाब्धौ कुलपथि भजन्तीह रसिकाः ॥ १८ ।

समस्तं शून्यार्थं रजतघटनारायणमयं
विसर्गं बिन्दुस्थं रविशशिकलावह्निकिरणम् ।
[4]जगद्व्यापाराङ्गं भवविरहितं भावजडितं
[5]विकाराधाराहं दशदलबिले स्थापयति धीः ॥ १९ ।

सुरासुरभयप्रदं तरुणरूपशोभाकरं
मनोहरकलेवरं सकलदेहसंज्ञापनम्[6] ।
भजन्ति मुनयो नृपा [7]यतय इन्द्रदेवादयो
दशच्छदनिकेतने प्रकृतिदेहमध्यस्थितम् ॥ २० ।

प्रचण्डवचनाश्रयं[8] ध्वनिकलापसम्मर्दनं
महोत्कटतपःप्रियं [9]भजति चाशुतोषं शिवम् ।
निधाय हृदि पङ्कजे किमपि नाभिमूलेऽपि वा
विभावगुणभावनं परिकरोति योगी महान् ॥ २१ ।

स्वकीयगुणसत्त्वके कठिनचित्तसंज्ञार्पणं[10]
चतुर्भुजकलेवरे दशकलाधरेन्दीवरे ।
मनोहरहरं[11] परमसारमाद्याक्षरं
[12]प्रकृत्य परमेश्वरे प्रणवरूपमारोपये ॥ २२ ।

---

१. महामन्त्राकारं भुवनकरजां वेशविषये–ख० ।
२. तनुगा–ख०; ३. मवाप्यानन्दाब्धौ कुलपथिजम्–ख०; ४. व्यापारादिम्–ख० ।
५. विकाराधाराहं दशदलयुतं स्थापयति धीः–ख० ।
६. संज्ञापकम्–ख० । —सकलदेहान् संज्ञापयति इति भावः ।
७. प्रतिदिनं तथेन्द्रादयः–ख०; ८. चरणाश्रयं धवलि–ख० ।
९. भवति–ख०; १०. संज्ञापनम्–ख० ।
११. मनोहरपरं हरं परमसारमाद्याक्षरम्–ख०; १२. प्रकृष्ट………आरोपयेत्–ख० ।

विविक्तमतिनिर्मलं [1]कमलहासमाल्याश्रयं
शिवं [2]शतकभास्करं सकलदेहमध्येऽपि वा ।
भुजायुतधरं धराधरधरं हि मुद्राधरं
भजन्ति कुलकामिनीपतय ईश वेश्याम्पदा ॥ २३ ।

सदा चरणपङ्कजे [3]विवहानिमुद्राश्रये
[4]कृपामयसलक्षणं गतिगसत्त्वसम्भावनम् ।
सदैकगुणभावनं परमदेवदेवास्य या[5]
त्रिलोकजननीपते रमणमेव कुर्याद्वशी ॥ २४ ।

एवं [6]कृत्वा निरालम्बविश्वासध्यानवान्नरः ।
अकस्मान्मन्त्रचैतन्यं[7] प्राप्नोत्यर्थविनिर्णयम् ॥ २५ ।

॥[8]इति श्रीरुद्रयामले उत्तरतन्त्रे मन्त्रार्थचैतन्यविन्यासो नाम द्विपञ्चाशत्तमः पटलः ॥

---

१. हार–ख० ; २. सकल……पद्ममध्ये–ख० ; ३. विफलहानि–ख० ।
४. सुलक्षणम्……मतिग–ख० ।—कृपामयं सलक्षणं यस्य तत् । प्राचुर्ये मयट् । तत्प्रकृतवचने मयडिति सूत्रेण तस्य विधानम्; ५. वै–ख० ।
६. जप्त्वा सदा मन्त्रं विश्वमध्ये परः शुचिः–ख० ।
७. मन्त्रस्य चैतन्यम्, चेतनत्वम् । मन्त्रा हि मननात् चेतनत्वं प्रकटयन्ति ।
८. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रभेदप्रकाशे भैरवीभैरवसंवादे मन्त्रार्थचैतन्यविन्यासो नाम त्रिपञ्चाशत्तमः पटलः ।

अथ त्रिपञ्चाशत्तमः पटलः

[1]श्रीआनन्दभैरवी उवाच—

आनन्दसागराम्भोजमध्यस्थ परमप्रिय ।
इदानीं कालजालादिवारणं शृणु भैरव ॥ १ ।
सम्पूर्य सञ्चयाच्छन्नं वायुं स्वाभाविकीगतिम्[2] ।
कुम्भयित्वा स्वभावेन चिरकालं सुखी भवेत् ॥ २ ।
शनैः शनैः रेचयित्वा सर्वदा तद्गतो भवेत् ।
कालजालवशो[3] याति तत्क्षणान्नात्र संशयः ॥ ३ ।
विना [4]वाय्वाकुञ्चनेन न सिध्यति च को जनः ।
वायुचालनमात्रेण सूक्ष्ममार्गोद्गमेन च ॥ ४ ।
सिध्यत्येव महायोगी कालजालवशोऽपि[5] च ।
कालवशं न करोति मोहादतिसुखायते[6] ॥ ५ ।
कालभक्षो भवेत् सोऽपि म्रियते नात्र संशयः ।
मणिपुरे मनो दत्त्वा साधयेद् देवताः[7] सदा ॥ ६ ।
स्तोत्रं ध्यानं नाम गुणं पठित्वा च पुनः पुनः ।
मनोयोगञ्च सर्वत्र वायुना कारयेद् बुधः ॥ ७ ।
कुम्भयित्वा [8]धारयित्वा रेचयित्वा पुनः पुनः ।
सर्वंकालवशं नीत्वा जितात्मा चामरो भवेत् ॥ ८ ।
लोभमोहौ वर्जयित्वा कामक्रोधादिपातकम् ।
सर्वदा वायुपानञ्च कृत्वा रहसि [9]संवशी ॥ ९ ।

---

१. आनन्दभैरवी उवाच–ख०; २. पतिम्–ख०; ३. कालजोलवसं–ख० ।
४. कुम्भकयोगेन को हि सिध्यति भूतले–ख० । —'विना वाय्वाकुञ्चनेन न सिध्यति च को जनः' इति मूलपाठे वायोराकुञ्चनं निरोधः संकोच इति यावत् । एवं च कुम्भकयोग एव पर्यवसानं भवति ।
५. भवेदिति–ख०; ६. सुखोदयात्–ख०; ७. देवताम्–ख० ।
८. सदायोगी–ख०; ९. सद्वशी–ख० ।

नित्यं वायुसाधनानि षट्चक्रभेदनाय च ।
शनैः शनैर्धारयेद्वै[1] चिरजीवित्वसाधनात् ॥ १० ।

यदि न चिरजीवी स्यात् कालात्मा वायुसेवकः ।
षट्चक्रभावसिद्धचन्ते ज्ञानी मृत्युवशो भवेत् ॥ ११ ।

अतः कुर्याच्छिवज्ञानं वायुसंसिद्धकारणम् ।
तत्क्रियासाधनार्थाय [2]आदौ पञ्चामराविधिम् ॥ १२ ।

कुर्यात् साधकमुख्यश्च निजकायप्रसाधनात् ।
नेतीयोगं तदा कुर्याद् यथा भवति संवशी ॥ १३ ।

धौतीयोगं तदा कुर्याद् यथा भवति संवशो[3] ।
नेउलीयोगमाकुर्याद्[4] यत्र लोको न विद्यते ॥ १४ ।

[5]दन्तीयोगं तदा कुर्याद् यदा मुख्यक्रियावतः ।
तदा क्षणेन यः कुर्याद्[6] यदा तृष्णाविवर्जितः ॥ १५ ।

तृष्णानाशो[7] भवेन्मोक्ष इति मे योगनिर्णयः ।
विशेषेण प्रवक्ष्येऽहं शृणु कैलासपावन ॥ १६ ।

एतत्कार्यं पुरा कृत्वा[8] दिवि देवा मुनीश्वराः ।
कायसिद्धिं मुदा कृत्वा छायामायाविवर्जिताः ॥ १७ ।

सर्वत्र गामिनः सर्वे धर्मशास्त्रार्थपण्डिताः ।
चिरजीविन एवापि [9]सकलश्रीसमन्विताः ॥ १८ ।

तत्तद्भेदान् प्रवक्ष्यामि साधनं[10]कायरक्षणम् ।
यः करोति महादेव कायसाधनमुत्तमम् ॥ १९ ।

स आयाति ममानन्दसदने नात्र संशयः ।
प्रभाते च समुत्थाय ब्राह्मे[11] कालफलोदये ॥ २० ।

---

१. रेचयेद्वै–ख०; २. चादौ–ख०; ३. संयमी–ख० ।
४. सदा कुर्यात्–ख०; ५. दण्डी सदा मुख्यक्रियारतः–ख०; ६. यः कुर्याद् यथा–ख० ।
७. नाशे–ख० ।—अयं पाठो युक्ततरः प्रतिभाति, यतो हि यस्य च भावेन भावलक्षणमिति सूत्रविहितसप्तम्या ज्ञापकत्वमर्थः। अतश्च तृष्णानाशज्ञाप्यो मोक्ष इत्यर्थः सम्पन्नः ।
८. पुरस्कृत्वा–ख०; ९. कमलाश्री–ख०; १०. साधनान् कायरक्षणान्–ख० ।
११. कलि–ख० ।

सहस्रारे गुरोः पादपङ्कजध्यानमाचरेत् ।
विचिन्तयेत्ततः श्रीमान् गुरुरूपां सरस्वतीम् ।। २१ ।

स्वदेवतां परानन्दरसिको योगबुद्धिमान् ।
प्रणम्य शिरसा नित्यं शौचकार्यं[1] समाचरेत् ।। २२ ।

शौचक्रियाक्रमेणैव सिद्धः शुचिगुणान्वितः ।
प्रगच्छेच्छौचकार्यार्थं घटमानन्तु[2] यत्नतः ।। २३ ।

मृत्तिकाप्रस्थमानञ्च नीत्वा शौचं समाचरेत् ।
कुल्कुलं[3] सप्तदशकं वर्चत्यागं पुनः पुनः ।। २४ ।

ततस्तर्जन्या [4]चालोडच वामहस्तस्य शङ्कर ।
गुदरन्ध्रे समायोज्य क्षालनं हि पुनः पुनः ।। २५ ।

[5]यावच्च विससंत्यागं निःशेषेण मलक्षयम् ।
तावन्मृत्पयसा क्षाल्य शोधयेदुदरं सुधीः ।। २६ ।

यावन्न जायते सौख्यं तावत्कालं समाचरेत् ।
तत उत्थाय विधिना मृत्तिकाशौचमाचरेत् ।। २७ ।

येन क्रमेण विष्ठाया गन्धनाशोऽपि जायते ।
पादद्वयं समाक्षाल्य चान्तःशौचं [6]समाश्रयेत् ।। २८ ।

तत्क्रियासफलं[7] वक्ष्ये शृणु योगेश्वर प्रभो ।
सूक्ष्मवस्त्रसमुद्भूतं डोरकं सूक्ष्मरन्ध्रके[8] ।। २९ ।

नासिकाया[9] दृढतरं कोमलं चातिनिर्मलम् ।
शनैः शनैर्नियोज्याथ जिह्वामूले निवेशयेत् ।। ३० ।

जिह्वामूलात् सदादाय[10] वारं द्वादशकं सुधीः ।
मन्दमन्दाघर्षणं तु कृत्वा भेदं [11]समानयेत् ।। ३१ ।

---

१. शौचं कार्यं समाचरेत्–ख० ।
२. घटमानं जलं नयेत्–ख० । —घटते यत्तद् घटमानं जलम्, शौचक्रियोपयोगि जलमिति भावः ।
३. कुन्थनं–ख०;
४. अल्पतैलैः–ख० ।
५. कालं भवेत् वै तु–ख०;
६. समाचरेत्–ख०;
७. सकलम्–ख० ।
८. वस्त्रके–ख०;
९. नासिकायाम्–ख०;
१०. समादाय–ख० ।
११ समाचरेत्–ख० ।

मायात्रयेण बीजेन देवीबीजत्रयेण च ।
रमाबीजत्रयेणापि योगिन्यै नम इत्यपि ॥ ३२ ।
एतन्मन्त्रेण योगीन्द्रो नेतीयोगं समाचरेत् ।
शिरःस्थाङ्गं[1] समाकृत्य कण्ठशोधनमाचरेत् ॥ ३३ ।
ततो वक्षःशोधनं तु ततो नाभेश्च शोधनम् ।
क्रमेण कुर्यात् कायार्थे[2] तत्प्रकारं शृणु प्रभो ॥ ३४ ।
धौतीक्रियां समाकुर्यात् तप्तोदकनिसेवनम् ।
शुक्लवस्त्रं सूक्ष्मसूत्रं [3]चाष्टाङ्गुलप्रमाणकम् ॥ ३५ ।
द्वात्रिंशद्धस्तमानं तु[4] पूर्णसंख्या उदीरिता ।
मन्त्री प्रथमतः कुर्यात् चतुरङ्गुलवस्त्रकम् ॥ ३६ ।
दीर्घे पञ्चहस्तमानं तप्तोदकसमन्वितम् ।
भक्षयेत् शेषजिह्वाग्रे संस्थाप्य वसनं सुखम् ॥ ३७ ।
तर्जनीमध्यमाङ्गुष्ठमुद्राभिर्भक्षयेत् सुधीः ।
क्रमेण वर्धयेन्नित्यं दीर्घे च प्रसवे तथा ॥ ३८ ।
[5]एतन्मन्त्रेण देवेश पूर्वोक्तमनुना तथा ।
सर्वत्र पूर्वबीजेन[6] संशोध्य बीजमुच्चरेत् ॥ ३९ ।
शक्तिबीजत्रयं पश्चात् कामबीजत्रयं तथा ।
लक्ष्मीबीजत्रयं पश्चान्महाधौतनिवासिनी ॥ ४० ।
मेवाडीमलमन्त्रे[7] तु क्षालयद्द्वयमेव च ।
भार्या वहेत्ततः पश्चादुदरे सन्निवेशयेत्[8] ॥ ४१ ।
शनैर्निवेशमाकृत्य यावत् सर्वः[9] प्रजायते ।
[10]एतद्योगप्रसादेन वायवी सुकृपा भवेत् ॥ ४२ ।

---

१. शिरः शुद्धि ·······करशोधन········ख० ।
२. 'कार्यर्धे-ख० । —नेतीयोगो नासिकारन्ध्रेण वस्त्रादिक्रियया कण्ठस्य वक्षसः नाभेश्च मलशोधनं भवति। मलच्छन्नानि इमानि स्थानानि यदि स्युस्तदा योगक्रियायां बाधा भवति ।
३. चाष्टाङ्गुलि-ख०; ४. तन्तुमानन्तु-ख० ।
५. एतन्मन्त्रेणेति श्लोकार्धः ख० नास्ति; ६. मन्त्रेण-ख०; ७. मलमन्त्रे-ख० ।
८. बम्धे-ख०; ९. सर्व-ख०; १०. एतदिति श्लोकार्धं ख० पुस्तके नास्ति ।

ततः कुर्यात् साधकेन्द्रो विग्रहक्षेमकारणात् ।
नेउलीपरमं योगं [1]गात्रदृढनिबन्धनम् ॥ ४३ ॥

[2]घूर्णायमानमाकुर्यादुदरं परमेश्वर ।
सर्वदा चालनं कुर्यात् प्राणवायुप्रधारणम् ॥ ४४ ॥

वामे घूर्णितमाकृत्य दक्षिणे घूर्णितं चरेत् ।
एवं क्रमेण देवेश [3]पुटपाकं समाचरेत् ॥ ४५ ॥

एतन्मन्त्रेण देवेश [4]शुभासने हठो भवेत् ।
ब्रह्मबीजत्रयं पश्चात् कालीबीजत्रयं ततः ॥ ४६ ॥

देवीप्रणवयुग्मं तु गात्रस्थायै नमो द्विठः ।
तदन्ते नाडिकादीनां क्षालनं पारमाद्भुतम् ॥ ४७ ॥

वक्षःस्थानं[5] महादेव दन्तीयोगेन कारयेत् ।
गजमानं दन्तकाष्ठं निर्मलं सुन्दरं मतम्[6] ॥ ४८ ॥

दन्तकाष्ठं [7]क्षालयेद्वै मनुना साधकाग्रणीः ।
[8]मायाबीजत्रयं पश्चाद् भैरवीबीजकत्रयम् ॥ ४९ ॥

मर्दिनीबीजयुगलं दन्तकाष्ठनिवासिनी ।
मे हृद्ग्रन्थि छेदय इति युगलं वह्निसुन्दरी ॥ ५० ॥

क्रमेण विधिनानेन गलरन्ध्रे निवेशयेत् ।
यावन्नाभेरधो याति यावत् [9]सुखमयानि च ॥ ५१ ॥

तावद्दन्तीयोगकार्यं प्रभाते सर्वकार्यकम् ।
एतदन्ते ततः कुर्यान्नाडीक्षालनमेव [10]च ॥ ५२ ॥

तन्मन्त्रं शृणु वीरेन्द्र चामरत्वप्रदायकम् ।
आदौ प्रणवमुद्धृत्य दीर्घंप्रणवयुग्मकम् ॥ ५३ ॥

---

१. गात्रस्य दृढबन्धनम्–ख० । —गात्रस्य शरीरस्य तदङ्गस्य च दृढं बन्धनमिति यावत् ।
२. मान मा–ख०; ३. सदाचरेत्–ख०, पेटपाक–क०; ४. शुभासन–ख० ।
५. स्थाने महाकाल–ख०; ६. नतम्–क०; ७. कारयेत्–ख० ।
८. श्यामाबीजत्रयं–ख०; ९. सुखमयो न च ख० ।
१०. दन्तीयोगक्रियां कृत्वा नाडीचालनं कर्तव्यम्, तेन नाडीशोधनं भवति ।

भुवनेशीबीजयुग्मं चन्द्रबीजत्रयं ततः ।
कृष्णबीजत्रयं पश्चादर्कबीजत्रयं ततः ॥ ५४ ।
[१]वाग्भवत्रयमुद्धृत्य वह्निबीजत्रयं ततः ।
श्रीबीजं मन्मथं लक्ष्मीं शीतले तदनन्तरम् ॥ ५५ ।
[२]स्वोदरं नाडिकामूलं मलक्षालययुग्मकम् ।
स्वाहान्तमनुना नित्यं क्षालयेन्नाडिकाधमाः ॥ ५६ ।
यावत्तृष्णानाशकः स्यात्तावत्कालं समाचरेत् ।
[३]यावदुद्गमशक्तित्वं त्रिदण्डावधि धारणा ॥ ५७ ।
तावन्न जायते नाथ क्षालनं सुखसाधनम् ।
यदि भाग्यवशादेव त्रिदण्डवायुकुम्भकम् ॥ ५८ ।
स्वयमेव समायाति नाडिकाक्षालनं शुभम् ।
[४]यावत्सूक्ष्मानिलालापं मधुपानं निरन्तरम् ॥ ५९ ।
पादाम्भोजनिःसृतं तु परमानन्दवर्धनम् ।
तत्सुखेनापरिच्छिन्नं [५]संज्ञाननिर्मलेन च ॥ ६० ।
चिदानन्दस्वरूपेण [६]आनन्दाश्रुविमोचनम् ।
तदा हि [७]हृदयग्रन्थिभेदनं देहवर्धनम् ॥ ६१ ।
तदा हि पुलकं स्थैर्यं देहावेशस्थिरं तथा ।
तदा षट्कञ्ज[८] सिद्धान्तज्ञानं चैतन्यनिर्मलम् ॥ ६२ ।
चिदानन्दमयो भूत्वा [९]तृष्णाज्ञानविवर्जितः ।
जीवन्मुक्तः परानन्दरसिकः [१०]प्रणयप्रियः ॥ ६३ ।
स्थिरचेता महायोगी भवत्येव न संशयः ।
[११]आस्तिको देवभक्तश्च निन्दावादविवर्जितः ॥ ६४ ।

---

१. वाग्भवेति श्लोकार्धः ख० पुस्तके नास्ति; २. शोधयन् नाडिकामूलं–ख० ।
३. उद्गमशक्तिर्न–ख०; ४. मलालापं–ख०; ५. सज्ञान–ख० ।
६. स्वानन्दाश्रुविलोचनम्–ख० ।
७. हृदये ग्रन्थिछेदनं–ख० । —हृदयस्य ग्रन्थीनां भेदनम्, हृदये या ग्रन्थयस्तासां भेदनम् । अयमेव भेदो द्वयोः पाठयोः ।
८. षट्कज–क०; ९. कृष्णाज्ञान–ख०; १०. प्रलयप्रियः–क०; ११. देवदत्तश्च–ख० ।

स एवात्मा महाज्ञानी भवत्येव न संशयः ।
पञ्चयोगं समाकृत्य नित्यादिकमनुत्तमम् ।। ६५ ।

स्नानं कुर्याद्विधानेन तीर्थराजनिकेतने ।
इडा गङ्गाजले वापि पिङ्गला यमुनाजले ।। ६६ ।

सुषुम्नायां सरस्वत्यां [1]वसुपुष्करकोटिषु ।
तथापि बाह्यस्नाने तु सर्वाङ्गमस्तकं विना ।। ६७ ।

सप्तवारं समासिञ्चेत्[2] मस्तकं बाह्यवारिणा ।
मार्जनेनापि मनुना मूलमन्त्रेण वा पुनः ।। ६८ ।

ततोऽङ्गं मार्जयित्वा च सन्ध्यावन्दनमाचरेत् ।
बाह्यसन्ध्यां तु [3]मन्त्रेणैवान्तरे प्रकृतीश्वरम् ।। ६९ ।

ऊर्ध्वाधस्तैजसं बिन्दुं नादमण्डलसम्पुटम् ।
[4]सन्ध्यावन्दनमाकृत्य महौषधिं [5]प्रभक्षयेत् ।। ७० ।

मूलमन्त्रेणाभिमन्त्र्य पञ्चगव्यं कुलेश्वर ।
ततः कुर्यान्महापूजां स्वस्वमन्त्रोक्तसाधिताम् ।। ७१ ।

षट्चक्रार्थं ततो ध्यायेद् यदुक्तं विधिना प्रभो ।
[6]कुण्डलिन्या महापूजा सहस्रनाममङ्गलम् ।। ७२ ।

[7]देवतानां पठेद्धीमान् सर्वकाले सुसिद्धये ।
मूलाधारं मुदा भित्वा सूक्ष्मवायुद्वयेन च ।। ७३ ।

ततो भेदं स्वाधिष्ठानं राकिणीविष्णुसङ्गमम् ।
तयोरनुक्रमं नाथ सहस्रनाममङ्गलम् ।। ७४ ।

अत्यन्तगुह्यकथनं सत्त्वभक्तिप्रकारकम् ।
भित्त्वा भेदं मुदा कुर्यान्मणिपीठस्थदेवयोः ।। ७५ ।

---

१. द्युषु–ख०; २. समासिञ्च–क०; ३. मन्त्रजालैः–ख० ।
४. सन्ध्यावन्दनमाकृत्येत्यनेन शुचित्वं द्योतितम् । ५. प्रकर्षेण औषधभक्षणविधानेनेत्यर्थः ।
६ कुण्डल्यादिमहापूजां–ख० ।
७. देवतानामित्यतः मङ्गलं पर्यन्तं श्लोकद्वयं ख० पुस्तके नास्ति ।

ध्यानं ज्ञानं स्तवं नित्यं यजनं नामकीर्तनम् ।
चैतन्यं रुद्रलाकिन्यास्तथा मृत्युञ्जयस्य च ।। ७६ ।

नित्यं गुरुमयं ध्यात्वा सर्वगामिनमीश्वरम्[1] ।
चिरजीवी महायोगी भवत्येव न संशयः ।। ७७ ।

।।[2]इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवभैरवीसंवादे मणिपूरभेदो नाम त्रिपञ्चाशत्तमः पटलः ।।

१. गुरुतत्त्वं व्यापकतया सर्वेश्वरसदृशं भवति इति यावत्, तस्य ध्यानेन सकलेष्टसिद्धिर्भवति ।
२. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरव-भैरवीसंवादे मणिपूरणभेदो नाम चतुःपञ्चाशत्तमः पटलः ।

अथ चतुःपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच—

परापराविभेदज्ञ निगूढज्ञानसाधनम्[1] ।
इदानीं शृणु सर्वज्ञ पञ्चद्रव्यादिसाधनम् ॥ १ ।

षट्चक्रपद्मभेदार्थं यत्क्रमाज्जायते क्षणात् ।
अमरश्चामरा[2] चैव सर्वसिद्धिप्रदायिका ॥ २ ।

ब्रह्मज्ञानसाधनी च ब्रह्मानन्दस्वरूपिणी[3] ।
अमरलता[4] तथा ध्येया दूर्वासंज्ञा प्रतिष्ठिता ॥ ३ ।

सिद्धामरा च निर्गुण्डी सर्वसिद्धिप्रदायिका[5] ।
नीलामरा ततो ग्राह्या नीलतुलसीसङ्गिता ॥ ४ ।

अमरुः[6] समयापत्रं चामरा बिल्वपत्रिका ।
शिवप्रिया सदा पूज्या [7]पूर्वोक्तावासमाश्रयेत् ॥ ५ ।

एतद्भक्षणमन्त्राणि शृणु कैलासभूपते ।
ब्राह्मणी[8] क्षत्रिया वैश्या शूद्रा च [9]क्रमतो जया ॥ ६ ।

तत्तन्मन्त्रेण संशोध्य भक्षयेन्मनुनामुना ।
[10]सर्वासाममरादीनां[11] भक्षणे समुदीरिता ॥ ७ ।

प्रणवं दीर्घप्रणवं कपिले ज्ञानसाधनि ।
[12]मम योगं साधयेति युगं स्वरेण सम्पुटम् ॥ ८ ।

---

१. साधन–क०; २. "अमरश्चामरश्चैव"......."प्रदायकः"–ख० ।
३. ब्रह्मज्ञानप्रकाशिनी–ख०; ४. अमलता–ख०; ५. सर्वसिद्धिप्रदायिनी–ख० ।
६. अमरा–ख०; ७. पूर्वोक्ताम्–ख०; ८. ब्रह्माणि–क० ।
९. क्रमशा–ख०; १०. सर्वासां पूर्वोक्तानामोषधीनामित्यर्थः ।
११. अमरा देवा आदयो येषां तेषाम् । अनुक्ते कर्तरि कृद्योगे षष्ठी ।
१२. ममयोगम्–ख० ।

[1]शाखासमूहसम्पूर्णे महौषधिनिवासिनि ।
मामेकममरं [2]देहि कुरु युग्मं ततो द्विठः ॥ ९ ।
अमराशनमन्त्राणि शृणुष्व पार्वतीश्वर ।
यस्य स्मरणमात्रेण नरो नारायणो भवेत् ॥ १० ।
शिववद् विहरेल्लोके बिल्वपत्रस्य भक्षणात् ।
श्रीबीजत्रयमुद्धृत्य वाग्देवीत्रितयं ततः ॥ ११ ।
लक्ष्मीकामेश्वरीबीजं[3] रमाकामत्रयं त्रयम् ।
सिद्धविश्वेशि[4] परमे निगूढतरुवासिनि ॥ १२ ।
मामेकं ज्ञानतत्त्वेऽन्ते[5] नियोजय युगं द्विठः ।
एतन्मन्त्रेण वीरेन्द्रो विधितत्त्वाख्यमुद्रया ॥ १३ ।
शोधयित्वा पुनर्नाथ चामरां[6] शोधयेत्ततः ।
[7]दूर्वा देवी त्रिभुवने अमृतत्वप्रदायिनि ॥ १४ ।
ग्रन्थिच्छेदभेदवारी प्रणवाद्ये परे रमा[8] ।
ततो हि विष्णुबीजञ्च किङ्किणी[9] बीजमुद्धरेत् ॥ १५ ।
राजराजेश्वरीबीजं श्रीबीजं त्रीणि तत्परम्[10]।
सुधाखण्डे मामिहान्ते सिद्धामरपदं लिखेत् ॥ १६ ।
देहि देहि नमः स्वाहा शब्दमुच्चार्य शोधयेत् ।
[11]एतद्भक्षणमात्रेण चिरकालं सुखी भवेत् ॥ १७ ।
सर्वसंयोगमात्रेण सिद्धो भवति साधकः ।
सिद्धामराशोधनं तु शृणु श्रीचन्द्रशेखर ॥ १८ ।
सिद्धामरा च निर्गुण्डी त्रिषु लोकेषु गोपिता ।
एतत्प्रधानं मूलञ्च पत्रं वा [12]चालयेत् सुधीः ॥ १९ ।

---

१. प्रशाखा–ख०; २. देव–ख०; ३. बीज–क० ।
४. विल्वेशि–क०; ५. तु–ख०; ६. चामरतां तु शोधयेत्–ख० ।
७. पूर्वा–ख० ।—दूर्वा देवी अमृतं प्रददाति, दूर्वाया अशनेन दूर्वाशाऋषिर्महानभवत् ।
८. पुरेव सा–ख०; ९. किं किं बीजं समुद्धरेत्–क० ।
१०. निर्वैरिसम्–क०; ११. स्मरणमात्रेण–ख०; १२. भक्षयेत्–ख० ।

मूलाभावे दलं [1]ग्राह्यं दलाभावे न मूलकम् ।
आनयेत् साधकश्रेष्ठः शोभनेन दिनेन तु ॥ २० ।

तदा भवति सिद्धिश्च कौलानां नियमो नहि ।
कौलिके सर्वसिद्धिश्च कौलिके योगसाधनम् ॥ २१ ।

कुलाचारविहीनानां [2]योगभोगादिकं कथम् ।
विना योगेन भोगादिसञ्चयो जायते कथम् ॥ २२ ।

[3]योगसाधनमात्रेण भोगसाधनमालभेत् ।
तद्भोगं परमं ज्ञानं [4]कालामृतनिसेवनम् ॥ २३ ।

विषयाह्लादभोगादिरनायासेन वर्धते ।
[5]शरीरिणामादिकार्यं शरीरस्य प्रभो प्रियम् ॥ २४ ।

शीतलामृतरूपाढ्यं व्यक्ताव्यक्तप्रकारकम् ।
आदिसाधनमेवं हि कथितं स्नेहहेतुना ॥ २५ ।

वल्लभ प्राणरक्षार्थे [6]शोकार्तिवारणाय च ।
पुनस्तु कथये [7]तुभ्यं निर्गुण्डीशोधनं मनुम् ॥ २६ ।

ॐ निर्गुण्डि महामाये [8]महायवनिवासिनि ।
आयुरारोग्यजननि ब्रह्मशब्दनित्रासिनि ॥ २७ ।

मदीयं सकलं कायं शुद्धं[9] कुरु युगं ततः ।
नान्तयुग्मं बिन्दुनादभूषितं चारुतेजसम् ॥ २८ ।

चतुर्दशस्वरव्याप्तं (ठ युगं)[10] बिन्दुभूषितम् ।
लक्ष्मीबीजत्रयं [11]पश्चाद् रमाबीजमयं लिखेत् ॥ २९ ।

वज्रकायं देहि देहि शब्दान्ते वह्निसुन्दरी ।
एतन्मन्त्रेण संशोध्य भक्षयेत् साधकोत्तमः ॥ ३० ।

---

१. भोज्यं पत्राभावे च–ख०; २. योगं योगादिकम्–ख० ।
३. योगसञ्चयमात्रेण–ख०; ४. ज्ञानामृतनिषेवणम्–ख० ।
५. शरीराणाम्–ख० । —शरीरिणामिति पाठो युक्ततरः, तेषां हि शरीरं प्रियं भवति । तत्रैवात्मतादात्म्यात् ।
६. शोकाश्रु–ख०; ७. तेऽहं–ख०; ८. महासत्त्व–ख० ।
९. गुह्यं–ख०; १०. घायुगं–ख०; ११. उमा–ख० ।

ततोऽमरो भवेत् क्षिप्रं नात्र कार्या विचारणा ।
तुलसीशोधनं वक्ष्ये शृणुष्व परमेश्वर ।। ३१ ।

यत्कृत्वा च निरोगी स्याद्बलवान् विजितेन्द्रियः ।
प्रणवं वैष्णवी देवी सत्त्वज्ञाननिवासिनि ।। ३२ ।

कामबीजत्रयान्ते तु मां रक्ष युगलं द्विठः ।
एतच्छोधनमाकृत्य भक्षणं यः करोति च[1] ।। ३३ ।

कायसिद्धिर्भवेत्तस्य ध्यानधारणयोगिनः[2] ।। ३४ ।

।।[3]इति श्रीरुद्रयामले उत्तरतन्त्रे सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे पञ्चसिद्धद्रव्यशोधनं नाम चतुःपञ्चाशत्तमः पटलः ।।

*

---

१. हि–ख० । —एतस्याः तुलसीदेव्याः संशोधनपूर्वकं सेवनेन सर्वसम्पत्तिर्बले वीर्ये ऐश्वर्ये विद्यायां च ।

२. ध्याने धारणे च योगो यस्य, तस्य योगिनः कायसिद्धिर्भवति । कायस्योड्डयनं दूरदर्शनं दूरश्रवणमित्यादि सिद्धय इत्यर्थः ।

३. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे पञ्चद्रव्यशोधनं नाम पञ्चपञ्चाशत्तमः पटलः ।

अथ पञ्चपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच—

कथयामि तव स्नेहात् कायवश्यविशेषणात् ।
हठयोगं प्रकथितमिदानीं शृणुत क्रमम् ॥ १ ।

मणिपूरस्थितं रुद्रं त्रैलोक्ये [1]पवनाक्षयम् ।
कथयामि शिवानन्द शिवशङ्कर मङ्गल[2] ॥ २ ।

स्वाधिष्ठानोर्ध्वदेशे च परमानन्दसागरम् ।
नाभिमूलं मेघजालमध्यविद्युच्छताकुलम् ॥ ३ ।

रहस्यातिरहस्यं च योगिनामतिसारगम् ।
तन्नाभिमूलदेशे च नीलपद्मं महाप्रभम् ॥ ४ ।

तद्दलाग्रे सदा भान्ति डादि[3]फान्ताक्षराणि च ।
तब्दाह्ये शोभितं रूपं त्रिकोणमनलस्य च ॥ ५ ।

प्रभातसूर्यसंकाशं शिखाकारं[4] निरञ्जनम् ।
तत्राग्निबीजरूपं च रूपातीतं गुणान्तरम्[5] ॥ ६ ।

विचिन्तयेन्मेषपृष्ठवाहनं चारुणाकृतिम् ।
चतुर्बाहुं त्रिनयनं चारुदेहधरं परम् ॥ ७ ।

तत्क्रोडे भाति रुद्रेशः सिन्दूरारुणविग्रहः ।
[6]ब्रह्मरूपी त्रिनयनः सृष्टिसंहारकारकः ॥ ८ ।

विभूतिभूषिताङ्गस्तु लोकानामिष्टदो विभुः ।
[7]तस्य वामे सदा भाति लाकिनी परदेवता ॥ ९ ।

---

१. परमाक्षरम्–ख०; २. मङ्गलम्–ख०; ३. भाविकान्ताक्षराणि–ख० ।
४. शिखाकारम्–ख०; ५. निरञ्जनम्–क० ।
६. वृद्धरूपी त्रिनेत्रश्च–ख० । —ब्रह्मणो रूपमस्ति यस्य स ब्रह्मरूपी । अथवा ब्रह्म रूपयति बोधयति इति ब्रह्मरूपी, णिनिप्रत्ययः कर्तरि ।
७. तस्या–क० ।

चतुर्भुजा महादेवी त्रिनेत्रा सौख्यदायिनी ।
श्यामाङ्गी पीतवसना विचित्रालङ्कृतामरा[1] ॥ १० ।

सर्वसिद्धिप्रदा माता सर्वत्र सर्वपालिका ।
सदा रक्षतु मां देवी विद्याभिः कुलपालिका[2] ॥ ११ ।

एवं ध्यात्वा पूजयित्वा जपयागस्तवादिभिः ।
ततः सिद्धो भवेन्मन्त्री मणिपूरप्रसादतः ॥ १२ ।

मणिपूरफलं वक्ष्ये समासेन शृणुष्व [3]तत् ।
कोटिवर्षशतेनापि फलं वक्तुं न शक्यते ॥ १३ ।

मणिपूरानन्तरं हि प्रवक्तव्यमनाहतम्[4] ।
स्तोत्रं ध्यानं नामधेयं[5] सहस्रगुणशङ्करम् ॥ १४ ।

फलमत्यन्तगुह्यं च [6]सुहृत्पद्मोपसिद्धिदम् ।
आत्मज्ञानं मोक्षसिद्धिं प्रेमभक्त्यादिलाभकम् ॥ १५ ।

संहर्ता जनसङ्घानां पालकः कमलाकरः[7] ।
अकस्माज्ज्ञानसन्दोहलक्ष्मीं प्राप्नोति योगिराट् ॥ १६ ।

॥ [8]इति श्रीरुद्रयामले मणिपूरभेदो नाम
पञ्चपञ्चाशत्तमः पटलः ॥

---

१. अलङ्कृताम्बरा–ख०; २. कालिका–ख०; ३. शृणु प्रभो–ख० ।
४. अनाहतः–ख०; ५. समाधेयम्–ख०; ६. सुहृत्पद्मोपलब्धिगम्–ख० ।
७. कमलापतिः–ख० । —अयमेव पाठो युक्ततरः । कमलाकर इति पाठे तु कृषातुः सम्पादने संवर्धने वा बोध्यः ।
८. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवी-भैरवसंवादे मणिपूरभेदो नाम षट्पञ्चाशत्तमः पटलः ।

अथ षट्पञ्चाशत्तमः पटलः

श्रीआनन्दभैरव उवाच—

वद कामिनि कौमारि सुरानन्दे कुलेश्वरि ।
हृदयाम्भोजविन्यासमधुना वक्तुमर्हसि ॥ १ ॥

यस्य विज्ञानमात्रेण नरो योगेश्वरो भवेत् ।
सर्वसिद्धिक्रियास्थानं योगिनामतिदुर्लभम् ॥ २ ॥

सर्वतत्त्वस्वरूपं च सिद्धिमार्गप्रकाशकम् ।
[1]हृदयाम्भोजविज्ञानान्मार्तण्डभैरवो भवेत् ॥ ३ ॥

श्रोतुमिच्छामि तत्सर्वं [2]षट्चक्रसारमङ्गलम् ।
[3]स्नेहाद् दृष्टिक्रमेणैव भक्तियोगोद्भवेन च ॥ ४ ॥

भेदनं भावनं ज्ञानं चित्तदर्शनमेव च ।
मन्त्रोद्धारश्च सङ्केतं सर्वज्ञादिगुणोदयम् ॥ ५ ॥

यजनं काकिनीदेव्या ईश्वरस्य गुणात्मनः ।
स्तवनं कवचं सर्वं सहस्रनाममङ्गलम् ॥ ६ ॥

वायूनां मण्डलज्ञानं समासेन वदस्व मे ।
त्वमेव शरणं देवि त्राहि मां दुःखसङ्कटात्[4] ॥ ७ ॥

श्रीआनन्दभैरवी उवाच—

महाकाल [5]भयाभाव भक्तिभावपरायण ।
[6]ममानन्दभैरवेश शृणु वक्ष्यामि तत्त्वतः ॥ ८ ॥

यदुक्तं भवता चात्र चाश्रुतं [7]चाद्भुतं मतम् ।
नोक्तं कुत्रापि सर्वेश तव स्नेहात् प्रकाशितम् ॥ ९ ॥

---

१. हृदयाम्भोध–क०; २. षट्सु चक्रेषु मङ्गलम्–ख०; ३. स्नेह–ख० ।

४. 'संप्रोदश्च कटच्' इति सूत्रेण संगतमित्यर्थे समुपसर्गात् कटच्प्रत्ययः । दुःखानां संकटात् संगमनात् ।

५. महाभाग–ख०; ६. महानन्द–ख०; ७. परमाद्भुतम्–ख० ।

अप्रकाश्यमिदं रत्नं दुःखजालनिवारणम् ।
सावधानेन सर्वेश कुरु त्वं योगसाधनम् ।। १० ।

मयि योगं महादेव कृत्वा कालवशं नय[1] ।
मयि योगं न [2]करोति सिद्धिभक्तिक्रियादिकम् ।। ११ ।

अकस्मान्मरणं तस्य कालभक्षो न संशयः ।
केवलं मां हृदम्भोजे परिपूर्णफलोदये ।। १२ ।

सर्वाकारे[3] मनोराज्ये नानाकौतुकसंकुले ।
पूजयित्वा सदा ध्यायेत् काकिनीं मां न संशयः ।। १३ ।

स[4] योगी जायते नाथ हृदम्बुजप्रसादतः ।
हृत्पङ्केरुहमध्यस्थाः सर्वे देवाः सवासवाः ।। १४ ।

मामर्चयन्ति ते नित्यं भक्तिभावपरायणाः ।
ये ध्यायन्ति महावीर[5] ते पश्यन्ति सवासवान् ।। १५ ।

क्रमेण प्राणसंयोगान् मां पश्यन्ति न संशयः ।
[6]मामेकं काकिनोध्यानं स्थिरवायुं प्रचण्डकम् ।। १६ ।

पश्यन्ति योगिनः काये अष्टैश्वर्यं महाप्रभम् ।
केवलं भक्तियोगेन नित्ययोगे[7] स्युरुत्तमाः ।। १७ ।

पद्मध्यानं प्रथमतः कृत्वा सिद्धो [8]भवेन्नरः ।
तद्ध्यानं शृणु वीरेश योगिनामिह दुर्लभम् ।। १८ ।

[9]हृत्पद्मं कुलपालितं सुललितं हंसेन संशोधितं
[10]बन्धूकामलदीप्तिकोटिजडितं सम्भावितं साधकैः ।
अत्युत्कृष्टमयूखपुञ्जमिलितं सिन्दूरपूरारुणं[11]
ध्यात्वा पश्यति यो नरः प्रतिदिनं काद्यारुणैरावृतम् ।। १९ ।

---

१. हर–ख०; २. करोषि–ख० । ३. सर्वकाममनोबाह्ये.........सङ्कुलः–ख० ।
४. संयोगी.......हृदम्भोज–ख० ।
५. महावीरास्तपस्यन्ति च वासवान्–ख० । वासवेनेन्द्रेण सहितान् इन्द्रसहितान् देवान् । च वासवानिति पाठे तु अनेककल्पसंभूतान् वासवान् इन्द्रान् ।
६. मामैकम्–क०; ७. नित्ययोगेन चोत्तमम्–ख०; ८. न संशयः–ख० ।
९. हृत्पद्मे–ख०; १०. वल्गुं कोमल–ख०; ११. वर्णारुणम्–ख० ।

स स्यात्कोटिधनेश्वरो नरवरो भूयात्त्वभावार्णवे[1]
यो नित्यं लिपिभावनं प्रकुरुते नित्येश्वरालोकनात् ।
तद्ध्यानं क्रमतो वदामि सकलं येन प्रसिद्धो[2] भवे-
दानन्दार्णवमध्यपद्मकलितं [3]काद्यर्कवर्णोज्ज्वलम् ॥ २० ॥

दले पूर्वे ध्यायेदतिविमलवर्णं कमिति वा
प्रभातार्कच्छायारुणकिरणयोगं युगमयम् ।
[4]चतुर्बाहुं नित्यं त्रिनयनमनन्तं रविगतं
भवाद्याशक्तिस्थं[5] स्वभवनघटाशोभिततनुम्[6] ॥२१कँ।

[7]द्वितीये पत्रेऽस्मिन् खमरुणसमूहाश्रयपदं
पदं श्रीतारिण्या अनिलगगनयोः प्रियकरम् ।
मुदा ध्यायेदेवं परममनिलं देवभुजगं
सुवर्णालङ्कारं त्रिनयनममौल्यं सुखमयम् ॥२२खँ।

तृतीये[8] पत्रेऽस्मिन् विधुयुतकपालं त्रिनयनं
[9]स्वसिन्दूराकारं द्वियुगभुजशोभाभवमहम् ।
सदा ध्यायेदेवं परमपुरुषं श्रीगणपतिं
[10]स्फुरद्रक्ताकारं तरुणमणिमालं जितमदम् ॥२३गँ।

चतुःपत्रे ध्यायेद्यमरुणशतं[11] घोरनिनदं
क्रियादक्षं मूर्तिं त्रिनयनसरोजं युगभुजम् ।
वराभीतिप्रोच्छत्स्फटिकजपमालादिसहितं
[12]फणालङ्कारालाङ्गं शिव शिव मुखेशोत्तममहम् ॥२४घँ।

---

१. भूयस्त्वत्यं वक्षसि–ख०; २. प्रसिद्धे–ख०; ३. काद्यार्क–ख० ।
४. चतुर्षाङ्ग–ख०; ५. शक्तिस्त्वं–ख० ।
६. स्वस्य भवने या घटा घटना तया शोभिता तनुर्यस्य तम् । स्वभवनघटास्थायिनी स्ववशगा भवति, परभवनघटा परतन्त्रा भवति ।
७. द्वितीये ...सुखमयमिति श्लोकमिदं ख० पुस्तके नास्ति; ८. द्वितीयं पत्रस्थं–ख० ।
९. ससिन्दूराकारं.... त्रिगुणभुज–ख०; १०. सुरत्नाकारं वै....मालं–ख० ।
११. अमलमरुणम्–ख०; १२. कलाऽलङ्काराङ्ग शिरसिहमुखेशोत्तममहम्–क० ।

ङंबीजं सिन्दूरारुणममखिलनाथं त्रिनयनं
महामोक्षस्थानं [1]मणिकनकरत्नाद्याभरणम् ।
[2]चतुर्बाहुं रुद्रं जगति भवमेकं गुणविभुं
[3]कपालं [4]श्रीमालं वरमभयकं बिभ्रतमहम् ॥२५ङँ।

[5]चतुर्बाहूल्लासं कमलवरमालासिसहितं
विभुं तं ध्यायेऽहं विधुशतमुखं तं त्रिनयनम् ।
प्रभातार्कप्रायं सकलमणिरत्नाभरणकं
महाज्योत्स्नाजालं परमरसबिन्दूद्भवतनुम् ॥२६चँ।

तमेकं नेत्रस्थं [6]छममलकरं नूतनरविं
चतुर्बाहुं[7] ध्याये वरतनुकपालेषु सहितम् ।
सुधाधारापानं कनकजपमालाऽऽवृततनुं
त्रिनेत्रं योगेन्द्रं वसुदलगतं चारुवदनम् ॥छँ २७।

चतुर्वक्त्रं ध्याये [8]जमजममरं सारुणतनुं
विशालाक्षं सूक्ष्मं [9]समरसमयं ब्रह्मवपुषम् ।
[10]चतुर्बाहुं देवं त्रिभुवनपदं सारघटितं
महाशङ्खं [11]रुद्रं वरमभयकं बिभ्रतबलम् ॥जँ २८।

महाकायं तेजोमयमपि चरुं बीजमखिलं
[12]मुदा ध्याये कामापहमतिमुखं चाष्टमदले ।
महासिन्दूराद्रि दिनकरकलाकोटिविमलं
त्रिनेत्रं पञ्चास्यं दशभुजयुतं [13]सर्ववपुषम् ॥झँ २९।

---

१. शशि–ख०; २. चतुर्घाङ्गं·······पतितजननाथम्–ख०; ३. क्रियानाथं देवं–ख० ।
४. श्रियं मिमीते या सा श्रीमा, तामलते भूषयति इति श्रीमालः, कर्तरि अण्प्रत्ययः, अल्धातोः ।
५. चतुर्घाङ्गं ध्याये–ख०; ६. छल–ख० ।
७. चतुर्घाङ्ग·······कपालेष्वष्टसहितम्–ख०; ८. अथ च मनसा चारुणतनुम्–ख० ।
९. समयमनिशं चक्रवपुषम्–ख०; १०. चतुर्घाङ्गं–ख० ।
११. रुण्डं–क०; १२. सदा–ख० ।
१३. सर्वं वपुर्यस्य तम् । सर्वं जगत् तस्य भगवतो वपुं शरीरमेवेति भावः ।

[1]ञबीजं [2]सार्धेन्दूद्भवशिखमखेशं त्रिनयनं
[3]चतुर्बाहुं ध्याये सुकमलगदाचक्रनियुतम् ।
महामालाव्याप्तं सुकनकशुभाऽलङ्कृतगुरुं[4]
[5]प्रभातार्कं विश्वार्चितजडिलरूपं रविदले ॥ञँ ३०।

मनोरूपाच्छन्नं त्रिनयनमधीशारुणदले[6]
टबीजं बिन्द्विन्द्वं[7] जपवटिवराभीत्यसिधरम् ।
तमेकं सोमेशं [8]मणिमयचलत्कुण्डलधरं
मुदा ध्याये शम्भुं हृदि शिवदले सिद्धकमले ॥टँ ३१।

त्रिनेत्रं कामाख्यं शिशुकरुणया सिद्धिफलदं
सुरत्नाऽलङ्कारच्छविरुचितनूनां समनघम् ।
ठकारं [9]बिन्द्विन्द्वं नवरविघटाकोटिकिरणं
दले चार्के ध्याये कमलवरमालाशिशुधरम् ॥ठँ ३२।

एतच्छुद्धमनोलयस्य भवनं[10] चैतन्यसंसिद्धये[11]
वर्णानां जपभावनं यदि सदा चिन्तामणेर्मण्डलम् ।
योगीन्द्रः कुरुते वशिष्ठसदृशो वाचां पतिर्भूतले
वाक्सिद्धिं चिरकालवासमखिले देवो हि नो मानुषः ॥ ३३ ।

वाञ्छाचिन्तामणिगृहं[12] हृदयाम्भोजमण्डलम् ।
तन्मध्ये पवनस्थानं मण्डलाकारमुल्बणम् ॥ ३४ ।

बुद्धिप्रतिभया व्याप्तं तन्मध्ये पवनाक्षरम् ।
आच्छन्नधूमसङ्काशं प्रसिद्धस्थानमुत्तमम् ॥ ३५ ।

तन्मध्ये देवतापीठं षट्कोणं मण्डलं परम् ।
तन्मध्ये भावयेदिष्टं स्वस्वकल्पोक्तसाधितम् ॥ ३६ ।

---

१. ञं–ख०; २. सार्धचन्द्रोद्भव–ख०; ३. चतुर्घाङ्गं····स्वकमल····निविडम् ।
४. मालाङ्कितगुरुम्–ख०; ५. प्रभातार्कम्–ख ।
६. अधीशं दशदले–ख०; ७. टकारं विन्द्वाढ्यम्–ख० ।
८. कनकलसत्कुण्डलधरम्–ख०; ९. विन्द्वाख्यम्········विकलम्–ख० ।
१०. भुवने–ख०; ११. चैतन्यस्य परतत्त्वस्य संसिद्धिस्तस्यै इति भावः ।
१२. मणेर्गेहं–ख० ।

वायोर्ध्यानं तत्र कुर्यादत्यन्तसूक्ष्मरूपिणम् ।
निराकारं परंब्रह्म साकारं शब्दरूपिणम् ।। ३७ ।

निरक्षरं स्वाक्षराढ्यं महोग्रं [1]स्थिररूपिणम् ।
[2]चतुर्बाहुं जगद्व्याप्तं कृष्णसारासनं यवम् ।। ३८ ।

लोकत्रयाणां वरदं करुणासिन्धुरूपिणम् ।
पञ्चभूतात्मकं रौद्रं प्राणसञ्ज्ञं किरीटिनम् ।। ३९ ।

संबिभ्रतं [3]वराभीतिघण्टाडमरुसेवकान् ।
[4]ईशनाम्ना परिचितं [5]परहंसं कुलेश्वरम् ।। ४० ।

सर्वाऽलङ्कारशोभाङ्गं [6]विवेकोदयकारणम् ।
विचिन्तयेत् साधकेन्द्रः परिवारगणावृतम् ।। ४१ ।

तत्र पङ्केरुहे ध्यायेदीश्वरं वर्णरूपिणम् ।
त्रैलोक्यमङ्गलं नाथं[7] चतुर्बाहुं[8] किरीटिनम् ।। ४२ ।

रत्नमालाशोभिताङ्गं शुक्लवर्णं महाप्रभम् ।
ईश्वरं योगिनामीशं [9]वरदं परमेश्वरम् ।। ४३ ।

[10]वराभीतिशङ्खपद्मश्रिया जुष्टं पुरातनम् ।
रत्नाभरणभूषाङ्गं हृदयाम्भोजवासिनम् ।। ४४ ।

वाञ्छातिरिक्तफलदं भावसिद्धिप्रकाशकम् ।
परमहंसमीशानं ध्यायेद् हृत्पद्ममण्डले ।। ४५ ।

तत्पार्श्वे ध्यानमाकुर्यात् काकिनीं परमेश्वरीम् ।
त्रैलोक्यपूजितां देवीं काकचञ्चुप्रकाशिनीम् ।। ४६ ।

---

१. महोग्रग्रन्थिरूपिणम्–ख० । —स्थिरं रूपयति इति कर्तरि णिनिप्रत्ययः ।
२. चतुर्धाङ्गं·······वरम्–ख० । —चत्वारो बाह्वो यस्य तम् ।
३. डामर–ख०; ४. ईशा–ख०; ५. परं हंसं–ख० ।
६. रविकोदयकारणम्–ख०; ७. नाथ–क० ।
८. चतुर्धाङ्गम्–ख० । — चतुर्धा विभक्तानि अङ्गानि यस्य तम् ।
९. ध्यायेद् हृत्पद्ममण्डले–ख० ।
१०. वराभीतीत्यत आरम्य पद्ममण्डले पर्यन्तं–ख० नास्ति ।

चतुर्भुजां पीतवर्णां[1] पीतवस्त्रोपशोभिताम् ।
नवविद्युत्कोटिरूपां विलोलनेत्रपङ्कजाम् ।। ४७ ।

कपालशशिशूलास्त्रवरदानसमाकुलाम् ।
विचित्ररत्ननिर्माण[2]स्वर्णाऽलङ्कारभूषिताम् ।। ४८ ।

[3]त्रैलोक्यललितां सूक्ष्मां वराभयकराम्बुजाम् ।
सुधापानरतां मत्तां पूर्णरूपां कुलेश्वरीम् ।। ४९ ।

रत्नकङ्कणमालाढ्यां परमानन्दभैरवीम् ।
हृदयाम्भोजमध्यस्थां ध्यायेऽहं हंसगामिनीम् ।। ५० ।

तत्पीठमध्यनिकरे[4] त्रिकोणं परिचिन्तयेत् ।
पीठशक्तिं सुवर्णाढ्यां विद्युत्कोटिसमोदयाम् ।। ५१ ।

काकिनीसदृशीं मत्तां पूर्णान्तःकरणोद्यताम्[5] ।
सर्वाऽलङ्कारभूषाढ्यां परिवारगणावृताम् ।। ५२ ।

तद्दक्षिणे पार्श्वभागे [6]चिन्तयेत्वामलिङ्गकम् ।
सुवर्णशुद्धसंकाशं निर्मलं चारुतेजसम् ।। ५३ ।

महालक्ष्मीप्रियानन्दं सर्वाकारं निरञ्जनम् ।
ज्ञानयोगोदयं ब्रह्मरूपिणं बहुरूपिणम् ।। ५४ ।

प्रदीपकलिकाकारं चिन्तयेदीश्वरं शिवम् ।
एतेषां ज्ञानमाकृत्य[7] वागीशो भवति क्षणात् ।। ५५ ।

वाक्यसिद्धिं[8] तत्र नाथ चिन्तयेत्तत्प्रसिद्धये ।
तत्र भानोर्मण्डलञ्च चिन्तयेत् साधकाग्रणीः ।। ५६ ।

---

१. महादेवीं–ख० । -पीतो वर्णो यस्याः । पीतवस्त्रेणोपशोभितामिति भावः ।

२. निर्माणाम्–ख०; ३. त्रैगुण्य–ख०; ४. ध्याननिकटे त्रिकोणाम्–ख० ।

५. पूर्वान्तः–ख० ।

६. बाण–ख० । —बाणलिङ्गं नामेदं लिङ्गम्, तस्य चिन्ता कार्या, वामलिङ्गकमिति पाठे तु वामं सुन्दरं यल्लिङ्गं तस्य चिन्तेत्याद्यर्थः ।

७. ध्यानम्–ख०; ८. राज्यसिद्धिम्……नाथम्–ख० ।

पद्मकिञ्जल्कमध्ये तु चिन्तयेदरुणायुतम् ।
मासैकसाधनादेव योगी स्याच्छीतलाङ्गधृक् ।। ५७ ।

द्विमासे ग्रन्थिभेदः [१]स्यादनन्तगुणवान् भवेत् ।
[२]त्रिमासे योगयोग्यः स्यात् सर्पादिविषनाशकृत् ।। ५८ ।

चतुर्मासे निर्मलात्मा भावकः स्थिरमानसः ।
पञ्चमे मासि सम्प्राप्ते वायवी कृपयान्विता ।। ५९ ।

स्थिरवायुः स्थिरा [३]दृष्टिरतीव सुखसम्पदः ।
ततो दिने दिने वृद्धिर्वायूनामनुकम्पया ।। ६० ।

षण्मासात् पापसत्यक्तो मुक्तवद् भ्रमते चिरम् ।
जले चाग्नौ च भूगर्त्ते कदाचिन्न म्रियेत हि ।। ६१ ।

ईश्वरात्मा महाज्ञानी निःशङ्को [४]निरुपद्रुतः ।
[५]महाविवेकसिद्धान्तज्ञानी भेदविवर्जितः ।। ६२ ।

स भूत्वा चिरजीवी च [६]भुक्तिभागी दिने दिने ।
सप्तमे कल्पसन्त्यक्तो मदनो [७]दोषविग्रहः ।। ६३ ।

नित्यानन्दगुणप्राप्तिर्भूमित्यागो दिने दिने ।
अष्टमे सर्वशत्रुघ्नो [८]रामनामविवर्जितः ।। ६४ ।

अणिमादिदर्शनञ्च ब्रह्मगोबिन्दुदर्शनम् ।
नवमे क्षालनासिद्धिर्भूमित्यागस्त्रिहस्तकः[९] ।। ६५ ।

[१०]दशमे योगसिद्धिश्च षट्चक्रादिप्रदर्शनम् ।
ब्रह्मरन्ध्रभेदनज्ञो महानन्दविग्रहः ।। ६६ ।

एकादशे सर्वसिद्धिः पञ्चभूतमयाङ्गधृक् ।
सप्तस्वर्गालोकनञ्च षट्शिवप्रियदर्शनम् ।। ६७ ।

---

१. अत्यन्तगुणवान्—ख० ।
२. साधको—ख०, सर्वादि इति—क०; ३. त्वतीव सुखसम्पदाम्—ख० ।
४. निरुपद्रवः—ख०; ५. सिद्धिस्तु—ख०; ६. मुक्तिभागो—क० ।
७. मदनोपमः—ख०; ८. वाञ्छानाशविवर्जितः—ख०; ९. पञ्चभूतमयाङ्गधृक्—ख० ।
१०. दशमे इत्यतो मयाङ्गधृगिति पर्यन्तं—ख० पु० नास्ति ।

द्वादशे देवसन्मानं देवतापाददर्शनम् ।
अत्यन्तं सुखसन्तानं मायाजालनिवारणम् ।। ६८ ।

[१]सर्वविद्यासर्वसिद्धिर्दिव्यभक्तिः शुभोदया ।
ते वीरास्ते च योगीन्द्रास्ते दिव्यास्ते च भैरवाः ।। ६९ ।

ते सर्वे [२]मृत्युजेतारस्ते भक्ता मुक्तिभागिनः ।
ये तिष्ठन्ति महारण्ये निर्जने पर्वते चिरम् ।। ७० ।

धारयन्ति साधयन्ति योगमेतत् कुलेश्वर ।
योगे[३] योगाद् भवेन्मोक्ष इति मे तत्त्वनिर्णयः ।। ७१ ।

संसारोत्तारणे[४] मुक्तिर्योगशब्देन कथ्यते ।
लोके हि दुर्लभं योगं योगात्परतरं नहि ।। ७२ ।

योगं पञ्चविधं प्रोक्तमेकं विषयसम्मतम् ।
द्वितीयञ्च द्विभेदञ्च पूजायोगं तृतीयकम् ।। ७३ ।

भक्तियोगं परं ब्रह्मयोगसारं कुलेश्वर ।
सर्वत्रापि [६]मनोयोगाद्बद्धो मुक्तो भवेद् ध्रुवम् ।। ७४ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादेऽनाहतपद्म-विन्यासो नाम [५]षट्पञ्चाशत्तमः पटलः ।।

●

---

१. सर्वा विद्याश्चतुर्दशसंख्याकाः, सर्वाः सिद्धयः यस्यां सा दिव्यभक्तिः शुभोदयकरी इति यावत् ।

२. मृत्युगोप्तार–ख० ; ३. योगयोगाद्……तत्त्वस्य निर्गमः–ख० ।

४. संसारोत्तारणात्–ख० ।

५. इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्र ……सप्तपञ्चाशत्तमः पटलः ।

६. मनसो योगो वृत्तिनिरोधः, तस्माद् बद्धो भवति, यदि सांसारिकं विषयमाधृत्य मनोयोगो विधीयते । यदि तु परमेशस्वरूपे योगः क्रियते, तदा मोक्षः ।

अथ सप्तपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच—

अथातः सम्प्रवक्ष्यामि विवेकगुणलक्षणम् ।
वर्णध्यानानन्तरं हि पूजनं तन्महाफलम्[1] ॥ १ ।
पूजया लभते पूजां विवेकं भावसम्भवम् ।
काकिनीश्वरसंयोगं भावं परमदुर्लभम् ॥ २ ।
यजनं काकिनीदेव्या ईश्वरस्यापि भावनम् ।
पूजाभावे महासिद्धिर्जायते तत्क्षणाच्छिव ॥ ३ ।
भावेन लभ्यते पूजा विवेकं पूजया लभेत् ।
विवेकं[2] ब्रह्मभावन्तु प्राप्नोति कोटिजन्मनि ॥ ४ ।
अथवा लभ्यते शीघ्रं तवापि मदनुग्रहैः ।
तत्प्रकारं शृणु प्राणवल्लभ त्रिपुरेश्वर ॥ ५ ।
यस्य विज्ञानमात्रेण भवेत् परमभावकः ।
विचिन्तयेद्वर्णपार्श्वे चतुर्दिक्षु क्रमेण तु ॥ ६ ।
सिद्धेश्वरान् योगयुक्तान् महापुरुषसंश्रितान्[3] ।
ब्रह्माणं परमं हंसं रुद्रं विश्वेश्वरं प्रभुम् ॥ ७ ।
[4]मृत्युञ्जयं महाकालं नीलकण्ठं सुरेश्वरम् ।
श्रीविष्णुं कमलानाथं पञ्चचूडं कुमारकम् ॥ ८ ।
चन्द्रं सूर्यं [5]प्रजानाथं दक्षं मुनीन्द्रमेव च ।
[6]प्रचेतसं मरीचिञ्च कश्यपं पुलहं तथा ॥ ९ ।
वशिष्ठञ्च भृगुञ्चैव गौतमं कपिलं मुनिम् ।
पुलस्त्यञ्च क्रतुञ्चैव प्रह्लादं कर्दमं तथा ॥ १० ।

---

१. महत्फलम्—ख०; २. विवेकब्रह्मभावस्तु—ख०; ३. संज्ञितान्—ख० ।
४. मृत्युं जयति इति मृत्युञ्जयः, "संज्ञायां मृतॄवृजिधारिसहितपिदमः" इति सूत्रेण खच्प्रत्ययः । "अरुर्द्विषदजन्तस्य मुम्" इति मुम् ।
५. प्रभानाथम्—ख०; ६. प्रचेतारम्—क० ।

अथर्वाङ्गिरसर्षिञ्च[1] बालखिल्यान् मरीचिपान् ।
[2]मलसञ्चान्तरीक्षञ्च विद्याश्च पवनं विभुम् ॥ ११ ।

तेजसञ्च जलञ्चैव महीस्पर्शञ्च शब्दकम् ।
तथा रूपं रसं गन्धं प्रकृतिञ्च विकारकम् ॥ १२ ।

यच्चान्यत् कारणं सर्वं [3]भुवाक्षयं चराचरम् ।
तत्पार्श्वगामिनो देवा सेन्द्रा [4]भ्रमन्ति नित्यशः ॥ १३ ।

अगस्त्यश्च महातेजा मार्कण्डेयश्च वीर्यवान् ।
यमदग्निर्भरद्वाजः [5]संवर्तश्च्यवनस्तथा ॥ १४ ।

दुर्वासाश्च महाभाग ऋष्यशृङ्गश्च धार्मिकः ।
सनत्कुमारो भगवान् योगाचार्यो महातपाः ॥ १५ ।

असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित् ।
ऋषभार्जितशक्रश्च[6] महावीर्यस्तथा मणिः ॥ १६ ।

[7]आयुर्वेदं तथाष्टाङ्गमेते भान्ति स्वमूर्तयः ।
चन्द्रमाः सह नक्षत्रैरादित्यैश्च गभस्तिभिः ॥ १७ ।

वायव ऋतवश्चैव सङ्कल्पः प्राण एव च ।
मूर्तिमन्तो महात्मानो महाव्रतपरायणाः ॥ १८ ।

एते चान्ये च बहव ईश्वरं समुपासते ।
एते पार्श्वे चिन्तनीया वर्णानां साधकोत्तमैः ॥ १९ ।

तत्पार्श्वस्थः प्रभाकोटिधारकः प्रतिभाति च ।
[8]अर्थो धर्मश्च कामश्च हर्षो द्वेषस्तथा दमः ॥ २० ।

तत्र गन्धर्वमुख्याश्च सहिताप्सरसस्तथा ।
विंशतिः सप्त चैवान्ये लोकपालाश्च सर्वशः ॥ २१ ।

---

१. अंगिरसञ्चैव–ख०; २. मानसाश्चान्तरीक्षाश्च–ख० ।
३. भवाक्षय–ख०; ४. सम्भान्ति–क० ।
५. सर्वाभ्य–क०; ६. शत्रुश्च–ख० ।
७. आयुर्वेदमित्यतः परायणाः पर्यन्तं–ख० पुस्तके नास्ति ।—अष्टावङ्गानि यस्मिन् स तम् । आयुः वेदयति प्रापयति ज्ञापयति वा इति आयुर्वेदः, तम् ।
८. अर्थो धर्मश्चेत्यत एव चेति पर्यन्तं श्लोकद्वयं ख० पुस्तके नास्ति ।

शुक्रो बृहस्पतिश्चैव बुधोऽङ्गारक एव च ।
शनैश्चरश्च राहुश्च ग्रहाः सर्वे तथैव च ॥ २२ ।
मन्त्रो रथन्तरश्चैव [1]हविष्मान् वसुमानपि ।
आदित्याः साधिराजानो नानावृन्दैरुपासिताः[2] ॥ २३ ।
मरुतो विश्वकर्मा च वसवश्च कपालिनः ।
तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ॥ २४ ।
ऋग्वेदः सामवेदश्च यजुर्वेदस्तथा विधिः[3] ।
अथर्ववेदश्च तथा सर्वशास्त्राणि चैव हि ॥ २५ ।
इतिहासोपदेशश्च वेदाङ्गानि च सर्वशः ।
ग्रहा यज्ञाश्च[4] सोमाश्च दैवतानि च सर्वशः ॥ २६ ।
सावित्री तारिणी[5] दुर्गा वाणी सप्तविधा तथा ।
मेधा धृतिः स्मृतिश्चैव प्रज्ञा बुद्धिर्यशः क्षमा ॥ २७ ।
सामानि श्रुतिशास्त्राणि गाथास्तु विविधास्तथा ।
भाष्याणि तर्कयुक्तानि देहवन्ति विभान्ति च ॥ २८ ।
नाटिका विविधाः कार्याः[6] कथाख्यायिककारिकाः ।
अत्र तिष्ठन्ति ये पुण्या ये पुण्या गुरुपूजकाः ॥ २९ ।
क्षणा लवा मुहूर्ताश्च दिवारात्रिश्च सर्वतः ।
अर्धमासास्तथामासाः ऋतवः षट् च शङ्कर ॥ ३० ।
संवत्सराः [7]पञ्चयुगं मासा रात्रिश्चतुर्विधा ।
कालचक्रञ्च यद्दिव्यं नित्यमव्ययम् ॥ ३१ ।
धर्मचक्रस्तथा चापि नित्यमास्ते महेश्वर ।
[8]अदितिश्च दितिश्चैव रुद्रश्च विनता तथा ॥ ३२ ।

---

१. हविमान्–क०; २. उपागताः–ख०; ३. निधिः–क०; ४. ग्रहा यज्ञश्च–क० ।
५. सावित्री दुर्गतरिणी–क० ।—तारिणीति पाठे तारयति या सा इति विग्रहे णिनिर्बाहुलकात् । दुर्गतरिणी इति पाठे तु दुर्गस्य संसारस्य तरणे तरिणी नौका इति यावत् ।
६. नाटका विविधा काव्या कथाख्यायिककारिकाः–क०; ७. पञ्चयुग्मं–ख० ।
८. अदितिर्दितिर्दनुश्चैव सुरसा विनता इव–क० ।—दो-धातुरवखण्डने, ततः क्तिन्प्रत्ययः, न दितिरदितिरखण्डिता, स्वविचारे विचला न भवति । दितिस्तु खण्डिता, मध्ये मध्ये स्वविचारं खण्डयति ।

कालिका [1]युवती देवी सुरसा चाथ गौतमी ।
[2]प्राधा कद्रुश्च वै देव्यो देवतानाञ्च मातरः ।। ३३ ।
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रा षष्ठी तथा परा ।
पृथिवीसञ्ज्ञिता देवी ह्रीः स्वाहा कीर्तिरेव च ।। ३४ ।
सुरा देवी शची चैव तथा पुष्टिररुन्धती ।
[3]संसिद्धि सिद्धिदा विद्या महादेवी रतिस्तथा ।। ३५ ।
एताश्चान्याश्च वै देव्य उपतस्थुरलङ्कृताः ।
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ।। ३६ ।
विश्वेदेवाश्च साध्याश्च पितरश्च महर्षयः ।
राजर्षयस्तत्र भान्ति हरिश्चन्द्रादयः प्रभो ।। ३७ ।
सर्वे हेमकुण्डलिनः सर्वाऽलङ्कारभूषिताः ।
भावुका गीतवाद्यादि [4]निस्वनैर्मग्नदेहिनः ।। ३८ ।
भावयन्ति महेशानीं काकिनीं परमेश्वरीम् ।
वर्णरूपां नित्यकलां महेश्वरपतिव्रताम् ।। ३९ ।
ईश्वरं भावयन्त्येते पूजयन्ति निरन्तरम् ।
वेष्टिताः सुन्दराकाराः[5] अष्टसिद्धिसमृद्धिदाः[6] ।। ४० ।
एताः पूज्या महाकालवर्णपार्श्वचराः प्रभाः[7] ।
प्रसीद नाथ स्वामीति नाम्ना मनसि पूजयेत् ।। ४१ ।
वर्णेश्वरप्रियानन्दां काकिनीं पूजयाम्यहम् ।
इति मन्त्रेणैव[8] पूज्या वर्णरूपा सरस्वती ।। ४२ ।
तदा प्रसन्नाः सिद्धयन्ति श्रीकाकिन्याः कलौ युगे ।। ४३ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे काकिनीश्वरपर्णपार्श्वचरयजनं नाम सप्तपञ्चाशत्तमः[9] पटलः ।।

---

१. सुरभी देवी शर्मा–ख० ; २. एताश्चान्याश्च–ख० ।
३. संसिद्धिर्वासा नियतिर्विडीदेवीरतिस्तथा–क० ।
४. विश्व–क० । —गीतं वाद्यमादिर्यस्य तादृशैः निस्वनैर्मग्ना देहिनः । आनन्दसागरे निमग्ना भवन्ति, विलक्षणगीतादिश्रवणेनेति भावः ।
५. सुन्दरकराः–क० ; ६. समृद्धिदा–क० ; ७. प्रभो–ख० ।
८. वै पूज्या–ख० ; ९. अष्टपञ्चाशत्तमः पटलः–ख० ।

अथाष्टपञ्चाशत्तमः पटलः

श्रीआनन्दभैरवी उवाच—

अथाष्टसिद्धिमाहात्म्यं श्रृणु श्रीचन्द्रशेखर ।
मन्त्रोद्धारं तथा न्यासं कवचाङ्गं तव प्रियम् ॥ १ ।

स्तोत्रं सहस्रनामाख्यं साष्टोत्तरमनुप्रियम् ।
साकारध्यानमखिलं सालोक्यादिपदप्रदम् ॥ २ ।

यस्य [1]करणमात्रेण [2]सुरो भवति मानुषः ।
वृक्षबीजाद् भवेद्वृक्षः श्रद्धया च फलोदयः ॥ ३ ।

यथा तथैव मन्त्राणामुदयो बीजयोगतः ।
बीजन्तु परमं ज्ञानं बोजाधीनं चराचरम् ॥ ४ ।

बीजमाश्रित्य सर्वेन्द्राः प्रतिभान्ति महौजसः ।
कोटिसूर्यप्रतीकाशाः प्राणस्थाननिवासिनः ॥ ५ ।

के चाप्ययुतसूर्याभाः शतसूर्यसमप्रभाः ।
केचिद् द्वादशसूर्याभाः को [3]जनश्चैकभासुराः ॥ ६ ।

कोऽपि [4]नाम मुनिर्दीप्तः कोऽपि चन्द्रसमप्रभः ।
कोऽपि श्रीकान्तिकिरणः शङ्खचक्रगदाधरः ॥ ७ ।

एते बीजसमुद्भूता [5]निर्बीजाश्च पञ्चदेवताः ।
ब्रह्मविष्णुशिवानन्दभैरवाः[6] प्राणदेवताः ॥ ८ ।

ब्रह्मा ब्रह्मस्वरूपेण श्वासमार्गप्रवेशकः ।
[7]विष्णुर्वैष्णवतत्त्वेन कुम्भकान्तर्गतः प्रभुः ॥ ९ ।

---

१. स्मरण–ख०; २. शिवो–ख०; ३. केऽपि ज्वलत्प्रभाकराः–ख० ।

४. नानामनोर्दीप्तिः–ख० ।

५. बीजाश्च–क० । —निर्गतं बीजं यासां ताः पञ्च देवताः । ब्रह्मा विष्णुः शिवः आनन्दो भैरवश्चेति प्राणापानसमानोदानव्यानाख्यपञ्चप्राणवासुदेवताः ।

६. भैरव इति समस्तपदात्मकः पाठः–ख० पुस्तके; ७. विष्णुर्वैष्णवतन्त्रेणेति–ख० ।

शिवः संहाररूपेण महाप्रलयगः प्रभुः ।
आनन्दभैरवः श्रीमान् मूलज्ञानी परात्परः ॥ १० ।
मूलाम्भोजाद् ब्रह्मरन्ध्रं यावत्तत्र [1]प्रवेशिका ।
प्राणविद्यास्वरूपेण बीजरूपा सनातनी ॥ ११ ।
सा भाव्या योगिभिर्नित्यं योगाङ्गैरतिभाव्यते ।
योगशास्त्रं विना नाथ के जानन्ति महर्षयः ॥ १२ ।
[2]अत्यन्तदुःखसाध्या सा योगिज्ञेया मनोयवा ।
नानारूपा बृहद्रूपा श्वासोच्छ्वासप्रकाशिनी ॥ १३ ।
हृदयाम्भोजमध्यस्था ईश्वरस्थानवासिनी ।
[3]कालचञ्चुप्रकाशा सा सर्वभूतहृदिस्थिता ॥ १४ ।
सर्वेषां ज्ञानकर्त्री च सर्वानन्दकरी हृदि ।
सा देवी काकिनी [4]विद्या ईश्वरी परमा कला ॥ १५ ।
विभाव्या कोटिसूर्याभा कोटिचन्द्रसमानना ।
तस्या मन्त्रं महामन्त्रं ब्रह्ममन्त्रं हि योगिनाम् ॥ १६ ।
शृणु नाथ कुलानन्द भैरव्यादिमनुं मुदा ।
एतन्मन्त्रप्रभावेण[5] परात्मानं वशं नयेत् ॥ १७ ।
दीर्घप्रणवमुच्चार्य वामनेत्रं समुद्धरेत् ।
[6]मायान्ते वाग्भवं बीजं कामबीजं समुद्धरेत् ॥ १८ ।
कामबीजं तथैश्वर्यं नमोऽन्ते[7] वह्निकामिनी ।
एतन्मन्त्रप्रसादेन भवेत् कालवशः क्षणात् ॥ १९ ।
[8]अत्यन्तसुखमाप्नोति भयाज्ञानापहो भवेत् ।
कामेन पुटितं मन्त्रं वाग्भवेनापि वा प्रभो ॥ २० ।

---

१. प्रवेशकः–ख०; २. अनन्तसुख–ख० ।
३. काकचञ्चुप्रकाशा–ख०; ४. देवीति–ख० ।
५. प्रसादेन–ख० । —एतस्य मन्त्रस्य भैरवमन्त्रस्य प्रभावेण प्रसादेन वा इति पाठद्वयीयो भावः ।
६. मायानामिति–क०; ७. नमोन्तवह्नि–ख०; ८. अनन्तेति–ख० ।

स्वमन्त्रपुटितं कृत्वा सिद्धिः स्यादचिरादिह ।
अथान्यमन्त्रं वक्ष्यामि [1]सावधानोऽवधारय ।। २१ ।
भद्रकालीं समुद्धृत्य किङ्किणीबीजमुद्धरेत् ।
[2]बालाबीजं समुद्धृत्य माहेश्वर्यै नमो द्विठः ।। २२ ।
केवलं मूलमन्त्रेण पुटितं मूलमन्त्रकैः ।
पूजयेत् परया भक्त्या हृदयाम्भोजमण्डले ।। २३ ।
अप्रकाश्यमिमं मन्त्रं सर्वतन्त्रेषु गोपितम् ।
लक्षजपेन सिद्धिः स्याद् हृदयाब्जे [3]स्थिरो भवेत् ।। २४ ।
अकस्माद्दीपकलिकाकारं जीवं[4] प्रपश्यति ।
ततो भवेन्महायोगी ईश्वरीमन्त्रसाधनात् ।। २५ ।
ध्यानं वक्ष्यामि पूजाया गुह्याद्गुह्यतरं परम् ।
ध्यात्वा पाद्यादिभिर्नाथ मनःकल्पितपुष्पकैः ।। २६ ।
पूजयेत्परया भक्त्या मन्त्रध्यानपरायणः ।। २७ ।
शशधरशतकोटिश्रीमयूखप्रभायाः
सुरतरुगुणशोभा निर्मला वेदहस्ता ।
अरुणकिरणभालाहारमाला विलोला
हृदयकमलमध्ये श्रीश्वरीं तां भजामि ।। २८ ।
एवं [5]सर्वस्वरूपां तां विभाव्य हृदयाम्बुजे ।
पुनः पुनः पूजयेद्वै त्रैलोक्योद्भवपुष्पकैः ।। २९ ।
अवश्यं सिद्धिमाप्नोति पूजायोगप्रभावतः ।
आयुरारोग्यजननं[6] पूजनं सुमहाफलम् ।। ३० ।
ततो जपेन्महामन्त्रं वर्णमालाक्रमेण तु ।
प्राणायामं ततः कृत्वा न्यसेत् सर्वाङ्गमध्यके ।। ३१ ।

---

१. सावधानावधारयेति–क० ख०; २. कलाबीजमिति–ख०; ३. शिवो–ख० ।
४. बीजमिति–ख० । —दीपस्य कलिकाया आकारो यस्य तादृशं जीवं स्वस्वरूपं प्रपश्यति ।
५. सर्वात्मरूपामिति–ख०; ६. जननीं सुमहत्फलसम्भवाम्–ख० ।

मातृकाग्रन्थिनिकरे न्यसेत् पूर्वोक्तनामभिः ।
यदुक्तं पूर्वपटले तेषां नामभिरेव च ॥ ३२ ।

विन्यस्य मन्त्रपुटितं मन्त्रन्यासं ततश्चरेत् ।
काकिन्या अष्टशक्तीनां न्यासं कुर्यात्ततः परम् ॥ ३३ ।

काकजिह्वाद्विकाण्डेशी[1] कामाख्या[2] काकिनी ध्वजा ।
काकिनी काकमाला च काकचञ्चुप्रकाशिनी ॥ ३४ ।

कोकिला चाष्टशक्तीनां नाम्ना विन्यस्य मस्तके ।
कण्ठकूपे न्यसेत्पश्चात् षोडशस्वरसम्पुटम् ॥ ३५ ।

हृदये विन्यसेन्नाथ कादिद्वादशसम्पुटम् ।
मन्त्रं विन्यस्य विधिना नाभौ मन्त्रेण सम्पुटम्[3] ॥ ३६ ।

डादिफान्तन्तु[4] विन्यस्य वादिलान्तं स्वलिङ्गके ।
मूलाधारे मूलमन्त्रपुटितं वादिसान्तकम्[5] ॥ ३७ ।

विन्यस्य व्यापकं न्यासं कृत्वाङ्गानि च बन्धयेत्[6] ।
ततः प्राणायाममेकं[7] कृत्वा प्राणान् समाश्रयेत् ॥ ३८ ।

ततः स्तोत्रं पठेद्धीमान् तत्सर्वं शृणु शङ्कर ।
[8]हविष्याशी वशीभूत्वा साधयेदिह सिद्धये ॥ ३९ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे काकिनीसिद्धिसाधन-
[9]नामाष्टपञ्चाशत्तमः पटलः ॥

---

१. द्विकाकेशीति–ख० ; २. काकाक्षा–ख० ।
३. नाभौ मन्त्रेण सम्पुटं मन्त्रं विधिना विन्यस्य जपेत् ।
४. फान्तं प्रविन्यस्येति–ख० ; ५. वादिमान्तकमिति–ख० ; ६. वर्धयेदिति–ख० ।
७. प्राणायामत्रिकं कृत्वा प्राणायामं समाश्रयेत्–ख० ।
८. हविष्यमश्नाति तच्छीलो वशी स्वेन्द्रियविजेता भूत्वा सिद्धये सिद्धिमवाप्तुं साधयेत् ।
९. ऊनषष्टितमः पटलः–ख० ।

अथोनषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच[1]—

ज्ञानेश्वरी शुभकरी परिभावनीया
योगेश्वरैर्हरिहरैर्गुरुभिर्महेन्द्रैः ।
तां काकिनीं परशिवां[2] परमेशपत्नीं
संस्तौमि[3] चारुहृदयाम्बुजपीठमध्ये[4] ॥ १ ।

एकाकिनी त्रिजगतामतिनाशकाले
त्वां काकिनीं [5]समरकार्णा(ण्ड)ककाकपत्नीम् ।
त्वं[6] साक्षिणी भुवनभङ्गविधौ सकास्ते
भूषण्डकाकमहिषीव वयं भजामः ॥ २ ।

एकाकिनीं सकलधारणकालयोगे
आधार्यं देहसमये सति काकिनीं त्वाम् ।
वाय्वासने मनस आशु विकारनाशे
काकेन्द्रचञ्चुचलितामहमेवमीडे ॥ ३ ।

भावोदये प्रणयिनीमगतौ[7] च भावा
आह्लादयोगविभवे[8] भुवनेश्वरीं त्वाम् ।
[9]मन्दारहाररुचिरे परमेश्वरि त्वं
रक्षां कुरु प्रथमतो मतिमाश्रयामि ॥ ४ ।

---

१. ख-पुस्तके नास्ति; २. प्रसविनीमिति—ख०; ३. तामिति—ख० ।
४. राजिमध्ये—ख०; ५. कालिक—ख० ।
६. त्वां साक्षिणीं भुवनभङ्गविधौ सकान्ते' ' ' महिषीं सततं भजामीति—ख० ।
७. विभवे—ख० । ८. आह्लादाधायको योग आह्लादयोगस्तस्य विभव ऐश्वर्यम् ।
९. तृतीयचरणं मन्दारहारादि ख-पु० नास्ति ।

चन्द्रोदये[1] सुखमयी द्युतिकोटिदीप्ता
गोप्यागमे [2]सुमतिभिः स्वमनांसि शुद्धा ।
सा त्वं सुखात्त्वं[3] भवभावविपूजनीये
रक्षां कुरु प्रथमभास्करमङ्घ्रिमीडे ॥ ५ ॥

ते पादपङ्कजमजस्रमहं भजामि
सानन्दबिन्दुविमलासनभावपुञ्जे[4] ।
गुञ्जावटी[5]विमलमाल्यसुशोभिताङ्गे
[6]श्यामेव मे चरमभावसमूहदात्री ॥ ६ ॥

पञ्चानने दशभुजे सकलास्त्रयुक्ते
विद्ये भये नरहरे नरहारभूषे ।
[7]प्रेतासने त्रिनयने जननी त्वमेव
[8]रक्षे शुभे चरणपङ्कजमाश्रयामि ॥ ७ ॥

श्रीसुन्दरि प्रणतरक्षिणि वेदमात-
स्तारेश्वरी[9] त्वमपि रक्ष विनाशकाले ।
यद्येकभक्त[10] इतिहासपुराणवक्ता
नित्यानुरक्तहरपादसरोजमीडे ॥ ८ ॥

ते श्रीपदं भुवनसारमनन्तसेव्यं
योगास्पदं कृतिभिराश्रयमेकयोगम् ।
सर्वे भजन्ति निजमोक्षफलाय नित्यं
दीनोऽहमम्ब[11] भुवनेशि मुदा[12]भजामि ॥ ९ ॥

---

१. चन्द्रोदये इत्यादि प्रथमचरणं ख० पु० नास्ति ।
२. सुखकरी शुभदाय शुद्धा–ख०; ३. सुखानुभवकारिणि पूजनीये–ख० ।
४. ननहासपुञ्जे–ख०; ५. गुञ्जात्कटी विमलमाल सुशोभिताङ्गे ।
६. श्यामे च मे.........धात्री–ख० ।
७. श्वेतासने–ख० । —प्रेत आसनं यस्याः सा तत्सम्बोधने, प्रेतासने त्रीणि नयनानि यस्याः सा, तत्सम्बोधने इति यावत् ।
८. दीनोऽस्मि ते–ख०; ९. तारेश्वरीति–क० ।
१०. यद्येक एव इतिहासपुराणरूपे नित्यं तवैव खलु पादसरोजमीडे–ख० ।
११. मद्य–ख०; १२. मुदाश्रयामि–ख० ।

त्रैलोक्यपूजितपदं हृदयाम्बुजस्थं
चित्तप्रकाशकमले[1] स्वसुखानुभूतम् ।
मायाश्रयं सकलसिद्धिनिदानरूपं
मञ्जीरहारविनतं वरमाश्रयामि ।। १० ।

[2]कौटीरहारकमलप्रियमाल्यशोभे
शोभाकरे स्थिरतरा भव मे हृदब्जे ।
भूमण्डले हि बलवान्कृतकृत्य एव
त्वामीश्वरीं हृदि मुदा सुखमाश्रयामि ।। ११ ।

[3]नित्ये पुरा भजति योगसुसिद्धयेऽसौ
शम्भुर्गिरीश इति चेश्वरपार्श्वगामि ।
सायुज्यनाथपदवीं गत ईशकान्ते
एकाकिनी कुलवताङ्घ्रियुगं किमन्यैः ।। १२ ।

ध्यायन्ति योगिन [4]इहाघसमूहशैलं
[5]संहारहेतुकसदाघविनाशनाय ।
चित्तोत्सवाय विभवाय जयाय भूमेः
दीनोऽहमाशु विभजामि पदं श्रिये ते ।। १३ ।

कृष्णे सिते [6]विमलपीतनिभे सुरक्ते
वर्णाश्रये त्वमव [7]मामतिदीनमेकम् ।
पुत्रं तवैव चरणाम्बुजमेव[8] कान्तं
नीलाम्बुजे स्थिरतरं कुरु कामदात्रि ।। १४ ।

---

१. चित्तप्रकाशकमशेषसुखानुभूतमिति–ख० ।
२. चन्द्रोदये सुखमयं द्युतिकोटिदीप्तमिति–ख० ।
३. नित्यं पुरा भवति वै खलु योगसिद्धयै ।—नितरां भवा नित्या ध्रुवा । 'त्यब् नेर्ध्रुवे' इति वार्तिकेन त्यपि सति नित्या इति । सम्बोधने नित्ये ।
४. इहैव तवाङ्घ्रियुग्मम्; ५. हेतुवडपाघविनाशनाय–क० ।
६. विमलपङ्कजकोशसंस्थे–ख० ।
७. मामिह–ख० । —एकमतिदीनमतिहीनं मामित्यन्वयः । दीङ् क्षये इत्यस्माद्दीनशब्दो निष्ठान्तः, ओदितश्चेति तस्य नत्वे दीनः, क्षीण इत्यर्थः ।
८. संस्मृतं माम्–ख० ।

सर्वेश्वरी प्रियकरि[1] भवभावहन्त्रि
[2]नानाध्वनिप्रणतकामदुघे विचित्रे ।
रत्नाम्बरे सुखपदं यदि देहि दास्यं
[3]त्वं चारुवर्णगलिते[4] पदमाश्रयामि ।। १५ ।

रत्नाकरे सकरुणेऽरुणकोटिवर्णे
[5]स्वर्णादिनिर्मितसृजापविशोभिताङ्गी ।
त्वं काकिनी यदि कटाक्षनिपातमेकं
[6]सर्वं कुरुष्व सुखमोक्षपथप्रमोदी ।। १६ ।

आद्ये प्रवालविमलेऽमलमाल्यशोभे
सूक्ष्मेऽतिसूक्ष्मनिकरे[7] करुणानिधाने ।
[8]वाले वले प्रचले चपले प्रलापे
योगेशि पादकमलं कुलमाश्रयामि ।। १७ ।

त्वं षोडशी खरतरा खरखड्गहस्ते
खड्गेश्वरी प्रखरवाक्यमथाढचवक्त्रे ।
खर्जूरहाररुचिरे खलहन्त्रि तुभ्यं
नित्यं नमो नम उपेन्द्रगिरीन्द्रसेव्ये ।। १८ ।

गीतानते तरुतरे प्रणमामि नित्यं
गात्रेश्वरी गतिहरे गणनाथसेव्ये ।
गायन्ति ते चरणपङ्कजसारगीतं
रक्षाप्रचण्डकलुषादनुपेक्षणीयम् ।। १९ ।

दीर्घस्वरे घनवरे घनघोरनादे
घोरानने नवघने घटनाघनानाम् ।
घोरास्पदे घटगते घटशून्यकर्त्रि
त्वं काकिनी समवतु क्षितिदोषजालात् ।। २० ।

---

१. प्रियकरी–ख० ; २. नानात्मिके सकलकामहरे विचित्रे–ख०; ३. तच्चारु–ख० ।
४. गणितम्–ख०; ५. स्वार्थादि–ख०; ६. कर्णे कुरुष्व खलु मोक्षपदानुभेदी–ख० ।
७. तनु देहि पदाब्जयुग्मम्–ख० ।
८. त्वं षोडशी इत्यारभ्य पटलान्तं श्लोक-कदम्बकं ख०-पुस्तके नास्ति ।

आनुस्वरे स्मरहरे ननु रूपविद्ये
संयोगिनीप्रबलशत्रुविनाशभूते ।
रक्षेऽतिरक्ष करुणां कुरु देहि मोक्षं
चण्डि प्रचण्डनयने चरणं भजे ते ॥ २१ ।

छत्रप्रदे छलहरे छदवासिनी त्वं
छद्मस्थिते हृदयपङ्कजदक्षयोगे[1] ।
त्वां पूजये जयधरे यदुनाथ जन्यो
जाये जयं यदिह देहि पदं भजामि ॥ २२ ।

झङ्के झनज्वलयतीह रिपुं पिबन्ति
त्वं कौशिकी सकलदेहविशोधनी त्वम् ।
नित्येऽनुनासिकपदे सकलार्थदे त्वं
रक्षां कुरुष्व विपदे कुलपुञ्जगुञ्जे ॥ २३ ।

टङ्कारगेऽट्टहसने टललेऽट्टहासे
ठाक्कारिणी सठहरापरिनिष्ठिता त्वम् ।
सिंहेष्टपृष्ठनिलयेऽस्थिरयोगभावं
हृत्पद्मके कुरु सदा सकलार्थदात्रि ॥ २४ ।

एतत्स्तोत्रं पठेद्धीमान् ध्यानन्यासपरायणः ।
विभाव्य स्तौति यो योगी स योगी मोक्षभाग्भवेत् ॥ २५ ।

हृत्पङ्करुहमध्यस्थं स पश्यति जगत्त्रयम् ।
[2]अष्टसिद्धियुतः शीघ्रं जीवन्मुक्तो भवेन्नरः ॥ २६ ।

॥ इति श्रीरुद्रयामले महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे काकिनीस्तोत्रविन्यासो नामोनषष्टितमः पटलः ॥

---

१. हृदयं पङ्कजमिव, "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इति समासः ।
२. अष्टौ सिद्धयोऽणिमाद्याः प्रसिद्धाः, ताभिर्युतोऽलङ्कृत इति यावत् ।

अथ षष्टितमः पटलः

आनन्दभैरव उवाच—

वद कान्ते परानन्दे रहस्यं कुलसुन्दरि ।
यस्य विज्ञानमात्रेण भवेद् गङ्गाधरो हरिः ॥ १ ॥

ईश्वरस्य स्तवब्रह्मपरं निर्वाणसाधनम् ।
[1]शोभाकोटियोगपतेर्योगेन्द्रस्य परापतेः ॥ २ ॥

ईश्वरं के न मानन्ति ब्रह्मविष्णुशिवादयः ।
तस्य स्मरणमात्रेण महावाग्मी च मृत्युजित् ॥ ३ ॥

[2]मन्त्री वेदान्तसिद्धान्तं तं भजन्ति महर्षयः ।
देवा मनुष्या गन्धर्वास्तं भजन्ति महेश्वरम् ॥ ४ ॥

अकालमृत्युहरणं सर्वदा सर्वतोमुखम् ।
सदा तस्य स्तवं दिव्यं श्रोतुमिच्छामि शाङ्करि[3] ॥ ५ ॥

श्रीआनन्दभैरवी उवाच—

कौल त्वं शृणु शङ्करप्रियकरं स्तोत्रं [4]तदीशस्य च
श्रीनाथाय नमः कुलेश [5]परमप्राणेश तुभ्यं मुदा ।
सानन्दाय नमो भवाय पतये लोकेश्वरायों नमो
भूतेशाय गणाधिपाय यतये[6] श्रीशूलिने ते नमः ॥ ६ ॥

कान्ताय प्रणवाय[7] योगपतये योगेश्वरायों नमो
[8]महारायाक्षरेश्वराय महते नित्याय नित्यं नमः ।
स्वाधिष्ठानविभेदकाय हरये मूलाब्जसम्भेदिने
[9]नाभेरम्बुजभेदिने हृदयाम्भोद्भिदकायों नमः ॥ ७ ॥

---

१. शोभा कोटिर्योगपते·········परागतिः–ख०; २. सर्ववेदान्तसिद्धान्तैस्तम्–ख० ।
३. शङ्करो–ख०; ४. मदीशस्य च–ख०; ५. सततम्–ख० ।
६. सततम्–ख० ।—यतिः सन्न्यासिराट्, तस्मै, श्रिया सहितः शूली, तस्मै इति भावः ।
७. प्रभवाय–ख० ।
८. ओङ्काराय, कवीश्वराय–ख० ।—भोगानामायो वृद्धिः, तत्रान्तर्यागिणे इति यावत् ।
९. ओम्नमोऽम्बुजभेदिने हृत्पद्मोद्भेदकाय ओं नमः–ख० ।

कालाय प्रणवाय मायवशिने नित्यं नमो भास्वते
मोक्षाय प्रथमेश्वराय कवये खट्वाङ्गहस्ताय ते।
भक्तिश्रीनिधये[1] महेन्द्रखचराय[2] मायाश्रयायों नमो
विज्ञानाय शिवाय सूक्ष्मगतये गूढाय भूयो नमः ॥ ८ ।

सर्वज्ञाय जयाय भूतिपतये[3] भूतेश्वराय प्रभो
पञ्चास्याय हराय देवपतये गौरीश्वराय श्रिये।
[4]भोगायान्तरगामिने हरिहरायानन्दचिद्रूपिणे
कल्याणाय भगाय शुद्धमतिभिर्नित्यं नमस्ते नमः ॥ ९ ।

गोविन्दप्रियवल्लभाय विधये ब्रह्मादिकोत्पत्तये
उत्पत्तिस्थितिसंहृतिप्रकृतये [5]बाह्याय विश्वेश्वर।
तुभ्यं काल नमो नमः प्रलययोगोल्लासिने भूभृते
[6]विज्ञाताय गिरीन्द्रपूजित विभो भूताधिपायानिशम्[7] ॥ १० ।

गौरीशाय गणार्चिताय मनसे[8] मान्याय[9] भूवासिने
भूतोत्साहमहीशनाथशशिचूडाय प्रधानाय ते।
नित्यं नित्यकलाकुलाय फणिचूडाय[10] प्रबुद्धाय ते
तेजःशान्तिपते सतां[11] पतिपते निर्वासिसे ते नमः ॥ ११ ।

शोभाकोटियुताय चन्द्रकिरणाह्लादाय सूक्ष्माय ते
तुभ्यं नाथ नमो नमः प्रणमतामानन्दसिन्धूत्सवा।
हेरम्ब[12] श्रयकार्तिकेयजनकानन्दप्रियाय प्रभो
पित्रे सर्वसुखाय सर्वपतये श्रीनीलकण्ठेश्वर ॥ १२ ।

---

१. निलये–ख०; २. खचरैर्माया........ख०; ३. भूतपतये–ख०।
४. ओंभोगान्तरगामिने–ख०; ५. बाम्यायेति–क०; ६. विख्याताय–ख०।
७. भूतानामधिपाय स्वामिने।
८. मनवे–ख०; ९. मन्याय–क०; १०. बुद्धायेति–ख०।
११. संजलपतिनिर्वासिशे नमः–क०; १२. हेरम्बाश्रयकार्तिकेशजनका........ख०।

त्रिब्रह्मार्पितभूतये सुरतये[1] श्रीभास्वते योगिना-
मानन्दोदयकारिणे कुलपते ते[2] नाथ तुभ्यं नमः ।
ब्रह्मानन्दकुलाय रौप्यगिरये सौन्दर्यसंसिद्धये
सर्वानन्दकराय सम्परतरायाढचाय सत्यं[3] नमः ॥ १३ ।

काशीशं कौशिकीशं सुरतरुकिरणं कारणाख्यं सुखाख्यं[4]
गौरीशं [5]गङ्गिरीशं गुरुमगुरुगिरिश्रेणिलिप्ताङ्गवङ्गम् ।
घोषाख्यं मञ्जुघोषं घनगणघटितं घोरसङ्घट्टनादं
[6]चार्वीशं राघवेशं घनहृदि घटमामीश्वरं घौटकेशम्[7] ॥ १४ ।

[8]लाक्षाभाण्डं विशालो वसति तव करे स्थावरो जङ्गमो वा
भूताध्यक्षो[9] वशिष्ठः स्वपरिजनकुले सर्वदा पाहि शम्भो ।
भक्तिज्ञानं [10]न दातुं चपलमलमणिश्रेणिमाला विलोला
लोकाभीतो[11]कलङ्की विधिशतमुकुटश्रीपदाम्भोरुहं ते ॥ १५ ।

धूर्तः शौरिः प्रशान्तो विमलमधुरसामोदमानोऽप्रमत्तो[12]
मायामोहापदेवी[13] सुरमदमदनो दानसम्मानदाता ।
[14]त्वं नाथं श्रीपदाम्भोरुहविमलतले[15] ते कथं ना सुरक्षे
पूर्वास्यो दक्षिणास्यो धनपतिवदनः पश्चिमास्यो[16]मुनिस्त्वम् ॥ १६ ।

---

१. सुरपते—ख०;   २. हे—ख०;   ३. सत्यमिति—क० ।
४. सुघाख्यमिति—ख० ।
५. सर्वंमीशं गुरुगिरिनमितं श्रोणिलिप्ताङ्गभस्ममिति—ख० ।
६. अर्घीशं.........जनघटनया चेश्वरमिति........ख० ।
७. घोटकानामीशं घोटकेशमित्यनेन तीव्रगतिकानां मनांसि ईशयति इति यावत् ।
८. नित्यं वै त्वं विशालो वसति तव करे" ख० ।
९. भूताध्यक्षं वाशिष्ठमिति—ख० ।
१०. न दत्तमिति ख०.... चपलसितमणि.... विलोलो.... ख० ।
११. लोकातीतः कलङ्कीविद्युशत.... अम्भोरुहस्ते—ख० ।—अकलङ्की इति पदच्छेदो भाति । "अतो रोरप्लुतादप्लुते" इति सूत्रेण रोरुत्वम् ।
१२. मोदमानः प्रमत्तो—ख०;   १३. प्रणाशो...सर्वंसम्मानदाता—ख० ।
१४. ते नाथ;   १५. तलेऽहं कथं चाशु वक्ष्ये—ख०;   १६. मुनीन्द्र—ख० ।

[1]भेदी [2]सिद्धान्तविद्याधरनिधिकिरणः कारणोऽनन्तशक्ति-
र्यः साक्षात् कामधेनुः स च धनपतिपः सर्वभोगानुरागी ।
पादाम्भोजे हि नित्यं [3]कलगिरिसुतानाथ ते योगिपत्वं
चित्तं मे चञ्चलाख्यं शशिधरकिरणो वाक्पते[4] योगसिद्धिः ॥ १७ ।

[5]कपर्दी श्रीखड्गासिवरगदया वेदभुजया
घनच्छायासंकोचरचरवशच्छद्मविजयः[6] ।
जयी जेता जायेर्जयमनुकरोतु श्रियतमो
ज्वलज्झंझावाते क्षणधर इह क्रोध इति मे ॥ १८ ।

[7]अथाऽऽज्ञाचक्रान्तर्गतविवरमाच्छन्नजटिलः
प्रतिज्ञाभङ्गस्थकटकशतकोटिप्रकटितः ।
कुठारस्ते[8] क्रोधी कमठकटवासी[9] कठिनहा
ककाराद्यं[10] नत्वा दशकिरणमानोऽवतु सदा ॥ १९ ।

[11]सुधाखण्डादेव्याः स्तवनपठनेन प्रियकरं
पदाम्भोजं चेति प्रचयति[12] स्वभाग्यं कुलपते[13]।
[14]प्रधाने भूखण्डे जयति यदि मृत्युञ्जयपदं
विनोदं भूयोगं पचति[15] सहसा [16]प्रेमतरलः ॥ २० ।

---

१. भेदे–ख०; २. विघु ; ३. समरगिरि....योगपन्नमिति–क० ।
४. वाक्पतेर्योगसिन्धो–ख० ।—'वाक्पते, योगसिन्धो' इति पदद्वयस्य संबोधने औचित्यम्, अथवा वाक्पते ! हे भगवन् ! तदा योगसिद्धिर्भवति, इत्यन्वयः ।
५. कापर्दी श्रीखड्गासिवरगदयावेद भुजगो
घनच्छायां संकोचय मम सदा कायनिचये ।
जयी जेता जातेर्जं ...ख० ।
६. स्थूलविजयः–ख० ।
७. सदाज्ञाचक्रान्तर्गतविषधरमाच्छन्नजटिलः–ख०; ८. कुठारास्त्रः–ख० ।
९. तट–ख०; १०. ककाराद्यणोर्द्वादशकिरणयुक्तोऽवतु सदा–ख० ।
११. सुधाखण्डं हुत्वा स्तवनपठने न प्रिय....ख०; १२. प्रचरति–ख०; १३. कुलपतेः–ख० ।
१४. प्रधाने–ख० ।—अयमेव पाठो युक्तः प्रतिभाति, अर्थसंगतेः ।
१५. पठति–ख०; १६. तरणः–ख० ।

यद्येवं प्रपठेदिदमनियतं[1] कौलावलीसंयुतं[2]
[3]स्तोत्रं साररहस्यभारपरमानन्दैकचित्तस्थलम् ।
योगीन्द्रावगतित्वमुक्तफलदं[4] सर्वेश्वरत्वं पदं
चन्द्रादित्यसमागतं परपदाह्लादैकमात्रं लभेत् ॥ २१ ।

ते शम्भो यदि पादाम्भोरुहमङ्गलवल्लिका[5] ।
[6]पूज्यते सर्वदा योगी निर्वाणगुणसिद्धये ॥ २२ ।

किन्न सिद्धयति भूमध्ये शिवभक्तिप्रसादतः ॥ २३ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने अनाहतपद्मे
[7]सुरस्तवनं नाम षष्ठितमः पटलः ॥

●

---

१. न्तु–ख० ; २. सम्मतमिति–ख० ।
३. संसारे सरहस्यकं भवभयानन्दैकचित्तस्थलमिति–ख० ।
४. मुक्तिफलदमिति–ख० ।—अर्थसंगत्या अयमेव पाठो युक्ततरो भाति ।
५. पाद एव अम्भोरुहं कमलम्, अथवा पादोऽम्भोरुहमिव, तत्र **मङ्गलवल्लिका** ।
६. स्तौति वै सर्वदा'''ख० ।—पूज्यते सर्वदा योगी, इति मूलपाठो युक्ततरः प्रतिभाति ।
७. अत्र क-खपुस्तकयोः पटलसंख्या समाना जाता ।

अथैकषष्टितमः पटलः

श्रीआनन्दभैरव उवाच—

वद कल्याणि कामेशि त्रैलोक्यपरिपूजिते ।
ब्रह्माण्डानन्तनिलये[1] कैलासशिखरोज्ज्वले ।। १ ।

कालिके कालरात्रिस्थे महाकालनिषेविते ।
शब्दब्रह्मस्वरूपे त्वं वक्तुमर्हसि सादरात् ।। २ ।

[2]सहस्रनामयोगाख्यम् अष्टोत्तरमनन्तरम् ।
अनन्तकोटिब्रह्माण्डं सारं परममङ्गलम् ।। ३ ।

ज्ञानसिद्धिकरं साक्षाद् अत्यन्तानन्दवर्धनम् ।
[3]सङ्केतशब्दमोक्षार्थं काकिनीस्वरसंयुतम् ।। ४ ।

परानन्दकरं ब्रह्म निर्वाणपदलालितम्[4] ।
[5]स्नेहादभिसुखानन्दादादौ ब्रह्म वरानने ।। ५ ।

इच्छामि सर्वदा मातर्जगतां सुरसुन्दरि ।
स्नेहानन्दरसोद्रेकसम्बन्धान्[6] कथय द्रुतम् ।। ६ ।

श्रीआनन्दभैरवी उवाच—

ईश्वर श्रीनीलकण्ठ नागमालाविभूषित ।
नागेन्द्रचित्रमालाढ्य नागाधिपरमेश्वर ।। ७ ।

काकिनीश्वरयोगाढ्यं सहस्रनाममङ्गलम् ।
[7]अष्टोत्तरं वृताकारं कोटिसौदामिनीप्रभम् ।। ८ ।

---

१. आनन्द–ख०; २. इदं पद्यार्धं ख० पु० नास्ति; ३. शङ्केत–क० ।
४. मादितमिति–क०; ५. स्नेहादतिसुखा''''श्रोतुं वरानने–ख० ।
६. सम्बन्धान्कवचं द्रुतमिति–ख० ।—स्नेहेनानन्दः स्नेहानन्दः, स चासौ रसश्च तस्योद्रेको वर्धनम्, तेन जनिताः सम्बन्धास्तान् । स्नेहानन्दः सत्त्वगुणजनितो भवति, रजस्तमोभ्यां तु आनन्दस्य विखण्डनं भवति ।
७. अष्टोत्तरं विभाकरमिति–क० ।

आयुरारोग्यजननं श्रृणुष्वावहितो मम ।
अनन्तकोटिब्रह्माण्डसारं नित्यं परात्परम् ॥ ९ ।

साधनं ब्रह्मणो ज्ञानं [1]योगानां योगसाधनम् ।
सार्वज्ञ्यगुह्यसंस्कारं संस्कारादिफलप्रदम् ॥ १० ।

वाञ्छासिद्धिकरं साक्षान्महापातकनाशनम् ।
महादारिद्र्यशमनं महैश्वर्यप्रदायकम् ॥ ११ ।

[2]जपेद्यः प्रातरि प्रीतो मध्याह्नेऽस्तमिते रवौ ।
नमस्कृत्य जपेन्नाम ध्यानयोगपरायणः ॥ १२ ।

काकिनीश्वरसंयोगं ध्यानं ध्यानगुणोदयम् ।
आदौ ध्यानं समाचर्य निर्मलोऽमलचेतसा ॥ १३ ।

ध्यायेद्देवीं महाकालीं काकिनीं कालरूपिणीम् ।
परानन्दरसोन्मत्तां श्यामां कामदुघां पराम् ॥ १४ ।

चतुर्भुजां खड्गचर्मवरपद्मधरां [3]हराम् ।
शत्रुक्षयकरीं रत्नाऽलङ्कारकोटिमण्डिताम् ॥ १५ ।

तरुणानन्दरसिकां पीतवस्त्रां मनोरमाम् ।
केयूरहारललितां ताटङ्कद्वयशोभिताम् ॥ १६ ।

ईश्वरीं कामरत्नाख्यां काकचञ्चुपुटाननाम् ।
सुन्दरीं वनमालाढ्यां चारुसिंहासनस्थिताम् ॥ १७ ।

[4]हृत्पद्मकर्णिकामध्याकाशसौदामिनीप्रभाम् ।
एवं ध्यात्वा पठेन्नाम मङ्गलानि पुनः पुनः ॥ १८ ।

ईश्वरं कोटिसूर्याभं [5]ध्यायेद्धृदयमण्डले ।
चतुर्भुजं वीररूपं लावण्यं भावसम्भवम् ॥ १९ ।

---

१. योगिनामिति–ख० ।
२. पठेद्य प्रातरुत्थाय······ मध्याह्ने वा तथाविधः–ख० ।
३. परामिति–ख० ।—हरामिति पाठे हरतीति हरा, पचादजन्तता ज्ञेया । परामिति पाठे तु उत्कृष्टामित्यर्थो ज्ञेयः ।
४. हृत्पद्मकर्णिकामध्यकोटि सौदामिनि प्रभामिति–ख० ।
५. हृन्मण्डले परम्–ख० ।

श्यामं हिरण्यभूषाङ्गं चन्द्रकोटिसुशीतलम् ।
अभयं वरदं पद्मं[1] महाखड्गधरं विभुम् ।। २० ।
किरीटिनं महाकायं स्मितहास्यं[2] प्रकाशकम् ।
हृदयाम्बुजमध्यस्थं नूपुरैरुपशोभितम् ।। २१ ।
कोटिकालानलं दीप्तं काकिनीदक्षिणस्थितम्[3] ।
एवं विचिन्त्य मनसा योगिनं[4] परमेश्वरम् ।। २२ ।
ततः पठेत् सहस्राख्यं[5] वदामि शृणु तत्प्रभो ।। २३ ।

अस्य श्रीकाकिनीश्वरसहस्रनामस्तोत्रस्य ब्रह्मऋषिर्गायत्रीच्छन्दो जगदीश्वरकाकिनी देवता निर्वाणयोगार्थसिद्ध्यर्थे [6]जपे विनियोगः ।

ॐ [7]ईश्वरः काकिनीशान ईशान कमलेश्वरी ।
ईशः काकेश्वरीशानी[8] ईश्वरीशः कुलेश्वरी ।। २४ ।
[9]ईशमोक्षः कामधेनुः कपर्दीशः कपर्दिनी ।
कौलः कुलीनान्तरगा कविः[10]काव्यप्रकाशिनी ।। २५ ।
कलादेशः सुकविता कारणः[11] करुणामयी ।
कञ्जपत्रेक्षणः काली कामः[12]कोलावलीश्वरी ।। २६ ।
किरातरूपी कैवल्याकिरणः[13] कामनाशना ।
[14]कार्णाटेशः सकर्णाटो कलिकः कालिकापुटा ।। २७ ।

---

१. पद्ममहा...... ख०; २. स्मितहास्यप्रकाशकम्–ख० ।
३. दक्षिणे–ख०; ४. योगिनाम्–ख०; ५. सहस्रास्यम्–ख० ।
६. जपे–ख० पु० नास्ति ।
७. ॐ ॐ ईश्वरः काकिनीशा ईशानः कुलेश्वरी । ईशः साक्षी कामधेनुः कपर्दिन्नर्क-पद्मिनी–ख० ।
८. ईश सामर्थ्ये इत्यस्माद् धातोः 'स्थेशभासपिसकसो वरच्' इति कर्त्तरि वरच्, ततः प्रयोगे ङीष् ।
९. इदं पद्यार्धं ख० पुस्तके न दृश्यते; १०. कविकाव्य...... ख० ।
११. कारणा–ख०; १२. कौलावली–ख०; १३. केवलं कमलासना–ख० ।
१४. किन्नटेशः सुकेशाक्षी कपिलः कलिप्रस्फुटः–ख० ।

किशोरः कीशुनमिता[1] केशवेशः कुलेश्वरी ।
केशकिञ्जलककुटिलः[2] कामराजकुतूहला[3] ॥ २८ ।
करकोटिधरः कूटा क्रियाक्रूरः क्रियावती ।
[4]कुम्भहा कुम्भहन्त्री च कटकच्छकलावती ॥ २९ ।
[5]कञ्जवक्त्रः कालमुखी कोटिसूर्यकरानना ।
कम्रः कलपः समृद्धिस्था कुपोऽन्तस्थः कुलाचला ॥ ३० ।
[6]कुणपः कौलपाकाशा स्वकान्तः कामवासिनी[7] ।
सुकृतिः शाङ्करी विद्या [8]कलकः कलनाश्रया ॥ ३१ ।
[9]कर्कन्धुस्थः कौलकन्या कुलीनः कन्यकाकुला ।
कुमारः केशरी विद्या कामहा कुलपण्डिता ॥ ३२ ।
[10]कल्कीशः कमनीयाङ्गी कुशलः कुशलावती ।
केतकीपुष्पमालाढ्यः केतकीकुसुमान्विता ॥ ३३ ।
कुसुमानन्दमालाढ्यः कुसुमामलमालिका ।
कवीन्द्रः काव्यसम्भूतः काममञ्जोररञ्जिनी ॥ ३४ ।
कुशासनस्थः कौशल्याकुलपः कल्पपादपा ।
कल्पवृक्षः कल्पलता विकल्पः कल्पगामिनी ॥ ३५ ।
कठोरस्थः[11] काचनिभा करालः कालवासिनी ।
कालकूटाश्रयानन्दः कर्कशाकाशवाहिनी ॥ ३६ ।

---

१. कीशरसिका कौलकेशः–ख० ।
२. केशकिञ्जल्को जटिलः–ख० । —केशानां किञ्जल्कोऽस्यास्ति स केशकिञ्जल्की । अत इनिः । षष्ठीतत्पुरुषे सति मत्वर्थीय इनिः ।
३. बीज–ख०; ४. कष्टहा कुष्ठहन्त्री च कटकास्या कलावती–ख० ।
५. कम्नवक्रः कामसुखी कोटिसूर्यवरानना–ख० ।
कम्पः कम्पसुबुद्धिस्थः कल्पान्तस्थः–ख० ।
६. कुलपः–ख०; ७. काञ्ची–ख० ।
८. कामहा कुलपण्डिता–ख० । —कामे वास इति कामवासः, सोऽस्या अस्ति सा । कामाधिष्ठात्री इत्यर्थः । ९. अयं श्लोकः ख० पु० नास्ति ।
१०. कंकेशः–ख० । —कर्कः शुक्लोऽश्वः । सोऽस्यास्ति स कर्की, रलयोरभेदे लत्वम् । स चासौ ईशश्चेति कर्मधारयः । कल्की इति कलियुगान्ते भगवदवतारः; ११.कठिनमा-ख०।

कटधूमाकृतिच्छायो[1] विकटासनसंस्थिता ।
[2]कायधारी कूपकरी करवीरागतः[3] कृषी ॥ ३७ ॥

कालगम्भीरनादान्ता[4] विकलालापमानसा[5] ।
[6]प्रकृतीशः सत्प्रकृतिः प्रकृष्टः कर्षिणीश्वरी ॥ ३८ ॥

भगवान् वारुणीवर्णा विवर्णो [7]वर्णरूपिणी ।
सुवर्णवर्णो हेमाभो महान्[8] महेन्द्रपूजिता ॥ ३९ ॥

महात्मा महतीशानी महेशो मत्तगामिनी ।
महावीरो महावेगा महालक्ष्मीश्वरो मतिः ॥ ४० ॥

महादेवो महादेवो महानन्दो महाकला ।
महाकालो महाकाली महाबलो महाबला ॥ ४१ ॥

महामान्यो महामान्या महाधन्यो[9] महाधनी ।
महामालो महामाला महाकाशो महाकशा[10] ॥ ५२ ॥

महायशो[11] महायज्ञा महाराजो [12]महारजा ।
महाविद्यो महाविद्या महामुख्यो महामखी[13] ॥ ४३ ॥

महारात्रो महारात्रिर्महाधीरो[14] महाशया ।
महाक्षेत्रो महाक्षेत्रा कुरुक्षेत्रः कुरुप्रिया ॥ ४४ ॥

महाचण्डो महोग्रा च महामत्तो महामतिः ।
महावेदो महावेदा महोत्साहो महोत्सवा ॥ ४५ ॥

महाकल्पो महाकल्पा महायोगो[15] महागतिः ।
महाभद्रो महाभद्रा महासूक्ष्मो महाचला ॥ ४६ ॥

---

१. छाया–ख०; २. काल–ख० ।
३. भगः कृषा–ख०; ४. नादन्तो–ख०; ५. मानुषा–ख० ।
६. प्रकृतिस्थः–ख०; ७. वर्णो वर्णस्वरूपिणी–ख० ।
८. महामहेन्द्र–ख० ।
९. महाधन्या–ख० । —प्रकरणदृष्ट्या तु 'महाधन्या' इत्येव पाठो युक्ततरः प्रतिभाति, धनमैश्वर्यं लब्धवती धन्या, महती चासौ धन्या चेति विशेषणसमासः ।
१०. महावियत्–ख०; ११. महायज्ञो–ख०; १२. महेश्वरी–ख०;
१३. महामुखी–ख०; १४. महारात्री–क०; १५. महायोगी–ख० ।

महावाक्यो महावाणी महायज्वा[1] महाजवा ।
महामूर्तिर्महाकान्ता[2] महाधर्मो महाधना[3] ॥ ४७ ।

महामहोग्रो महिषी महाभोग्यो[4] महाप्रभा ।
[5]महाक्षेमो महामाया महामाया महारमा ॥ ४८ ।

महेन्द्रपूजिता माता विभालो[6] मण्डलेश्वरी ।
[7]महाविकालो विकला [8]प्रतलस्थललामगा ॥ ४९ ।

कैवल्यदाता कैवल्या कौतुकस्थो विकर्षिणी[9] ।
[10]वालाप्रतिर्वालिपत्नी वलरामो वलाङ्गजा ॥ ५० ।

[11]अवलेशः कामवीरा प्राणेशः प्राणरक्षिणी ।
पञ्चमाचारगः पञ्चापञ्चमः[12] पञ्चमीश्वरी ॥ ५१ ।

प्रपञ्चः पञ्चरसगा[13] निष्प्रपञ्चः कृपामयी ।
कामरूपी कामरूपा कामक्रोधविवर्जिता ॥ ५२ ।

कामात्मा कामनिलया कामाख्या[14]कामचञ्चला ।
कामपुष्पधरः कामा कामेशः[15] कामपुष्पिणी ॥ ५३ ।

महामुद्राधरो मुद्रा सन्मुद्रः [16]काममुद्रिका ।
चन्द्रार्धकृतभालाभो विधुकोटिमुखाम्बुजा ॥ ५४ ।

---

१. महाजल्पा महाज्वली–ख०; २. महामूर्ति महाकान्तो–ख० ।
३. महाधर्मा–क०; ४. महाभाग्यो–ख० ।
५. महाक्षोमो–क०; ६. विभाण्डो–ख० ।
७. महाविकारी–ख०; ८. प्रवलस्थः स्थलायता–ख० ।
९. विकल्पिनी–ख० ।
१०. बाला पति बाला पानो पत्नी बालो–ख० ।
११. अवनीशः कालवीरा–ख०; १२. प्रपञ्चः–ख० ।
१३. रसना–ख०; १४. कामाख्यः–ख० ।
१५. कटकस्थः कलावती–ख० ।
१६. कम्रवक्त्रः काममुखी कोटिसूर्यकरानना ।
कुनपः कीलपाकाशा सुकान्तः काञ्चवासिनी ॥
सुकृतिः शाङ्करी विध्या कामहा कुलपालिता । ख० ।

चन्द्रकोटिप्रभाधारी चन्द्रज्योतिः स्वरूपिणी ।
सूर्याभो वीरकिरणा[1] सूर्यकोटिविभाविता[2] ॥ ५५ ।

मिहिरेशो[3] मानवका अन्तर्ग्गामी[4] निराश्रया ।
प्रजापतीशः कल्याणी[5] दक्षेशः कुलरोहिणी ॥ ५६ ।

अप्रचेताः[6] प्रचेतस्था व्यासेशो व्यासपूजिता ।
काश्यपेशः काश्यपेशी भृग्वीशो[7] भार्गवेश्वरी ॥ ५७ ।

वशिष्ठः प्रियभावस्थो वशिष्ठबाधितापरा ।
पुलस्त्यपूजितो देवः पुलस्त्यचित्तसंस्थिता ॥ ५८ ।

अगस्त्याच्र्योऽगस्त्यमाता प्रह्लादेशो वलीश्वरी ।
कर्दमेशः कर्दमाद्या बालको बालपूजिता ॥ ५९ ।

मनस्थश्चान्तरिक्षस्था शब्दज्ञानी सरस्वती ।
रूपातीता[8] रूपशून्या विरूपो रूपमोहिनी ॥ ६० ।

विद्याधरेशो विद्येशी वृषस्थो [9]वृषवाहिनी ।
रसज्ञो रसिकानन्दा विरसो रसवर्जिता ॥ ६१ ।

सौनः सनत्कुमारेशी योगचर्येश्वरः प्रिया ।
[10]दुर्वाशाः प्राणनिलयः साङ्ख्ययोगसमुद्भवा ॥ ६२ ।

असङ्ख्येयो[11]मांसभक्षा सुमांसाशी मनोरमा ।
नरमांसविभोक्ता च नरमांसविनोदिनी ॥ ६३ ।

[12]मीनवक्त्रप्रियो मीना मीनभुङ्मीनभक्षिणी ।
रोहिताशी मत्स्यगन्धा [13]मत्स्यनाथो रसापहा ॥ ६४ ।

---

१. सूर्याभः सूर्यकिरणा–ख० ।
२. विभासिता–ख० ।—सूर्याणां कोटयस्ताभिर्विभाविता ।
३. महेन्द्रेणो मीनवक्रा–ख०; ४. अन्तर्यामी–ख०; ५. श्रीकन्या–ख० ।
६. स्वचेतः स्यःस्वचेतः स्था–ख० ।—अविद्यमानं प्रचेतो यस्य सः; ७. भृगुपः–ख० ।
८. वाहना–ख०; ९. मौनः·······योगाचार्ये–ख०; १०. दुर्वासा–ख० ।
११. असङ्ख्या मांसभक्षा चेति–ख०; १२. मत्स्यमत्तासवप्रिया–ख० ।
१३. पद्यार्धं ख० पु० नास्ति ।

[1]पार्वतीप्रेमनिकरो त्रिधिदेवाधिपूजिता ।
विधातृवरदो वेद्या वेदो वेदकुमारिका ॥ ६५ ।
श्यामेशो सितवर्णा च चासितोऽसितरूपिणी ।
महामत्ताऽऽसवाशी च महामत्ताऽऽसवप्रिया ॥ ६६ ।
[2]आसवाढ्योऽमनादेवी निर्मलासवपामरा[3] ।
विसक्तो[4] मदिरामत्ता मत्तकुञ्जरगामिनी ॥ ६७ ।
मणिमालाधरो मालामातृकेशः[5] प्रसन्नधीः ।
जरामृत्युहरो गौरी गायनस्थो जरामरा ॥ ६८ ।
सुचञ्चलोऽतिदुर्धर्षा कण्ठस्थो [6]हृद्गता सती ।
अशोकः शोकरहिता मन्दरस्थो[7] हि मन्त्रिणी ॥ ६९ ।
मन्त्रमालाधरानन्दो मन्त्रयन्त्रप्रकाशिनी ।
मन्त्रार्थचैतन्यकरो मन्त्रसिद्धिप्रकाशिनी ॥ ७० ।
मन्त्रज्ञो मन्त्रनिलया [8]मन्त्रार्थामन्त्रमन्त्रिणी ।
बीजध्यानसमन्तस्था मन्त्रमालेऽतिसिद्धिदा ॥ ७१ ।
मन्त्रवेत्ता मन्त्रसिद्धिर्मन्त्रस्थो मान्त्रिकान्तरा ।
बीजस्वरूपो बीजेशी बीजमालेऽति[9] बीजिका ॥ ७२ ।
बीजात्मा बीजनिलया बीजाढ्या[10]बीजमालिनी।
बीजध्यानो बीजयज्ञा बीजाढ्या बीजमालिनी[11]॥ ७३ ।
[12]महाबीजधरो बीजा बीजाढ्या बीजवल्लभा ।
मेघमाला मेघमालो वनमाली हलायुधा ॥ ७४ ।

---

१. पार्वतीप्रेमनिकर इत्यारम्य महामत्तासवप्रियान्तं—श्लोकयुगलं-ख० पु० नास्ति ।
२. अमला-ख०; ३. सुप्रिया-ख०; ४. विमुक्तो-ख०; ५. महाकेशः-ख० ।
६. कण्ठस्य हृद्गता-ख० । —प्रकरणदृष्टया 'कण्ठस्थः' इत्येव पाठो युक्तः । कण्ठे तिष्ठतीति कण्ठस्थो भगवान् शिवः ।
७. मन्त्रस्थो यतिमन्त्रिणी-ख० ।
८. मन्त्रार्था-क०; ९. बीजमालातिबीजिका-ख०; १०. बीजगो-ख० ।
११. बीजसुन्दरी-ख० ।
१२. बीजतातो बीजमाता बीजज्ञो बीजमालिनी । ख० पु० नास्ति ।

कृष्णाजिनधरो रौद्रा रौद्रा[1] रौद्रगणाश्रया ।
रौद्रप्रियो रौद्रकर्त्री [2]रौद्रलोकप्रदः प्रभा ॥ ७५ ।

विनाशी सर्वगानां[3] च सर्वाणी सर्वसम्पदा ।
नारदेशः प्रधानेशी वारणेशो[4] वनेश्वरी ॥ ७६ ।

कृष्णेश्वरः केशवेशी [5]कृष्णवर्णस्त्रिलोचना ।
[6]कामेश्वरो राघवेशी बालेशी वा बाणपूजितः ॥ ७७ ।

भवानीशो भवानी च भवेन्द्रो भववल्लभा ।
भवानन्दोऽतिसूक्ष्माख्या भवमूर्तिर्भवेश्वरी ॥ ७८ ।

भवच्छायो भवानन्दो भवभीतिहरो वला ।
भाषाज्ञानीभाषमाला[7] महाजीवोऽतिवासना ॥ ७९ ।

लोभापम्दो लोभकर्त्री प्रलोभो लोभवर्धिनी ।
मोहातीतो मोहमाता मोहजालो महावती[8] ॥ ८० ।

मोहमुद्गरधारी[9] च मोहमुद्गरधारिणी ।
[10]मोहान्वितो मोहमुग्धा कामेशः कामिनीश्वरी ॥ ८१ ।

[11]कामलापकरोऽकामा सत्कामो कामनाशिनी ।
[12]बृहन्मुखो बृहन्नेत्रा पद्माभोऽम्बुजलोचना ॥ ८२ ।

पद्ममालः पद्ममाला श्रीदेवो देवरक्षिणी ।
असितोऽप्यसिता चैव आह्लादो[13]देवमातृका ॥ ८३ ।

---

१. रुद्रो रुद्रगणप्रिया–ख०; २. रुद्रलोकप्रदः प्रभो–ख० ।
३. सर्वंगतानां शर्वाणी सर्वसम्पदाम्–ख०; ४. रावणेशो रणेश्वरी–ख० ।
५. कृष्णवर्णोऽतिचञ्चलः–ख० । —पाठद्वयमपि युक्तं प्रतिभाति । कृष्णवर्णः श्रीशिवः, त्रिलोचना भगवती । क्षीरसागराद् विनिःसृतस्य विषस्य पानेन भगवान् शिवो नीलकण्ठ इत्युच्यते ।
६. रामेश्वरो रामवेशी बाणेशो बाणपूजिता–ख० ।
७. भाषमाना महाजिह्वोऽतिवामना–ख०; ८. अमरावती–ख० ।
९. मोहमुद्गरक्षो बीजा–ख०; १०. महान्वितो महामुक्ता–ख० ।
११. कामलोपकरो……सत्कामा–ख०; १२. बृहन्मख–क० ।
१३. साह्लादो नाशमातृका–ख० ।

नागेश्वरः शैलमाता नागेन्द्रो वै नगात्मजा ।
नारायणेश्वरः कीर्तिः सत्कीर्तिः कीर्तिवर्धिनी ॥ ८४ ।

[1]कार्तिकेशः कार्तिकी च विकर्ता गहनाश्रया ।
[2]विरक्तो गरुडारूढा गरुडस्थो हि गारुडी ॥ ८५ ।

गरुडेशो गुरुमयी गुरुदेवो गुरुप्रदा ।
गौराङ्गेशो गौरकन्या गङ्गेशः प्राङ्गणेश्वरी ॥ ८६ ।

[3]प्रतिकेशो विशाला च निरालोको निरीन्द्रिया ।
प्रेतबीजस्वरूपश्च प्रेताऽलङ्कारभूषिता ॥ ८७ ।

प्रेमगेहः[4] प्रेमहन्त्री हरीन्द्रो हरिणेक्षणा ।
कालेशः कालिकेशानी कौलिकेशश्च काकिनी ॥ ८८ ।

कालमञ्जीरधारी च कालमञ्जीरमोहिनी ।
करालवदनः काली कैवल्यदानदः कथा[5] ॥ ८९ ।

कमलापालकः कुन्ती कैकेयीशः सुतः[6] कला ।
[7]कालानलः कुलज्ञा च कुलगामी कुलाश्रया ॥ ९० ।

कुलधर्मस्थितः कौला कुलमार्गः कुलातुरा[8] ।
[9]कुलजिह्वः[10]कुलानन्दा कृष्णः कृष्णसमुद्भवा[11]॥ ९१ ।

[12]कृष्णेशः कृष्णमहिषी काकस्थः काकचञ्चुका ।
कालधर्मः कालरूपा कालः कालप्रकाशिनी ॥ ९२ ।

कालजः कालकन्या[13] च कालेशः कालसुन्दरी ।
खड्गहस्तः खर्पराढ्या खरगः खरखड्गिनी[14] ॥ ९३ ।

---

१. कृत्तिवेशः........कलहा कलहप्रिया–ख० ।
२. विरक्त इत्यारभ्य प्राङ्गणेश्वरी इत्यन्तं–ख० पु० नास्ति ।
३. प्रतिष्ठेश–ख०; ४. प्रेमगः–ख०; ५. सदा–ख० ।
६. कैकेयज्ञः सुतः–क०; ७. कलाननहू–ख०; ८. कुलान्तरा–ख० ।
९. कुलजिह्वा–ख०; १०. कुलानन्दा–क०; ११. तनूद्भवा इति–ख० ।
१२. कालानलः कृष्णकेशा काकुत्स्थ–ख०; १३. कालजन्या–ख० ।
१४. खञ्जनी–ख० ।

[1]खलबुद्धिहरः खेला खञ्जनेशः सुखाञ्जनी ।
गीतप्रियो गायनस्था गणपालो [2]गृहाश्रया ॥ ९४ ।
[3]गर्गप्रियो गयाप्राप्तिर्गर्गस्थो हि गभीरिणा ।
[4]गारुडीशो हि गान्धर्वी गतीशो गार्हवह्निजा ॥ ९५ ।
गणगन्धर्वगोपालो गणगन्धर्वगो गता ।
गभीरमानी[5] सम्भेदो गभीरकोटिसागरा ॥ ९६ ।
गतिस्थो गाणपत्यस्था[6] गणनाद्यो गवा तनूः ।
गन्धद्वारो गन्धमाला गन्धाढ्यो गन्धनिर्गमा ॥ ९७ ।
गन्धमोहितसर्वाङ्गो गन्धचञ्चलमोहिनी[7] ।
गन्धपुष्पधूपदीपनैवेद्यादिप्रपूजिता ॥ ८ ।
[8]गन्धागुरुसुकस्तूरी कुङ्कुमादिविमण्डिता[9] ।
गोकुला मधुरानन्दा पुष्पगन्धान्तरस्थिता[10] ॥ ९९ ।
गन्धमादनसम्भूतपुष्पमाल्यविभूषितः[11] ।
[12]रत्नाद्यशेषालङ्कारमालामण्डितविग्रहः ॥ १०० ।
स्वर्णाद्यशेषालङ्कारहारमालाविमण्डिता ।
[13]करवीरायुतप्रख्यरक्तलोचनपङ्कजः ॥ १०१ ।
जवाकोटिकोटिशत चारुलोचनपङ्कजा ।
घनकोटिमहानास्य[14] पङ्कजालोलविग्रहा ॥ १०२ ।
घर्घरध्वनिमानन्दकाव्याम्बुधिमुखाम्बुजा ।
घोरचित्रसर्पराज मालाकोटिशताङ्कभृत् ॥ १०३ ।
घनघोरमहानाग[15] चित्रमालाविभूषिता ।
घण्टाकोटिमहानादमानन्दलोलविग्रहः ॥ १०४ ।

---

१. खरबुद्धि–ख०; २. गणाधीशो गुहप्रिया–ख०;
३. गमप्राप्ति....गकीरिणी–ख०; ४. गारुडेशो हि गन्धर्वपती–ख० ।
५. नाद.... ....ख०; ६. गाणपत्यस्थो–ख०; ७. चन्दन–ख० ।
८. चन्दनागुरु–ख०; ९. सुमण्डिता–ख०; १०. स्थित–ख० ।
११. विभूषिता–ख०; १२. मणि–ख० ।
१३. कुसुमप्रख्या–ख०; १४. समानास्य–ख०; १५. ख० पु० नास्ति ।

घण्टाडमरु मन्त्रादिध्यानानन्दकराम्बुजा[1] ।
[2]घटकोटिकोटिशतसहस्रमङ्गलासना ॥ १०५ ।
घण्टाशङ्खपद्मचक्रवराभयकराम्बुजा ।
घातको रिपुकोटीनां शुम्भादीनां[3] तथा सताम् ॥ १०६ ।
घातिनीदैत्यघोराश्च[4] शङ्खानां सततं तथा ।
चार्वाकमतसङ्घातचतुराननपङ्कजः ॥ १०७ ।
चञ्चलानन्दसर्वार्थसारवाग्वादिनीश्वरी ।
चन्द्रकोटिसुनिर्मल[5] मालालम्बितकण्ठभृत् ॥ १०८ ।
चन्द्रकोटिसमानस्य पङ्केरुहमनोहरा ।
चन्द्रज्योत्स्नायुतप्रख्यहारभूषितमस्तकः ॥ १०९ ।
[6]चन्द्रबिम्बसहस्राभायुतभूषितमस्तकः[7] ।
चारुचन्द्रकान्तमणिमणिहारायुताङ्गभृत् ॥ ११० ।
चन्दनागुरुकस्तूरी कुङ्कुमासक्तमालिनी ।
चण्डमुण्डमहामुण्डायुतनिर्मलमाल्यभृत्[8] ॥ १११ ।
[9]चण्डमुण्डघोरमुण्डनिर्माणकुलमालिनी[10] ।
चण्डाट्टहासघोराढचवदनाम्भोजचञ्चलः ॥ ११२ ।
चलत्खञ्जननेत्राम्भोरुहमोहितशङ्करा[11] ।
चलदम्भोजनयनानन्दपुष्करमोहितः ॥ ११३ ।
चलदिन्दुभाषमाणावग्रहखेदचन्द्रिका[12] ।
चन्द्रार्धकोटिकिरण चूडामण्डलमण्डितः ॥ ११४ ।
चन्द्रचूडाम्भोजमाला उत्तमाङ्गविमण्डितः[13] ।
चलदर्कसहस्रान्त[14] रत्नहारविभूषितः ॥ ११५ ।

---

१. यन्त्रादि–ख०; २. पद्यार्ध ख० पु० नास्ति; ३. कुम्भादीनां तथा सती–ख० ।
४. घोरात्मभयानां नाशिनी तथा सर्वशत्रुविनाशाय''''ख० ।
५. निर्माण–क० ।
६. चन्द्र–ख०; ७. मस्तका–ख०; ८. निर्माल्य–ख० ।
९. महामुण्ड–ख०; १०. निर्माल्य–ख०; ११. शङ्करः–ख० ।
१२. स्वेद–ख०; १३. विमण्डिता–ख०; १४. सहस्राभ–ख० ।

चलदर्ककोटिशतमुखाम्भोजतपोज्ज्वला[1] ।
चारुरत्नासनाम्भोजचन्द्रिकामध्यसंस्थितः ॥ ११६ ॥

चारुद्वादश पत्रादि[2] कर्णिकासुप्रकाशिका ।
[3]चमत्कारगटङ्कारधनुर्बाणकराम्बुजः ॥ ११७ ॥

चतुर्थवेदगाथादि स्तुतिकोटिसुसिद्धिदा ।
चलदम्बुजनेत्रार्कवह्निचन्द्रत्रयान्वितः ॥ ११८ ॥

चलत्सहस्रसङ्ख्यात[4] पङ्कजादिप्रकाशिका ।
चमत्काराट्टहासास्य स्मितपङ्कजराजयः ॥ ११९ ॥

चमत्कारमहाघोरसाट्टाट्टहासशोभिता ।
छायासहस्रसंसारशीतलानिलशीतलः ॥ १२० ॥

छदपद्मप्रभामानसिंहासनसमास्थिता ।
छलत्कोटिदैत्यराजमुण्डमालाविभूषितः ॥ १२१ ॥

छिन्नादिकोटिमन्त्रार्थज्ञानचैतन्यकारिणी ।
चित्रमार्गमहाध्वान्तग्रन्थिसम्भेदकारकः ॥ १२२ ॥

अस्त्रकास्त्रादिब्रह्मास्त्र सहस्रकोटिधारिणी ।
अजामांसादिसद्भक्षरसामोदप्रवाहगः ॥ १२३ ॥

छेदनादि महोग्रास्त्रे भुजवामप्रकाशिनी ।
जयाख्यादिमहासाम ज्ञानार्थस्य प्रकाशकः ॥ १२४ ॥

जायागणहृदम्भोज बुद्धिज्ञानप्रकाशिनी ।
जनार्दनप्रेमभाव महाधनसुखप्रदः ॥ १२५ ॥

जगदीशकुलानन्दसिन्धुपङ्कजवासिनी ।
जीवनास्थादिजनकः परमानन्दयोगिनाम् ॥ १२६ ॥

जननी योगशास्त्राणां भक्तानां पादपद्मयोः ।
रुक्षपवननिर्वातमहोल्कापातकारुणः ॥ १२७ ॥

---

१. भयोज्वला–ख०; २. पुत्रादि–ख० ।
३. चमत्कारघटाङ्कारवधूर्बालकराम्बुजः–ख० ।
४. चलस्त्रदलपङ्केरुहादिप्रकाशिका–ख० ।

झर्झरीमधुरी वीणा वेणुशङ्खप्रवादिनी ।
झनत्कारौघसंहारकरदण्डविशानधृक् ॥ १२८ ।
झर्झरीनायिकार्य्यादिकराम्भोजनिषेविता ।
टङ्कारभावसंहारमहाजागरवेशधृक् ॥ १२९ ।
टङ्कासिपाशुपातास्त्र चर्मकार्मुकधारिणी ।
टकनानलसङ्कट्टपट्टाम्बरविभूषितः ॥ १३० ।
टुल्टुनी किङ्किणी कोटि विचित्रध्वनिगामिनी ।
ठं ठं ठं मनुमूलान्तः स्वप्रकाशप्रबोधकः ॥ १३१ ।
ठं ठं ठं प्रखराह्लादनादसंवादवादिनी ।
ठं ठं ठं कूर्मपृष्ठस्थः कामचाकारभासनः ॥ १३२ ।
ठं ठं ठं बीजवह्निस्थ हातुकभ्रूविभूषिता ।
डामरप्रखराह्लादसिद्धिविद्याप्रकाशकः ॥ १३३ ।
डिण्डिमध्वानमधुरवाणीसम्मुखपङ्कजा ।
डं डं डं खरकृत्यादि मारणान्तः प्रकाशिका ॥ १३४ ।
ढक्कारवाद्यभूपूरतारसप्तस्वराश्रयः ।
ढौं ढौं ढौं ढौकढक्कलं वह्निजायामनुप्रियः ॥ १३५ ।
ढं ढं ढं ढौं ढ ढं ढ कृत्येत्थाहेति वासिनी ।
तारकब्रह्ममन्त्रस्थः श्रीपादपद्मभावकः ॥ १३६ ।
तारिण्यादिमहामन्त्र सिद्धिसर्वार्थसिद्धिदा ।
तन्त्रमन्त्रमहायन्त्र वेदयोगसुसारवित् ॥ १३७ ।
तालवेतालदैतालश्रीतालादिसुसिद्धदा ।
तरुकल्पलतापुष्पकलबीजप्रकाशकः ॥ १३८ ।
डिन्तिडीतालहिन्तालतुलसीकुलवृक्षजा ।
अकारकूटविन्द्विन्दुमालामण्डितविग्रहः ॥ १३९ ।
स्थातृप्रस्थप्रथागाथास्थूलस्थित्यन्तसंहरा ।
दरीकुन्जहेममालावनमालादिभूषितः ॥ १४० ।

[1]दारिद्र्यदुःखदहनकालानलशतोपमः ।
दशसाहस्रवक्त्राम्भोरुहशोभितविग्रहः ॥ १४१ ।

पाशाभयवराह्लादधनधर्मादिवर्धिनी ।
धर्मकोटिशतोल्लाससिद्धिऋद्धिसमृद्धिदा ॥ १४२ ।

ध्यानयोगज्ञानयोगमन्त्रयोगफलप्रदा ।
नामकोटिशतानन्तसुकीर्तिगुणमोहनः ॥ १४३ ।

निमित्तफलसद्भावभावाभावविवर्जिता ।
परमानन्दपदवी दानलोलपदाम्बुजः ॥ १४४ ।

प्रतिष्ठासुनिवृत्तादि समाधिफलसाधिनी ।
फेरवीगणसन्मानवसुसिद्धिप्रदायकः ॥ १४५ ।

फेत्कारीकुलतन्त्रादि फलसिद्धिस्वरूपिणी ।
वराङ्गनाकोटिकोटिकराम्भोजनिसेविता ॥ १४६ ।

वरदानज्ञानदान मोक्षदातिचञ्चला ।
भैरवानन्दनाथाख्य शतकोटिमुदान्वितः ॥ १४७ ।

भावसिद्धिक्रियासिद्धिसाष्टाङ्गसिद्धिदायिनी ।
मकारपञ्चकाह्लादमहामोदशरीरधृक् ॥ १४८ ।

मदिरादिपञ्चतत्त्वनिर्वाणज्ञानदायिनी ।
यजमानक्रियायोगविभागफलदायकः ॥ १४९ ।

यशःसहस्रकोटिस्थ गुणगायनतत्परा ।
रणमध्यस्थकालाग्नि क्रोधधारसुविग्रहः ॥ १५० ।

काकिनीशाकिनीशक्तियोगादि काकिनीकला ।
लक्षणायुतकोटीन्दुललाटतिलकान्वितः ॥ १५१ ।

[2]लाक्षाबन्धूकसिन्दूरवर्णलावण्यलालिता ।
वातायुतसहस्राङ्गघूर्णायमानभूधरः ॥ १५२ ।

---

१. दरिद्रस्य भावो दारिद्र्यम्, तस्य दुःखम्, तस्य दहने कालानलशतोपम इत्यन्वयः ।
२. लाक्षाबन्धूकसिन्दूरवर्णस्य लावण्येन सौन्दर्येण लालिता । भगवत्या इदं स्वरूपवर्णनम् ।

विवस्वत्प्रेमभक्तिस्थ चरणद्वन्द्वनिर्मला ।
श्रीसीतापतिशुद्धाङ्ग व्याप्तेन्द्रनीलसन्निभः ॥ १५३ ।

शीतनीलाशतानन्दसागरप्रेमभक्तिदा ।
षट्पङ्केरुहदेवादिस्वप्रकाशप्रबोधिनी ॥ १५४ ।

महोर्मिस्थषडाधारप्रसन्नहृदयाम्बुजा ।
श्यामप्रेमकलाबन्धसर्वाङ्गकुलनायकः ॥ १५५ ।

संसारसारशास्त्रादि सम्बन्धसुन्दराश्रया ।
ह्सौः प्रेतमहाबीजमालाचित्रितकण्ठधृक् ॥ १५६ ।

हृकारवामकर्णाढ्य चन्द्रबिन्दुविभूषिता ।
लयसृष्टिस्थितिक्षेत्रपानपालकनामधृक् ॥ १५७ ।

लक्ष्मीलक्षजपानन्दसिद्धिसिद्धान्तवर्णिनी ।
क्षुन्निवृत्तिक्षपारक्षा क्षुधाक्षोभनिवारकः ॥ १५८ ।

क्षत्रियादिकुरुक्षेत्रारुणाक्षिप्तत्रिलोचना ।
अनन्त इतिहासस्थ आज्ञागामी च ईश्वरी ॥ १५९ ।

उमेश उटकन्येशी ऋद्धिस्थहृस्थगोमुखी ।
गकारेश्वरसंयुक्त त्रिकुण्डदेवतारिणी ॥ १६० ।

एणाचीशप्रियानन्द ऐरावतकुलेश्वरी ।
ओढ्रपुष्पानन्तदीप्त ओढ्रपुष्पानखाग्रका ॥ १६१ ।

ऐहृत्यशतकोटिस्थ औ दीर्घप्रणवाश्रया ।
अङ्गस्थाङ्गदेवस्था अर्यस्थश्चार्यमेश्वरी ॥ १६२ ।

मातृकावर्णनिलयः सर्वमातृकलान्विता ।
[1]मातृकामन्त्रजालस्थः प्रसन्नगुणदायिनी ॥ १६३ ।

अत्युत्कटपथिप्रज्ञा गुणमातृपदे स्थिता ।
स्थावरानन्ददेवेशो विसर्गान्तरगामिनी ॥ १६४ ।

---

१. मातृकामन्त्राणां जाले तिष्ठति इति, "सुपि स्थः" इति कर्तरि कप्रत्ययः ।

अकलङ्को निष्कलङ्को निराधारो निराश्रया ।
निराश्रयो निराधारो निर्बीजो बीजयोगिनी ॥ १६५ ।

निःशङ्को निस्पृहानन्दो सिन्धूरत्नावलिप्रभा ।
आकाशस्थः खेचरी च स्वर्गदाता शिवेश्वरी ॥ १६६ ।

[1]सूक्ष्मातिसूक्ष्मात्वैर्ज्ञेया दारापदुःखहारिणी ।
नानादेशसमुद्भूतो नानालङ्कारलङ्कृता ॥ १६७ ।

नवीनाख्यो नूतनस्थ नयनाब्जनिवासिनी ।
विषयाख्यविषानन्दा विषयाशी विषापहा ॥ १६८ ।

विषयातीतभावस्थो विषयानन्दघातिनी ।
विषयच्छेदनास्त्रस्थो विषयज्ञाननाशिनी ॥ १६९ ।

संसारछेदकच्छायो भवच्छायो भवान्तका ।
संसारार्थप्रवर्तश्च संसारपरिवर्तिका ॥ १७० ॥

संसारमोहहन्ता च संसारार्णवतारिणी ।
संसारघटकश्रीदा संसारध्वान्तमोहिनी ॥ १७१ ।

पञ्चतत्त्वस्वरूपश्च पञ्चतत्त्वप्रबोधिनी ।
पार्थिवः पृथिवीशानी पृथुपूज्यः पुरातनी ॥ १७१ ।

वरुणेशो वारुणा च वारिदेशो जलोद्यमा ।
मरुस्थो जीवनस्था च जलभुग्जलवाहना ॥ १७३ ।

तेजः कान्तः प्रोज्वलस्था तेजोराशेस्तु तेजसी ।
तेजस्थस्तेजसो माला तेजः कीर्तिः स्वरश्मिगा ॥ १७४ ।

पवनेशश्चानिलस्था परमात्मा निनान्तरा ।
वायुपूरककारी च वायुकुम्भकवर्धिनी ॥ १७५ ।

वायुच्छिद्रकरो वाता वायुनिर्गममुद्रिका ।
कुम्भकस्थो रेचकस्था पूरकस्थातिपूरिणी ॥ १७६ ।

१. 'सूक्ष्मातिसूक्ष्मा तु विज्ञेया' इति पाठः प्रतिभाति । अथवा 'सूक्ष्मातिसूक्ष्मा च विज्ञेया' इति पाठः करणीयः ।

वाय्वाकाशाधाररूपी वायुसञ्चारकारिणी ।
वायुसिद्धिकरो दात्री वायुयोगी च वायुगा ॥ १७७ ।

आकाशप्रकरो ब्राह्मी आकाशान्तर्गतद्रिगा ।
आकाशकुम्भकानन्दो गगनाह्लादवर्धिनी ॥ १७८ ।

गगनाच्छन्नदेहस्थो गगनाभेदकारिणी ।
गगनादिमहासिद्धो गगनग्रन्थिभेदिनी ॥ १७९ ।

कालकर्मा महाकाली कालयोगी च कालिका ।
कालछत्रः कालहत्या कालदेवो हि कालिका ॥ १८० ।

कालब्रह्मस्वरूपश्च कालितत्त्वार्थरक्षिणी ।
दिगम्बरो दिक्पतिस्था दिगात्मा दिगि भास्वरा ॥ १८१ ।

दिक्पालस्थो दिक्प्रसन्ना दिग्वलो दिक्कुलेश्वरी ।
दिगघोरो दिग्वसना दिग्वीरा दिक्पतीश्वरी ॥ १८२ ।

आत्मार्थो व्यापितत्त्वज्ञ आत्मज्ञानी च सात्मिका ।
आत्मीयश्चात्मबीजस्था चान्तरात्मात्ममोहिनी ॥ १८३ ।

आत्मसञ्ज्ञानकारी च आत्मानन्दस्वरूपिणी ।
आत्मयज्ञो महात्मज्ञा महात्मात्मप्रकाशिनी ॥ १८४ ।

[1]आत्मविकारहन्ता च विद्यात्मीयादिदेवता ।
मनोयोगकरो दुर्गा मनः [2]प्रत्यक्ष ईश्वरी ॥ १८५ ।

मनोभवनिहन्ता च मनोभवविवर्धिनी ।
[3]मनश्चान्तरीक्षयोगो निराकारगुणोदया ॥ १८६ ।

---

१. चमत्काराट्टहासेत्यारभ्य विद्यात्मीयादिदेवतान्तं श्लोकजातं ख० पुस्तके नास्ति ।

२. प्रत्यक्षकेश्वरी–ख० ।—अयं पाठो युक्तः । यतो हि अन्वर्थताऽत्रैव पाठे । प्रत्यक्षं कायति या सा प्रत्यक्षका, सा चासावीश्वरी चेति ।

३. मनसान्तरिक्ष···· ····ख० ।

[1]मनोनिराकारयोगी मनोयोगेन्द्रसाक्षिणी ।
[2]मनःप्रतिष्ठो मनसा मानशङ्का मनोगतिः ॥ १८७ ।

नवद्रव्यनिगूढार्थो नरेन्द्रविनिवारिणी[3] ।
नवीनगुणकर्मादिसाकारः खगगामिनी ॥ १८८ ।

अत्युन्मत्ता महावाणी वायवीशो महानिला ।
सर्वपापापहन्ता च सर्वव्याधिनिवारिणी ॥ १८९ ।

द्वारदेवीश्वरी प्रीतिः प्रलयाग्निः करालिनी ।
[4]भूषण्डगणतातश्च भूःषण्डरुधिरप्रदा ॥ १९० ।

[5]काकावलीशः सर्वेशी काकपुच्छधरो जया ।
[6]अजितेशो जितानन्दा वीरभद्रः प्रभावती ॥ १९१ ।

अन्तर्नाडीगतप्राणो वैशेषिकगुणोदया ।
[7]रत्ननिर्मितपीठस्थः सिंहस्था रथगामिनी ॥ १९२ ।

कुलकोटीश्वराचार्यो वासुदेवनिषेविता ।
आधारविरहज्ञानी सर्वाधारस्वरूपिणी ॥ १९३ ।

सर्वज्ञः सर्वविज्ञाना मार्तण्डो[8] यश इल्वला ।
[9]इन्द्रेशो विन्ध्यशैलेशी वारणेशः प्रकाशिनी ॥ १९४ ।

[10]अनन्तभुजराजेन्द्रो अनन्ताक्षरनाशिनी ।
[11]आशीर्वादस्तु वरदोऽनुग्रहोऽनुग्रहक्रिया ॥ १९५ ।

---

१. मनोविकारयोगी–ख० ।

२. मनःपूर्तिर्मनोज्योतिमीनसेशो····· ····ख० । —मनसि प्रतिष्ठा यस्यासौ मनःप्रतिष्ठः । अथवा मनसा प्रतिष्ठा यस्य सः । मनसोऽधिकरणत्वं कारणत्वं वा, योग्यताबलात् । शमदमादिसम्पन्ने एव मनसि ईदृशी स्थितिर्भवति ।

३. मणिवासिनी–ख०; ४. भुषण्ड–ख०; ५. ककारादीशः–ख० ।

६. अजितेशा जितानन्दो–ख०; ७. रत्ननिर्माणभाकोटिसिंहस्थोरथगामिनी–ख० ।

८. मार्तण्डेयेन्दुवन्दिता–ख०; ९. उत्केशी विल्वशैलेशी चारुनेत्रप्रकाशिनी–ख० ।

१०. अनन्तराजराजेन्द्रो ज्वालानगसुरनाशिनी ।

११. आशीर्वादरता देवी भक्तानुग्रहकातरा–ख० ।

प्रेतासनसमासीनो मेरुकुञ्जनिवासिनी ।
मणिमन्दिरमध्यस्थो मणिपीठनिवासिनी ।। १९६ ।
सर्वप्रहरणः[1] प्रेतो विधिविद्याप्रकाशिनी ।
प्रचण्डनयनानन्दो [2]मञ्जीरकलरञ्जिनी ।। १९७ ।
कलमञ्जीरपादाब्जो [3]बलमृत्युपरायणा ।
कुलमालाव्यापिताङ्गः[4] कुलेन्द्रः कुलपण्डिता ।। १९८ ।
बालिकेशो रुद्रचण्डा बालेन्द्रः प्राणबालिका ।
कुमारीशः काममाता मन्दिरेशः स्वमन्दिरा ।। १९९ ।
अकालजननीनाथो [5]विदग्धात्मा प्रियङ्करी ।
वेदाद्यो वेदजननी वैरागस्थो[6] विरागदा ।। २०० ।
स्मितहास्यास्यकमलः स्मितहास्यविमोहिनी ।
दन्तुरेशो दन्तुरु च दन्तीशो दशनप्रभा ।। २०१ ।
दिग्दन्तो हि दिग्दशना भ्रष्टभुक् चर्वणप्रिया ।
मांसप्रधाना[7] भोक्ता च प्रधानमांसभक्षिणी ।। २०२ ।
[8]मस्त्यमांसमहामुद्रा [9]रजोरुधिरभुक्प्रिया ।
सुरामांसमहामीनमुद्रामैथुनसुप्रिया ।। २०३ ।
कुलद्रव्यप्रियानन्दो [10]मद्यादिकुलसिद्धिदा ।
हृत्कण्ठभ्रूसहस्रारभेदनोऽन्ते [11]विभेदिनी ।। २०४ ।
प्रसन्नहृदयाम्भोजः प्रसन्नहृदयाम्बुजा ।
प्रसन्नवरदानाढ्यः [12]प्रसन्नवरदायिनी ।। २०५ ।
प्रेमभक्तिप्रकाशाढ्यः प्रेमानन्दप्रकाशिनी ।। २०६ ।

---

१. सर्वप्रहरणोपेतो–ख०; २. कनकाञ्जलिः–ख०; ३. सर्वत्यागपरायणा–ख० ।
४. व्यापिताङ्गी–ख० । —कुलमालाभिः व्यापितमङ्गं यस्य सः । व्यापितं विशेषतः सम्बद्धम् । कुलमाला तान्त्रिकपरम्परानुशिष्टा भवति ।
५. विश्वात्मा सुप्रियङ्करी–ख०; ६. वैराग्यस्थो–ख० ।
७. ···· ···· ····प्रधाननोक्ता च–ख०; ८. मद्य–ख० ।
९. रुधिरसुप्रिया–ख० ।—रजोरुधिरव्याप्ता या दृक् नेत्रं तत्प्रिया । रजस्तमोऽधिष्ठात्री या देवी, तस्याः रजोरुधिरप्रियत्वं भवति ।
१०. प्रियानन्दा–ख०; ११. भूरिभेदिनी–ख०; १२. प्रेमानन्दप्रकाशिनी–ख० ।

प्रभाकरफलोदयः[1] परमसूक्ष्मपुरप्रिया
[2]प्रभातरविरश्मिगः प्रथमभानुशोभान्विता ।
प्रचण्डरिपुमन्मथः[3] प्रचलितेन्दुदेहोद्गतः
[4]प्रभापटलपाटलप्रचयधर्मपुञ्जार्चिता ॥ २०७ ।

सुरेन्द्रगणपूजितः [5]सुरवरेशसम्पूजिता
सुरेन्द्रकुल [6]सेवितो नरपतीन्द्रसंसेविता ।
[7]गणेन्द्र गणनायको गणपतीन्द्र देवात्मजा
भवार्णवगतारको जलधिकर्णधारप्रिया ॥ २०८ ।

सुरासुरकुलोद्भवः सुररिपुप्रसिद्धिस्थिता
सुरारिगणघातकः सुरगणेन्द्रसंसिद्धिदा ।
[8]अभीप्सितफलप्रदः सुरवरादिसिद्धिप्रदा
[9]प्रियाङ्गजकुलार्थदः सुतधनापवर्गप्रदा ॥ २०९ ।

[10]शिवस्वशिवकाकिनी हरहरा च भीमस्वना[11]
क्षितीश इषुरक्षका [12]समनदर्पहन्तोदया ।
गुणेश्वर उमापती[13] हृदयपद्मभेदी[14] गतिः
क्षपाकरललाटधृक्[15]स्वसुखमार्गसन्दायिनी ॥ २१० ।

श्मशानतटनिष्पट[16]प्रचटहासकालङ्कृता
हठत्शठमनस्तटे सुरकपाटसंछेदकः ।
[17]स्मराननविवर्धनः [18]प्रियवसन्तसम्बायवी
विराजितमुखाम्बुजः कमलमञ्जसिंहासना[19] ॥ २११ ।

---

१. फलोदारः–ख०; २. प्रकाररश्मिरूपः प्रथमो भानुशोभिता–ख० ।
३. विपुलोन्मत्तः चलितेन्दुप्रभावहः–ख०; ४. जटिलः प्रभूतघर्मपूजिता–ख० ।
५. सुरेन्द्रवेशपूजिता–ख०; ६. नरेन्द्रकुलसेविता–ख० ।
७. नगेन्द्रगणनायको नगपतीन्द्रदेवात्मजा ।
८. बलिच्छलनतत्परः–ख०; ९. प्रियद्विज–ख०; १०. शिवश्च शिवकामिनी–ख० ।
११. सभा–ख०; १२. मदनदर्पहन्त्रादया–ख०; १३. उमावती ।
१४. भेदे–ख०; १५. विकटहासविस्फारिता–ख०; १६. निष्पटः स्मरकपाटसञ्छेदकः–ख० ।
१७. स्मरानलविमर्दन–ख० । —स्मरस्य कामदेवस्य आननं मुखम्, तद् विवर्धतेऽनेनेति स्मराननविवर्धनः । अस्यां व्युत्पत्तौ कामवर्धकत्वमायाति, तच्च शिवे भगवति न संघटत इति कृत्वा तक्षणार्थकाद् वृधधातोः करणे ल्युट्प्रत्ययः कार्यः ।
१८. सद्वायवी–ख०; १९. मञ्ज–क० ।

भवो भवपतिप्रभाभव कविश्च भाव्यासुरैः[1]
क्रियेश्वर ईलावती [2]तरुणगाहितारावती ।
[3]मुनीन्द्रमनुसिद्धिदः सुरमुनीन्द्रसिद्धायुषी[4]
मुरारिहरदेहगस्त्रिभुवना[5] विनाशक्रिया ॥ २१२ ॥

[6]द्विकः कनककाकिनी कनकतुङ्गकीलालकः
कमलाकुलः कुलकलाकंमालोमला ।
[7]सुभक्ततमसाधकप्रकृतियोगयोग्यार्चितो
विवेकगतमानसः [8]प्रभुपरादिहस्तार्चिता ॥ २१३ ॥

त्वमेव कुलनायकः प्रलययोगविद्येश्वरी[9]
प्रचण्डगणगो नगाभुवनदर्पहारी हरा[10]।
चराचरसहस्रगः [11]सकलरूपमध्यस्थितः
स्वनामगुणपूरकः स्वगुणनामसम्पूरणी[12] ॥ २१४ ॥

इति ते कथितं नाथ सहस्रनाममङ्गलम् ।
अत्यद्भुतं परानन्दरससिद्धान्तदायकम् ॥ २१५ ॥
मातृकामन्त्रघटितं सर्वसिद्धान्तसागरम्[13] ।
[14]सिद्धविद्यामहोल्लासमानन्दगुणसाधनम् ॥ २१६ ॥

---

१. भव्याभवः–ख० । २. तरुणगो–ख० ।

३. सुख–ख० । —मन्यते ज्ञायते इष्टतत्त्वं येन स मनुः मन्त्रः, मुनीन्दस्य मनुः मन्त्रः, तेन जायमाना सिद्धिः, तां ददाति इति । "आतोऽनुपसर्गे कः" इति दाधातुतः कर्तरि कप्रत्ययः ।

४. सिद्धिप्रदा–ख०; ५. त्रिभुवनस्य नाशक्रिया–ख० ।

६. हितः........कनकसंशुद्धिः किलार्थप्रदा–ख० ।

७. यति........प्रतियोग........ख० ।

८. विभुवरादि........ख०; ९. प्रलयकालयोगच्छविः–ख०; १०. तथा ।

११. प्रकृतरूपशक्तिस्थिता–ख० ।

१२. कृपार्दहृदयासदा निखिललोककल्पद्रुमः–ख० अधि० ।

१३. सारकम्–ख०; १४. सिद्धिविद्यामहोत्साह–ख० ।

दुर्लभं सर्वलोकेषु [1]यामले तत्प्रकाशितम् ।
[2]तव स्नेहरसामोदमोहितानन्दभैरव ।। २१७ ।

कुत्रापि नापि कथितं स्वसिद्ध[3]हानिशङ्कया ।
[4]सर्वादियोगसिद्धान्तसिद्धये [5]भुक्तिमुक्तये ।। २१८ ।

प्रेमाह्लादरसेनैव दुर्लभं तत्प्रकाशितम् ।
येन विज्ञातमात्रेण भवेच्छ्रीभैरवेश्वरः ।। २१९ ।

[6]एतन्नामशुभफलं वक्तुं न च समर्थकः ।
कोटिवर्षशतेनापि यत्फलं लभते नरः ।। २२० ।

यत्फलं योगिनामेक[7]क्षणाल्लभ्यं [8]भवार्णवे ।
यः पठेत् प्रातरुत्थाय [9]दुर्गग्रहनिवारणात् ।। २२१ ।

[10]दुष्टेन्द्रियभयेनापि महाभयनिवारणात् ।
ध्यात्वा नाम जपेन्नित्यं मध्याह्ने च विशेषतः ।। २२२ ।

सन्ध्यायां रात्रियोगे च साधयेन्नामसाधनम् ।
योगाभ्यासे ग्रन्थिभेदे [11]योगध्याननिरूपणे ।। २२३ ।

पठनाद् योगसिद्धिः स्याद् ग्रन्थिभेदो दिने दिने ।
योगज्ञानप्रसिद्धिः[12]स्याद् योगः स्यादेकचित्ततः ।। २२४ ।

देहस्थदेववश्याय[13] महामोहप्रशान्तये ।
[14]स्तम्भनायारिसैन्यानां प्रत्यहं प्रपठेच्छुचिः ।। २२५ ।

---

१. यामले-ख०; २. वसामोद-क०; ३. सिद्धिहानेस्तु शङ्कया-ख० ।
४. भवादियोग········ख० । आदयः प्रमुखा ये योगाः, तेषां सिद्धान्ताः, सर्वे च ते तादृशसिद्धान्ताश्च तेषां सिद्धये ।
५. भक्तिमुक्तये-ख०; ६. नाम्नः-ख०; ७. मेव-ख० ।
८. भवान्तरे-ख०; ९. दुष्टग्रह········ख० ।
१०. ध्यात्वा सुरभयेनापि महाभयनिवारणम्-ख०; ११. ज्ञान-ख० ।
१२. प्रसिद्धः स्यात्-ख०; १३. देह-ख० ।
१४. स्तम्भनाय विशाल्यानां-ख० ।—स्तम्भनायारिसैन्यानामित्यत्र स्तम्भनमवरोधनं तस्मै । अरीणां शत्रूणां सैन्यानि तेषामवरोधेन विजयो ध्रुवः ।

भक्तिभावेन पाठेन सर्वकर्मसु सुक्षमः ।
स्तम्भयेत् परसैन्यानि[1] वारैकपाठमात्रतः ।। २२६ ।

[2]वारत्रयप्रपठनाद् वशयेद् भुवनत्रयम् ।
वारत्रयं तु प्रपठेद् यो मूर्खः पण्डितोऽपि वा ।। २२७ ।

शान्तिमाप्नोति परमां विद्यां भुवनमोहिनीम् ।
प्रतिष्ठाञ्च ततः प्राप्य मोक्षनिर्वाणमाप्नुयात् ।। २२८ ।

[3]विनाशयेदरीञ्छीघ्रं चतुर्वारप्रपाठने ।
पञ्चावृत्तिप्रपाठेन शत्रुमुच्चाटयेत् क्षणात् ।। २२९ ।

[4]षडावृत्त्या साधकेन्द्रः शत्रूणां नाशको भवेत् ।
आकर्षयेत् [5]परद्रव्यं सप्तवारं पठेद् यदि ।। २३० ।

एवं [6]क्रमगतं ध्यात्वा यः पठेदतिभक्तितः ।
स भवेद् योगिनीनाथो महाकल्पद्रुमोपमः ।। २३१ ।

ग्रन्थिभेदसमर्थः स्यान्मासमात्रं पठेद् यदि ।
दूरदर्शी महावीरो बलवान् पण्डितेश्वरः ।। २३२ ।

महाज्ञानी लोकनाथो भवत्येव न संशयः ।
मासैकेन समर्थः स्यान्निर्वाणमोक्षसिद्धिभाक् ।। २३३ ।

प्रपठेद् योगसिद्ध्यर्थं भावकः परमप्रियः ।
शून्यागारे [7]भूमिगर्तमण्डपे शून्यदेशके ।। २३४ ।

[8]गङ्गागर्भे महारण्ये चैकान्ते निर्जनेऽपि वा ।
दुर्भिक्षवर्जिते देशे सर्वोपद्रववर्जिते ।। २३५ ।

श्मशाने प्रान्तरेश्वत्थमूले वटतरुस्थले ।
इष्टकामयगेहे वा यत्र[9] लोको न वर्तते ।। २३६ ।

---

१. शल्यानि–ख०; २. वारद्वय–ख० ।
३. विद्वेषयेत्–ख०; चतुरावर्तनाद्वरम्–क०; ४. षडावृन्याम्–ख० ।
५. सुरद्रव्यं ; ६. योगमतम्–ख० ।
७. बिल्वमूले चितायां शून्यदेशके–ख०; ८. महागर्ते–ख० ।
९. हेमकाष्ठादिनिर्मिते–ख० ।

[1]तत्र तत्रानन्दरूपी महापीठस्थलेऽपि[2] च ।
दृढासनस्थः प्रजपेन्नाममङ्गलमुत्तमम् ॥ २३७ ।

ध्यानधारणशुद्धाङ्गो न्यासपूजापरायणः ।
ध्यात्वा स्तौति प्रभाते च मृत्युजेता [3]भवेद्ध्रुवम् ॥ २३८ ।

[4]अष्टाङ्गसिद्धिमाप्नोति चामरत्वमवाप्नुयात् ।
गुरुदेवमहामन्त्रभक्तो भवति निश्चितम् ॥ २३९ ।

शरीरे तस्य दुःखानि न भवन्ति [5]कुवृद्धयः ।
दुष्टग्रहाः पलायन्ते तं दृष्ट्वा योगिनं परम् ॥ २४० ।

यः पठेत् सततं मन्त्री तस्य हस्तेऽष्टसिद्धयः ।
तस्य हृत्पद्मलिङ्गस्था देवाः सिद्धयन्ति चापराः ॥ २४१ ।

युगकोटिसहस्राणि चिरायुर्योगिराड् भवेत् ।
[6]शुद्धशीलो निराकारो ब्रह्मा विष्णुः शिवः[7] स च॥
स नित्यः [8]कार्यसिद्धश्च स जीवन्मुक्तिमाप्नुयात् ॥ २४२ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने ईश्वरशक्तिकाकिन्यष्टोत्तरसहस्रनामस्तोत्रविन्यासो नाम एकषष्टितमः पटलः ॥

●

१. तत्तदानन्दरूपी च–ख०; २. देवता–क०; ३. भवेन्नरः–ख०।
४. कालकालो भवेद्योगी–ख० । —अष्टसंख्याकानि अङ्गानि इति मध्यमपदलोपिसमासः, तेषां सिद्धिः । अष्टाङ्गयोगसिद्धिरित्यपि बोध्यम् ।
५. कवाचन–ख० ।
६. सुकुलीनो–ख० । —शुद्धं शीलं यस्यासौ शुद्धशीलः । शीलं स्वभाव आचारो वा ।
७. शिवस्य च–ख०; ८. कायसिद्धिस्थो–ख० ।

अथ द्विषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच—

अथ नाथ प्रवक्ष्येऽहं काकिनीगुरुदेवयोः ।
मन्त्रोद्धारस्तवज्ञानं येन सिद्धो भवेद् यतिः ॥ १ ।

एतत्स्तवनपाठेन सहस्राख्यान्तसिद्धिषु[1] ।
राजत्वं लभते सद्योऽथवा योगी च सम्पदि ॥ २ ।

यथा जनकराजा च विषये[2] गुरुभक्तिमान् ।
महासिद्धो महाज्ञानी तथा भवति साधकः ॥ ३ ।

सुरा नागा रुद्रगणाः सर्वे विद्यार्थसेवकाः ।
योगी ज्ञानी तथा सिद्धाः खेचरा यक्षराक्षसाः ॥ ४ ।

मुनयः[3] क्रोधवेतालास्तथा चण्डेश्वरादयः ।
एतच्छुभस्तवेन्द्रेण स्तुत्वा सर्वत्र सिद्धिगाः ॥ ५ ।

[4]पूर्णः पूर्णेन्दुबिम्बाननकमलकटाक्षादघौघापहारी
नारीन्धाता विधाता समवति न च तान् योगयोग्यान् महेन्द्रान् ।
सम्पत्तिप्राणयोगी निरवधिवरदानन्दगोप्ता शरीरो
बालो मृत्युञ्जयस्य[5] प्रभुरिति भयहा पातु मे गुप्तदेहम् ॥ ६ ।

---

१. सन्धिषु–ख०; २. विषये–ख० ।

३. मन्युः क्रोधवेतालो तथा चक्रेश्वरादयः ।

४. पूर्णः पूर्णेन्दुदिवाननकमलकटाखोत्कटाघाप–ख०, हारी नारी धाता विधाता प्रसरति च तान् योगयोग्यान्·······योगो भूयान्नरोऽसौ···· ··· भृत्योः···· प्रभुरिति भुवने ···· ···· ···· गुप्तदेहः–ख० ।

५. मृत्युं जयति इति मृत्युञ्जयः । "संज्ञायां भृ तृ वृ जि धारि सहि वणि दम" इति खच्-प्रत्ययः, मुमागमश्च खिति परतः ।

[1]कामक्रोधापहन्ता जनयति भरतान् भारतान् पातु पृथ्वीं
यो योगी भावयोगी मम कुलफलदः सर्वदा शं करोतु ।
तत्क्रोडे लोकचक्रं तिलतुलतुलसेसन्निभं भाति सूक्ष्मं
तच्छ्रीनाथाङ्घ्रिपादद्वयमजरमहं भावये हृत्प्रपञ्चे ॥ ७ ।

[2]मायां मोहे विवेकी शतकितवरिपूच्छेदकः प्रेरकस्थ-
कोर्षाणी गुप्ततन्द्रावनिभवमनुजो यो महामङ्गलस्थः ।
लोकातीतो तितीरो जय जय करुणानाथ दाता तपस्वी
मन्त्रोद्धारार्थगुप्तं समवति य इह प्राणनाथं तमीडे ॥ ८ ।

[3]भावान्तो योऽतिगुर्वी हृदि जयकमलेऽतेऽमरप्रत्यथर्वो
वाग्देवी देवतायै नम इति मनुना मोहितो वाक्पतीशः ।
मन्त्रार्थोद्दीपनाख्यो विजयसखाकोटिभिर्वेष्टितो यो
बालार्कानन्दरश्मिप्रचयशतमखः पातु मां दुःखजालात् ॥ ९ ।

[4]हृद्याङ्गा [5]सङ्गताङ्गाननविमलशिखाकोटिभिर्वर्जितो यो
मन्त्राच्चैतन्यहर्ता प्रणवमयशिवं तत्सदान्ते शिवं च ।
ध्यात्वा माहेश्वरायां नम इति जपनात् ते महेन्द्राधिपः स्यात्
कालीपुत्रः स एव त्वमभयवरदः सेव्यते यैः स मुक्तः ॥ १० ।

---

१. ···· ····जनयति भवतः पाति पृथ्वी च योगी—ख० ।—मालाधारी प्रपायात् मम कुल-सकलं सर्वदा शङ्करो वै तत्क्रोडे···· ····निलतुलतुलना सन्निभं भाति सूक्ष्म तच्छ्रीनाथा ···· ····मद्यहरणं भावयेदाशु कुञ्जे—ख० ।

२. स च कित रिपुहृत् कोशविध्वंसकारी सर्वाधीशो महेशो निखिलसुखमयो निर्गुणो निर्विकारो लोकातीतोऽहि तीव्रो···· ··· नियतं प्राणनाथं तमीडे—ख० ।

३. तारान्ते याऽपि गुर्वी निजहृदिकमलेऽन्ते सरस्वत्ययो वा
तस्मै नित्यं नमो मे नम इति मनुना···· ···· ····
मन्त्रार्थे हैपलाख्यो निजविजय···· ···· ···· ····
बालार्कानन्दवश्यः···· ···· ···· ख० ।

४. कृत्याकृत्यास्वरूपो कुलविमलशिखाकोटिभिः संयुक्तो यो—ख० ।
मन्त्रञ्चैतन्यहर्ता प्रणवमथ शिवां तत्सदान्ते शिवं च ········ ····सेवते यः स मुक्तः ।

५. संगतेन अङ्गेनाननेन विमलशिखया कोट्या च वर्जितः । अथवा संगतादिविमल-शिखान्तानामितरेतरयोगद्वन्द्वं कृत्वा तासां कोट्यः, ताभिर्वर्जितो रहितः, निराकार इति यावत् ।

हंसः प्राणाविहन्ता[1] त्वमखिलवरदस्त्वं निदानः[2] प्रधानः
शान्तीशस्त्वं प्रतिष्ठः [3]प्रणवशिवसदाभद्रमाहेश्वराय ।
[4]अन्तेऽस्त्युच्चैर्नमोऽन्ते मनुमिह जपते सम्पदे दोषभङ्गा-
दानन्दाब्धौ [5]त्वमीशो गुरुरिह चपलं चापलं मां [6]प्रपाहि ॥ ११ ।

[7]आनन्दोद्रेककारी त्वमपि सकरुणासागरो भक्तिदाता
दाता विद्याधरीणां त्वमपि सुररिपुः पार्वतीप्राणनाथः ।
तारे बिन्द्वाधराढ्यं क्षरमथविधुमत्तं मन्त्रमेकाक्षरं ते
तारान्तं त्र्यक्षरन्तं प्रजपति यदि यो योगिराड् भूतले स्यात् ॥ १२ ।

[8]सर्पाण्डस्थं सुसिद्धो हरविधुमधरं चन्द्रबिन्दुस्वरूपं
जप्त्वा नित्यं विलोमं प्रणवमृतिहरं वह्निकान्ता तदन्ते ।
एतद्रूपं [9]पदं यो भजति वरगतं हेममञ्जीरनादं
मन्प्रेक्षानन्दचित्तं विजयवरकुलानन्ददः प्राणगं ते ॥ १३ ।

उच्चाटे मोहने वाप्यरिवशसमये[10] शान्तिपुष्ट्यान्तवश्ये[11]
[12]ते मन्त्रान् योजयित्वा जपति यदि सुधीः श्रीपदाब्जावलम्बी ।
[13]सिध्येत् षट्कर्मसारं परमगुरुगतः स भवेत् कल्पशाखी
राजेन्द्रः सर्वलोके धनपतिसदृशः शम्भुनाथप्रसादात् ॥ १४ ।

---

१. प्राणो—ख०; २. निधान—ख० ।

३. प्रणमसि व च । —प्रणवश्च शिवश्च सदाभद्रश्च महेश्वराणामयं माहेश्वरः, स च, एतेषां समाहारद्वन्द्वः । अथवा प्रणवशिवसदाभद्रसहितो माहेश्वर इति मध्यमपदलोपिसमासः ।

४. अन्ते उच्चैर्नमोऽन्तं मनुमिह जपति तत्पदे देवभृङ्ग ।

५. त्वमेको—ख०; ६. मां च पाहि—ख० ।

७. सृष्टिस्थित्यन्तकारी.... .... करुणासागरो मुक्तिदाता
पूज्यो विद्याधरीणां त्वमसुरविजयः.... .... ।
तारान्तं बिन्दुयुक्तं सकलविधुयुतं मन्त्रमेकाक्षरं
जप्त्वा ध्यात्वा च देवीं त्रिभुवनविजयी .... । इति ख० ।

८. सप्तार्णस्थं सुसिद्धो हरवधुमधुरं .... ।
.... दुरित .... ।

९. सदा यो भजति मनुवरं सर्वसिद्धीश्वरो वै ।
हे मातः ! शोभनेऽस्मि न विजय वर कुलानन्द सन्तानयुक्तः ।

१०. वद्य इति—ख०; ११. काले—ख०; १२. तन्त्रमन्त्रान्.... .... इति—ख० ।

१३. सिद्धः षट्कर्मसारः स भवति भुवने भूतनाथ प्रपन्नः ।

[1]खान्तं शक्रादिरूढं विधुनयनयुतं कामबीजं त्रिशक्ति
[2]चाद्येऽन्ते ॐ शिवायानलवधुमिलितं यो जपेन्नाथमन्त्रम् ।
तेनाम्नायो जपित्वा कुलपथनिरतः साधकः श्रीवरेण्यः
किं तस्यासाध्यसिद्धि त्रिजगति स सुखी सन्मुखी योगमार्गी ।। १५ ।

[3]सर्वातीतो विहारी पदगतिरहितः सर्वगामी विरामी
हस्ताभावो विनेता निरवधिवरदः सर्वरूपी विरूपी ।
[4]मन्त्रज्ञस्त्वं सुमन्त्री महमयसमयः संशयासारहन्ता
मन्ता विश्वेश्वरीणां परपशुपतयेऽन्ते नमः पातु नम्रम् ।। १६ ।

योगी भोगी [5]विरागी त्वमतुलविभवः सम्भवः पञ्चचूडो
[6]वाणी शेषः [7]प्रियेशः [8]शशिग्रथितमृडाशोभिताङ्गो ह्यनङ्गः ।
कामो माया रमेशः प्रथमदिनकरश्रेणि [9]शोभावलिप्तः
सर्वाङ्गं यः [10]प्रपायादमलकमलगः क्रोधगो योऽवलोकम् ।। १७ ।

एतच्छ्रीशङ्करस्तोत्रं यः पठेन्नियतः शुचिः ।
संवत्सराद् भवेत् सिद्धिः सर्वज्ञानप्रदायिनी ।। १८ ।

शुचौ वाप्यशुचौ स्तौति भक्त्याथः साधकोत्तमः ।
स सर्वयातनामुक्तो योगी ग्रन्थिविभेदकः ।। १९ ।

अकस्मात् सिद्धिमाप्नोति प्रेमानन्दसुभक्तिदाम् ।
शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः ।। २० ।

---

१. शान्तम्-ख० ।
२. तस्यान्ते.... ....नम इति मिलितं.... .... ।
त्वन्नाम्ना .... किं वरेण्यः ।
किन्तस्या साध्यसिद्धिः प्रजपति सुमुखी योगभागप्रपन्नः—ख० ।
३. सर्वाभीतो .... विवासी ।
४. मन्त्रज्ञस्थः ....सकलमनुमयः संशये मन्त्रो विश्वेश्वरीणां.... ....
५. विरोगी—ख०; ६. वानीशेशः—ख०; ७. शशिशकलरुचा—ख० ।
८. शशिना ग्रथितो मृडः शिवः, आशोभितानि अङ्गानि यस्य सः । द्वयोर्मध्यमपदलोपि-समासो बोध्यः ।
९. विलिप्तः—ख० ।
१०. सर्वां सिद्धि प्रपायादमलकमलगः क्रोधघ्नो यो नृलोकम्—ख० ।

न स्नानं न जपः कार्यं न पूजादिविधानकम् ।
केवलं स्तवपाठेनानाहते सुस्थिरो भवेत् ।। २१ ।

चिरञ्जीवी [1]वीतरागो वीतसंसारभावनः ।
पठित्वा धारयित्वा[2] च योगभ्रष्टो न सम्भवेत् ।।
[3]अनायासे योगसिद्धिं प्राप्नोति विपुलां श्रियम् ।। २२ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे ईश्वरस्तोत्रविन्यासो नाम द्विषष्टितमः पटलः ।।

१. वीतरोगी-ख० । —वीतराग इत्येव पाठो युक्तः । वीतरोग इति पाठेऽपि संसाररूपो रोगश्चेत्तर्हि सोऽपि पाठः सम्भवति ।
२. भावयित्वा-ख०; ३. सर्वायासे-क० ।

अथ त्रिषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच—

कवचं श्रृणु चास्यैव लोकनाथ शिवापते ।
ईश्वरस्य परं[1] ब्रह्म निर्वाणयोगदायकम् ॥ १ ।

कवचं दुर्लभं लोके [2]नामसम्मोहनं परम् ।
कवचं ध्यानमात्रेण[3] निर्वाणफलभाग्भवेत् ॥ २ ।

[4]अस्य किं पुत्रमाहात्म्यं तथापि तद्वदाम्यहम् ।
केवलं ग्रन्थिभेदाय निजदेहानुरक्षणात् ॥ ३ ।

सर्वेषामपि योगेन्द्र देवानां योगिनां तथा ।
[5]भावादिसिद्धिलाभाय कायनिर्मलसिद्धये ॥ ४ ।

प्रकाशितं महाकाल तव स्नेहवशादपि ।
सर्वे मन्त्राः प्रसिद्धयन्ति सम्मोहकवचाश्रयाः ॥ ५ ।

कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदाहृतम् ।
ईश्वरो देवता प्रोक्त[6]स्तथा शक्तिश्च काकिनी ॥ ६ ।

कीलकं [7]क्रूं तथा ज्ञेयं ध्यानसाधनसिद्धये ।
[8]हृदब्जभेदनार्थे तु विनियोगः प्रकीर्तितः ॥ ७ ।

एतच्छ्रीसम्मोहनमहाकवचस्य ब्रह्मा ऋषिरनुष्टुप् छन्द ईश्वरो देवता काकिनी शक्तिः[9]क्रूं कीलकं ध्यान-साधनसिद्धये हृदब्जभेदार्थे[10] जपे विनियोगः ।

प्रणवो मे पातु शीर्षं ललाटं च सदाशिवः ।
प्रासादो हृदयं पातु बाहुयुग्मं महेश्वरः ॥ ८ ।

---

१. परमम्–ख०; २. नाथ–ख०; ३. मार्गेण–ख०; ४. अन्यत्कि–ख० ।
५. तारादि–ख० ।—भाव आदिर्यासां ता भावादयः, ताश्च ताः सिद्धयश्च तासां लाभाय प्राप्तये । ६. प्रोक्ता–ख०; ७. हुं–ख० ।
८. हृदब्जं हृत्कमलं तस्य भेदनार्थे विकासनार्थे, सूर्यकरैः कमलं प्रभिन्नं भवति ।
९. हुं–ख०; १०. भेदनार्थे–ख० ।

पृष्ठं पातु महादेव उदरं कामनाशनः ।
पार्श्वौ पातु कामराजो बालः[1] पृष्ठतलान्तरम् ॥ ९ ।

कुक्षिमूलं[2] महावीरो ललितापतिरीश्वरः ।
मृत्युञ्जयो नीलकण्ठो लिङ्गदेशं सदावतु ॥ १० ।

लिङ्गाधो मुद्रिका पातु पादयुग्ममुमापतिः ।
अङ्गुष्ठं पातु सततं पार्वतीप्राणवल्लभः ॥ ११ ।

गुल्फं पातु त्र्यम्बकश्च जानुनी युवतीपतिः ।
ऊरुमूलं सदा पातु मञ्जुघोषः सनातनः ॥ १२ ।

[3]सिमनीदेशमापातु भैरवः क्रोधभैरवः ।
लिङ्गदेशोद्गमं पातु लिङ्गरूपी जगत्पतिः ॥ १३ ।

हृदयाग्रं सदा पातु महेशः काकिनीश्वरः ।
ग्रीवां पातु वृषस्थश्च कण्ठदेशं दिगम्बरः ॥ १४ ।

लम्बिकां पातु गणपो नासिकां भवनाशकः[4] ।
भ्रूमध्यं पातु योगीन्द्रः [5]महेशः पातु मस्तकम् ॥ १५ ।

मूर्घ्निदेशं मुनीन्द्रश्च द्वादशस्थो महेश्वरः ।
द्वादशाम्भोरुहं पातु [6]काकिनीप्राणवल्लभः ॥ १६ ।

नाभिमूलाम्बुजं पातु महारुद्रो जगन्मयः ।
स्वाधिष्ठानाम्बुजं पातु सदा हरिहरात्मकः ॥ १७ ।

मूलपद्मं सदा पातु ब्रह्मेन्द्रो डाकिनीश्वरः ।
कुण्डलीं सर्वदा पातु डाकिनी योगिनीश्वरः ॥ १८ ।

कुण्डली मातृका पातु वटुकेशः शिरोहरः ।
राकिणीविग्रहं पातु वामदेवो महेश्वरः ॥ १९ ।

---

१. बलिः–ख० । २. तूणं–ख०; ३. सीमनीं सदा–ख० ।

४. नाशनः–ख० ।—भवं संसारं नाशयति स भवनाशकः । पूर्वं नाशक इति ण्वुलन्तं साधयित्वा भवेन सह षष्ठीसमासः पश्चात् कार्यः ।

५. सदेशः–ख०; ६. कामिनी–ख० ।

पञ्चाननः सदा पातु लाकिनीवज्रविग्रहम् ।
स्वस्थानं द्वादशारञ्च वीरः पातु [1]सुकाकिनीम् ॥ २० ।

वीरेन्द्रः कर्णिकां पातु द्वादशारं विषाशनः ।
षोडशारं सदा पातु क्रोधवीरः सदाशिवः ॥ २१ ।

मां पातु [2]वज्रनाथेशोऽरिभयात्[3] क्रोधभैरवः ।
[4]षट्चक्रं सर्वदा पातु लाकिनीश्रीसदाशिवः ॥ २२ ।

षोडशाम्भोरुहान्तस्थं पातु धूम्राक्षपालकः
दिङ्नाथेशो महाकायो मां पातु परमेश्वरः ।

[5]आकाशगङ्गाजटिलो [6]द्विदलं पातु मे परम्
गङ्गाधरः सदा पातु [7]हाकिनीं परमेश्वरः ॥ २३ ।

[8]हाकिनीपरशिवो मे भ्रूपद्मं परिरक्षतु ।
दण्डपाणीश्वरः पातु मनोरूपं द्विपत्रकं ॥ २४ ।

साधुकेशः सदा पातु मनोन्मन्यादिवासिनम् ।
[9]पिङ्गाक्षेशः सदा पातु भयभूमौ तनूं मम ॥ २५ ।

[10]उन्मनोस्थानकं पातु रोधिनीसहितं मम ।
सुधाघटः सदा पातु ममानन्दादिदेवताम् ॥ २६ ।

आनन्दभैरवः पातु गूढदेशाधिदेवताम् ।
मायामयोपहा[11] पातु सुषुम्नाडिकाकलाम् ॥ २७ ।

इडाकलाधरं पातु कोटिसूर्यप्रभाकरः ।
पिङ्गलामिहिरं पातु चन्द्रशेखर ईश्वरः ॥ २८ ।

---

१. स्वकाकानीम्–ख०; २. वज–ख०;
३. विभवान्–ख०; ४. षड्वक्रं–ख० ।
५. आकाशगङ्गयाऽभिषिक्तः, स चासौ जटिलश्च । मध्यमपदलोपिसमासः । अथवाऽऽकाशगङ्गयैव जटिलः । सैव जटा इति भावः ।
६. विदलं पातु चेश्वरः–ख०; ७. हाकिनी परमेश्वरम्–ख० ।
८. हाकिनीशः शिरः पातु भ्रू पद्मं–ख०; ९. पिङ्गलाक्षः–ख० ।
१०. मे स्थलं·······बोधिनीसहितं शिवः–ख०; ११. मायामयः सदा–ख० ।

कोटिकालानलस्थानं सुषुम्नायां सदावतु ।
सुधासमुद्रो मां पातु रत्नकोटिमणीश्वरः ॥ २९ ।

शिवनाथः सदा पातु कुण्डलीचक्रमेव मे ।
विष्णुचक्रं महादेवः कालरात्रः कुलान्वितम् ॥ ३० ।

मृत्युजेता सदा पातु सहस्रारं सदा मम ।
सहस्रदलगं शम्भुं स्वयम्भूः पातु सर्वदा ॥ ३१ ।

[1]सर्वरूपिणमीशानं पातु शर्वो हि सर्वदा ।
सर्वत्र [2]सर्वदा पातु श्रीनीलकण्ठ ईश्वरः ॥ ३२ ।

सर्वबीजस्वरूपो मे बीजमालां सदावतु ।
मातृकां सर्वबीजेशो [3]मातृकार्णं शिवो मम ॥ ३३ ।

अहङ्कारं हरः पातु करमालां सदा मम ।
जलेऽरण्ये महाभीतौ पर्वते शून्यमण्डपे ॥ ३४ ।

व्याघ्रभल्लूकमहिषपश्वादिभयदूषिते ।
महारण्ये घोरयुद्धे गगने भूतलेऽतले ॥ ३५ ।

अत्युत्कटे शस्त्रघाते शत्रुचौरादिभीतिषु ।
महासिंहभये क्रूरे मत्तहस्तिभये तथा ॥ ३६ ।

ग्रहव्याधिमहाभीतौ सर्पभीतौ च सर्वदा ।
पिशाचभूतवेतालब्रह्मदैत्यभयादिषु ॥ ३७ ।

[4]अपवादापवादेषु मिथ्यावादेषु सर्वदा ।
करालकालिकानाथः प्रचण्डः प्रखरः परः ॥ ३८ ।

उग्रः [5]कपर्दी भीदंष्ट्री कालाच्छन्नकरः कविः ।
क्रोधाच्छन्नो [6]महोन्मत्तो गारुडीशो महेशभृत्[7] ॥ ३९ ।

---

१. मुनि–ख०; २. सर्वाङ्गं सर्वदा पातु देवः–ख ।
३. मातृकानामृस्मं दुर्गंभूमिः, तत्संबोधने । अथवा शिवेन सह मध्यमपदलोपिसमासः ।
४. अन्नादे रुपवादेषु–ख०; ५. कपर्दमी–ख०; ६. मदोन्मत्तो–ख० ।
७. महास्त्रभृत्–ख० ।

पञ्चाननः पञ्चरश्मिः पावनः पावमानकः ।
[1]शिखामात्रामहामुद्राधारकः क्रोधभूपतिः ॥ ४० ।
द्रावकः पूरकः पुष्टः पोषकः पारिभाषिकः ।
एते पान्तु महारुद्रा द्वाविंशतिमहाभये ॥ ४१ ।
एते सर्वे शक्तियुक्ता मुण्डमालाविभूषिताः ।
अहङ्कारेश्वराः क्रुद्धा योगिनस्तत्त्वचिन्तकाः ॥ ४२ ।
चतुर्भुजा महावीराः खड्गखेटकधारकाः ।
कपालशङ्खमालाढ्या नानारत्नविभूषिताः ॥ ४३ ।
किङ्किणीजालमालाढ्या हेमनूपुरराजिताः[2] ।
नानालङ्कारशोभाढ्याश्चन्द्रचूडाविभूषिताः ॥ ४४ ।
सदानन्दयुताः श्रीदा मोक्षदाः कर्मयोगिनाम् ।
सर्वदा भगवान् पातु ईश्वराः पान्तु नित्यशः ॥ ४५ ।
ब्रह्मा पातु मूलपद्मं श्रीविष्णुः पातु षड्दलम् ।
रुद्रः पातु दशदलमीश्वरः पात्वनाहतम् ॥ ४६ ।
सदाशिवः पातु नित्यं षोडशारं सदा मम ।
[3]परो द्विदलमापातु षट्शिवाः पान्तु नित्यशः ॥ ४७ ।
अपराः पान्तु सततं मम देहं कुलेश्वराः ।
पूर्णं ब्रह्म सदा पातु सर्वाङ्गं सर्वदेवताः ॥ ४८ ।
कालरूपी सदा पातु मनोरूपी शिरो[4] मम ।
आत्मलीनः सदा पातु ललाटं वेदवित्प्रभुः ॥ ४९ ।
वाराणसीश्वरः पातु [5]मम भ्रूमध्यपीठकम् ।
[6]योगिनाथः सदा पातु मम दन्तावलिं दृढम् ॥ ५० ।

---

१. मात्रौ–ख० ।—शिखा च मात्रा च महामुद्रा चेति द्वन्द्वः । धारयतीति धारकः । शिखामात्रामहामुद्राणां धारक इति षष्ठीसमासः ।

२. सुनूपुरविराजिता–ख०; ३. परश्च द्विदलं पातु–ख०; ४. शिवो–ख० ।

५. नीलकेशो हरेश्वरः–ख० ।

६. योगिनाथ इत्यारभ्य अतिथीश्वरानां ख० पु० नास्ति । ७. अर्घेश्वरो–ख० ।

ओष्ठाधरौ सदा पातु झिल्टीशो भौतिकेश्वरः ।
नासापुटद्वयं पातु भारभूतीशोऽतिथीश्वरः ॥ ५१ ।
गण्डयुग्मं सदा पातु स्थाणुकेशो हरेश्वरः ।
कर्णदेशं सदा पातु अमरोऽधीश्वरो मम ॥ ५२ ।
महासेनेश्वरस्तुण्डं मम पातु निरन्तरम् ।
[1]श्रीकण्ठादिमहारुद्राः स्वाङ्गग्रन्थिषु मातृकाः ॥ ५३ ।
मां पातु कालरुद्रश्च सर्वाङ्गं कालसंक्षयः ।
[2]अकालतारकः पातु उदरं परिपूरकः ॥ ५४ ।
अगस्त्यादिमुनिश्रेष्ठाः पान्तु योगिन ईश्वराः ।
श्रीनाथेश्वर ईशानः पातु मे सूक्ष्मनाडिकाः ॥ ५५ ।
त्रिशूली पातु पूर्वस्यां दक्षिणे मृत्युनाशनः ।
पश्चिमे वारुणीमत्तो महाकालः सदाऽवतु ॥ ५६ ।
उत्तरे चावधूतेशो भैरवः कालभैरवः ।
ईशाने पातु शान्तीशो वायव्यां योगिवल्लभः ॥ ५७ ।
मरुत्कोणे दैत्यहन्ता पातु मां सततं शिवः ।
वह्निकोणे सदा पातु कालानलमुखाम्बुजः ॥ ५८ ।
ऊर्ध्वं ब्रह्मा सदा पातु अधोऽनन्तः सदाऽवतु ।
सर्वदेवः सदा सातु [3]सर्वदेहगतं सुखम् ॥ ५९ ।
[4]इहार्हावल्लभः पातु कालाख्येशो गुणो मम ।
रविनाथः सदा पातु हृदयं मानसं मम ॥ ६० ।
चन्द्रेशः पातु सततं भ्रूमध्यं मम कामदः ।
वज्रदण्डधरः पातु रक्ताङ्गेशस्त्रिलोचनम् ॥ ६१ ।
बुधश्यामसुन्दरेशः पातु मे हृदयस्थलम् ।
सुवर्णवर्णगुर्वीशो मम कण्ठं सदाऽवतु ॥ ६२ ।

---

१. श्रीकण्ठादयो महान्तो रुद्रदेवा मातृकाश्च स्वाङ्गग्रन्थिषु पान्तु रक्षन्तु इत्यर्थः ।
२. अकालतारकः–ख०; ३. रक्ताङ्गेशः त्रिलोचनः–ख० ।
४. इहार्हा इत्यारभ्य स्त्रिलोचमित्यन्तं ख० पु० नास्ति ।

सिन्दूरजलदच्छन्नाद्यर्कशुक्रेश्वरो गलम्[1] ।
नाभिदेशं सदा पातु शनिश्यामेश [2]ईश्वरः ॥ ६३ ।

[3]राहुः पातु महावक्त्रः केवलं मुखमण्डलम् ।
केतुः पातु महाकायः सदा मे गुह्यदेशकम् ॥ ६४ ।

इन्द्रादिदेवताः पान्तु परिवारगणैर्युताः[4] ।
शिरोमण्डलदिग्रूपं पान्तु वैकुण्ठवासिनः ॥ ६५ ।

भैरवा भैरवीयुक्ताः सर्वदेहसमुद्भवाः ।
भीमद्रंष्ट्रा महाकाया[5] मम पान्तु निरन्तरम् ॥ ६६ ।

यज्ञभुङ्नीलकण्ठो मे हृदयं पातु सर्वदा ।
[6]उन्मत्तभैरवाः पान्तु ईश्वराः पान्तु सर्वदा ॥ ६७ ।

क्रोधभूपतयः पान्तु श्रीमायामदनान्विताः ।
इत्येतत् कवचं तारं तारकब्रह्ममङ्गलम् ॥ ६८ ।

कथितं नाथ यत्नेन कुत्रापि न प्रकाशितम् ।
तव स्नेहवशादेव प्रसन्नहृदयान्विता[7] ॥ ६९ ।

कृपां कुरु दयानाथ तवैव कवचाद्भुतम् ।
हिताय जगतां मोहविनाशायामृताय च ॥ ७० ।

पठितव्यं साधकेन्द्रैर्योगीन्द्रैरुपवन्दितम् ।
दुर्लभं सर्वलोकेषु सुलभं तत्त्ववेदिभिः ॥ ७१ ।

असाध्यं साधयेदेव पठनात् कवचस्य च ।
धारणात् पूजनात् साक्षात् सर्वपीठफलं[8] लभेत् ॥ ७२ ।

---

१. गणम्–ख० । —गलमिति पाठो युक्ततरः प्रतिभाति, अग्रे च नाभिदेशस्य कथनात् ।
२. शनिरिव श्याम ईशः, शनिश्यामेश इत्यर्थः ।
३. शशि–ख०; ४. गुणैरिति–ख० ।
५. महाकायम्–ख० । —महाकायमिति पाठे तु द्वितीयान्तं महाकायं रक्षणक्रियायाः कर्मतया मन्यते । महाकाया इति पाठे तु बहुव्रीहिर्बोध्यः ।
६. ख० पु० नास्ति; ७. हृदयान्वित–ख०; ८. सर्वामिष्टकुलम्–ख० ।

काकचञ्चुपुटं कृत्वा सप्तधा पञ्चधापि वा ।
कवचं प्रपठेद्विद्वान् गूढसिद्धिनिबन्धनात् ।। ७३ ।

काकिनीश्वरसंयोगं सुयोगं[1] कवचान्वितम् ।
ईश्वराङ्गं विभाव्यैव कल्पवृक्षसमो भवेत् ।। ७४ ।

एतत्कवचपाठेन देवत्वं लभते ध्रुवम् ।
आरोग्यं परमं ज्ञानं मोहनं जगतां वशम् ।। ७५ ।

स्तम्भयेत् परसैन्यानि पठेद्वारत्रयं यदि ।
शान्तिमाप्नोति शीघ्रं स [2]षट्कर्मकरणक्षमः ।। ७६ ।

[3]आकाङ्क्षारसलालित्यविषयाशाविवर्जितः ।
साधकः कामधेनुः स्यादिच्छादिसिद्धिभाग्भवेत् ।। ७७ ।

सर्वत्र गतिशक्तिः स्यात् स्त्रीणां मन्मथरूपधृक् ।
अणिमालघिमाप्राप्तिगुणादिसिद्धिमाप्नुयात् ।। ७८ ।

योगिनीवल्लभो भूत्वा विचरेत् साधकाग्रणीः ।
यथा गुहो गणेशश्च तथा स मे हि पुत्रकः ।। ७९ ।

श्रीमान् कुलीनः सारज्ञः सर्वधर्मविवर्जितः ।
शनैः शनैर्मुदा याति षोडशारे यतीश्वरः ।। ८० ।

यत्र भाति शाकिनीशः सदाशिवगुरुः प्रभुः ।
क्रमेण परमं स्थानं प्राप्नोति मम योगतः ।। ८१ ।

मम योगं विना नाथ तव भक्तिः कथं भवेत् ।
एतत्सम्मोहनाख्यस्य[4] कवचस्य प्रपाठतः ।। ८२ ।

---

१. सूत्रञ्च–ख० ।
२. षट्चक्रधारणक्षमः–ख० ।
३. आकाङ्क्षा इत्यारम्य कथं भवेद् इत्यन्तं ख० पु० नास्ति ।
४. एतस्य सम्मोहने आख्या यस्येति बहुव्रीहिः । अथवा एतत्संमोहनमाचष्टे इति कः कर्तरि बोध्यः ।

वाणी वश्या स्थिरा लक्ष्मीः[1] सर्वैश्वर्यसमन्वितः ।
त्यागिता लभ्यते पश्चान्निःसङ्गो विहरेत् शिवः ॥
सदाशिवे [2]मनो याति सिद्धमन्त्री मनोलयः[3] ॥ ८३ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादेऽनाहतेश्वरसम्मोहनाख्यकवचं नाम त्रिषष्टितमः पटलः ॥

●

---

१. यदा वाणी वश्या भवति, वशमायाति, तदा लक्ष्मीः स्थिरा भवति ।

२. मन्त्रो न संशयः–ख० ।

३. चतुर्वर्गं लभेत् साध्यो ब्रह्मज्ञानी सदाशिवः ।
सर्वं भूतसमः शान्तः परमानन्दचिन्मयः ॥
भवेत् लोके न संदेहो मानवोऽस्य प्रसादतः–ख० अ० पाठः ।

अथ चतुःषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच—

अथ भेदान् प्रवक्ष्यामि सर्वेन्द्रियविनिग्रहान् ।
शृणु चैकमनाः शम्भो यदि वाञ्छाफलेच्छुकः ॥ १ ॥

पुनर्ज्ञानं समाप्नोति स्मृतिविज्ञानवर्जितम् ।
यत्र वै कुरुते न्यासं मम तन्त्रोक्तसम्मतम् ॥ २ ॥

अनाहतोर्ध्वं श्रीपद्मं दलषोडशवेष्टितम् ।
कण्ठकूपमहाधूमावयवे कोटिभास्वरम् ॥ ३ ॥

पञ्चरश्मियुतं क्षेत्रं तन्मध्ये केशवप्रभम् ।
तन्मध्ये कर्णिकास्थानं परमाह्लादवर्धनम् ॥ ४ ॥

अप्रकाश्यं सुगोप्यन्तु शिवरूपं सदाशिवम् ।
पूजयेन्मतिमान् ज्ञानी साकिनीशक्तिवल्लभम् ॥ ५ ॥

महाजनाः कामकलादिबीजै-
र्निरुध्य वक्त्रं परिभावयन्ति ।
मेघाभमुग्रं स्थिरविद्युदाभं
श्यामं महासुन्दरविग्रहामलम् ॥ ६ ॥

निरूपणं नास्ति गतिप्रकाश-
श्चालोकनं पञ्चमवर्णयोगः ।
जातेर्विचारः प्रतिपादको यः
सदाशिवं शान्तजनाश्रयं भजे ॥ ७ ॥

अकालचक्रं कुलकालचक्रं
प्रकाशमानं भजतां सुरद्रुमम् ।
यजन्ति चक्रं तरुणारुणायुतं
सिन्दूरशैलामलदीप्तवन्तम्[1] ॥ ८ ॥

---

१. सिन्दूरस्य शैलेनामलं दीप्तवन्तमिति चक्रस्य विशेषणम् ।

ब्रह्मादिदेवाः प्रतिपूजयन्ति
तदादिदेवस्य समाधिभावम् ।। ९ ।

भल्लेशी भल्लकुल्ला कलयति वलिभिर्वीरभल्लूकभाला-
भर्गभ्रान्तिर्विभान्ती भयलविलकलाकालसर्पातुरस्था ।
कौला कैलासमालाकुलकमलजले बिन्दुलावण्यलीला
कण्ठाम्भोजे ज्वलन्ती कनकमधुगृहे पीठपूरे समाधौ ।। १० ।

ध्येयाया चिन्तनीया रुचिरविकिरणा साकिनी पीतवस्त्रा
सा पायान्नीरदाभं वरदसमदं चन्द्रचूडं सदेशम् ।
ब्रह्मेन्द्रैर्योगिमुख्यैर्विरचयति दलग्रन्थिसंस्थानचित्रं
विद्युत्पुञ्जप्रकाशा मुनिगणनिलया सेव्यतां साधकेन्द्रैः ।। ११ ।

आकाशाख्यप्रकाशे द्विरसदलकलाप्रोज्ज्वले ब्रह्ममार्गे
जीवानां हंसमालाविरचितपवने धूमधूमेन्दुशुभ्रे ।
श्रीमार्तण्डो विशुद्धे जयति कुलपथोद्दीपनः प्राणवायुः
साकिन्या योगिनीभिर्वसति सुखपदामोदचिन्तामनीशः ।। १२ ।

द्वावेव धत्तः सकलञ्च कालं
सदाशिवौ तौ मधुपूरवासिनौ ।
इच्छाक्रियाज्ञानविराजितौ यौ
प्रधानदेवौ भजतां सुखास्पदौ ।। १३ ।

विशुद्धपद्मे प्रकृतीश्वरौ यौ
प्रचक्रतू बाणशिवादिभेदिनौ ।
अकाररूपे गुरुमन्त्रदीप्तौ
कुलाकुलार्थौ पथि भावनीयौ ।। १४ ।

महाभैरव उवाच—

कुलजे परमे विद्ये नित्यानन्दस्वरूपिणि ।
भेदान् सर्वान्मम स्नेहाद्वक्तुमर्हसि सुन्दरि ।। १५ ।
कालकूटमहाभीममदोन्मादसुविस्मृतः ।
अहं न जाने योगार्थान् नित्यायुर्बन्धनप्रियान् ।। १६ ।

यदि मां रक्षितुं शक्ता विषाक्ताङ्गं सदावतु ।
कथं वा कण्ठसञ्चारः कथं वा राक्षसी क्रिया ।। १७ ।

कथं वा रिपुविद्वेषी कथं वा मङ्गलोदयः ।
कियद्वा विनयाह्लादं कियद्वा कालसाधनम् ।। १८ ।

नवीनत्वं कथं याति ध्यानं वा कीदृशं तव ।
तवाङ्गागुरुसद्भावं कुलपीठप्रदर्शनम् ।। १९ ।

कुण्डलीगमनं कुत्र साधकानां कुलं कुतः ।
वर्णध्यानं कुत्र पदे दलभेदः कथं भवेत् ।। २० ।

स्फूर्तिविद्यावियोगो हि पूर्वज्ञानसमोदयः ।
कथं समरसप्राप्तिः कथं वा कायकल्पनम् ।। २१ ।

मथनं कामदेवस्य कथं देहे व्यवस्थितिः ।
कण्ठाम्भोजस्थिरः को वा भावज्ञानी च को जनः ।। २२ ।

भावादि त्वत्कृपादृष्ट्या वद आदौ पतिं प्रति ।

श्रीआनन्दभैरवी उवाच—

आदौ श्रीकण्ठसञ्चारः श्रूयतां परमेश्वर ।। २३ ।

श्रोतव्यं मन्त्रिभिर्नित्यं कर्तव्यं प्रत्यहं प्रभो ।। २४ ।

कण्ठे षोडशकं दलं तदुदरे श्रीकर्णिकामण्डलं
तद्बाह्ये चतुरस्रकं सुखमयं षट्कोणमन्तर्गतम् ।
बाह्ये द्वारचतुष्टयं नवगृहं भूबिम्बषट्कं ततः
श्रीचन्द्रातपमूर्ध्वके मधुपुरी तत्कर्णिकायां यजेत् ।। २५ ।

तत्कर्णिकामध्यनिगूढदेशे
सम्भाति नित्यं मधुपूरदेशः ।
तन्मध्यदेशेऽष्टपुरीप्रकाशः
कौलक्रियासाधनसिद्धये स्यात् ।। २६ ।

पूर्वादिताः प्रेमकलाधिनाथाः
प्रभान्ति माध्वीरससारस्निग्धाः[1] ।
तेषां प्रणामः क्रियते यतीन्द्रै-
र्ध्येयाः सदाकण्ठदलप्रकाशः ॥ २७ ।
वामेश्वरः पूर्वगृहं प्रयाति
राहुर्गृहं ज्येष्ठगणेश्वरीशः ।
रौद्रात्मको मृत्युपतेर्गृहं तथा
कालीश्वरो नैर्ऋतिहेममन्दिरम् ॥ २८ ।
सकलविकरणीशो वारुणं मन्दिरं तत्
सवनधिकरणीशः पावनः मन्दिरं तत् ।
सबलविमथनीशो मन्दिरं चोत्तरस्थं
समवति निजगेहं सर्वभूताधिदेवः ॥ २९ ।
मध्यं मनोन्मनीनाथः सर्वालम्भस्तदूर्ध्वकम् ।
मन्दिरं हेमजडितं नानारत्नविनिर्मितम् ॥ ३० ।
एतेषां शक्तयो ध्येयाः स्वस्ववामपदोज्ज्वलाः ।
तासां नाम्ना योजयित्वा स्वमन्त्रैः प्रणवेन वा ॥ ३१ ।
सम्पुटीकृत्य जप्त्वा च असाध्यं खलु सिद्ध्यति ।
नवकोणोर्ध्वगेहे च पूर्वस्यां दिशि राजते ॥ ३२ ।
वामा देवी महातेजोमयी भुजचतुष्टया ।
नानालङ्कारशोभाङ्गी साधकाऽभीष्टदा सदा ॥ ३३ ।
वह्नौ हेममन्दिरे च ज्येष्ठा देवी चतुर्भुजा ।
सर्वालङ्कारसंयुक्ता पद्ममालाविराजिता ॥ ३४ ।
ध्येया सदा योगिमुख्यैः सर्वसिद्धिसमृद्धये ।
यमस्वर्णमन्दिरे च रौद्री परमसिद्धिदा ॥ ३५ ।
चतुर्भुजा त्रिनेत्रा च ध्येयालङ्कारमण्डिता ।
नैर्ऋते हेमगेहे च काली देवी चतुर्भुजा ॥ ३६ ।

१. माध्वीरससारेण स्निग्धाः ।

सर्वाऽलङ्कारशोभाढ्या त्रिनेत्रा वरदायिनी ।
सर्वास्त्रधारिणी देवी मुण्डमालासुशोभिता ।। ३७ ।

ध्येया योगेन्द्रविद्याभिः परमा ज्ञानदायिनी ।
कलविकरणी देवी भाति वारुणमन्दिरे ।। ३८ ।

चतुर्भुजा योगिमाता त्रिनेत्रा भरणान्विता ।
सा ध्येया योगिमुख्यैश्च अणिमाद्यष्टसिद्धिदा ।। ३९ ।

पावने स्वर्णगेहे च ध्येया साधकसत्तमैः ।
बन्धूकपुष्पसङ्काशा केयूरहारमालिनी ।। ४० ।

बलविकरणी देवी सर्वाभरणभूषिता ।
चतुर्भुजा त्रिनेत्रा च सर्वादिसिद्धिदायिनी ।। ४१ ।

बलप्रमथिनी देवी धनदा मोक्षदा सदा ।
कुबेरहेमगेहस्था सर्वानन्दकरोद्यता ।। ४२ ।

श्रीसर्वभूतदमनी ध्येया ईशानमन्दिरे ।
प्रथमारुणसङ्काशा करवीरस्रजान्विता ।। ४३ ।

चतुर्भुजा त्रिनेत्रा च सर्वालङ्कारशोभिता ।
मध्ये श्रीकर्णिकायाश्च ध्येया सर्वजनेश्वरैः ।। ४४ ।

सूर्यप्रभा सदा ध्येया देवी श्रीदा मनोन्मनी ।
चतुर्भुजा महादीप्तिरलङ्कारोपशोभिता ।। ४५ ।

त्रिनेत्रा वरदा सर्वा सर्वान्तःकरणस्थिता ।
सकलगुणात्मशक्तियुक्ता देवी चतुर्भुजा ।। ४६ ।

अरुणायुतसङ्काशा रुण्डमालाविराजिता ।
[1]अनन्तानन्तमहिमा ध्येया साद्या चतुर्भुजा ।। ४७ ।

त्रिनेत्रा रक्तवसना सर्वालङ्कारमण्डिता[2] ।
एतासां ध्यानमाकृत्य पूजयेद्विधिवत् ततः ।। ४८ ।

---

१ अनन्तानन्तो महिमा यस्याः सा; २. सर्वालङ्कारैर्मण्डिता इति ।

[1]मनः कल्पितद्रव्यैश्च साक्षात्कल्पितद्रव्यकैः ।
जप्त्वा नाम्ना योजयित्वा समर्प्य विधिवत्सुधीः ।। ४९ ।

कृत्वा मांसासवैर्योगी तर्पयेन्मधुधारया ।
अभिषेकं कुलद्रव्यैः साधकैर्योगिभिः सह ।। ५० ।

भोजयेद् योगिमुख्यांश्च ब्राह्मणान् वेदपारगान् ।
नानाविधकुलद्रव्यैर्भक्ष्यैर्भोज्यैश्च योगिराट् ।। ५१ ।

ततः प्रकाशमाप्नोति मनोयोगेन वार्पयेत् ।
एतत्प्रकारः कण्ठस्य सञ्चारः परमेश्वर ।। ५२ ।

लभ्यते विधिनानेन दिव्यभावेन वार्पयेत् ।
ततः सिद्धिमवाप्नोति साकिनीदर्शनं तथा ।। ५३ ।

पत्न्या सार्धं साधकेन्द्रः सिद्धमन्त्रमवाप्नुयात् ।
अथ वक्ष्ये महाकाल राक्षसों परमां क्रियाम् ।। ५४ ।

येन कर्मसाधनेन शिवत्वमपि लभ्यते ।
चीनाचारं राक्षसीनां कुलीनानां सदाशिव ।। ५५ ।

राक्षसी वेदभाषा च वेदमन्त्रविशोधिता ।
चीनाचारं राक्षसीनां साधनादेव सिद्ध्यति ।। ५६ ।

चीनाचारं प्रवक्ष्यामि राक्षसीनां महाफलम् ।
अष्टादशप्रकारन्तु चीनाचारं प्रचक्षते ।। ५७ ।

सर्वत्र शुद्धसद्भावः प्रयोजनविरागवित् ।
उत्तमोत्तमसंज्ञं चानुत्तमोत्तममेव च ।। ५८ ।

[2]अत्यन्तोत्तमसंज्ञं चात्यन्तानुत्तममेव च ।
अनुत्तमोत्तमं नाथ चात्युत्तममथापरम् ।। ५९ ।

उत्तमं सप्तविधञ्च चीनाचारेषु योजयेत् ।
अत्यन्तमध्यमं चीने चातिमध्यममेव च ।। ६० ।

---

१. मनसा कल्पितानि द्रव्याणि, तैरित्यर्थः ।
२. अन्तमतिक्रान्ता अत्यन्ता, तादृशो उत्तमा संज्ञा यस्य तम् ।

मध्यमध्यमसञ्ज्ञञ्च मध्यमन्तु चतुर्विधम् ।
अत्यन्ताधमसञ्ज्ञञ्चात्यन्ताधममेव च ॥ ६१ ।

अत्यधमाधमं चैवात्यन्ताधमाधमं तथा ।
अत्यधमं तथा नाथाधमाधममथापरम् ॥ ६२ ।

अधमं सप्तमं विद्धि राक्षसीचीनसाधने ।
दिनपक्षमासवर्षभेदेषु कारयेत् क्रमात् ॥ ६३ ।

आदावुत्तमसिद्धान्तश्रवणं कुरु शङ्कर ।
यदा ऋतुमती पृथ्वी त्रिदिनं चाम्बुवीचिषु ॥ ६४ ।

तद्दिनात्तु दिनं यावत्तावद्धि मांसचर्वणम् ।
चीनद्रुमासवानन्दपञ्चतत्त्वनिषेवणम् ॥ ६५ ।

अबाधतो यः करोति चोत्तमोत्तममेव तत् ।
अनुत्तमोत्तमं वक्ष्ये पूजाकालेषु योजयेत् ॥ ६६ ।

केवलं गुप्तभावेन पञ्चतत्त्वनिषेवणम् ।
अत्यागं स्वीयबीजं तु कुलपीठस्य मन्थनम् ॥ ६७ ।

तत्पीठमथनोद्भूतसुधारसनियोजनम् ।
आसवेसु च सर्वेषु तदासवनिषेवणम् ॥ ६८ ।

अष्टप्रकारमांसाढ्यं सदा चर्वणतत्परम् ।
पूजाकालं विना द्रव्यं नाहरेत् साधकोत्तमः ॥ ६९ ।

[1]अनुत्तमोत्तमं तद्धि सर्वदेशे च सर्वदा ।
अत्यन्तोत्तमचीनं तु वक्ष्याम्यत्र विधानतः ॥ ७० ।

येन सिद्धो भवेन्मन्त्री सदाशिवादिदर्शनम् ।
प्रत्यहं वत्सरं व्याप्य निशायामर्धरात्रके ॥ ७१ ।

पञ्चतत्त्वं समानीय अष्टनायिकया सह ।
पूजयेत् क्रमतो मन्त्री तत्कथाश्रवणोत्सुकः ॥ ७२ ।

---

१. नास्ति उत्तमो यस्मात् सोऽनुत्तमः । अनुत्तमेष्वपि उत्तमस्तमित्यर्थः ।

क्रमेण मथनं कृत्वाऽऽसवे संयोज्य नित्यशः ।
[1]शुद्धभावेन गृह्णीयाद् ब्राह्मण्यां बीजमर्पयेत् ॥ ७३ ।

तद्बीजेन समासिञ्चेन्मस्तकादिषु पङ्कजे ।
दत्वा ताभ्यो दक्षिणादीन् स्वातन्त्र्यमपि चाचरेत्॥७४ ।

अत्यन्तोत्तममेतद्धि न चारम्भो विशां विना ।
अत्यन्तानुत्तमं विद्धि येन सिद्धो भवेन्मनुः ॥ ७५ ।

आनन्दे त्यागमापन्ने पुनरानन्दमाश्रयेत् ।
सर्वदानन्दसंयुक्तः प्रजपेद्यजनादिषु ॥ ७६ ।

न विशेषो दिवारात्रौ सर्वदारसुसंयुतः ।
उक्तासनोपविष्टस्तु निर्जने कुलसाधनम् ॥ ७७ ।

अनुत्तमोत्तमं विद्धि मायाजालनिकृन्तनम् ।
कालाकालं विहायादौ स्वकुलं परमेव वा ॥ ७८ ।

तन्नाम्नाहूय यत्नेन दापयेदासनादिकम् ।
महाशङ्खं समानीय कुलद्रव्यं तथानघ ॥ ७९ ।

विधिना पूजनं कृत्वा कुलवारे च साधकः ।
दाता भोक्ता संविदश्च शोधितस्य कुलेश्वर ॥ ८० ।

स्वीयाङ्गे न्यासजालादीन् तासामङ्गे ततः परम् ।
शिवपूजां ततः कृत्वा कुलपूजां समारभेत् ॥ ८१ ।

पीठे संयोज्य शम्भुं चाक्षुब्धोऽयुतजपं चरेत् ।
जपं समर्पयेत् तस्या वामहस्ताम्बुजे सुधीः ॥ ८२ ।

विसर्जनं स्वबीजस्य ततो नित्याप्रतर्पणम् ।
आसवे योजयित्वा तु तया सार्धं पिबेन्मधु ॥ ८३ ।

वामभागे कुलं कृत्वा लक्षजाप्यं समापयेत् ।
कुलद्रव्यैश्च होमः स्यात् तद्दशांशेन तर्पणम् ॥ ८४ ।

---

१. शुद्धश्चासौ भावश्चेति कर्मधारयः । सर्वत्र भावशुद्धिरेव मूलम् ।

तद्दशांशाभिषेकन्तु दशांशं विप्रभोजनम् ।
ततः कुमारीभोज्यञ्च मधुमांसासवैः प्रभो ।। ८५ ।

प्रत्यहं वत्सरं व्याप्य कुलवारे कुजे शनौ ।
वत्सरान्ते मम पदाम्भोजं पश्यति निश्चितम् ।। ८६ ।

अनुत्तमोत्तमञ्चैतद् राक्षसीचीनसाधने ।
अत्युत्तमं प्रवक्ष्यामि सावधानावधारय ।। ८७ ।

सदा जितेन्द्रियो भूत्वा योगाभ्यासपरायणः ।
मांसासवाद्यैः सन्तर्प्य कालिकां घोरनिःस्वनाम् ।। ८८ ।

एकादशीव्यतीपाते कुलवारे कुले तिथौ ।
कुलमानीय साक्षाद्वै परंब्रह्ममयो भवन् ।। ८९ ।

केवलं लयभावेन देवीपूजां समारभेत् ।
कुलदृष्टचा च तद्बुद्ध्या तत्तद्धचानपरायणः ।। ९० ।

मूलाधारे महाचक्रे योगिनीकोटिराजिते ।
कोटिब्रह्मालये सिद्धे सूक्ष्ममार्गेण साधकः ।। ९१ ।

ज्योतिराकाशगङ्गाभिर्यथाधाराभिराप्लुताम् ।
पृथिवीं ब्रह्मजननीं ब्रह्मानन्दस्वरूपिणीम् ।। ९२ ।

तथा कुलमयीं नित्यां नित्यानन्दस्वरूपिणीम् ।
कुलकुण्डलिनीं देवीं विश्वमातां त्रिलोचनाम् ।। ९३ ।

महाघनरसोल्लासां महोन्मादादिबिन्दुभिः ।
गलिताभिर्महाधाराजन्याब्धिशतकोटिभिः ।। ९४ ।

परिच्छिन्नाभिरुद्धते ज्योतीरन्ध्रे महापथे ।
अत्रैव सततं भाति सूक्ष्मात्सूक्ष्मतराऽपरा ।। ९५ ।

बिन्दूद्भवा महाधारा कोटिसौदामिनीप्रभा[1] ।
तस्या रूपस्य का पूजा कुलदेव्या महाप्रभो ।। ९६ ।

---

१. कोटिसंख्याकाः सौदामिन्यस्तासां प्रभा यस्यां सा ।

केवलं बिन्दुधाराभिस्तर्पयामि सदानघाम् ।
कुलदेवीं जगद्रूपां स्थूलसूक्ष्मस्वरूपिणीम्[1] ।। ९७ ।

मूलादिब्रह्मरन्ध्रान्तं तर्पयामि सुरेश्वरीम् ।
इत्येवं मनसा यस्य तस्य किं बाह्यपूजया ।। ९८ ।

तथापि कल्पयाम्यत्र सा(शा)रदीये महोत्सवे ।
यथा कुलवतीं दुर्गां तथाहं कुलनायिकाम् ।। ९९ ।

मूलपद्मात्समाकृष्य नागिनीं नागकन्यकाम् ।
कुहकोद्भवरूपस्थां मनुष्यगणकन्यकाम् ।। १०० ।

वामेऽहं कल्पयाम्यत्र कुलपीठे मनोरमे ।
कुलदेवीं वामभागे पूजयाम्यधुनामुना ।। १०१ ।

तर्पयामि महाबिन्दूद्भवासवघटामृतैः ।
मांसाष्टकयुतैर्नित्यं मुद्राभिर्मीनमिश्रितैः ।। १०२ ।

यथान्तःकरणे सा तु तथा मे बाह्यतर्पणम् ।
शुभं भवतु नित्यं मे महारात्रिश्च सौख्यदा ।। १०३ ।

कुलं भवतु सौख्यं मे बाह्यपूजा शुभा मम ।
इत्येवं मनसा यस्य तस्याः सौख्यं कुतः प्रभो ।। १०४ ।

सर्वदा पूजनं तस्य चैव कालो निरर्थकः ।
अभेदबुद्धया सर्वत्र पूजनं भावसाधने ।। १०५ ।

अत्युत्तममिति प्रोक्तं कौलानां योगसाधने ।
जातिवृत्तं न तत्रैव यदीच्छति फलोदयम् ।। १०६ ।

उत्तमं सम्प्रवक्ष्येऽहं यथोचितफलोदयम् ।
अत्र तन्त्रे क्रिया गुप्ता गुप्तमामन्त्रितं कुलम् ।। १०७ ।

गुप्तं कुलरसं नित्यं गुप्तपानं सदा प्रभो ।
वर्षे वर्षे पूर्णसिद्धिं प्राप्नुयान्नात्र संशयः ।। १०८ ।

---

१. स्थूलानि सूक्ष्माणि च स्वरूपाणि सन्ति यस्यां सा, इनिप्रत्ययान्तः ।

मासे मासे तर्पणन्तु पक्षे पक्षे कुलक्रिया ।
दिने दिने सदा पानं कौलानामिति लक्षणम् ॥ १०९ ।

गुप्तक्रियाभिः सिद्धयेत न प्रकाश्यं कदाचन ।
सर्वत्यागी तदैव स्यात् प्रकाशो जायते यदि ॥ ११० ।

उत्तमं भावमालम्ब्य क्षिप्रं सिद्धयति साधकः ।
तस्यैव लक्षणं नित्यं तन्त्रनाथे निरूपितम् ॥ १११ ।

शिवोक्तिलक्षणे प्रोक्तं भैरवेण मया सह ।
तत्सर्वं ज्ञानमालम्ब्य चोत्तमस्त्वं भविष्यसि ॥ ११२ ।

अत्यन्तमध्यमं वक्ष्ये चीनाचारक्रमेण तु ।
यत्कृत्वा मुनयः सर्वे कौललक्षणभावकाः ॥ ११३ ।

पीठोपपीठमध्ये च महापीठे कुलार्णवे ।
[१]महाचीनद्रुमलतावेष्टिते साधकान्विते ॥ ११४ ।

तत्रैकमासनं कृत्वा तिथित्रयदिने शुभे ।
उक्तासनमुपानीय तत्र निश्चयचेतसा ॥ ११५ ।

लक्षमेकं जपेन्नित्यं कामनाविषयस्थितः ।
कृष्णे वा शुक्लपक्षे वा होमादिविधिमाचरेत् ॥ ११६ ।

कुमारीं भोजयित्वा तु कण्ठे तौ भावयेत्सदा ।
मासेन सिद्धिमाप्नोति कुलद्रव्यप्रसादतः ॥ ११७ ।

अत्यन्तमध्यमं चीनं कथितं तव यत्नतः ।
अतिमध्यममावक्ष्ये यज्ज्ञात्वा योगिराड् भवेत् ॥ ११८ ।

कालाकालं विहायाथ सदान्तःकरणस्थितः ।
भावयित्वा सुधादेवीं डाकिन्यादिस्वरूपिणीम् ॥ ११९ ।

पञ्चशक्ति समानीय पूजयेत्कुलजै रसैः ।
कुलपुष्पैः साधकेन्द्रः कुलीनां भावयेत्ततः ॥ १२० ।

---

१. महाचीनद्रुमलताभिर्वेष्टित इत्यर्थः । चीनदेशेऽयं वृक्षः सम्भाव्यते ।

यथा बाह्ये तथा हृद्ये कण्ठे मणिगृहे तथा ।
वैकुण्ठे विष्णुकमले मूलाधारे पुनः पुनः ॥ १२१ ।

ध्यात्वा ध्यात्वा तर्पयेद्यः स कामविजयी भवेत् ।
अतिमध्यममेतत्तु योगिनामपि दुर्लभम् ॥ १२२ ।

मध्यमध्यममावक्ष्ये कुलीनफलसागरम् ।
वाञ्छासिद्धिकरं साक्षात् शिववद्विहरेन्मुदा ॥ १२३ ।

मासमध्ये पञ्चवारं पञ्चतत्त्वनिषेवणम् ।
यजनं भावनं नित्यं होमकर्म समापयेत् ॥ १२४ ।

बाह्यक्रियासु निपुणः श्मशाने विपिनेऽपि वा ।
भावयेत् कान्तं शिरसि काकिनीं साकिनीं कलाम् ॥ १२५ ।

पञ्चशक्ति द्वयं वापि गृहीत्वा तर्पणं चरेत् ।
तर्पणान्ते जपेद्विद्यामहर्निशमनातुरः ॥ १२६ ।

होमतर्पणकाले तु कुलशक्ति प्रपूजयेत् ।
आसनं स्वागतं पाद्यमर्घमाचमनीयकम् ॥ १२७ ।

मधुपर्कं च मनस्नानवसनाभरणानि च ।
[1]गन्धपुष्पधूपदीपनैवेद्यं शीतलं जलम् ॥ १२८ ।

पक्वान्नं पक्वमांसञ्च पक्वञ्च व्यञ्जनादिकम् ।
कर्पूरवासितं नीरं ताम्बूलं तदनन्तरम् ॥ १२९ ।

लवङ्गादिसमायुक्तं दत्वा गन्धानुलेपनम् ।
गन्धमाल्यादिकं दत्वा प्रार्थयेत्सुहितं वरम् ॥ १३० ।

तस्यै दत्वा स्वमात्मानं कुलपीठे स्थिरो भवेत् ।
कण्ठपद्मे मनो याति शक्तिमन्त्रप्रभावतः ॥ १३१ ।

मध्यमध्यममेतद्धि कुलीनविप्रभोजनम् ।
क्रमशः सिद्धिमाप्नोति मध्यमं शृणु भैरव ॥ १३२ ।

---

१. गन्धः पुष्पं धूपो दीपो नैवेद्यमिति समाहारद्वन्द्वः । पञ्चोपचारे एतानि द्रव्याणि योज्यानि ।

यथा काले कुलद्रव्यं समानीय प्रयत्नतः ।
नवशक्तिमेकशक्तिं त्रिशक्तिं वासमाहरेत् ॥ १३३ ।

गुप्तस्थाने समानीय गुप्तद्रव्यैः प्रपूजयेत् ।
दशोपचारविधिना पूजयेदिष्टदेवताम् ॥ १३४ ।

प्रातःकाले च मध्याह्ने सायाह्ने मध्यरात्रिके ।
सहस्रजपमाकृत्यार्चनं वारचतुष्टयम् ॥ १३५ ।

मध्यरात्रौ शक्तिमात्रं स्थापयेदग्रतः सुधीः ।
साक्षान्मूर्त्तौ दिगम्बर्यां मुद्रया परिपूजयेत् ॥ १३६ ।

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥ १३७ ।

अनेन मनुनाभ्यर्च्य परंब्रह्मस्वरूपिणीम् ।
कुलद्रव्यं पिबेत् पश्चाच्छक्तिदत्तं पुनः पुनः ॥ १३८ ।

शक्तिप्रसादं विधिना संशोध्य पानमाचरेत् ।
शोधयामि परां देवीं कुलास्यपद्मनिर्गताम् ॥ १३९ ।

पिबामि परमानन्दैस्तत्प्रसादात्कुलेश्वरि ।
इत्यादि मध्यमं प्रोक्तं चीनाचारेषु दुर्लभम् ॥ १४० ।

अत्यन्ताधमचीनन्तु वक्ष्याम्यत्र विशेषतः ।
मासमध्ये त्रिदिनन्तु तर्पणन्तु त्रयं त्रयम् ॥ १४१ ।

अष्टोत्तरशतं जाप्यं केवलं शक्तिशोधनम् ।
ऋषिमातृकराङ्गादिन्यासं स्वीयतनौ चरेत् ॥ १४२ ।

कुलाङ्गेऽपि समाकृत्य पीठे शम्भुं नियोजयेत् ।
[1]धर्माधर्मकलास्नेहमात्माग्नौ मनसा स्रुचा ॥ १४३ ।

सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ।
स्वाहान्तमन्त्रमुच्चार्य नियोज्य जपमाचरेत् ॥ १४४ ।

---

१. धर्मः, अधर्मः, तयोः कला, तस्याः स्नेहः ।

जपं समर्प्य विधिना स्तोत्रं कवचमापठेत् ।
कवचान्ते ततो मन्त्री स्वबीजहोममाचरेत् ॥ १४५ ।

कुलत्रिकोणगगनवायूज्ज्वलकुलानले ।
कुलप्रकाशिते पद्मतले च मनुनामुना ॥ १४६ ।

प्रकाशाकाशहस्ताभ्यामवलम्ब्योन्मनीस्त्रुचा ।
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम् ॥ १४७ ।

स्वाहेति मन्त्रमुच्चार्य ततस्तेनैव तर्पणम् ।
तर्पणान्ते चाभिषेकं स्वशक्तिकुलजै रसैः ॥ १४८ ।

शक्तीनां ब्राह्मणस्थाने भोजनञ्च समापनम् ।
केवलं त्रिदिनं मासे चात्यन्ताधमलक्षणम् ॥ १४९ ।

अत्यन्तात्यधमं चीनं वक्ष्यामि कुलवल्लभ ।
राक्षसोक्रियया व्याप्तं भुजङ्गाकारभोजनम् ॥ १५० ।

अहमेव परंब्रह्म बुद्ध्यात्मानं प्रतर्पयेत् ।
आत्मम्भरी स्वयं नित्यं शक्तित्यागपरो नरः ॥ १५१ ।

अन्तरे च न तु त्यागो मनसा कर्मसाधनम् ।
पञ्चतत्त्वं स्वयं पीत्वा सदानन्दस्वरूपवान्[१] ॥ १५२ ।

बीजत्यागं न करोति लिङ्गं वक्त्रे पुनः पुनः ।
दन्तावलियुते वक्त्रे बीजोच्चारणमुच्चकैः ॥ १५३ ।

उपांशु मानसं वापि जप्त्वा ब्रह्ममयो भवेत् ।
न तु बाह्ये महापूजा एकादशीव्रतं विना ॥ १५४ ।

एकादश्यामवश्यन्तु पूजयेत्सुरसुन्दरीम् ।
यथाविधि विधानेन शक्तिं सन्तोषयेत् सुधीः ॥ १५५ ।

सर्वदेशे सर्वपीठे तत्राशुचिर्न विद्यते ।
अशुचेर्भावमालब्य नरकं खलु गच्छति ॥ १५६ ।

---

१. सदानन्दस्य स्वरूपमिति षष्ठीतत्पुरुषः, तदस्यास्तीति मतुबन्तः ।

विष्ठायां गन्धनिबिडे मांसमेदादिगन्धके ।
सुगन्धदेशके वापि एकभावेन पूजयेत् ।। १५७ ।

पूजान्ते षट्सहस्राख्यस्तोत्रं कवचमापठेत् ।
तदन्ते विहरेद्वीरो मदनाह्लादवर्जितः ।। १५८ ।

अन्तरे कुण्डलीयुक्तः कामकर्ता स्वयं भवेत् ।
न तु बाह्ये स्वबीजस्य त्याग एव सुरेश्वर ।। १५९ ।

तदा योगे स्थिरो याति चात्यन्तात्यधमादिभिः ।
अत्यधमाधमं वक्ष्ये कालात्मञ्छृणु सादरम् ।। १६० ।

मासमध्ये वारमेकं कुलाचारं सचीनकम् ।
कुलमालां समानीय कुलेन पुटितं मनुम् ।। १६१ ।

शक्तियुक्तो जपेन्मन्त्री मन्त्रध्यानपरायणः ।
चतुर्दण्डगते रात्रौ जपारम्भ उदीरितः ।। १६२ ।

जपेत्तु सकलां रात्रिं वेददण्डस्थिते न तु ।
भयं नैव तु कर्तव्यं हास्यं तत्र विवर्जयेत् ।। १६३ ।

कालीतन्त्रविधानेन तारातन्त्रक्रमेण वा ।
पूजाजपं समर्प्याथ शक्तिं सम्प्रार्थयन्मुदा ।। १६४ ।

स्तोत्रं कवचमुच्चार्य विहरेच्च यथाविधिम् ।
मासमध्ये दिनमेकं कृत्वा योगी भवेन्नरः ।।
पशुत्वं न समायाति वीरतन्त्रप्रसादतः ।
एतदन्यदिने नाथ पञ्चतत्त्वाक्ततण्डुलम् ।। १६५ ।

वदनाम्भोरुहे दत्वा जपेत्तद्गतमानसः ।
एवं वत्सरपर्यन्तं कृत्वा योगी भवेन्नरः ।। १६६ ।

अत्यधमाधमं कृत्वा पशुत्वमपि मुञ्चति ।
कुलेश परमानन्द वक्ष्येऽन्त्यन्ताधमाधमम्[1] ।। १६७ ।

---

१. अधमादपि अधमः, अन्तमतिक्रान्तोऽत्यन्तः, स चासौ अधमाधमश्च ।

भवेयुः साधकाग्रयाश्च वीराः पशुगुणोदयाः ।
उच्चदेशे गृहं कृत्वा मण्डलाकारमेव च ॥ १६८ ।

शक्तिं विना चरेत्कार्यं नृणां मुण्डत्रयोदशे ।
आसनं तत्र संस्कृत्य जपेत्तु शङ्खमालया ॥ १६९ ।

अनुकल्पितद्रव्येण साक्षात्कल्पितद्रव्यकैः ।
पूजयेत्परया भक्त्या स्वात्मानं शक्तिकुण्डलीम् ॥ १७० ।

एकाकी निर्जने देशे तद्‌गतः प्रजपेन्मनुम् ।
कुलपूजाक्रमेणैव आत्मशक्तिं प्रतर्पयेत् ॥ १७१ ।

सहस्रनामयोगाङ्गं षट्‌चक्रभेदनक्रमात् ।
पठित्वा स्तोत्रकवचं विन्यसेदात्मनो हृदि ॥ १७२ ।

गुप्तजाप्यक्रमेणैव सिद्धो भवति मानवः ।
इत्येतत्कथितं नाथ महासिद्धिकरं परम् ॥ १७३ ।

दिवारात्रौ साधकस्य विशेषो नास्ति शङ्कर ।
पशुभावं परित्यज्य सिद्धोऽत्यन्ताधमाधमम् ॥ १७४ ।

अत्यधमं प्रवक्ष्यामि चीनाचारक्रमेण तु ।
येन सिद्धो भवेन्मन्त्री पशुभावं विमुञ्चति ॥ १७५ ।

शृणु प्राणेश वरद सिद्धानामधिपाधिप ।
पातालमण्डपं कृत्वा गन्धनिर्गमवर्जितम् ॥ १७६ ।

तत्रासनं समाकृत्य तत्र मुण्डत्रयं त्रयम् ।
तन्मध्ये निवसेन्नाथ कुलविद्यासमन्वितः ॥ १७७ ।

कुलीनां पण्डितां नारीं दिव्यालङ्कारमण्डिताम् ।
सर्वदानन्दनिलयां रसिकां क्रोधवर्जिताम् ॥ १७८ ।

सुन्दरीं [1]यौवनाह्लादललितां देवयोगिनीम् ।
एवंभूतां देवशक्तिं वामभागे नियोज्य च ॥ १७९ ।

---

१. यौवनस्याह्लादेन ललिता । यूनो भावो यौवनम् । "हायनान्तयुवादिभ्योऽण्" इत्यण्-प्रत्ययः ।

पूजयेत्परया भक्त्या यथेष्टदेवतां प्रभो ।
केवलं पूजनं कृत्वा त्रिदिनं कुलमन्दिरे ।। १८० ।

अथ सप्तदिनान्[1] वापि पूजाजपविधिं चरेत् ।
शक्तिं सन्तर्पयेद् भक्त्या नवकन्यामथापि वा ।। १८१ ।

वस्त्रालङ्कारभूषाद्यैः कुलद्रव्यैर्यथाविधि ।
सन्तोषयेत् सदा कामी लिङ्गध्यानपरायणः ।। १८२ ।

धूपदीपौ तथा दद्यात् सर्वदा साधकोत्तमः ।
यथा तत्त्वान्तनाशः स्यात्तथा तच्चित्ततामसम् ।। १८३ ।

नश्यत्येव महाकाल अत्यधमप्रसादतः ।
अधमाधममावक्ष्ये यथोक्तफलसिद्धये ।। १८४ ।

मन्त्री पीठे समागम्य मुक्तकेशो दिगम्बरः ।
घृणालज्जाविरहितो निर्जने विपिनेऽपि वा ।। १८५ ।

गङ्गागर्भे गिरौ वापि बिल्वमूले चतुष्पथे ।
वटमूलेऽश्वत्थमूले चीनद्रुमतलेऽपि वा ।। १८६ ।

कृष्णपक्षे चतुर्दश्यां समारभ्य प्रयत्नतः ।
मुण्डमेकमधः क्षिप्त्वा गन्धचन्दनलेपितम् ।। १८७ ।

हस्तार्धमानतो नाथ चाण्डालं हीनजातिगम् ।
तत्र स्थित्वा जपेन्मन्त्री भयमात्रं विवर्जयेत् ।। १८८ ।

चाण्डालीशक्तिमानीय कुलद्रव्यं तथा प्रभो ।
तद्दिनात्तद्दिनं यावत्तावदष्टोत्तरं शतम् ।। १८९ ।

विधिना शोधनं कृत्वा शक्त्यै दत्वा स्वयं पिबेत् ।
आनन्दसागरे मग्नः सर्वदर्शी निरामयः ।। १९० ।

मांसमुद्राचर्वणं तु सदानन्दमयो भवन् ।
प्रत्यहं साधनं कृत्वा वर्षमध्ये च मासकम् ।। १९१ ।

---

१. दिनशब्दस्य नपुंसकत्वेऽपि अत्र पुंस्त्वम् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति महाभाष्यवचनात् ।

मासेन सिद्धिमाप्नोति राक्षसीक्रमतः प्रभो ।
अधमाधमकार्येण पशुश्चीनाश्रितो भवेत् ।। १९२ ।
अधमं शृणु यत्नेन कौलानामतिदुर्लभम् ।
अधमादिक्रमेणैव वत्सरान्मां प्रपश्यति ।। १९३ ।
पशुवत्सकलं कार्यं रात्रौ चापि कुलक्रिया ।
कुलदेव्यास्त्रिरात्रौ[1] च कुलपीठे मनोरमे ।। १९४ ।
पूजयेत् परमानन्दैः कुलध्यानपरायणः ।
कुलपुष्पैः कुलद्रव्यैः साङ्गोपाङ्गैर्विधानतः ।। १९५ ।
कुलपूजां मध्यरात्रौ ब्राह्मणो ब्राह्मणीयुतः ।
क्षत्रियः क्षत्रियायुक्तो वैश्यो वैश्यान्वितः सदा ।। १९६ ।
शूद्रः शूद्रकलायुक्तो निजाभावे परायुतः ।
जुहुयात् कालसर्पिण्या वदनाम्भोजसुन्दरे ।। १९७ ।
पुरश्चरणवत् कार्यं दिवारात्रौ प्रतर्पयेत् ।
अकालमृत्युजेता स्यात् परानन्दमयो भवन् ।। १९८ ।
अनायासेन सिद्धिः स्यादधमस्य प्रसादतः ।
रिपुविद्वेषणं वक्ष्ये देवदेव शृणु प्रभो ।। १९९ ।
यस्य प्रसादमात्रेण निःशत्रुरखरान् भवेत् ।
कण्ठपद्मे दृढो भूत्वा साकिनीं श्रीसदाशिवम् ।। २०० ।
पूजयित्वा विधानेन भावयेत् तद्गतो यदि ।
मञ्जुघोषस्य मनुना पुटीकृत्य सदाशिवम् ।। २०१ ।
तारयद्वयमुच्चार्य रक्षात्मानं युगं तथा ।
परपक्षं छेदयति योगशत्रून् विनाशय ।। २०२ ।
युगलं युगलं तत्र रमावह्नित्रयं त्रयम् ।
ततो मारययुग्मन्तु खादयद्वयमेव च ।। २०३ ।

---

१. त्रिरावृत्ता रात्रिस्त्रिरात्रिस्तत्र त्रिरात्राविति मध्यमपदलोपिसमासो ज्ञेयः, न तु तिसृणां रात्रीणां समाहारस्त्रिरात्रं तत्रेति विग्रहः ।

शत्रुकण्ठत्रिशूल्यन्ते निकण्ठरिपुपञ्चकान् ।
हारयद्वयमुच्चार्य स्वाहान्तमनुमाजपेत् ॥ २०४ ।
स भवेद्रिपुविद्वेषी योगाभ्यासी स्वयं भवेत् ।
अन्यमन्त्रं वक्ष्यामि सावधानोऽवधारय ॥ २०५ ।
अघोरमन्त्रपुटितं साकिनीनिजमन्त्रकम् ।
तदन्ते कामराजन्तु रिपुं मे योगविघ्नदम् ॥ १०६ ।
दारयद्वयमुच्चार्य विद्वेषयद्वयं वदेत् ।
परपक्षं छेदयेति कालजालं हरद्वयम् ॥ २०७ ।
स्वाहान्तमन्त्रमुच्चार्य जपेत् कण्ठाधिदेवताम् ।
स भवेद्रिपुविद्वेषी योगविघ्नादिविघ्नहृत्[1] ॥ २०८ ।
मङ्गलोदयमावक्ष्ये येन योगी भवेन्नरः ।
रात्रिशेषे समुत्थाय जपेन्मध्यन्दिनावधि ॥ २०९ ।
योगध्यानं सर्वदैव कण्ठपद्मे स्थिरो भवेत् ।
मङ्गलोदयमाप्नोति चिरजीवी भवेद् ध्रुवम् ॥ २१० ।
विस्मयाह्लादमावक्ष्ये यत्कृत्वा योगिनीपतिः ।
स्वीकृत्य च कुलं द्रव्यं परानन्दमयो भवन् ॥ २११ ।
ध्यानाद्विलयमाप्नोति तस्य नाशः कुतः प्रभो ।
क्रमेण परतां याति क्रयविक्रयवर्जितः ॥ २१२ ।
तस्मिन् प्रलयमापन्ने कुतो देहः कुतो मृतिः ।
तस्यैव सर्वदा पूजा बाह्यपूजा निरर्थिका ॥ २१३ ।
एतस्मिन् प्रलये याते कुतः सृष्टिस्थितिर्भवेत् ।
सृष्टिस्थितिमयो भूत्वा विलयं याति निश्चितम् ॥ २१४ ।
कालसाधनमावक्ष्ये यथा कुण्डलिनीपदम् ।
यदा समरमानन्दः सानन्दचेतसान्वितः[2] ॥ २१५ ।

---

१. योगे योगकर्मणि ये विघ्नास्त आदयो येषां ते योगविघ्नादयः, ते च ते विघ्नाश्च, तान् हरतीति योगविघ्नादिविघ्नहृत्, हृधातोः कर्तरि क्विप् ।

२. आनन्देन सहेति सानन्दं चेतः, तेनान्वितः । बहुव्रीहिगर्भस्तत्पुरुषसमासः ।

तदेव फलदं कालं तस्मिन् काले च साधयेत् ।
साधनादेव सिद्धिः स्यात् तत्कालसाधनञ्चरेत् ।। २१६ ।
शृणु नाथ नवीनत्वं येन याति नरोत्तमः ।
प्रातःकालं समारभ्य यावद्दण्डचतुष्टयम् ।। २१७ ।
शौचं स्नानादिकं कृत्वा चासनाभ्यासमाश्रयेत् ।
ततो योगधारणाञ्च ततः पूजादिकं प्रभो ।। २१८ ।
ततो जपादिकं कृत्वा प्राणायामं समाचरेत् ।
षट्षोडशद्वादशन्तु कुण्डलीवायुधारणम् ।। २१९ ।
ततो न्यासं स्तोत्रपाठं कवचं नाममङ्गलम् ।
पठित्वा देवतां हृद्ये पुनरानीय यत्नतः ।। २२० ।
चरणोदकपानं तु पश्चासवनिषेवणम् ।
दुग्धपानं ततः पश्चात् सन्ध्यावधि विधानतः ।। २२१ ।
रात्रौ ध्यानं सदा कृत्वा समाधिं क्रमतो लभेत् ।
एवं क्रमेण देवेश नवीनत्वं समाप्नुयात् ।। २२२ ।
मम ध्यानं प्रवक्ष्यामि सावधानोऽवधारय ।
अनाश्रयं सदा ध्यायेदानन्दप्रणयादिभिः ।। २२३ ।
निराश्रयं निराकारं मम ध्यानमुदीरितम् ।
रूपातीतं [1]निर्विकल्पं सर्वज्ञं योगवारिदम् ।। २२४ ।
कोटिसूर्यप्रतीकाशं तेजोबिम्बं निराकुलम् ।
ज्वालामालासहस्राढ्यं कालानलशतोपमम् ।। २२५ ।
दंष्ट्राकरालदुर्धर्षं जटामण्डलमण्डितम् ।
त्रिशूलं वरहस्तञ्च घोररूपं भयानकम् ।। २२६ ।
अनन्तानन्तमहिमं[2] सर्वगामिनमीश्वरम् ।
सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् ।। २२७ ।

---

१. निर्गता विविधाः कल्पाः कल्पना यस्मात्तदिति बहुव्रीहिसमासः ।
२. अनन्तानन्तो महिमा यस्य, तम् ।

सर्वमावृत्य तिष्ठन्तं कण्ठस्थं कण्ठवायुगम् ।
मम ध्यानं सदा कृत्वा परं ब्रह्ममयो भवेत् ॥ २२८ ।

ममाज्ञा गुरुसद्भावं श्रृणु यत्नेन भैरव ।
कण्ठस्थं दैवतं देवगुरुरूपं महागुणम् ॥ २२९ ।

आनन्दभैरवं पश्चान्महाकालं ततः परम् ।
ज्ञानानन्दं सदानन्दं भैरवानन्दमेव च ॥ २३० ।

श्यामानन्दं शिवानन्दं कालानन्दमतः परम् ।
सुधानन्दं हरानन्दं सुरानन्दमतः परम् ॥ २३१ ।

कुलानन्दं प्रियानन्दं यज्ञानन्दमतः परम् ।
ध्यानानन्दं परानन्दं योगानन्दं ततः परम् ॥ २३२ ।

क्रोधानन्दं क्रियानन्दं बोधाबन्दं ततः परम् ।
देवानन्दं जयानन्दं विजयानन्दमेव च ॥ २३३ ।

ब्रह्मानन्दं प्रभानन्दं पूर्णानन्दं ततः परम् ।
जगदानन्दरूपं च ममाज्ञागुरुचक्रगम् ॥ २३४ ।

ममाज्ञागुरुसद्भावं कृत्वाऽभ्यर्च्य विभावयेत् ।
कण्ठपद्मे स्थिरो याति साधकः स्थिरचेतसा ॥ २३५ ।

वक्ष्येऽहं देवदेवेश कुलपीठप्रदर्शनम् ।
कामस्थानं कामकलावेष्टितं योगिनीपदम् ॥ २३६ ।

कामरूपं महापीठं कुलपीठं प्रकीर्तितम् ।
तस्य दर्शनमात्रेण जीवन्मुक्तो न संशयः ॥ २३७ ।

तत्प्रकारविधिं वक्ष्ये सावधानोऽवधारय ।
कुलपीठे समागम्य यदा तद्गतमानसः ॥ २३८ ।

तदैव पूजनं कृत्वा किं न सिद्ध्यति भूतले ।
आदौ भवेत् कालरूपभूपतिः[1] सिद्धिदर्शकः[2] ॥ २३९ ।

---

१. कालस्य रूपमिव रूपं यस्यासौ कालरूपः, भुवः पतिर्भूपतिः । कालरूपश्चासौ भूपतिश्चेति कर्मधारयः ।

२. पश्यति इति दर्शकः, दृशेर्ण्वुल्प्रत्ययः कर्तरि । सिद्धीनां दर्शक इति ।

कुलपूजाविधानेन निजपीठे प्रपूजयेत् ।
कामेश्वरीं कालकन्यां कामकौतूहलोज्ज्वलाम् ॥ २४० ।
कालरूपां प्रपूज्याथ सर्वभावेन पूजयेत् ।
सुधादानं पाद्यदानं अर्घ्यमांसादि मुद्रया ॥ २४१ ।
आचमनीयं सकुलं गन्धमालिङ्गनादिकम् ।
नखदंष्ट्राक्षतादीनि पुष्पाणि विविधानि च ॥ २४२ ।
समूहधूपदानं तु कुलपीठप्रदर्शकम् ।
तत्स्पर्शनं भवेद्दीपः प्रवेशो हि कुलान्तरे ॥ २४३ ।
तन्नैवेद्यं महासौख्यं सर्वतन्त्रेषु गोपितम् ।
कुलद्रव्यन्तु पानार्थं ततस्ताम्बूलभक्षणम् ॥ २४४ ।
स्थापनं तर्पणं विद्धि मम पूजाक्रमादिकम् ।
तन्मूलेन यथा नाथ पूर्वोक्तेन प्रकारयेत् ॥ २४५ ।
कुण्डलीगमनं वक्ष्ये संक्षेपाच्छृणु वल्लभ ।
कायशोधनमाकृत्य आसनादिकमाचरेत् ॥ २४६ ।
प्राणायामं त्रिधा कृत्वा भूतन्यासं समाचरेत् ।
[1]अङ्गन्यासकरन्यासौ बीजन्यासेषु षोढया ॥ २४७ ।
व्यापकं पञ्चधा कृत्वा भूतशुद्धिं समाचरेत् ।
जीवेनैक्यं विभाव्यैव ब्रह्मरन्ध्रे निवेशयेत् ॥ २४८ ।
ब्रह्मरन्ध्रे ततो गत्वा सुषुम्नामुखमाश्रयेत् ।
तन्मध्ये कर्णिकास्थानं तन्मध्ये च चतुर्दलम् ॥ २४९ ।
चतुर्दलान्ते सा देवी विभाति तामुपाश्रयेत् ।
तामुपकुञ्च्य यत्नेन सिद्धरूपी प्रबुद्धयेत् ॥ २५० ।
देवैः सार्धं ततो गच्छेत् षड्दले काकिनीस्थले ।
तया सार्धं कुण्डलिन्या देवैर्गच्छेद्दशच्छदे[2] ॥ २५१ ।

---

१. अङ्गेषु न्यासः, करयोश्च न्यासो देवतास्थापनम् । द्वयोर्द्वन्द्वः ।
२ दश दशच्छदा यत्रासौ दशच्छदः, यथा सप्तच्छदो भवति वृक्षस्तद्वत् ।

एवं क्रमेण हृत्पद्मं षोडशारं ततः परम् ।
द्विदलं भेदमाकृत्य बोधिनीचक्रमाश्रयेत् ॥ २५२ ।

ततः कटाहमाभेद्य पूर्णशैलं समाश्रयेत् ।
ततोऽसौ ह्युन्मनीं भित्त्वा घटाधारे मनोलयम् ॥ २५३ ।

तदूर्ध्वे प्रलयाकारं ब्रह्मचक्रं निराकुलम् ।
तदूर्ध्वे ब्रह्मदण्डन्तु तदूर्ध्वे केवलं जलम् ॥ २५४ ।

सर्वं जलं समालम्ब्य सहस्रारं प्रभामयम् ।
तदूर्ध्वे कर्णिकास्थानं सिद्धखड्गं तदूर्ध्वके ॥ २५५ ।

सर्वबीजमयं नाथ मातृकामण्डलं ततः ।
मातृकामण्डलोर्ध्वे च प्रेतबीजं सुधामयम् ॥ २५६ ।

प्रेतासनोपरि ध्यायेन्महाकालकुलेश्वरीम् ।
तत्रैव श्रीपदाम्भोजतले संस्थापयेन्मनः ॥ २५७ ।

पूर्वोक्तदेवताभिस्तु लययोगेन लेपयेत् ।
तत्रैव स्थित्वा संध्यायेन्मूलेऽनलमनुं प्रभो ॥ २५८ ।

वायुबीजेन प्रज्वाल्य दहेद्देहं यतीश्वरः ।
तन्नेत्रद्वयपर्यन्तं कर्णयुग्मावधि प्रभो ॥ २५९ ।

प्रदह्य भ्रूदले नेत्रे वह्नौ वह्निलयं चरेत् ।
तच्छिखापटलेनैव क्षरन्ति ब्रह्मबिन्दवः ॥ २६० ।

तद्‌बिन्दुधारया देहं वरुणैः प्लावयेत्ततः ।
शुद्धदेहं ततो ध्यायेद् बीजेन प्रथमाङ्कुरम् ॥ २६१ ।

अधोमार्गेण सन्ध्यायेत् कुण्डलिन्या गमागमम्[1] ।
इत्येतत् कथितं नाथ कुण्डलीगमनादिकम् ॥ २६२ ।

[2]साधकालम्बनं वक्ष्ये येन सिद्धो हि साधकः ।
प्राणविद्यासुसिद्धिः स्यादायुरारोग्यमालभेत् ॥ २६३ ।

---

१. गमश्चागमश्चेत्यनयोः समाहारो गमागमम् ।
२. साधकस्यालम्बनमाश्रयः ।

श्रीकारुणोऽकारणगुप्तभावे विभावयामि प्रियपादपद्मम्[1] ।
एवं मनोयोगमुपेत्य नित्यं श्रीसाधकालम्बनमेव सम्पदम् ॥२६४।

नित्योपलब्धिविज्ञाने सुन्दरीचरणाम्बुजे ।
आत्मानमर्पयन् भावैः साधकालम्बनं हि तत् ॥ २६५ ।

वर्णध्यानं शृणु प्रीतः शङ्कर प्राणशङ्कर ।
मूलादिब्रह्मरन्ध्रान्तमकारादीन् स्मरेद् बुधः ॥ २६६ ।

स्मृत्वा ग्रथित्वा मनुना विलोमेन पुनः पुनः ।
भावयेन्मनसा योगी सत्त्वाधिष्ठानतत्परः ॥ २६७ ।

कोटिसूर्यायुताभासं प्रत्येकग्रन्थिभेदतः ।
मन्त्राक्षरं परंब्रह्म ध्यात्वा ध्यात्वा विभाकरम् ॥ २६८ ।

भित्त्वा सहस्रारमध्यं क्षकारं भाति चन्द्रगम् ।
[2]अनुलोमविलोमेन विभाव्य ध्यानमाचरेत् ॥ २६९ ।

अकारादिक्षकारान्तं वर्णध्यानं समीरितम् ।
दलभेदं प्रवक्ष्यामि यत्र यत्र पदे स्थितिः ॥ २७० ।

विसर्गाद् बिन्दुपर्यन्तो दलभेदः प्रकीर्तितः ।
तथापि शृणु योगेन्द्र सङ्केतार्थत्रिनिर्णयम् ॥ २७१ ।

देवतादक्षिणावर्त्या योगेन भावयेद्दलम् ।
एवं मूलादिपद्मानां भेदः श्रीकण्ठभूषण ॥ २७२ ।

एवं सहस्रारपद्मदलभेदः प्रकीर्तितः ।
स्फूर्तिविद्यां प्रवक्ष्यामि अकस्मात्सिद्धिदायिनीम् ॥ २७३ ।

निरन्तरं जपेद्विद्यां समभावपरायणः ।
अकस्मात्स्फूर्तिविद्यः स्यात्काव्यवाक्पतिरीश्वरः ॥ २७४ ।

वाचां सिद्धिः करे तस्य कुब्जिकासिद्धिरेव च ।
यदि कण्ठाम्बुजे ध्यायेत् काकचञ्चुपुटस्थितः ॥ २७५ ।

---

१. प्रियौ च तौ पादौ च प्रियपादौ तौ पद्ममिव, इति उपमितसमासः ।
२. अनुलोमेन सहितो विलोमस्तेन । अनुगतं च तल्लोम चेति—अच्प्रत्ययः समासान्तः ।

इत्येताः स्फूर्तिविद्या हि [1]सर्वपद्मदलस्थिताः ।
वियोगं सम्प्रवक्ष्यामि येन मन्त्री च निर्भयः ॥ २७६ ।

स्त्रीपुत्रधनमित्रादिलोभमोहादिपातकम् ।
वर्जयित्वा तनुक्लेशं विवेकं समुपाश्रयेत् ॥ २७७ ।

वियोगः स हि विज्ञेयो मन्त्रन्यासपरायणः ।
अथ वक्ष्ये त्रियोगेन्द्र पूर्वज्ञानसमोदयम् ॥ २७८ ।

काले काले क्रियासिद्धिश्चण्डिकापार्श्वगो भवेत् ।
पूर्वस्यां दिशि पूर्वाह्णे वदनाम्भोजमण्डलः ॥ २७९ ।

ज्ञानद्रव्यसमरसैरुदयं भावयेद् रविम् ।
पूर्वपूर्वस्वजन्मादिज्ञानसमोदयं लभेत् ॥ २८० ।

आकाशे च मनो दत्वा आकाशाख्यं स्मरन्मनुम् ।
पूर्वजन्मादिसञ्ज्ञानं जानाति समभावकः ॥ २८१ ।

इति ते कथितं नाथ पूर्वज्ञानसमोदयम् ।
अथात्र संप्रवक्ष्यामि सिद्धः शुद्धः फलार्थभाक् ॥ २८२ ।

येन क्रमेण सम्भूयात् खेचरीमेलनं प्रभो ।
या या समरसप्राप्तिः सा सैव फलसिद्धिदा ॥ २८३ ।

शृणु संक्षेपतो वक्ष्ये पश्चाद्वक्तव्यमेव तत् ।
आसनादिकमाकृत्य कायसङ्कोचमाचरन् ॥ २८४ ।

कामलता क्षुद्रतरैर्भेदिता वसनाग्रकैः ।
तालुमूलोत्तरे मूले नियोज्य मधुपो भवेत् ॥ २८५ ।

तदैव जपमाकृत्य वायुं धृत्वा मधुं पिबेत् ।
सा स्यात्समरसप्राप्तिः कामलिङ्गे स्थिरो भवेत् ॥ २८६ ।

इत्येषा कथिता विद्या लताभेदं शृणु प्रभो ।
[2]श्वेतवाटचालसूत्रेण निर्मिता या लता शुभा ॥ २८७ ।

---

१. सर्वाणि च तानि पद्मानि च, तेषां दलेषु पत्रेषु स्थिताः ।

२. श्वेतं यद् वाटचालसूत्रं तेनेत्यर्थः । वाटचालः कश्चन सूत्रारम्भकपदार्थः ।

अथवा पद्मसूत्रेण लतां कुर्याद्विचक्षणः ।
अष्टादशाङ्गुलमितं नातिसूक्ष्मं प्रमाणवत् ॥ २८८ ।

जित्वाधः सन्निवेश्याथ घर्षयेत् कामसुन्दर ।
तदा जित्वा स्वयं याति घर्षणेन पुनः पुनः ॥ २८९ ।

तदा पश्चाज्जित्वा क्रियां कुर्यात्तालुमूले निधाय च ।
क्रमेणामृतमाप्नोति जिह्वाधश्छेदने ध्रुवम् ॥ २९० ।

सा स्यात्समरसप्राप्तिर्यदि मन्त्राक्षरं भजेत् ।
जीवब्रह्मबुद्धिमन्तास्तु तिष्ठन्ति निरञ्जने ॥ २९१ ।

कूष्माण्डाकारदेही च ब्रह्मसाधनतत्परः ।
सदा समरसप्राप्तिरनायासेन लभ्यते ॥ २९२ ।

जले स्थले भूमिगर्ते शरीरं नापि नश्यति ।
अजरामरदेही स्याद् योगोऽयं योगिदुर्लभः ॥ २९३ ।

कायकल्पनमावक्ष्ये येन सिद्धपतिर्भवेत् ।
शृणुष्वैकमनाः शम्भो गृहस्थानां तु दुर्लभम् ॥ २९४ ।

महारण्ये पद्मवने शीतले गन्धशोभिते ।
[1]कायकल्पनमाकृत्य भावयेत् कण्ठपङ्कजम् ॥ २९५ ।

उदारचित्तः सर्वत्र वैष्णवाचारतत्परः ।
पद्मे पद्मे स्वदेहस्य कल्पना च दले दले ॥ २९६ ।

क्रमशः कण्ठपद्मे च स्वीयदेहस्य कल्पना ।
क्रियते यदि योगेन्द्रैस्तदा देहस्य रक्षणम् ॥ २९७ ।

अन्यथा मृत्युवश्यः स्याद् योगभ्रष्टो भवेन्नरः ।
एवं क्रमेण सर्वत्र कुर्यात् कायस्य कल्पनम् ॥ २९८ ।

[2]जरामरणदुःखाद्यैर्मुच्यते मोहसङ्कटात् ।
अथान्यत् सम्प्रवक्ष्यामि कायकल्पनमेव तत् ॥ २९९ ।

---

१. कायस्य देहस्य कल्पनं नवनिर्माणम् ।
२. जरा च मरणं च जरामरणे त एव दुःखे, ते आद्ये येषां तैः ।

नानापीठे त्वसाध्ये च [1]चक्षुरिन्द्रियवर्जिते ।
मनोगम्ये स्थिरो भूत्वा स्वदेहमपि कल्पयेत् ॥ ३०० ।
वाराणस्यादिपीठे च महाज्वालामुखीपदे ।
कुरुक्षेत्रे प्रयागे च दक्षिणे द्वारकादिषु ॥ ३०१ ।
हरिद्वारोदये तीर्थे मार्कण्डेये च कापिले ।
वृन्दावने गुह्यपीठे गङ्गायमुनयोस्तटे ॥ ३०२ ।
पुष्करे पृथिवीतीर्थे कायतीर्थे गयादिषु ।
कालकल्पनमाकृत्य श्रद्धावान् पूजयेत्परम् ॥ ३०३ ।
सदाशिवं साकिनीशं शाकिनीयोगिनीगणैः ।
वेष्टितं परया भक्त्या ध्यात्वा देहं प्रकल्पयेत् ॥ ३०४ ।
प्रकल्प्य स्वतनुं तत्र ततो देवस्य कल्पयेत् ।
येषां मनसि यद्ध्यानं तद्ध्यानं कायकल्पनम् ॥ ३०५ ।
एतत्कायकल्पनेन मौनी वाक्सिद्धिमाप्नुयात् ।
इदानीं कामदेवस्य मथनं शृणु भैरव ॥ ३०६ ।
कामदेवस्य मथनं सुखदं मोक्षदं परम् ।
यावद् बिन्दुः स्थिरो देहे तावन्मृत्युभयं कुतः ॥ ३०७ ।
बिन्दुपाताद्भवेन्नाशस्ततो हि बिन्दुरक्षणम् ।
तत्तदौषधमावक्ष्ये येन बिन्दुः स्थिरो भवेत् ॥ ३०८ ।
नित्यं सेवनमाकुर्यात्तेषां मूलमाहरन् ।
श्वेतापराजितामूलं सिद्धिमूलं ततः परम् ॥ ३०९ ।
शतपर्णिमूलमेकं कदम्बमूलमेव च ।
श्वेतकुन्दपुष्पमूलं करवीरं तथाशितम् ॥ ३१० ।
[2]कृष्णधुस्तूरमूलन्तु सेफालीमूलमेव च ।
चितामूलं तथा शम्भो निर्गुण्डीमूलमाहरन् ॥ ३११ ।

---

१. चक्षुरिन्द्रियेण वर्जिते इति । यत्र चक्षुरिन्द्रियस्य गतिर्न भवति, एवंभूते मनोगम्ये विषये इत्यर्थः ।

२. कृष्णो यो धुस्तूरस्तस्य मूलम् । धत्तूरपदमपि तत्रार्थे प्रयुज्यते ।

एकीकृत्य विधानेन [1]रविवारेऽर्कमूलकैः ।
समभागेन योगेन्द्र चूर्णीकृत्य पृथक् पृथक् ।। ३१२ ।

शुक्रवारे च पूर्वाह्णे मिश्रं कुर्याद्दिनत्रयम् ।
षड्रात्रिं शोधयेत् काममुद्राभिर्वामदेवताः ।। ३१३ ।

मध्यमाङ्गुलिमुत्तोल्य दक्षिणेनापि मुष्टिना ।
धृत्वा च शोधयेदादौ द्रव्यमूलानि साधकः ।। ३१४ ।

विजयाचूर्णयोगेन पिबेच्चूर्णं द्वितोलकम् ।
अर्धतोलकमुनैक्यं विजयाः सार्धतोलकाः ।। ३१५ ।

मिश्रीकृत्य विधानेऽपि तत्तत्कुजदिने शुभे ।
एतत्प्रभक्षणेनैव मदनं वशमानयेत् ।। ३१६ ।

यदा मनसि आयाति पुष्पधन्वा महाबली ।
तदा तं पूजयित्वा च कामदेवं निवारयेत् ।। ३१७ ।

इति कामस्य मथनं देहे व्यवस्थितं शृणु ।
अङ्गुष्ठगुल्फजानूरुसिमनीलिङ्गनाभिषु ।। ३१८ ।

हृद्ग्रीवाकण्ठदेशेषु लम्बिकायां तथा नसि ।
भ्रूमध्ये मस्तके मूर्ध्नि वाय्वाकाशप्रियालये ।। ३१९ ।

वायुरूपं स्वदेहन्तु स्थापयित्वा मनुं जपेत् ।
कुम्भकप्राणयोयेन निजदेहव्यवस्थितिः ।। ३२० ।

कण्ठाम्भोजे स्थिरो यो हि तं जनं शृणु भैरव ।
[2]योगारम्भावधिर्यो हि स्त्रीसंसर्गं विवर्जयेत् ।। ३२१ ।

मातृणां गमनं नास्ति यस्य स कण्ठसंस्थितः ।
नित्यं करोति योगं यो धर्मात्मा स्थिरचेतसा ।। ३२२ ।

स एव कण्ठपद्मे च स्थिरो भवति निश्चितम् ।
[3]भावज्ञानी च यो विद्वान् तं विदामि दयार्णव ।। ३२३ ।

---

१. अर्को मन्दारस्तस्य मूलकैः । मूलान्येव मूलकानि स्वार्थे कप्रत्ययः ।
२. योगस्यारम्भः, तस्यावधिः ।
३. भावस्यान्तस्तत्त्वस्य ज्ञानी ज्ञाता । ज्ञानमस्ति यस्येति ज्ञानी, इनिप्रत्ययो मत्वर्थीयः ।

कुण्डलीस्पर्शमात्रेण तन्मयो जायते क्षणात् ।
सर्वदेवे परं भावं कृत्वा ज्ञानेन पूजयेत् ।। ३२४ ।

सर्वपीठे स्थिरो भूत्वा ज्ञानात्मा परिपूजयेत् ।
क्रमेण कण्ठभेदः स्याद् योगी भवति सत्वरम् ।। ३२५ ।

धनं धान्यं धरां धर्मं कीर्तिमायुर्यशः श्रियम् ।
उरगान् दन्तिनः पुत्रान् लोकान् सर्वस्वस्वोदयम् ।। ३२६ ।

एतज्ज्ञानप्रसादेन लभ्यते परमेश्वरम्[1] ।। ३२७ ।

ज्ञात्वा योगेन्द्रचक्रं त्रिभुवनविवरध्वान्तजालप्रकाशं
मूलाम्भोजे रसाख्ये दशदलविमले हृत्स्वपद्मे विलासम् ।
कण्ठाम्भोजे मनोज्ञे द्विदलस्वकमले भावयन्तं सुरेन्द्रैः
श्वेताम्भोजे परेशं निरवधिगगनं पूजये भावयामि ।। ३२८ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे कण्ठपद्मभेदविज्ञानविन्यासो नाम चतुःषष्टितमः पटलः ।।

---

१. पातीति पः परमात्मा, रमयति इति रमा, पचादित्वादच्प्रत्ययः कर्तरि ज्ञेयः । पस्य परमात्मनो रमा परमा, तस्या ईश्वर ईश्वरत्वं यस्मिन् ऐश्वर्ये, तत् तादृशमलौकिकमैश्वर्यं लभ्यते, प्राप्यते । तत्र एतज्ज्ञानस्य प्रसादः कारणम् ।

अथ पञ्चषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच—

अथ कान्त प्रवक्ष्यामि समुदायफलोदयम् ।
कण्ठाम्भोजस्य वर्णानां ध्यानं मन्त्रं शृणु प्रभो ।। १ ।

शाकिनीसहितं नित्यं पूजयित्वा सदाशिवम् ।
मूढोऽपि योगिनां श्रेष्ठः किमन्ये ध्यानयोगिनः ।। २ ।

ध्यात्वा सम्पूजयेद्यस्तु सोऽभीष्टं फलमाप्नुयात् ।
ततो ध्यानं प्रवक्ष्यामि वीरनाथ शृणु प्रभो ।। ३ ।

आदौ श्रीशाकिनीध्यानं पश्चाद् ध्यानं सदाशिवे[1]।
द्वयोरभेदबुद्धया[2] च कामजेता स्वयं भवेत् ।। ४ ।

वन्दे नित्यां सुशीलां त्रिभुवनवरदां शाकिनीं पीतवस्त्रां
वेदाद्यां वेदमातां सुखमयललितां वेदहस्तोज्ज्वलाङ्गीम् ।
ध्याये पीयूषधारामलघटसुधया स्निग्धदेहां हसन्तीं
मायां शम्भोर्ललाटे विधुकिरणकरां श्रीसदानन्दयुक्ताम् ।। ५ ।

अम्भोजास्त्रादिमुद्रासिववरजटा धारयन्तीं करालं
श्यामां पीनस्तनाढ्यां त्रिनयनकमलां प्रेतलिङ्गासनस्थाम् ।
सर्वाङ्गालङ्कृतां श्रीं विधुशतवदनाम्भोजशोभां वहन्तीं
शम्भोरानन्दकर्त्रीं चरमगुणपदां स्थूलसूक्ष्मस्वरूपाम् ।। ६ ।

एवं ध्यायेन्महायोगी स्थूलसूक्ष्मस्वरूपिणीम् ।
अभेद्यभेदकरणीं शङ्कर प्रेमवल्लभ ।। ७ ।

---

१. सदाशिवे इति विषयसप्तमी । सदाशिवविषयकं ध्यानं पश्चात् करणीयम् ।
२. शिवस्य शिवायां चाभेदबुद्धिः कार्या, शक्तिशक्तिमतोरभेद इति सिद्धान्तात् ।

या विद्या वाग्भवाढ्या हरिवधुकमला[1] केवले निष्फलन्ते
मायालक्ष्मीस्त्रिकूटं शशिमुखितदधः शाकिनी क्षेत्रपालम् ।
वक्षद्वन्द्वं त्रिकूटं वधुमधरमिवासिद्धिमिष्टां विधेहि
स्वाहान्तोऽयं महेशत्रिभुवनभविकाह्लादहेतोः प्रकाशः ॥ ८ ।

प्रणवं पूर्वमुद्धृत्य वाग्भवं तदनन्तरम् ।
शाकिनि त्वं तदन्ते तु मम दोषान् विनाशय ॥ ९ ।
युगलं वह्निकान्तां च मन्त्रार्थाः सारदाः स्मृताः ।
कामराजं समुद्धृत्य हिरण्याक्षि सनातनि ॥ १० ।
शाकिन्यन्ते महामाये मायावह्निश्रिया युतम् ।
एषा मन्त्रात्मिका विद्या कण्ठाम्भोजप्रकाशिनी ॥ ११ ।
शाकम्भरी महाविद्या तस्य वामे विभाति च ।
तस्य मन्त्रं प्रवक्ष्यामि ज्ञात्वैव योगवित् प्रभुः ॥ १२ ।
महामन्त्रस्य माहात्म्यं कथितुं नैव शक्यते ।
भावमात्रेण सिद्धिः स्यात् किं पुनर्मोक्षसाधनम् ॥ १३ ।

विद्यां कामकलां विचित्रवसनां पद्मासनस्थां शिवां
कामाख्यां सकलान् स्वरान् त्रिजगतां शाकैर्महायोगिनी ।
नित्यं या परिपाल्यते भगवतीं शाकम्भरीं तां भजे
सा योगाधिपरक्षका निशि दिशि श्रीकण्ठपद्मे प्रभा ॥ १४ ।

अद्यापि प्रियकण्ठपद्मनिकरे सम्भाति शाकम्भरी
विद्यावाक्कमलायुत स्मितमुखि प्रान्ते च शाकम्भरि ।
वह्निर्वारुणवायुबीजमनलद्वन्द्वं हि वक्षद्वयं
वह्निप्रेमकलान्वितो[2] मनुवरः साक्षाज्जगत्क्षोभकृत् ॥ १५ ।

शाकम्भरीं महामायां पूजयेद् द्वारदेवताम् ।
तदन्ते सर्वदेवांश्च शक्रादीन् परिपूजयेत् ॥ १६ ।

---

१. 'हरेर्वधूः कमला, ङ्यापोः संज्ञाछन्दसोर्बहुलमित्यत्र बहुलग्रहणाद् वधूघटकोकारस्य ह्रस्वः ।

२. मनुर्मन्त्रः, तेषु मनुषु वरः श्रेष्ठः, मन्त्रराज इति यावत् ।

ध्यात्वा च शाकिनीं देवीं शाकम्भर्याश्च दक्षिणे ।
पूजयेत् परया भक्त्या पूर्वोक्तविधिना प्रभो ।। १७ ।

शाकम्भरीं त्रिनयनां सूर्येन्दुवह्नियोजिताम्[1] ।
रक्तपद्मस्थितां श्यामां वेदबाहुश्रियोज्ज्वलाम् ।। १८ ।

वराभयकरां खड्गकपालकमलान्विताम् ।
नानालङ्कारशोभाङ्गीं मुक्तकुन्तलभूषिताम् ।। १९ ।

प्रसन्नवदनाम्भोजस्मितहास्यविराजिताम् ।
साधकाभीष्टदां नित्यां महाविद्यां भजाम्यहम् ।। २० ।

ततो मानसपूजाञ्च ध्यानान्ते तु समाचरेत् ।
पुनर्ध्यानं ततः कृत्वा चित्तावाहनमाचरेत् ।। २१ ।

पाद्याद्यैः पूजयेन्नित्यं भक्त्या च योगसिद्धये ।
ततो जपेच्छतं वापि चाष्टोत्तरसहस्रकम् ।। २२ ।

एवं लक्षसमाप्ते तु कण्ठे देवीं प्रपश्यति ।
होमादीन् क्रमशः कुर्याद् ब्राह्मणानां तु भोजनम् ।। २३ ।

तदन्ते शाकिनीपूजा प्रथमे वापि कारयेत् ।
तत्प्रकारं श्रृणु प्राणवल्लभे कामसुन्दरि ।। २४ ।

आदौ जलं शोधयित्वा हस्तौ पादौ च विग्रहम् ।
क्षालयित्वा द्विराचम्य मूलमन्त्रेण साधकः ।। २५ ।

शिखाबन्धनमाकृत्य चासनं परिशोधयेत् ।
ततोऽर्घ्यस्थापनं कृत्वा पीठं निर्माय यत्नतः ।। २६ ।

पीठचक्रं शोधयित्वा पीठपूजां समाचरेत् ।
ततो ध्यानं भूतशुद्धि न्यासजालं समाचरेत् ।। २७ ।

पुनः प्राणायामयुग्मं कृत्वा देहं दृढं नयेत् ।
ततो ध्यानं मानसार्चा[2] मुद्रादर्शनमेव च ।। २८ ।

---

१. सूर्यश्च इन्दुश्च वह्निश्चेति सूर्येन्दुवह्नयः, तैर्योजिताम् । अत एव—वन्दे वह्निशशाङ्क-सूर्यनयनमिति शिवतत्त्वप्रतिपादकं पदम् ।

२. मनसा अर्चा पूजा । मानसी पूजा महते कल्याणाय भवति ।

ततः पाद्यं तथार्घ्यं तु चारुशङ्खेन कारयेत् ।
आचमनीयं ततः स्नानं पुनराचमनं तथा ॥ २९ ॥

गन्धं पुष्पाणि सर्वाणि विल्वपत्राणि दापयेत् ।
निजावरणदेवांश्च पूजयित्वा क्रमेण तु ॥ ३० ॥

धूपदीपौ निवेद्याथ नैवेद्यं पानकं[1] ततः ।
पुनराचमनं दत्वा बलिद्रव्याणि दापयेत् ॥ ३१ ॥

बलिं दत्वा जपेन्मन्त्रं सहस्रं वा शताष्टकम् ।
दिवसे यज्जपं कुर्याद्रात्रौ तज्जाप्यमाश्रयेत् ॥ ३२ ॥

जपं समर्पयेद् विद्वान् गुह्यातिगुह्यमन्त्रकैः ।
प्राणायामं त्रिषट्कृत्वा वन्दनं च प्रदक्षिणम् ॥ ३३ ॥

स्तोत्रञ्च कवचं नित्यं सहस्रनाममङ्गलम् ।
पठेद्भक्त्या कण्ठपद्मे कायकल्पनकृन्नरः ॥ ३४ ॥

एवं विधिविधानेन पूजयित्वा सदाशिवम् ।
अस्मिञ्छास्त्रे क्रिया गुप्ता गुप्तनारीप्रपूजनम् ॥ ३५ ॥

अथवा मनसा सर्वं पूजायागजपं[2] चरेत् ।
यथा देव्यास्तथा शम्भोर्जपयागः समीरितः ॥ ३६ ॥

एवं क्रमेण पूज्याश्च बाह्यस्था मुनयः क्रमात् ।
पूज्या वर्णकला नाथ तद्वाह्यस्थान् प्रपूजयेत् ॥ ३७ ॥

एवं हि मासकार्येण वरं सिद्धिं समाप्नुयात् ॥ ३८ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे शाकिनीसदाशिवार्चनं नाम पञ्चषष्टितमः पटलः ॥

●

१. पीयते चर्व्यते यत्तत्पानं तदेव च पानकम्, स्वार्थे कप्रत्ययः । ताम्बूलमित्यर्थः ।

२. नास्ति जपः स्फुटमुच्चारणं यस्मिन् पूजाकर्मणि तद् अजपम् ।

अथ षष्ठषष्टितमः पटलः

आनन्दभैरवी उवाच—

कैलासशिखरारूढ पञ्चवक्त्र त्रिलोचन ।
सर्वभूतप्रपूज्याथ शाकिनीयजनं शृणु ॥ १ ।

पूजनं त्रिविधं प्रोक्तं मनः साक्षाद्वचोमयम् ।
मानसं योगिनां प्रोक्तं साक्षात् पूजागृहं प्रभो ॥ २ ।

वाचामयं तामसानां नृपाणां कामिनां प्रभो ।
एका पूजा च त्रिविधा कथिता परमेश्वर ॥ ३ ।

सा पूजा सिद्धिदा काले त्रिकाले सर्वकालके ।
काले सिद्धिर्गृहस्थानां त्रिकाले ब्रह्मचारिणाम् ॥ ४ ।

योगिनां सर्वकालेऽपि विफला दुष्टचेतसाम् ।
भावत्रयं हि पूजानां रजःसत्त्वतमोमयम् ॥ ५ ।

त्रिशक्तिपूजनं नाथ सर्वत्र परिकीर्तितम् ।
ब्रह्माणीं वैष्णवीं तत्र पूजयेत् तां महेश्वरीम् ॥ ६ ।

त्रिभावेन पूजयित्वा शक्तिं ब्रह्मत्रयेण च ।
पशुरूपवीररूपदिव्यरूपेण[1] पूजयेत् ॥ ७ ।

बलिदानं हि सर्वत्र परं मोक्षाय केवलम् ।
क्रमेण शृणु योगेश सर्वाविद्यादिपूजनम्[2] ॥ ८ ।

यत्कृत्वा सम्भवेद् योगी परं ब्रह्ममयोऽचिरात् ॥ ९ ।

स्थानं वीक्ष्य महेन्द्रकोटिसदृशं श्रीलक्षणैर्लक्षितं
देवानां दिवि वीरनाथ रुचिरं पुण्यं पवित्रं सुखम् ।
रम्यं देवगृहान्वितं परजलैर्व्याप्तं तरुच्छायया
सौगन्धादिषु मान्यशैलपवनं काले वसन्तेऽपि वा ॥ १० ।

---

१. पशु-वीर-दिव्येति त्रीणि रूपाणि भगवतः पूजने उक्तानि ।
२. सर्वा विद्याः, ता आदिर्यासां वासां पूजनम् । बाहुलकाद् ह्रस्वाभावः ।

शून्ये देवगृहे तले वरतरोश्चित्तार्पितात्मा यति-
श्चाम्भोजासनसंस्थितो मृदुकटे व्याघ्राजिने वारणे ।
आदौ पादयुगं भुवि स्थितमिति व्याशोध्य हस्तौ तथा
नीरं निर्मलगन्धराजमिलितं संक्षाल्य पद्मासनः ॥ ११ ।

[1]जलशोधनमन्त्रस्तु श्रूयतां परमेश्वर ।
प्रणवं स्तरणप्रान्ते वज्रोदकमतः परम् ॥ १२ ।
शोधयामि ततः स्वाहा जलमन्त्र उदाहृतः ।
प्रक्षिपेत्तज्जलं भिन्नजले भैरवशङ्कर ॥ १३ ।
हस्तौ पादौ तज्जलेन क्षालयेत् काममायया ।
विग्रहं मूलमन्त्रेण चाचमने द्वे उदाहृते ॥ १४ ।
शिखाबन्धनमन्त्रस्तु शृणून्मत्तकुमारक ।
अप्रकाश्यं महामन्त्रं शिखाबन्धनमासनम् ॥ १५ ।
शोधयेत् त्रिपुरानाथ कालाग्निशिखयोज्ज्वल ।
आसनं शोधयाम्यद्य द्वारपालो भवानिशम् ॥ १६ ।
प्रणवाद्यैर्नमोऽन्तेन शोधयेत् परमेश्वर ।
शोधयेत् त्रिपुरानाथ कालाग्निशिखयोज्ज्वल ॥ १७ ।
शिखाग्रं बन्धयाम्यद्य द्वारपालो भवानिशम् ।
ततोऽर्घ्यं स्थापयेद् विद्वान् शङ्खाधारे मनोरमे ॥ १८ ।
मूलमन्त्रेण संक्षाल्य ततो मूलेन पूरयेत् ।
रक्तचन्दनयुक्तेन जलेन चन्दनेन च ॥ १९ ।
ततो दूर्वार्घ्यपुष्पाणि साधारे दापयेत् सुधीः ।
दशधा मूलमन्त्रं तु तत्र जप्त्वा[2] सुधामयम् ॥ २० ।
[3]धेनुमुद्रां मत्स्यमुद्रां योनिमुद्रां प्रदर्शयेत् ।
जपेत् तत्र सारमन्त्रमाच्छाद्य मत्स्यमुद्रया ॥ २१ ।

---

१. जलस्य शोधने स्वच्छीकरणे पवित्रीकरणं च यो मन्त्रस्तस्य स्वरूपं गुप्तरूपेणाग्रे उक्तमस्ति ।

२. छान्दसत्वादिडभावः । जपधातुः सेट्कः ।

३. आसां मुद्राणां स्वरूपमुक्तमस्ति ।

आत्मानं प्रोक्षयेदादौ ततो द्रव्याणि प्रोक्षयेत् ।
ततः पीठं सुनिर्माय ताम्रे हेमशलाकया ॥ २२ ।
नवकोणं विलिख्याथ षट्कोणञ्च तदन्तरे ।
बाह्ये च मण्डलद्वन्द्वं षोडशार्णं ततो लिखेत् ॥ २३ ।
तद्बाह्ये च चतुर्द्वारं भूबिम्बद्वितयं पुनः ।
एवं पीठं विनिर्माय दलेऽर्णान् विलिखेत्ततः ॥ २४ ।
ॐ सुरेखायै नमः स्वाहा मन्त्रेण परिलेखयेत् ।
प्रणवञ्च महारेखाशब्दान्ते शोधयामि युक् ॥ २५ ।
वह्निबीजायादिमनून् शोधयेत् पीठचक्रकम् ।
पीठपूजां ततः कुर्यात् प्रणवादिनमोऽन्तकैः ॥ २६ ।
सांपदं पूर्वमुच्चार्य हृदयाय नमस्ततः ।
षड्दीर्घभाजा बीजेन पूजयेद् वामतः सुधीः ॥ २७ ।
पूर्वादीशानपर्यन्तं चतुर्दिक्षु च मध्यके ।
पूजयित्वा च तन्मध्ये वर्णोच्चारणपूर्वकैः ॥ २८ ।
पीठशक्ति पूजयित्वा पीठनायकमर्चयेत् ।
प्रणवादिनमोऽन्तेन सर्वत्र प्रतिपूजयेत् ॥ २९ ।
पीठशक्ति शाकिनीन्तु तथा शाकम्भरीं शिवाम् ।
लक्ष्मीं सरस्वतीं दुर्गां चण्डिकां गणनायिकाम् ॥ ३० ।
भद्रकालीं विशालाक्षीं श्रद्धां मायां दयां कलाम् ।
रणचण्डां मधुमतीं प्रसन्नां रत्नमालिनीम् ॥ ३१ ।
[1]हिरण्यवर्णां कौमारीं वाग्देवीं त्रिजटां महीम् ।
त्रिशूलिनीं वेदमातां सिद्धाद्यां मधुनायिकाम् ॥ ३२ ।
मधुपुरेश्वरीं कुब्जां तथा मधुमतीं यजेत् ।
शाकाख्यां[2] शाकचक्षाञ्च[3] वरहस्तां हसन्मुखीम् ॥ ३३ ।

---

१. हिरण्यस्य वर्णः पीतो भवति, तादृशो वर्णो यस्याः सा ।
२. शाका आख्या यस्याः सा, शाका इति मत्वर्थीयोऽच्प्रत्ययः, ततष्टाप् ।
३. शाकेन चष्टे, शाकं चष्टे इति वा शाकचक्षा, पचाद्यच्, टाप् ।

कपालिनीं [1]खड्गहस्तां वनमालाञ्च माधवीम् ।
विचित्राङ्गीं ललज्जिह्वां चेकितानां प्रभामयीम् ।। ३४ ।

सर्वां सर्वाकर्षिणीञ्च बहुरूपां सुरां सुधाम् ।
सर्वमयीं वर्णमयीं मुण्डमालां त्रिकालिकाम् ।। ३५ ।

विश्वेश्वरीं विश्वमातां महाविद्यां सनातनीम् ।
एता विद्याः पूजनीयाः प्रणवादिनमोऽन्तिकाः ।। ३६ ।

ततो ध्यानं प्रवक्ष्यामि संक्षेपतः शृणु प्रिये ।
शाकिनीं श्रीवेदविद्यां स्थूलसूक्ष्मस्वरूपिणीम् ।। ३७ ।

पीतवर्णां त्रिनयनां वेदहस्तां हसन्मुखीम् ।
सदाशिवयुतां गौरीं सर्वालङ्कारमण्डिताम् ।। ३८ ।

त्रिलोचनां सूर्यचन्द्रवह्निमण्डलमण्डिताम् ।
कपालपद्मविमलवराभयकराम्बुजाम् ।। ३९ ।

देवदानवगन्धर्वयोगसिद्धप्रपूजिताम् ।
षोडशारमहापद्मसंस्थितां वनमालिनीम् ।। ४० ।

शाकम्भरीदेवविद्यामाधवीशक्तिशोभिताम् ।
[2]मुनिदेवमहेन्द्रादिब्रह्मविष्णुशिवाश्रयाम् ।। ४१ ।

ध्यायेऽहं कण्ठपद्मस्थां सर्वसिद्धिसमृद्धिदाम् ।
एवं ध्यात्वा कण्ठपद्मे भूतशुद्धिं ततश्चरेत् ।। ४२ ।

भूतशुद्धिं प्रवक्ष्यामि येन कण्ठे स्थिरो भवेत् ।
आकाशगामिनी सिद्धिर्लभ्यते नात्र संशयः ।। ४३ ।

संयोज्य जीवं कुलवर्त्ममध्ये श्रीकुण्डलिन्या सह मूलपद्मम् ।
क्रमेण भित्त्वा समयोर्ध्वतुण्डो विशुद्धपद्मे लयमाचरेद् बुधः ।।४४।

शाकिनीपार्श्वभागे तु जीवं संस्थापयेत् सुधीः ।
कुण्डलिन्या लयं कृत्वा वह्निबीजेन भस्मसात् ।। ४५ ।

---

१. खड्गो हस्ते यस्याः सा खड्गहस्ता, व्यधिकरणबहुव्रीहिसमासो ज्ञापकसिद्धः ।

२. मुनयो देवा महेन्द्रादयः, ब्रह्म-विष्णु-शिवा आश्रयो यस्याः सा । आश्रय इति कथनेन एते शयनभूमय इति बोध्यम् ।

देहं तदा विदधीत वायुबीजेन शोषयेत् ।
वरुणेनामृतं कृत्वा वेदनारहितो भवेत् ।। ४६ ।
धैर्येण भावयेद्देवं शाकिनीशं सदाशिवम् ।
त्रैलोक्यान्वितमीशानं पञ्चवक्त्रं त्रिलोचनम् ।। ४७ ।
पूर्वोक्तध्यानमाकुर्यान्मन्त्राक्षराणि भावयेत् ।
चिच्छक्तौ परमात्मानं भावयित्वा पुनः पुनः ।। ४८ ।
आत्मलग्नं तत्र पदे कृत्वा चिन्तामणिं भजेत् ।
धूम्राकारं महाकाशं विचिन्त्य तेजसावृतम् ।। ४९ ।
लीलामयं देवताया रूपं सम्पूज्य मानसैः ।
क्रमेण नासिकाद्वारात् सोऽहंबीजेन चालयेत् ।। ५० ।
आनीय संमुखे पीठे संस्थाप्य जीवमर्पयेत् ।
तत्रैव संस्थिरो भूत्वा तत्प्राणान् तत्र स्थापयेत् ।। ५१ ।
[1]आं ह्रीं क्रों शब्दमुच्चार्य यं रं लं वं ततः परम् ।
इत्याद्यैः स्थापयेत् प्राणान् ततोऽर्चविधि[2]माचरेत् ।। ५२ ।
न्यासजालं ततः कुर्यात् शृणु तत्त्वासनादिकम् ।
सदाशिव ऋषिश्चास्य मस्तके संन्यसेत् सुधीः ।। ५३ ।
सदाशिवाय ऋषये नमः प्रणवमाद्यके ।
मुखे प्रणवमुच्चार्य चानुष्टुप्छन्दसे नमः ।। ५४ ।
हृदि प्रणवमुच्चार्य शाकिन्यै तदनन्तरम् ।
सदाशिवप्रयुक्तायै देवतायै नमस्ततः ।। ५५ ।
कराङ्गन्यासौ सङ्कुर्यात् षड्दीर्घस्वरसंयुतैः ।
सकारैर्देवदेवेश मातृकां बीजसम्पुटाम् ।। ५६ ।
मातृकास्थानमालम्ब्य सांबीजेन तु वा चरेत् ।
व्यापकषोडशवारं प्राणायामयुगं चरेत् ।। ५७ ।

---

१. मन्त्रस्य स्वरूपमत्रोक्तमस्ति, तत एवावगन्तव्यम् ।
२. अर्चनमर्चः, तस्य विधिः । भावे कप्रत्ययो घनर्थे कविधानमिति वचनेन ।

पुनर्ध्यानं मानसार्चां[1] योनिमुद्रां प्रदर्शयेत् ।
पद्ममुद्रां ततः कृत्वा पाद्याद्यैः परिपूजयेत् ।। ५८ ।

आदौ मूलं समुच्चार्य एतत्पाद्यं ततः स्मरेत् ।
सदाशिवप्रयुक्तायै शाकिन्यै नम इत्यपि ।। ५९ ।

एवं क्रमेण पूर्वार्घ्यमाचमनीयं निवेदयेत् ।
स्नानीयं क्रमतो दद्यात् पुनराचमनीयकम् ।। ६० ।

गन्धं पुष्पाणि मूलेन दद्याद् भक्त्या सदाशिवे ।
बिल्वपत्राणि मूलेन दत्वा वरुणमर्चयेत् ।। ६१ ।

धेनुमुद्रां मत्स्यमुद्रां सिंहमुद्रां प्रदर्शयेत् ।
प्रणवं सां हृदयाय नमश्चाग्नौ प्रपूजयेत् ।। ६२ ।

प्रणवञ्च शीं शिरसे स्वाहया नैर्ऋते यजेत् ।
प्रणवं सूं शिखायै वषड् वायौ यजेत् क्रमात् ।। ६३ ।

प्रणवं सैं कवचाय कूर्चमीशे प्रपूजयेत् ।
मध्ये सौं नेत्रत्रयाय वौषट् प्रणवमाद्यके ।। ६४ ।

[2]चतुर्दिक्षु ततः पश्चात् सः अस्त्राय ततो हि फट् ।
[3]प्रणवाद्यं पूजयित्वा मस्तके ऋषिमर्चयेत् ।। ६५ ।

प्रणवं मूलऋषये सदाशिवाय कृत्ततः ।
पूर्वादिवामतः पूज्याः परिवारादिदेवताः ।। ६६ ।

आनन्दभैरवं पश्चान्महाकालं समर्चयेत् ।
[4]सुधानन्दं हरानन्दं सुरानन्दं समर्चयेत् ।। ६७ ।

कुलानन्दं प्रियानन्दं यज्ञानन्दमतः परम् ।
ध्यानानन्दं परानन्दं योगानन्दं समर्चयेत् ।। ६८ ।

---

१. मनसि भवा मानसी, आसमन्तादर्चनमर्चा, मानसी अर्चा इति विशेषणसमासः ।

२. चतुःसंख्याकासु दिक्षु इति मध्यमपदलोपिसमासः ।

३. प्रणव आद्यो यस्य तं प्रणवाद्यम् ।

४. ज्ञानानन्दं सदानन्दं भैरवानन्दमेव च ।
श्यामानन्दं शिवानन्दं कालानन्दं ततः परम् ।।

[1]क्रोधानन्दं [2]क्रियानन्दं [3]बोधानन्दं तथार्चयेत् ।
देवानन्दं जयानन्दं विजयानन्दमेव च ॥ ६९ ।
ब्रह्मानन्दं प्रभानन्दं पूर्णानन्दं समर्चयेत् ।
जगदानन्दरूपं तु ममाज्ञागुरुचक्रगम् ॥ ७० ।
पूजयित्वा देहशक्तिमेतेषां पार्श्वके यजेत् ।
कल्याणीं कामकन्यां त्रिपुरां षोडशीं तथा ॥ ७१ ।
विद्याधरीं नीलवर्णां श्यामां सिंहासनस्थिताम् ।
चण्डिकामुपकन्याञ्च चन्द्रचूडसरस्वतीम् ॥ ७२ ।
कपिलां मेघदूताञ्च धूम्रवर्णां जटाधराम् ।
त्रिलोचनां खेचरीञ्च गगनां कामरूपिणीम् ॥ ७३ ।
पीनकुचां व्याघ्रमुखीं मधुपानां मदोन्मदाम् ।
रम्यां स्नेहकलां धर्मां तथा मधुमतीं हराम् ॥ ७४ ।
हारमालां वनमालां चकोरां कुलकामिनीम् ।
पूजितां गुरुसर्वाणीं सर्वतत्त्वस्वरूपिणीम् ॥ ७५ ।
पूजयेत् सर्वतः शक्त्या ईशानान्तं क्रमेण तु ।
तन्मध्ये केशवं ध्यात्वा दलस्वरमुपार्चयेत् ॥ ७६ ।
अकारादिषोडशार्णान् प्रणवादिनमोऽन्तिकान् ।
नीलवर्णान् सरक्ताढ्यान् कुङ्कुमालक्तवेष्टितान् ॥ ७७ ।
विद्युत्कोटिसमाभासपद्मरागसमोज्ज्वलान् ।
मनोरथपूर्णकरान् जगदानन्दवर्धकान् ॥ ७८ ।
सुप्रियाकण्ठताल्वादिपरमात्मप्रदर्शकान् ।
तेषां नाम्ना पूजयित्वा यथा मार्तण्डमण्डले ॥ ७९ ।
तथाऽत्र ते पूजिताः स्युः स्वस्वनामप्रचोदिताः ।
शृणु नाथ महाकाय [4]मदोन्मत्त दिगम्बर ॥ ८० ।

---

१. क्रोधेनानन्दो भवति यस्य सः, तम्; २. क्रियया आनन्दो यस्य ।
३. बोधेनानन्दो यस्य तमिति; ४. मदेन विजयापानेन विषपानेन वा उन्मत्तः, विभोरः ।

[1]स्थिरचेताः सदा भूत्वा पूजय त्वं हि शाकिनीम् ।
तत्र पद्मकर्णिकायां शवरूपं सदाशिवम् ।। ८१ ।

ध्यात्वा मद्गतमध्ये तु पीठचक्रं प्रपूजयेत् ।
मूलाधारे कामरूपं कामचक्रं त्रिलक्षणम् ।। ८२ ।

पीठाय नम उच्चार्य चाद्यतारकमुच्चरेत् ।
हृदि जालन्धरं पीठं सिद्धपीठं त्रिचक्रकम् ।। ८३ ।

ललाटे पूर्णगिर्याख्यं हिङ्गुलादं सुपीठकम् ।
उड्डियानं तदूर्ध्वे तु मेघकुञ्जं स्वपीठकम् ।। ८४ ।

महापीठं भ्रुवोर्मध्ये वाराणसीञ्च लिङ्गकम् ।
लोचनत्रयमध्ये तु ज्वलन्तीसिद्धपीठकम् ।। ८५ ।

ज्वालामुखी त्रिवेणी च पीठत्रयमुदाहृतम् ।
त्रिलोचने त्रिपीठं मे अवश्यं परिपूजयेत् ।। ८६ ।

मुखाम्बुजे पूजयेद् वै मायारतिं सुभद्रिकाम् ।
कम्पिल्लनगरं वंशनगरं कामभञ्जनम् ।। ८७ ।

हिरण्यनगरं तत्र एकदन्तारसायनाम् ।
कपालपीठं ताल्वाख्यं फणिपीठं मुखे यजेत् ।। ८८ ।

कण्ठे मधुपुरीपीठं सुधापीठं तदन्तिके ।
आह्लादपीठं श्रीपीठं शून्यपीठं प्रियाञ्जलम् ।। ८९ ।

पूरञ्जनाख्यं भद्राख्यं कण्ठे अम्भपुरो मम ।
नाभौ महापीठराजमयोध्याभवपीठकम् ।। ९० ।

लक्ष्मीपीठं ब्रह्मपीठं लाङ्गलीपीठमेव च ।
मानपीठं ज्ञानपीठं रुद्रपीठं तदन्तिके ।। ९१ ।

लाकिनी कुलपापीठं वलाकापीठमेव च ।
रौद्रप्रभामहापीठं म्लेच्छवासिसुपीठकम्[2] ।। ९२ ।

---

१. स्थिरं चेतो यस्य तादृशो भूत्वा इत्यर्थः ।

२. म्लेच्छानां वासो म्लेच्छवासः, सोऽस्यास्तीति मत्वर्थीय इनिः ।

मक्कासिद्धकरीपीठं निरञ्जनस्वपीठकम् ।
ब्राह्मीपीठं दत्तपीठमभयापीठमेव च ॥ ९३ ।

रङ्गिणीपीठमेवं हि फेत्कारीपीठमर्चयेत् ।
गर्गरीसिद्धपीठं च चन्द्रशेखरशैलकम् ॥ ९४ ।

हरिद्वाराख्यपीठं तु समुद्रपीठमर्चयेत् ।
कटचां संकेतपीठं च काञ्चीपीठं त्रिघर्घरम् ॥ ९५ ।

शूलिनीपीठमभ्यर्च्य लङ्कापीठं समर्चयेत् ।
वारुणीपीठमभ्यर्च्यं वज्रपीठं समर्चयेत् ॥ ९६ ।

सिद्धकटाहपीठञ्च महासंहारपीठकम् ।
षट्पीठं द्राविडापीठं विष्णुपीठं रसान्वितम् ॥ ९७ ।

दलपीठं तथा राधापीठं पञ्चनलाख्यकम् ।
कुण्डलीचक्रपीठं तु कामपीठं समर्चयेत् ॥ ९८ ।

महावाय्वाकाशपीठं त्रिकालचक्रपीठकम् ।
ब्रह्मपीठं धरापीठं शत्रुपीठं समर्चयेत् ॥ ९९ ।

कुञ्जराख्यं महापीठं कालधर्माख्यपीठकम् ।
तद्वामे डाकिनीपीठं गर्भपीठं तदन्तिके ॥ १०० ।

मयूरपीठमभ्यर्च्यं गारुडीपीठमर्चयेत् ।
प्रणवं पूर्वमुच्चार्य चात्र पीठस्थितान् स्वरान् ॥ १०१ ।

पूजयामि पद्मपुष्पैः प्रसन्नाः प्रभवन्तु ते ।
पूजयित्वा पीठलोकं शिवलोकं समर्चयेद् ॥ १०२ ।

क्षेत्रपाललोकमेवं धूम्रलोकं त्रिलोककम् ।
पूजयेत् सागरान् सप्त भुवनानि चतुर्दश ॥ १०३ ।

[1]ताराग्रहणक्रान्तलोकपालयुतानि च ।
पूजयित्वा तद्बाह्ये च शक्तिविद्याः प्रपूजयेत् ॥ १०४ ।

---

१. ताराणां ग्रहाणां च गणाः, तैः क्रान्ता लोकास्तान् पालयन्ति ये तैर्युतानि ।

डाकिनी राकिणी पूज्या लाकिनी काकिनी तथा ।
शाकिनी हाकिनी पश्चात् प्रभा नीला च बोधिनी ॥ १०५ ।
उन्मनी भाविनी चिन्ता प्रियाङ्गी मानसेश्वरी ।
उल्कामुखी क्रोधमुखी विप्रचित्ता सुभद्रिका ॥ १०६ ।
नागिनी नागमाला च पृथिवीतीर्थवासिनी[1] ।
अकलङ्का जाह्नवी च स्वर्गगङ्गा मनोन्मनी ॥ १०७ ।
सं सत्त्वस्था रं रजःस्था तं तमःस्था प्रपूजयेत् ।
सर्वां देवीं पूजयेद् वै [2]प्रणवादिनमोऽन्तिकाम् ॥ १०८ ।
धूपदीपौ स्वमूलेन दद्यात् साधकयोगिराट् ।
नैवेद्यं शोधयित्वा च दद्यात् पानार्थकं प्रभो ॥ १०९ ।
पुनराचमनं दत्वा विशेषबलिमर्पयेत् ।
पूर्वोक्तस्तु ममानेन पञ्चतत्त्वक्रियादिभिः ॥ ११० ।
अनेन मनुना दद्याद् बलित्रयमनुत्तमम् ।
प्रणवं कालमायेऽन्ते सर्वपीठनिवासिनि ॥ १११ ।
तदन्ते कालिकाबीजं स्वबीजं तदनन्तरम् ।
आकाशवाहिनीत्यन्ते बलिं गृह्ण ततः परम् ॥ ११२ ।
पञ्चतत्त्वादिमिलितं कपाले तदनन्तरम् ।
परिगृह्णयुगं पश्चात् शब्दबीजं ततो द्विजः ॥ ११३ ।
अनेन मनुना दद्याद् बलित्रयमनुत्तमम् ।
सर्वत्र मानसैर्योगी ददाति पूजनं बलिम् ॥ ११४ ।
प्राणायामं त्रिधा कृत्वा जपेन्मन्त्रं यथाविधि ।
सहस्रं वा शतं वापि चाष्टोत्तरसमन्वितम् ॥ ११५ ।
दिवसे यज्जपं कुर्याद्रात्रौ तज्जाप्यमाश्रयेत् ।
जपं समर्पयेद् देव्या वामहस्ते तु मन्त्रकैः ॥ ११६ ॥

---

१. पृथिवीतीर्थे वसति तच्छीला पृथिवीतीर्थवासिनी ।

२. प्रणव आदिर्यस्याः, नमोऽन्तिको यस्याः सा, पुत्रः प्रणवादिश्च नमोऽन्तिकश्चेति कर्मधारयः ।

[1]गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि ॥ ११७ ।
प्राणायामं त्रिषट्कृत्वा वन्दनं च प्रदक्षिणम् ।
संवन्दे वरदे देवि त्रैलोक्यकुलपावनि ॥ ११८ ।
सर्वसिद्धिप्रदे देवि शाकिनि त्वां नमाम्यहम् ।
वेदविद्याप्रकाशे त्वं नानाविद्याविनोदिनि ॥ ११९ ।
भवानि सिद्धिदे देवि वरदा भव सर्वदा ।
सर्वदानवहन्त्री त्वं मम शत्रून् विनाशय ॥ १२० ।
अकालमृत्युहरणं कुलकौमारिशाकिनि ।
सदाशिवयुते नित्ये सदाशिवविहारिणि ॥ १२१ ।
अमरत्वं सदा देहि भक्तिं मुक्तिं प्रयच्छ मे ।
शाकिनि प्राणदे देवि देवानां प्राणरक्षिणि ॥ १२२ ।
शाकम्भरि नमस्तेऽस्तु मम देहं समाश्रय ।
वाञ्छाकल्पतरोर्मूले स्थायिनि प्रेमदायिनि ॥ १२३ ।
सर्वलोकार्चिते सिद्धिकण्ठपद्मे स्थिरा भव ॥ १२४ ।
कण्ठाम्भोरुहमण्डले सुविमले वाञ्छाफले ज्वालिनि
कामाख्ये प्रणमामि शाकिनि पदं मातर्हि शाकम्भरि ।
देवानां जगतां हिताय विनये सम्यग्वरश्रीप्रदे
स्थित्यादिक्रमसंस्थिता भव महाकाशप्रभाचञ्चले ॥ १२५ ।
इति प्रणम्य भावेन भुक्तिमुक्ती[2] लभेद् ध्रुवम् ।
पूजाफलमवाप्नोति प्रदक्षिणरतो नरः ॥ १२६ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे शाकिनीयजनं नाम षष्ठषष्टितमः पटलः ॥

●

---

१. गुह्यमतिगुह्यं च गोपायति या सा, गुपेः कर्तरि तृच्प्रत्ययः ।
२. भुक्तिर्भोग ऐहलौकिकः, मुक्तिर्मोक्षः पारलौकिकः, द्वयोः प्राप्तिः ।

अथ सप्तषष्टितमः पटलः

श्रीआनन्दभैरवी उवाच—

कुरु नाथ वन्दनं भो पूजनं कवचं पठ ।
[1]वर्णाध्यानं कण्ठपद्मे स्थिरो भव जगत्पते ॥ १ ।

परमा शाकिनी विद्या [2]महामोहनिवारिणी ।
योगिनीकोटिभिः सार्धं राजते सूर्यवत् सदा ॥ २ ।

वाराणसीपुरे स्थित्वा कण्ठपद्मस्थितां भज ।
स्तोत्रेणानेन विधिना भक्ति कुरु महाशिवे ॥ ३ ।

अखण्डे नीलपङ्केरुहविमलकरे स्थापितां षोडशारे
हेमाभां विद्युताभां सुकणकवलयां चन्द्रकोटिप्रभावाम् ।
श्रीकन्यां शाकिनीशां त्रिपुरहरकराम्भोजपूजाविनोदीं
कामाख्यां रुद्रमायां वधुनयनयुतां शक्रकान्तप्रकाशाम् ॥ ४ ।

सिन्धुस्थां भावयामि प्रमथगणवधूप्रोज्ज्वलां वेदयुक्तां
योगेन्द्रानन्दकर्त्रीं कमलवलयां नीलजीमूतनेत्राम् ।
ओङ्कारां कारणाख्यां मधुगृहनिकरामष्टगेहप्रकाशा-
मानन्दज्ञाननित्यां द्विविनदलकलां कण्ठवैकुण्ठशोभाम् ॥ ५ ।

धर्मार्थज्ञानदात्रीं त्रिभुवनभुविकाह्लादहेतोः प्रकाश्यां
विन्ध्यस्थां पीठकन्यां त्रिकमलनयनां वेदहस्तां प्रसन्नाम् ।
स्मेरास्यां चन्द्रवक्त्रां हरिहरविधिभिर्ध्यानगम्यां कदाचि-
च्छम्भुस्थां चारुरूपां भवभयहरणीं तारिणीं भावयामि ॥ ६ ।

---

१. वर्णानामाध्यानमिति विग्रहे षष्ठीतत्पुरुषः ।

२. महान् मोहो महामोहः, सन्महदिति समासः, तं निवारयति तच्छीला कर्तरि णिनिः ।

सूक्ष्मां [1]स्थूलप्रभाढ्यां [2]चरणतलविभाकोटिबन्धूककान्ति
कान्तानां कामकान्तां जयरतिभवतीं शाकिनीं शोकहन्त्रीम् ।
शब्दान्तःप्रान्तरस्थां स्थितिलयगगनां पद्मरागस्रजाढ्यां
कान्त्या विश्वं ज्वलन्तीं मदनवधुरमाबीजमालां स्मरामि ।। ७ ।

व्याघ्रस्थां व्याघ्रवस्त्रां हरिणनयनकैः केवलानन्दरूपां
वामां शक्तिं प्रवालां त्रिकुलजलकलां कालराजेश्वरीं याम् ।
आनन्दाब्धौ प्रभान्तीं प्रभुगणभयहां मातृकाबीजभूषां
घोरामट्टाट्टहास्यां दशनसुहसनां चारुनेत्रां भजामि ।। ८ ।

बालादित्यायुताभां चरमपदमदां मद्यमाधुर्यभक्षां
क्षोणीसिंहासनस्थां मणिमयजपमालाभिर्वरानन्दहस्ताम् ।
मातल्लीलाकलापां तरतनुविमलां चामले कण्ठपद्मे
नित्यज्ञानप्रकाशां भजति मम सदानन्दचित्तावसन्नाम् ।। ९ ।

हालापानोद्यताङ्गीं परमसुखमयीं वेदसन्तानकर्त्रीं
योगानन्दादिकर्त्रीं तरुणघनघटाघोररूपां करालाम् ।
आकाशाम्भोजमध्येऽविकलकरयुषा व्यापकाङ्गप्रकाशां
सा माता श्रीं वहन्तीं परिसमयकलौ मोक्षभक्तिं भजे त्वाम् ।। १० ।

सा विद्याधर्मचिन्तामणिगुणजनिता योजिता जातु भीतौ
शब्दब्रह्मैकहेतुस्थलनिलयमहाज्ञानसाक्षिप्रतीता ।
त्वं माता वेदमाता हर हर कलुषं बालिशं तारयन्ती
जीवात्मानं द्विरक्षक्षयमरणभयभ्रान्तिमाभञ्जयन्ती ।। ११ ।

[3]ज्वालामालाविलोला कलयति कलुषं शाकिनी सैव माता
यातायातप्रभातोदयदिवसनिशाभ्रान्तिमोहारिनाशा ।
दासानामामवासा वसति शशिगृहे कार्तिकेशासुवंशा
संसारेऽशादिहंसा चल चल चपलं त्वं कलाषोडशारे ।। १२ ।

---

१. स्थूला बृहती या प्रभा, तया आढ्यां समृद्धाम् ।
२. चरणतलस्य या विभा, तया, कोटिबन्धूकपुष्पसदृशी कान्तिर्यस्याः सा ।
३. ज्वालानां मालास्ताभिर्विलोला चञ्चला ।

बीजात्मा यज्ञकुण्डे रचयति चरणाच्छन्दसां गद्यपद्यैः
पाताले भूकराले कुलयुगदलके निर्गता वेदशक्तिः ।
पश्यन्ती मध्यमाद्या नयनवचनगा वैखरी वाक्स्वरूपा
कण्ठे हृत्पद्ममूले कथयति कविता स्तम्भितास्त्वां प्रयामि ॥ १३ ।

परासापर्वासारहितमतहासा प्रविश मे
घनश्यामे वामे द्विकमलललाटेऽतिशिखया ।
वहन्ती सिन्दूरं त्रिजपपरयानामपरया
मुखाम्भोजे वश्या भवभवयुगं षोडशदले ॥ १४ ।

रमा लज्जा माया वधुमदनकूर्च्चास्त्रसहिते
हिते मातः शाकम्भरि धरणि बाला कमलया ।
निशार्धे शत्रवङ्गं हन हन हरे संहर रिपुं
त्रितारी षट्कूटा [1]मदनवधुजा ह्लिजाया हर अघम् ॥ १५ ।

योगेन्द्रानन्दमुद्रां तरतनुतपनां तापिनीं तप्तदेहां
मुग्धानां मोहमुग्धां मुकुटशशिमणिच्छाययाच्छन्नवेशाम् ।
कामाख्यां ब्रह्मबीजध्वनिमदनकुलाद्यादिबीजप्रतिष्ठां
स्वाहान्तां भावयामि क्षितिसुरपतिहंसाख्यब्रह्मास्त्रविद्याम् ॥ १६ ।

सायाह्ने कामलक्ष्मीः पवनविधुयुता दीर्घनेत्रा त्रिनेत्रा
सावित्री मध्यकाले न चलति चलति श्रद्धया मस्तकोर्ध्वे ।
कोटचर्काभासमाना न नमति कुटिलं तेजसा व्याकुलालं
कालोल्काकोटिकूटं रमयति धवलास्यारुणाङ्गी प्रभाते ॥ १७ ।

गायत्री वर्णमात्रामितवनवनिता मानिवा भालकूपे
हालाकालानलाङ्गी तिमिरहरपदालीढपादारविन्दा ।
त्वं विद्या वाग्भवाद्या [2]प्रणवतनुमयी देवलक्ष्मीः प्रसादा[3]
नादाद्याचार्धचन्द्रोज्ज्वलयुगलं षोडशारे ममारे ॥ १८ ।

---

१. मदनस्य कामदेवस्य या वधूस्ततो जाता, बाहुलकाद् ह्रस्वः ।
२. प्रणव एव तनुस्तत्स्वरूपा, स्वार्थे मयट् ।
३. प्रसादयति या सा—सदेर्ण्यन्तात् पचाद्यच्प्रत्ययः ।

जाया माया विमायाह्यमुखि विमले केवले तारहारे
हाराकंचित्रिताङ्गि स्ववधुयुगयुगे तारयद्वन्द्वचन्द्रे ।
स्वाहा मेधा स्वधा त्वं [1]श्रुतिनुतिसुनतिग्रन्थिवाग्वादिनी त्वं
मामेकं रक्षयुग्मं धरणिधरसुखं सञ्चयाग्निप्रियान्ता ॥ १९ ।

एतत् स्तववरं पठेद्यदि सदा ध्यात्वा नरेन्द्रः सुखी
धन्यः पुण्यमुपैति देवविलयं पीठादिसन्दर्शनम् ।
योगानामपि सिद्धिभाक्प्रियतरं ज्ञानं धनं लभ्यते
राजानं वशयन्ति ते च सहसा साक्षात् कटाक्षै रमाम् ॥ २० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे शाकिनीस्तोत्रविन्यासो नाम सप्तषष्टितमः पटलः ॥

●

---

१. श्रुतिर्नुतिः सुनतिः, तासां ग्रन्थिः, तत्र वाग्वादिनी सरस्वती, तद्ग्रन्थिरहस्योद्घाटने साक्षात् सरस्वती इति भावः ।

अथाष्टषष्टितमः पटलः

श्रीआनन्दभैरव उवाच—

त्रैलोक्यरक्षणार्थाय पूजयामि तवानघे ।
संसारविलयार्थाय तव श्रीचरणाम्बुजम् ॥ १ ।

महादेवि जगद्धात्रि परमानन्दवर्धिनि ।
भवानि भैरवि प्राणे वर्णध्यानं वदामलम् ॥ २ ।

श्रीआनन्दभैरवी उवाच—

अथ कामेश गौराङ्ग धर्माधर्मप्रदर्शक ।
इदानीं शृणु सर्वज्ञ महाज्ञाननिरूपणम् ॥ ३ ।

वर्णध्यानं तव स्नेहात् कथये मम रूपकम् ।
अकस्मात् सिद्धिदं ध्यानं ज्ञानमात्रेण सिद्ध्यति ॥ ४ ।

अकारं ध्यायेऽहं हरिहरचतुर्वक्त्रविबुधैः[1]
सदा ध्येयं शुक्लं विधुमुखिवधुश्रीश्रुतिभुजम् ।
विधेयं कौमारं त्रिनयनमलङ्कारजडितं
कपालाब्जास्त्राहिमहितशितांशुप्रभकरम् ॥ ५ । अं

आंबीजाढ्यां प्रभासां कनकघटमधुप्रीतिमानां विमानां
शुल्कच्छायां वहन्तीं श्रुतिभुजसहितां पद्मनालाख्यमालाम् ।
खड्गं तां धारयन्तीं मुकुटमणिरुचिं क्रोधमाकाशदेशं
नानालङ्कारदीप्तिं हिमकरकपिलावाहनीं भावयामि ॥ ६ ।आं

इं मायां भुवनस्थितां वधुयुतां श्रीषोडशीसंयुतां
मायालक्षणलक्षितां त्रिजगतां विद्याभयश्रीपदाम् ।
हस्ताम्भोजचतुष्टयां त्रिनयनां शूलासिभालाम्बुजां
नानारत्नजनूपुरां सुरनतां ध्याये विशुद्धाम्बुजे ॥ ७ ।इं

---

१. हरिश्च हरश्च चतुर्वक्त्रश्च (ब्रह्मा च) ते च ते विबुधाश्च, तैः ।

कोटचर्काभासमानां कनकमयमहालङ्कृतां ध्यानगम्यां
ईकाराकारमूर्ति त्रिनयनकमलां वेदहास्योज्ज्वलाङ्गीम् ।
शङ्खाम्भोजासिघण्टासहिततनुवरां देवसिंहासनस्थां
वेदस्थां वेदसिद्धां रुधिरशितयुतां बाललीलां भजामि ॥ ८ ।ईं

उकारं ब्रह्माणं त्रिमुनिसहितं काञ्चनरसं
हयं हंसारूढं इवरसनयुतं मन्दिराजालवाद्यम् ।
विशालं वेदास्यं शतरविसुवर्णं त्रिनयनं
जटाकुण्डाह्लादं तरुणपुरुषं नौमि सततम् ॥ ९ ।उं

ऊङ्कारं सर्वरूपं विधुशतजटितं काञ्चनाभं त्रिसर्गं
मन्दारैर्मानसाप्तं प्रचयघनरसं शुद्धसूत्राक्षमालम् ।
हस्तौ द्वौ संवहन्तं फणिगणललनामालयानन्दरूपं
सिद्धानामिष्टसिद्धिं कुलकमलघनं भावये षोडशारे ॥ १० ।ऊं

ऋङ्कारं सप्तरेखासहितविमलया मालया शोभिताङ्गं
मायाविस्थं प्रसन्नाननकमलवरं वारणाकारदेहम् ।
पुण्यं यज्ञादिसिद्धं मदनशशिकलामादनं षड्भुजाढ्यं
घण्टाचार्वस्त्रखड्गामलकमलकपालाङ्कमेकं भजामि ॥ ११ ।ऋं

ॠं बीजं चातिथीशं शितकमलमुखं शुक्लवर्णं त्रिनेत्रं
मायालक्ष्मीस्वरान्तं तरुणरविकरं षड्भुजं नीलवस्त्रम् ।
नानालङ्कारशोभातरमुकुटतटं चन्द्रबिम्बस्वभावं
खड्गाब्जज्ञानमुद्रामधुधरसुगदापाशपाणिं भजामि ॥ १२ ।ॠं

लृकारं [1]स्थाणुकेशं त्रिनयनवदनाम्भोजतेजःप्रकाशं[2]
पूर्णात्मानं परेशं त्रिगुणघनमयं नीलवर्णं त्रिभावम् ।
षड्बाहुं पिङ्गकेशामलगलितशिरोमण्डलं मालयाढ्यं
वेदासिज्ञानमालाम्बुजवरगदया शोभितं भावयामि ॥ १३ ।लृं

---

१. स्थाणवस्तत्सदृशाः केशा यस्य सः, तम् ।

२. त्रयाणां नयनानां वदनाम्भोजस्य च तेजः प्रकाशयति, तमित्यर्थः ।

लृङ्कारं शितवसनयुक्शुक्लकिरणं
सुधामग्नं ध्याये हरिणनयनं वेदभुजगम् ।
भुजङ्गाम्भोजासिप्रियवरदभावं शुभकरं
करालं भूपालं सुरमुनिगणैः सेव्यमनिशम् ॥ १४ । लॄं

एंबीजं कालवर्णं शतयुवतिगतं वेष्टितं देवमुख्यैः
सूर्याभं बिन्दुसर्गं भुजयुगसहितं पद्मभालं[1] करालम् ।
सालङ्कारं किरीटं त्रिनयनममरं नूपुरेन्दुप्रकाशं
झिण्टीशं शम्बरीशं प्रमथसुतगणैर्व्यापितं भावयामि ॥ १५ । एं

शुक्लाभं वा भवार्णं त्रिवलितनयनं शुद्धबन्धूकवस्त्रं
रत्नालङ्कारहारं त्रिभुवनवचनं षड्भुजं बीजसारम् ।
ध्यायेऽहं षोडशारे त्रिमदनरमणे भावितं पञ्चरश्मि
योगाद्यं भौतिकेशं गगनपथकरं वह्निजायास्वरान्तम् ॥ १६ । ऐं

भजे [2]प्रणवलक्षणं शितकरं चलत्कुण्डलं
चतुर्भुजविभाकरं कमलशङ्खशूलाभयम् ।
अलङ्कृतकलेवरं विमलपीतवस्त्रं मुखं
शुक्लांशुशतवेष्टितं मुकुटनूपुराढ्यं परम् ॥ १७ ।ओं

ध्याये चानुग्रहेशं प्रणवधवल ओङ्काररूपं सुसूक्ष्मं
ब्रह्मद्वारप्रभेदं श्रुतिभुजललितं खड्गबाणास्थभालम् ।
जन्तूनां कोटिकान्ति शतरविमुकुटं क्रोधराजं महेशं
रत्नालङ्कारशोभं चरलतलरिभामण्डलं सारुणाभम् ॥ १८ ।औं

अङ्कारं बिन्दुभावं ललितदशभुजं व्याघ्रचर्माम्बराढ्यं
पञ्चास्यं तं त्रिनेत्रं स्वकणकवलयं चन्द्रकोटिप्रकाशम् ।
शूलास्त्रासीषु चक्रप्रतनफलगदाखेटकाम्भोजभालं
ध्याये चाक्रूरदेवं परशुखरपदं सारदं स्थूलसूक्ष्मम् ॥ १९ । अं

---

१. पद्मं कमलं भाले मस्तके विराजते यस्य । अथवा पद्मवत् शोभमानो भालो यस्य ।
२. प्रणवो लक्षणं परिचायको यस्य तमित्यर्थः ।

अःकारं श्रीविसर्गं कमलदलगतं दीनदातारमेकं
शुक्लाभं कोटिसूर्यं शतभुजललितं देवविद्यास्त्रखड्गम्।
सर्वाङ्गारक्तधारं त्रिनयनकमलानन्दितं मन्दहास्यं
पञ्चाशद्वक्त्रशोभाभवतनुकिरणं कारणं भावयामि ॥२०।अः

एवं ध्यात्वा षोडशारे स्थिरचेताः प्रपूजयेत् ।
वर्णरूपं शक्तियुतं लोकनाथं सदाशिवम् ॥ २१ ।

तदा प्रसन्ना बुद्धिः स्यादमरो जायतेऽचिरात् ।
खेचरत्वं वाक्यसिद्धिं जलस्तम्भादिसिद्धिभाक् ॥ २२ ।

पूर्वादिवामतो ध्यायेत् कामनाभयवर्जितः ।
गुप्तस्थाने ध्यानकार्यं [1]यत्र विद्याः स्फुरन्ति ताः ॥ २३ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे विशुद्धवर्णध्यानं नाम अष्टषष्टितमः पटलः ॥

---

१. यत्र ता विद्याः स्फुरन्ति इत्यन्वययोजना । विद्यास्तावच्चतुर्दशसंख्याकाः । तत्रागमशास्त्रस्य धर्मशास्त्रे परिगणना कृताऽस्ति ।

अथैकोनसप्ततितमः पटलः

श्रीआनन्दभैरवी उवाच—

कैलासशिखरारूढ पञ्चवक्त्र त्रिलोचन ।
अभेद्यभेदकप्राण वल्लभ श्रीसदाशिव ॥ १ ।
[1]भवप्राणप्ररक्षाय कालकूटहराय च ।
प्रत्यङ्गिरापादुकाय दान्तं शब्दमयं प्रियम् ॥ २ ।
इच्छामि रक्षणार्थाय भक्तानां योगिनां सताम् ।
अवश्यं कथयाम्यत्र सर्वमङ्गललक्षणम् ॥ ३ ।
अष्टोत्तरसहस्राख्यं सदाशिवसमन्वितम् ।
महाप्रभावजननं दमनं दुष्टचेतसाम् ॥ ४ ।
सर्वरक्षाकरं लोके कण्ठपद्मप्रसिद्धये ।
अकालमृत्युहरणं सर्वव्याधिनिवारणम् ॥ ५ ।
योगसिद्धिकरं साक्षाद् अमृतानन्दकारकम् ।
विषज्वालादिहरणं मन्त्रसिद्धिकरं परम् ॥ ६ ।
नाम्नां स्मरणमात्रेण योगिनां वल्लभो भवेत् ।
सदाशिवयुतां देवीं सम्पूज्य संस्मरेद् यदि ॥ ७ ।
मासान्ते सिद्धिमाप्नोति खेचरीमेलनं भवेत् ।
आकाशगामिनी सिद्धिः पठित्वा लभ्यते ध्रुवम् ॥ ८ ।
धनं रत्नं क्रियासिद्धिं [2]विभूतिसिद्धिमालभेत् ।
पठनाद् धारणाद्योगी महादेवः सदाशिवः ॥ ९ ।
विष्णुश्चक्रधरः साक्षाद् ब्रह्मा नित्यं तपोधनः ।
योगिनः सर्वदेवाश्च मुनयश्चापि योगिनः ॥ १० ।

---

१. भवः संसारस्तस्य प्राणाः, तेषां प्ररक्षः, तस्मै ।

२. विभूतीनां सर्वैश्वर्याणां सिद्धिस्तामित्यर्थः ।

सिद्धाः सर्वे सञ्चरन्ति धृत्वा च पठनाद् यतः ।
ये ये पठन्ति नित्यं तु ते सिद्धा विष्णुसम्भवाः ॥ ११ ।

किमन्यत् कथनेनापि भुक्ति मुक्ति क्षणाल्लभेत् ॥ १२ ।

अस्य श्रीभुवनमङ्गलमहास्तोत्राष्टोत्तरसहस्रनाम्नः सदाशिव ऋषिर्गायत्रीच्छन्दः सदाशिवशाकिनीदेवता पुरुषार्थाष्टसिद्धिसमययोगसमृद्धये विनियोगः ॥

ॐ शाकिनी पीतवस्त्रा सदाशिव उमापतिः ।
शाकम्भरी महादेवी भवानी भुवनप्रियः ॥ १३ ।
योगिनी योगधर्मात्मा योगात्मा श्रीसदाशिवः ।
युगाद्या युगधर्मा च योगविद्या सुयोगिराट् ॥ १४ ।
योगिनी योगजेताख्यः सुयोगा योगशङ्करः ।
योगप्रिया योगविद्वान् योगदा योगषड्भुवि ॥ १५ ।
त्रियोगा जगदीशात्मा जापिका [1]जपसिद्धिदः ।
यत्नी यत्नप्रियानन्दो विधिज्ञा वेदसारवित् ॥ १६ ।
सुप्रतिष्ठा शुभकरो मदिरा मदनप्रियः ।
मधुविद्या माधवीशः क्षितिः क्षोभविनाशनः ॥ १७ ।
वीतिज्ञा मन्मथघ्नश्च चमरी चारुलोचनः ।
एकान्तरा कल्पतरुः क्षमाबुद्धो रमासवः ॥ १८ ।
वसुन्धरा वामदेवः श्रीविद्या मन्दरस्थितः ।
अकलङ्का निरातङ्क उतङ्का शङ्कराश्रयः ॥ १९ ।
निराकारा निर्विकल्पो रसदा रसिकाश्रयः ।
रामा [2]रामननाथश्च लक्ष्मी नीलेषुलोचनः ॥ २० ।
विद्याधरी धरानन्दः कनका काञ्चनाङ्गधृक् ।
शुभा शुभकरोन्मत्तः प्रचण्डा चण्डविक्रमः ॥ २१ ।

---

१. जपेन सिद्धिर्जपसिद्धिः, तृतीयातत्पुरुषः, तां ददातीति ।
२. रामयतीति रामनः कर्तरि ल्युट्प्रत्ययो बाहुलकात्, णत्वाभावोऽपि ।

सुशीला देवजनकः काकिनी [1]कमलाननः ।
कज्जलाभा कृष्णदेहः शूलिनी खड्गचर्मधृक् ॥ २२ ।
गतिग्राह्यः प्रभागौरः क्षमा क्षुब्धः शिवा शिवः ।
जवा यतिः परा हरिर्हराहरोऽक्षराक्षरः ॥ २३ ।
सनातनी सनातनः श्मशानवासिनीपतिः ।
जयाक्षयो धराचरः समागतिः प्रमापतिः ॥ २४ ।
कुलाकुलो मलाननो वलोवला मलामलः ।
प्रभाधरः परापरः सरासरः कराकरः ॥ २५ ।
मयामयः पयापयः पलापलो दयादयः ।
भयाभयो जयाजयो गयागयः फलान्वयः ॥ २६ ।
समागमो धमाधमो रमारमो वमावमः ।
वराङ्गणा धराधरः प्रभाकरो भ्रमाभ्रमः ॥ २७ ।
सती सुखो सुलक्षणा कृपाकरो दयानिधिः ।
धरापतिः प्रियापतिर्विरागिणी मनोन्मनः ॥ २८ ।
प्रधाविनी सदाचलः प्रचञ्चलातिचञ्चलः ।
कटुप्रिया महाकटुः पटुप्रिया महापटुः ॥ २९ ।
धनावली गणागणी खराखरः फणिः क्षणः ।
प्रियान्विता शिरोमणिस्तु शाकिनी सदाशिवः ॥ ३० ।
रुणारुणो घनाघनो हयो हयो लयी लयः ।
सुदन्तरा सुदागमः खलापहा महाशयः ॥ ३१ ।
चलत्कुचा जवावृतो घनान्तरा स्वरान्तकः ।
प्रचण्डघर्घरध्वनिः प्रिया प्रतापवह्निगः ॥ ३२ ।
प्रशान्तिरुन्दुरुस्थिता महेश्वरी महेश्वरः ।
महाशिवाविनी घनी रणेश्वरी[2] रणेश्वरः[3] ॥ ३३ ।

---

१. कमलवद् आननं मुखं यस्य सः ।

२. रणे ईश्वरी इव । अथवा रणस्य ईश्वरी स्वामिनी ।

३. रणस्येश्वरोऽधिष्ठाता शिवो भगवान् ।

प्रतापिनी प्रतापनः प्रमाणिका प्रमाणवित् ।
त्रिशुद्धवासिनी मुनिर्विशुद्धविन्मधूत्तमा ।। ३४ ।
तिलोत्तमा महोत्तमः[1] सदामया दयामयः ।
विकारतारिणी तरुः सुरासुरो मरागुरुः ।। ३५ ।
प्रकाशिका प्रकाशकः प्रचण्डिका विभाण्डकः ।
त्रिशूलिनी गदाधरः प्रवालिका महाबलः ।। ३६ ।
क्रियावती जरापतिः प्रभाम्बरा दिगम्बरः ।
कुलाम्बरा मृगाम्बरा निरन्तरा जरान्तरः ।। ३७ ।
श्मशाननिलया शम्भुर्भवानी भीमलोचनः ।
कृतान्तहारिणीकान्तः कुपिता कामनाशनः ।। ३८ ।
चतुर्भुजा पद्मनेत्रो दशहस्ता महागुरुः ।
दशानना दशग्रीवः क्षिप्ताक्षी क्षेपनप्रियः ।। ३९ ।
वाराणसी पीठवासी काशी विश्वगुरुप्रियः ।
कपालिनी महाकालः कालिका कलिपावनः ।। ४० ।
रन्ध्रवर्त्मस्थिता वाग्मी रती रामगुरुप्रभुः ।
सुलक्ष्मीः प्रान्तरस्थश्च योगिकन्या कृतान्तकः ।। ४१ ।
सुरान्तका पुण्यदाता तारिणी तरुणप्रियः ।
महाभयतरा तारास्तारिका तारकप्रभुः ।। ४२ ।
तारकब्रह्मजननी महादृप्तः भवाग्रजः ।
लिङ्गगम्या लिङ्गरूपी चण्डिका वृषवाहनः ।। ४३ ।
रुद्राणी रुद्रदेवश्च कामजा काममन्थनः ।
विजातीया जातितातो विधात्री धातृपोषकः ।। ४४ ।
निराकारा महाकाशः सुप्रविद्या विभावसुः ।
वासुकी [2]पतितत्राता त्रिवेणी तत्त्वदर्शकः ।। ४५ ।

---

१. एषामयमतिशयेनोत्कृष्ट उत्तमः । महाँश्चासौ उत्तमश्च ।
२. पतितानां त्राता त्राणकर्ता रक्षक इति यावत् ।

पताका पद्मवासी च त्रिवार्ता कीर्तिवर्धनः ।
धरणी धारणाव्याप्तो विमलानन्दवर्धनः ॥ ४६ ।
विप्रचित्ता कुण्डकारी विरजा कालकम्पनः ।
सूक्ष्माधारा अतिज्ञानी मन्त्रसिद्धिः प्रमाणगः ॥ ४७ ।
वाच्या वारणतुण्डश्च कमला कृष्णसेवकः ।
दुन्दुभिस्था वाद्यभाण्डो नीलाङ्गी वारणाश्रयः ॥ ४८ ।
वसन्ताद्या शीतरश्मिः प्रमाद्या शक्तिवल्लभः ।
खड्गिना चक्रकुन्ताढ्यः शिशिराल्पधनप्रियः ॥ ४९ ।
दुर्वाच्या मन्त्रनिलयः खण्डकाली कुलाश्रयः ।
वानरी हस्तिहाराद्यः प्रणया लिङ्गपूजकः ॥ ५० ।
मानुषी मनुरूपश्च नीलवर्णा विधुप्रभः ।
अधश्चन्द्रधरा कालः कमला दीर्घकेशधृक् ॥ ५१ ।
दीर्घकेशी विश्वकेशी त्रिवर्गा खण्डनिर्णयः ।
गृहिणी ग्रहहर्ता च ग्रहपीडा ग्रहक्षयः ॥ ५२ ।
पुष्पगन्धा वारिचरः क्रोधादेवी दिवाकरः ।
अञ्जना क्रूरहर्ता च केवला कातरप्रियः ॥ ५३ ।
पद्यामयी पापहर्ता विद्याद्या शैलमर्दकः ।
कृष्णजिह्वा रक्तमुखो भुवनेशी परात्परः ॥ ५४ ।
वदरी मूलसम्पर्कः क्षेत्रपाला बलानलः ।
[1]पितृभूमिस्थिताचार्यो विषया बादरायणिः ॥ ५५ ।
पुरोगमा पुरोगामी वीरगा रिपुनाशकः ।
महामाया महान्मायो वरदः कामदान्तकः ॥ ५६ ।
[2]पशुलक्ष्मीः पशुपतिः पञ्चशक्तिः क्षपान्तकः ।
व्यापिका विजयाच्छन्नो विजातीया वराननः ॥ ५७ ।

---

१. पितृणां भूमौ स्थित आचार्यः ।

२. पश्यतीति पशुस्तादृशी दर्शनशीला लक्ष्मीर्यस्याः सा ।

कटुमूर्तिः शाकमूर्तिस्त्रिपुरा [1]पद्मगर्भजः ।
अजाब्या जारकः प्रक्ष्या वातुलः क्षेत्रबान्धवा ॥ ५८ ।
अनन्तानन्तरूपस्थो लावण्यस्था प्रसञ्चयः ।
योगज्ञो ज्ञानचक्रेशो बभ्रमा भ्रमणुस्थितः ॥ ५९ ।
शिशुपाला भूतनाथो भूतकृत्या कुटुम्बपः ।
तृप्ताश्वत्थो वरारोहा वटुकः प्रोटिकावशः ॥ ६० ।
श्रद्धा श्रद्धान्वितः पुष्टिः पुष्टो रुष्टाष्टमाधवा ।
मिलिता मेलनः पृथ्वी तत्त्वज्ञानी चरुप्रिया ॥ ६१ ।
अलब्धा भयहानन्त्या दशनः प्राप्तमानसा ।
जीवनी परमानन्दो विद्याढ्या धर्मकर्मजः ॥ ६२ ।
[2]अपवादरताकाङ्क्षी विल्वानाभद्रकम्बलः ।
शिविवाराहनोन्मत्तो विशालाक्षी परन्तपः ॥ ६३ ।
गोपनीया सुगोप्ता च पार्वती परमेश्वरः ।
श्रीमातङ्गी त्रिपीठस्थो विकारी ध्याननिर्मलः ॥ ६४ ।
चातुरी चतुरानन्दः पुत्रिणी सुतवत्सलः ।
वामनी विषयानन्दः किङ्करी क्रोधजीवनः ॥ ६५ ।
चन्द्रानना प्रियानन्दः कुशला केतकीप्रियः ।
प्रचला तारकज्ञानी त्रिकर्मा नर्मदापतिः ॥ ६६ ।
कपाटस्था कलापस्थो विद्याज्ञा वर्धमानगः ।
त्रिकूटा त्रिविधानन्दो नन्दना नन्दनप्रियः ॥ ६७ ।
विचिकित्सा समाप्ताङ्गो मन्त्रज्ञा मनुवर्धनः ।
मन्त्रिका चाम्बिकानाथो विवाशी वंशवर्धनः ॥ ६८ ।
वज्रजिह्वा वज्रदन्तो विक्रिया क्षेत्रपालनः ।
विकारणी पार्वतीशः प्रियाङ्गी पञ्चचामरः ॥ ६९ ।

---

१. पद्मगर्भे जात इति । सप्तम्यां जनेर्डः इति डप्रत्ययः ।
२. अपवादे रतं रतिमाकाङ्क्षति या सा, कर्मणि उपपदेऽण् प्रत्ययस्ततो ङीप् ।

आंशिका वामदेवाद्या विमायाढ्या परापरः ।
पायाङ्गी परमैश्वर्या दाता भोक्त्री दिवाकरः ॥ ७० ।
[1]कामदात्री विचित्राक्षो रिपुरक्षा क्षपान्तकृत् ।
घोरमुखी घर्घराख्यो विलज्वा ज्वालिनीपतिः ॥ ७१ ।
ज्वालामुखी धर्मकर्ता श्रीकर्त्री कारणात्मकः ।
मुण्डाली पञ्चचूडाश्च त्रिशावर्णा स्थिताग्रजः ॥ ७२ ।
विरूपाक्षी बृहद्गर्भो राकिनी श्रीपितामहः ।
वैष्णवी विष्णुभक्तश्च डाकिनी डिण्डिमप्रियः ॥ ७३ ।
रतिविद्या रामनाथो राधिका विष्णुलक्षणः ।
चतुर्भुजा वेदहस्तो लाकिनी मीनकुन्तलः ॥ ७४ ।
मूर्धजा लाङ्गलीदेवः स्थविरा जीर्णविग्रहः ।
लाकिनीशा लाकिनीशः प्रियाख्या चारुवाहनः ॥ ७५ ।
जटिला त्रिजटाधारी चतुराङ्गी चराचरः ।
त्रिश्रोता पार्वतीनाथो भुवनेशी नरेश्वरः ॥ ७६ ।
पिनाकिनी पिनाकी च चन्द्रचूडा विचारवित् ।
जाड्यहन्त्री जडात्मा च जिह्वायुक्तो जरामरः ॥ ७७ ।
अनाहताख्या राजेन्द्रः काकिनी सात्त्विकस्थितः ।
मरुन्मूर्तिः पद्महस्तो विशद्धा शुद्धवाहनः ॥ ७८ ।
वृषली वृषपृष्ठस्थो विभोगा भोगवर्धनः ।
यौवनस्था युवासाक्षी लोकाद्या लोकसाक्षिणी ॥ ७९ ।
बगला चन्द्रचूडाख्यो भैरवी मत्तभैरवः ।
क्रोधाधिपा वज्रधारी इन्द्राणी वह्निवल्लभः ॥ ८० ।
निर्विकारा सूत्रधारी मत्तपाना दिवाश्रयः ।
[2]शब्दगर्भा शब्दमयो वासवा वासवानुजः ॥ ८१ ।

---

१. कामानां मनोरथानां दात्री समर्पयित्री ।
२. शब्दः शब्दतत्त्वं गर्भे यस्याः सा ।

दिक्पाला ग्रहनाथश्च ईशानी नरवाहनः ।
यक्षिणीशा [1]भूतिनीशो विभूतिर्भूतिवर्धनः ॥ ८२ ।
जयावती कालकारी कल्क्यविद्या विधानवित् ।
लज्जातीता लक्षणाङ्गो विषपायी मदाश्रयः ॥ ८३ ।
विदेशिनी विदेशस्थोऽपापा पापवर्जितः ।
अतिक्षोभा कलातीतो निरिन्द्रियगणोदया ॥ ८४ ।
वाचालो वचनग्रन्थिमन्दरो वेदमन्दिरा ।
पञ्चमः पञ्चमोदुर्गो दुर्गा दुर्गतिनाशनः ॥ ८५ ।
दुर्गन्धा गन्धराजश्च सुगन्धा गन्धचालनः ।
चार्वङ्गी चर्वणप्रीतो विशङ्का मरलारवित् ॥ ८६ ।
अतिथिस्था स्थावराद्या जपस्था जपमालिनी ।
वसुन्धरसुता तार्क्षी तार्किकः प्राणतार्किकः ॥ ८७ ।
तालवृक्षावृतोन्नासा तालजाया जटाधरः ।
जटिलेशी जटाधारी सप्तमीशः प्रसप्तमो ॥ ८८ ।
अष्टमीवेशकृत् काली सर्वः सर्वेश्वरीश्वरः ।
शत्रुहन्त्री नित्यमन्त्री तरुणी तारकाश्रयः ॥ ८९ ।
धर्मगुप्तिः सारगुप्तो मनोयोगा विषापहः ।
वज्रावीरः सुरासौरी चन्द्रिका चन्द्रशेखरः ॥ ९० ।
विटपीन्द्रा वटस्थानी भद्रपालः कुलेश्वरः ।
चातकाद्या चन्द्रदेहः प्रियाभार्या मनोयवः ॥ ९१ ।
तीर्थपुण्या तीर्थयोगी जलजा[2] जलशायकः ।
भूतेश्वरप्रियाभूतो भगमाला भगाननः ॥ ९२ ।
भगिनी भगवान् भोग्या भवतो भीमलोचनः ।
भृगुपुत्री भार्गवेशः प्रलयालयकारणः ॥ ९३ ।

---

१. भूतिनीनामीशो भूतिनीशः । भगवान् शिवः ।
२. जले जाता जलजा, कमला, लक्ष्मीरिति यावत् ।

रुद्राणी रुद्रगणपो रौद्राक्षी[1] क्षीणवाहनः ।
[2]कुम्भान्तका निकुम्भारिः कुम्भान्ती कुम्भिनीरगः।। ९४ ।

कूष्माण्डी धनरत्नाढ्यो महोग्राग्राहकः शुभा ।
शिविरस्था शिवानन्दः शवासनकृतासनी ।। ९५ ।

प्रसंशा समनः प्राज्ञा विभाव्या भव्यलोचनः ।
कुरुविद्या कौरवंशः कुलकन्या मृणालधृक् ।। ९६ ।

द्विदलस्था परानन्दो नन्दिसेव्या बृहन्नला ।
व्याससेव्या व्यासपूज्यो धरणी धीरलोचनः ।। ९७ ।

त्रिविधारण्या तुलाकोटिः कार्पासा खार्पराङ्गधृक्।
वशिष्ठाराधिताविष्टो वशगा वशजीवनः ।। ९८ ।

खड्गहस्ता खड्गधारी शूलहस्ता विभाकरः ।
अतुला तुलनाहीनो विविधा ध्याननिर्णयः ।। ९९ ।

अप्रकाश्या विशोध्यश्च चामुण्डा चण्डवाहनः ।
गिरिजा गायनोन्मत्तो मलामाली चलाधमः ।। १०० ।

पिङ्गदेहा पिङ्गकेशोऽसमर्था शीलवाहनः ।
गारुडी गरुडानन्दो विशोका वंशवर्धनः ।। १०१ ।

वेणीन्द्रा चातकप्रायो विद्याद्या दोषमर्दकः ।
अट्टहासा अट्टहासो मधुभक्षा मधुव्रतः ।। १०२ ।

मधुरानन्दसम्पन्ना माधवो मधुनाशिका ।
माकरी मकरप्रेमो माघस्था मघवाहनः ।। १०३ ।

विशाखा सुसखा सूक्ष्मा ज्येष्ठो ज्येष्ठजनप्रिया ।
आषाढनिलयाषाढो मिथिला मैथिलीश्वरः[3] ।। १०४ ।

---

१. रौद्रे भयानकेऽक्षिणी यस्याः सा इति भावः । षच् समासान्तः षित्वान् ङीष् ।

२. शवासना शवारूढो विषमा प्रेतवासनः ।
प्रेतलिङ्गस्थिता प्रौढो वारन्द्रा नवकान्तकः ।।

३. मैथिलोनामीश्वरः ।

शीतशैत्यगतो वाणी [1]विमलालक्षणेश्वरः ।
अकार्यकार्यजनको भद्रा भाद्रपदीयकः ॥ १०५ ।
प्रवरा वरहंसाख्यः पवशोभा पुराणवित् ।
श्रावणी हरिनाथश्च श्रवणा श्रवणाङ्कुरः ॥ १०६ ।
सुकर्त्री साधनाध्यक्षो विशोध्या शुद्धभावनः ।
एकशेषा शशिधरो धरान्तः स्थावराधरः ॥ १०७ ।
धर्मपुत्री धर्ममात्रो विजया जयदायकः ।
दासरक्षादि विदशकलापो विधवापतिः ॥ १०८ ।
विधवाधवलो धूर्तः धूर्ताढचो धूर्तपालिका ।
शङ्करः कामगामी च देवला देवमायिका ॥ १०९ ।
विनाशो मन्दराच्छन्ना मन्दरस्थो महाद्वया ।
अतिपुत्री त्रिमुण्डी च मुण्डमाला त्रिचण्डिका ॥ ११० ।
कर्कटीशः कोटरश्च सिंहिका सिंहवाहनः ।
नारसिंही नृसिंहश्च नर्मदा जाह्नवीपतिः ॥ १११ ।
त्रिविधस्त्री त्रिसर्गास्त्रो दिगम्बरो दिगम्बरी ।
मुञ्चानो मञ्चभेदी च मालञ्चा चञ्चलाग्रजः ॥ ११२ ।
कटुतुङ्गी विकाशात्मा ऋद्धिस्पष्टाक्षरोऽन्तरा ।
विरिञ्चिः प्रभवानन्दो नन्दिनी मन्दराद्रिधृक् ॥ ११३ ।
कालिकाभा काञ्चनाभो मदिराद्या मदोदयः ।
द्रविडस्था दाडिमस्थो मज्जातीता मरुद्गतिः ॥ ११४ ।
क्षान्तिप्रज्ञो विधिप्रज्ञा वीतिज्ञोत्सुकनिश्चया ।
अभावो मलिनाकारा कारागारा विचारहा ॥ ११५ ।
शब्दः कटाहभेदात्मा शिशुलोकप्रपालिका ।
अतिविस्तारवदनो [2]विभवानन्दमानसा ॥ ११६ ।

---

१. विमलाया लक्षणे ईश्वरः । अथवा लक्षयतीति लक्षणः, कर्तरि ल्युट् । विमलायाः लक्षणश्चासौ ईश्वरश्च इति विग्रहः ।

२. विभवस्यानन्दो मानसे यस्याः सा । व्यधिकरणबहुव्रीहिः ।

[1]आकाशवसनोन्मादी मेपुरा मांसचर्वणः ।
अतिकान्ता प्रशान्तात्मा नित्यगुह्या गभीरगः ॥ ११७ ।
त्रिगम्भीरा तत्त्ववासी राक्षसी पूतनाक्षरः ।
अभोगगणिका हस्ती गणेशजननीश्वरः ॥ ११८ ।
कुण्डपालककर्ता च त्रिरुण्डा रुण्डभालधृक् ।
अतिशक्ता विशक्तात्मा देव्याङ्गी नन्दनाश्रयः ॥ ११९ ।
भावनीया भ्रान्तिहरः कापिलाभा मनोहरः ।
आर्यदेवी नीलवर्णा सायको बलवीर्यदा ॥ १२० ।
सुखदो मोक्षदाताऽतो जननी वाञ्छितप्रदः ।
चातिरूपा विरूपस्थो वाच्या वाच्यविवर्जितः ॥ १२१ ।
महालिङ्गसमुत्पन्ना काकभेरी नदस्थितः ।
आत्मारामकलाकायः सिद्धिदाता गणेश्वरी ॥ १२२ ।
कल्पद्रुमः कल्पलता कुलवृक्षः कुलद्रुमा ।
सुमना श्रीगुरुमयी गुरुमन्त्रप्रदायकः ॥ १२३ ।
अनन्तशयनाऽनन्तो जलेशी जह्नुजेश्वरः ।
गङ्गा गङ्गाधरः श्रीदा भास्करेशो महाबला ॥ १२४ ।
गुप्ताक्षरो विधिरता विधानपुरुषेश्वरः ।
सिद्धकलङ्का कुण्डाली वाग्देवः पञ्चदेवता ॥ १२५ ।
अल्पातीता मनोहारो त्रिविधा तत्त्वलोचना ।
अमायापतिर्भूभ्रान्तिः पाञ्चजन्यधरोऽग्रजा ॥ १२६ ।
अतितप्तः कामतप्ता मायामोहविवर्जितः ।
आर्या पुत्रोश्वरः स्थाणुः कृशानुस्था जलाप्लुतः ॥ १२७ ।
वारुणी मदिरामत्तो मांसप्रेमदिगम्बरा ।
अन्तरस्थो देहसिद्धा [2]कलानलसुराद्रिपः ॥ १२८ ।

---

१. आकाश एव वसनं यस्य, स चासौ उन्मादी चेति बहुव्रीहिगर्भस्तत्पुरुषः ।

२. कलारूपोऽनलोऽग्निर्यस्य सः । सुराद्रिं सुमेरुं पाति रक्षति इति सुराद्रिपः । पुनः कर्मधारयः ।

आकाशवाहिनी देवः काकिनीशो दिगम्बरी ।
काकचञ्चुपुटमधुहरो गगनमाब्धिपा ॥ १२९ ।
मुद्राहारी महामुद्रा [1]मीनपो [2]मीनभक्षिणी ।
शाकिनी शिवनाथेशः काकोर्ध्वेशी सदाशिवः ॥ १३० ।
कमला कण्ठकमलः स्थायुकः प्रेमनायिका ।
मृणालमालाधारी च मृणालमालमालिनी ॥ १३१ ।
अनादिनिधना तारा दुर्गतारा निराक्षरा ।
सर्वाक्षरा सर्ववर्णा सर्वमन्त्राक्षमालिका ॥ १३२ ।
आनन्दभैरवो नीलकण्ठो ब्रह्माण्डमण्डितः ।
शिवो विश्वेश्वरोऽनन्तः सर्वातीतो निरञ्जनः ॥ १३३ ।
इति ते कथितं नाथ त्रैलोक्यसारमङ्गलम् ।
भुवनमङ्गलं नाम महापातकनाशनम् ॥ १३४ ।
अस्य प्रपठनेऽपि च यत्फलं लभते नरः ।
तत्सर्वं कथितुं नालं कोटिवर्षशतैरपि ॥ १३५ ।
तथापि तव यत्नेन फलं शृणु दयार्णव ।
राजद्वारे नदीतीरे संग्रामे विजनेऽनले ॥ १३६ ।
शून्यागारे निर्जने वा घोरान्धकाररात्रिके ।
चतुष्टये श्मशाने वा पठित्वा षोडशे दले ॥ १३७ ।
रक्ताम्भोजैः पूजयित्वा मनसा कामचिन्तयन् ।
घृताक्तैर्जुहुयान्नित्यं नाम प्रत्येकमुच्चरन् ॥ १३८ ।
मूलमन्त्रेण पुटितमाज्यं वह्नौ समर्पयेत् ।
अन्तरे स्वसुखे होमः सर्वसिद्धिसुखप्रदः ॥ १३९ ।
सद्योमधुयुतैर्मांसैः सुसुखे मन्त्रमुच्चरन् ।
प्रत्येकं नामपुटितं हुत्वा पुनर्मुखाम्बुजे ॥ १४० ।

---

१. मीनं पाति रक्षति इति मीनपः ।
२. मीनं भक्षयति तच्छीला, ताच्छील्ये णिनिः कर्तरि ।

कुण्डलीरसजिह्वायां जीवन्मुक्तो भवेन्नरः ।
धृत्वा वापि पठित्वा वा स्तुत्वा वा विधिना प्रभो ॥ १४१ ।

महारुद्रो भवेत्साक्षान्मम देहान्वितो भवेत् ।
योगी ज्ञानी भवेत् सिद्धः सारसङ्केतदर्शकः ॥ १४२ ।

अपराजितः सर्वलोके किमन्यत् फलसाधनम् ।
धृत्वा राजत्वमाप्नोति कण्ठे पृथ्वीश्वरो भवेत् ॥ १४३ ।

दक्षहस्ते तथा धृत्वा धनवान् गुणवान् भवेत् ।
[1]अकालमृत्युहरणं [2]सर्वव्याधिनिवारणम् ॥ १४४ ।

हुत्वा राजेन्द्रनाथश्च महावाग्मी सदाऽभयः ।
सर्वेषां मथनं कृत्वा गणेशो मम कार्तिकः ॥ १४५ ।

देवानामधिपो भूत्वा सर्वज्ञो भवति प्रभो ।
यथा तथा महायोगी भ्रमत्येव न संशयः ॥ १४६ ।

प्रातःकाले पठेद् यस्तु मस्तके स्तुतिधारकः ।
जलस्तम्भं करोत्येव रसस्तम्भं तथैव च ॥ १४७ ।

राज्यस्तम्भं नरस्तम्भं वीर्यस्तम्भं तथैव च ।
विद्यास्तम्भं सुखस्तम्भं क्षेत्रस्तम्भं तथैव च ॥ १४८ ।

राजस्तम्भं धनस्तम्भं ग्रामस्तम्भं तथैव च ।
मध्याह्ने च पठेद् यस्तु वह्निस्तम्भं करोत्यपि ॥ १४९ ।

कालस्तम्भं वयःस्तम्भं श्वासस्तम्भं तथैव च ।
रसस्तम्भं वायुस्तम्भं बाहुस्तम्भं करोत्यपि ॥ १५० ।

सायाह्ने च पठेद् यस्तु कण्ठोदरे च धारयन् ।
मन्त्रस्तम्भं शिलास्तम्भं शास्त्रस्तम्भं करोत्यपि ॥ १५१ ।

हिरण्यरजतस्तम्भं वज्रस्तम्भं तथैव च ।
अकालत्वादिसंस्तम्भं वातस्तम्भं करोत्यपि ॥ १५२ ।

---

१. अकाले यो मृत्युः, तस्य हरणम् ।
२. सर्वे व्याधयस्तेषां विनाशनम्, विनाशकम्, कर्तरि ल्युट् ।

पारदस्तम्भनं शिल्पकल्पना ज्ञानस्तम्भनम् ।
आसनस्तम्भनं व्याधिस्तम्भनं बन्धनं रिपोः ।। १५३ ।

षट्पद्मस्तम्भनं कृत्वा योगी भवति निश्चितम् ।
वन्ध्या नारी लभेत् पुत्रं सुन्दरं सुमनोहरम् ।। १५४ ।

भ्रष्टो मनुष्यो राजेन्द्रः किमन्ये साधवो जनाः ।
श्रवणान्मकरे लग्ने चित्रायोगे च पर्वणि ।। १५५ ।

हिरण्ययोगे वायव्यां लिखित्वा माघमासके ।
वैशाखे राजयोगे वा रोहिण्याख्या विशेषतः ।। १५६ ।

श्रीमद्भुवनमङ्गलं नाम यशोदातृ भवेद् ध्रुवम् ।
जायन्ते राजवल्लभा अमराः खेचरा लिखनेन ।। १५७ ।

धर्मार्थकाममोक्षं च प्राप्नुवन्ति च पाठकाः ।
कीर्तिरात्मदृष्टिपातं लभते नात्र संशयः ।। १५८ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे शाकिनीसदाशिवस्तवनमङ्गलाष्टोत्तरसहस्रनामविन्यासो नाम एकोनसप्ततितमः पटलः ।।

अथ सप्ततितमः पटलः

श्रीआनन्दभैरव उवाच—

कथितं शाकिनीसारं सदाशिवफलोदयम् ।
श्रुतं परमकल्याणं भेदभाषाक्रमोदयम् ।। १ ।

इदानीं श्रोतुमिच्छामि कवचं सारदुर्लभम् ।
यस्य विज्ञानमात्रेण भवेत् साक्षात् सदाशिवः ।। २ ।

वद कान्ते शब्दमयि यदि स्नेहोऽस्ति मां प्रति ।
आनन्दभैरवं नत्वा सोवाचानन्दभैरवी ।। ३ ।

श्रीआनन्दभैरवी उवाच—

गुरोः परमकल्याणं कवचं कथये तव ।
सदाशिवस्य शाकिन्या भैरवानन्दविग्रह ।। ४ ।

शृणुष्व कामदं नामाद्भुतं कवचमङ्गलम् ।
त्रैलोक्यसारभूतं च सर्वज्ञानविवर्धनम् ।। ५ ।

सर्वमन्त्रौघनिकरं ज्ञानमात्रेण सिद्धचति ।
सर्वगूढप्रियानन्दं सामरस्यं कुलान्तरम् ।। ६ ।

प्रचण्डचण्डिकातुल्यं सर्वनिर्णयसाक्षिणम् ।
सर्वबुद्धिकरानन्दं कुलयोगिमनोगतम् ।। ७ ।

रामसेव्यं शिवं शम्भुसेवितं विषनाशनम् ।
अप्रकाश्यं महायोगं धनारोग्यविवर्धनम् ।। ८ ।

सर्वसौभाग्यजननं सर्वानन्दकरं परम् ।
सर्वतन्त्रदुर्लभं यत् कथितं रुद्रयामले ।। ९ ।

अस्य श्रीशाकिनीसदाशिवकामनानाममहाकवचस्य सदाशिवऋषिर्गायत्रीच्छन्दः शाकिनी देवता सकलह्रीं जीवबीजं मायास्त्रशक्तिः कामस्वाहा कीलकं वज्रं दंष्ट्राघोरघर्घरामहोग्राशाकिनीशक्तिः सदाशिवमहामन्त्रसिद्धये विनियोगः ।।

ॐ प्रभावा सदा पातु महाकाशाधिशाकिनी ।
त्रिगुणा चण्डिका पातु क्रोधदंष्ट्रा करालिनी ।। १० ।
[1]अनन्ताऽनन्तमहिमा महास्त्रदलपङ्कजम् ।
पूर्वाह्णं पातु सततं गायत्री सविता मम ।। ११ ।
आकाशवाहिनी देवी शिरोमङ्गलमद्भुतम् ।
सर्वदा पातु मे गुह्यं लिङ्गं चक्रं सुधामयम् ।। १२ ।
महामण्डलमध्यस्था पातु मे भालमण्डलम् ।
सहस्रशतकोटीन्दुयोगिनीगणमण्डलम् ।। १३ ।
महाचक्रेश्वरी पातु महाचक्रेश्वरो मम ।
मुखाब्जं चण्डिका देवी दन्तावलिमनन्तकः ।। १४ ।
जिह्वाग्रं तालुमूलस्था तालुमूलं मनोजवः ।
तीक्ष्णदंष्ट्रा दन्तमध्यं कण्ठाग्रं चिबुकं शिवः ।। १५ ।
सदा पातु षोडशारं शाकिनी श्रीसदाशिवः ।
कण्ठमध्यस्थितं पातु महामोहविनाशिनी ।। १६ ।
प्रेतराजः सदा पातु महादेवी स्वपङ्कजम् ।
विद्यादेवी महाशक्तिः कूटस्थानं सदाशिवः ।। १७ ।
महाकाशावलघ्नी मे धूम्रां भोजञ्च धूर्जटी ।
कौमुदी पटलाङ्गी मे वर्णंषोडशसंज्ञकम् ।। १८ ।
अकारादिकान्तवर्णान् श्रीदेवी परिपातु मे ।
[2]हेमचित्ररथस्था मे चित्रिणी पातु मे मधु ।। १९ ।
अपर्णा या विशुद्धं मे षोडशीषोडशाक्ष्यकम् ।
पञ्चदुर्गा सहदेवः प्रत्येकं पातु मे दलम् ।। २० ।
दीपमासहल्कीं मे प्रवरा पातु मे बला ।
व्यापिनी चानवच्छिन्ना पातु मे दलमण्डलम् ।। २१ ।

---

१. अनन्तानन्तो महिमा यस्यासौ बहुव्रीहिसमासेन साधुता बोध्या ।
२. हेम्नः सुवर्णस्य चित्रम्, तदेव रथस्तत्र तिष्ठति या सा ।

अकालतारिणी दुर्गा [1]शुक्रं चक्रं सदावतु ।
शाकिनीशो महामाया परिवारान्विताऽवतु ॥ २२ ।
पञ्चरश्मिर्नीलकण्ठो मधुपूरं स्वपीठकम् ।
सदा पातु कण्ठपङ्केरुहाश्रयस्वरानपि ॥ २३ ।
[2]कण्ठस्वर्गः सदा पातु कन्दर्पेशो मनोगतिः ।
शाकिनी शाकविभवा शाकेशी शाकसम्भवा ॥ २४ ।
शाकम्भरीश्वरा पातु सुमना दलषोडशम् ।
सदाशिवः सदा पातु परिवारगणैः सह ॥ २५ ।
हृदयं शाकिनी देवी शिरःस्थानं सदावतु ।
काकिनीसहितं पातु द्वादशारं कुलेश्वरी ॥ २६ ।
दलद्वादशकं पातु कामनाथः सदाशिवः ।
अभेदरूपिणी पातु कादिठान्ताक्षरं मम ॥ २७ ।
वाणी मे हृदयग्रन्थिर्देशं तु कपिलेश्वरः ।
पायान्मेघं च सूर्यास्या विमाया हृत्सु कर्णिकाम् ॥ २८ ।
तालहस्ता महावाणी पातु मे हृदयान्तरम् ।
शोषिणी मोहिनी वह्निः पातु मे हृदयाम्बुजम् ॥ २९ ।
पिलापिप्पलादेशो रतिर्मे हृदयेप्सितम् ।
योगिनीकुलदन्तश्च पातु मे हृत्स्वरानपि ॥ ३० ।
केकरेशो गूढसंज्ञा वज्रधारी हृदम्बुजम् ।
एकलिङ्गी सदा पातु हृदयान्तः शिवं मम ॥ ३१ ।
तदधो मण्डलं पातु भेदाभेदविवर्जिता ।
अकाललक्षणः पातु पाशिनी नाभिमण्डलम् ॥ ३२ ।
कालकूटस्वरूपो मे नाभिपद्मं प्रपातु मे ।
चन्द्रचूडा विधुमुखी शाकिनी मे दशाम्बुजम् ॥ ३३ ।

---

१. 'क'पुस्तके सुक्रमिति पाठः ।

२. कण्ठे स्वर्गो यस्य स. । यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम् ॥

त्रिवृत्ताकारमुद्रा मे पातु रुद्रश्च लाकिनीम् ।
त्रिखण्डारोहणः पातु डादिफान्ताक्षरानपि ॥ ३४ ।

कालिका कपिला कृष्णा घनावाला कपालिनी ।
ललिता तारिणी सर्वा महामाया दशच्छदम् ॥ ३५ ।

परिपातु कामदुर्गा लाकिनी पातु मे सदा ।
सदाशिवः पातु नित्यं मणिपूरं कुलस्थलम् ॥ ३६ ।

जाडचनाशकरी दुर्गा मुण्डमालाविभूषिता ।
मां पातु सप्तरोधात्मा केशवेशी महापदम् ॥ ३७ ।

अभया चण्डिका कृष्णा कालिका कुलपण्डिता ।
वज्रवर्णा धारणाख्या धरा धात्री क्षमा रमा ॥ ३८ ।

वासुकी वसुधा वाच्या सर्वाणी सर्वमङ्गला ।
पार्वती सर्वशक्तिस्था पार्वणे परिपातु माम् ॥ ३९ ।

रणे राजकुले द्यूते वादे मानापमानके ।
गेहेऽरण्ये प्रान्तरे च जले चानलमध्यके ॥ ४० ।

सर्वाणी सर्वदा पातु महातन्त्रार्थभूषिता ।
विजया पद्मिनी जाया जानकी कमलावती ॥ ४१ ।

एताः पान्तु दिग्विदिक्षु महापातकनाशनाः ।
अन्तरं पातु लिङ्गस्था लिङ्गमूलाम्बुजं मम ॥ ४२ ।

कर्णिकां पातु सततं काञ्चीपीठस्थिता शिवा ।
अतिवेगान्विता पातु वह्निमण्डलमेव मे ॥ ४३ ।

राक्षसीशा सदा पातु जम्बुद्वीपनिवासिनी ।
जाह्नवी भास्करा मौना मलयस्था मलाङ्गजा ॥ ४४ ।

मतितप्ता पापहन्त्री परिपातु विभाकरी ।
लयस्थानं सदा पातु कुञ्जरेश्वरसंस्थिता ॥ ४५ ।

विंशत्यर्णमहाविद्या लम्बमाना कुलस्थली ।
मन्दिरे पातु मां नित्यं वित्तसंहारकारिणी ॥ ४६ ।

अनन्तशयना पातु वटमूलनिवासिनी ।
प्रलये मां काली पातु वटपत्रनिवासिनी ।। ४७ ।

केवलाख्या सदा पातु महाकूर्चस्वरूपिणी ।
आयुरारोग्यदात्री मे धनं राज्यं सदावतु ।। ४८ ।

कामरूपं गृहं पीठं परिपातु महाबला ।
बलाका घोरदंष्ट्रा मे उदरं पातु सर्वदा ।। ४९ ।

सर्वरोगहरा पातु मुण्डमालाविभूषिता ।
आनन्दो नन्दनाथो मे हृदूर्ध्वाब्जं सदाऽवतु ।। ५० ।

षट्पद्मं सर्वदा पातु नानारूपविहारिणी ।
अकलङ्का निराधारा नित्यपुष्टा निरिन्द्रिया ।। ५१ ।

षोडशोर्ध्वं महापद्मं द्विदलं पातु सर्वदा ।
दिग्विदिक्षु सदा पातु शाकिन्याद्यष्टशक्तयः ।। ५२ ।

अतिगुप्तस्थलं पातु पापनाशकरी परा ।
क्षालनाख्या लिङ्गगुह्ये पातु मे पावनं प्रभा ।। ५३ ।

विप्रचित्ता कोटराक्षी लिपिभूता सरस्वती ।
चतुर्दलं सदा पातु विभूतिः कामया सह ।। ५४ ।

पान्तु विद्याः सदैताश्च [1]रिपुपक्षविनाशनाः ।
कटिदेशं सदा पातु चामुण्डा शूलधारिणी ।। ५५ ।

त्रिनेत्रा सर्वदा पातु भूर्भुवःस्वःस्वरूपिणी ।
वसन्तादिकलाः पान्तु पामरोग्रप्रतापिनी ।। ५६ ।

षड्भुजा सर्वदा पातु वेदहस्ता प्रपातु माम् ।
अतिविद्या सर्वविद्या चण्डविद्या प्रपातु माम् ।। ५७ ।

वारुणी मदिरा पातु सर्वाङ्गं शाकिनी मम ।
गृहोदरी सदा पातु सर्वाङ्गं वज्रधारिणी ।। ५८ ।

उल्कामुखी सदा पातु भृगुवंशसमुद्भवा ।
अकालतारिणी दुर्गा ललिता धर्मधारिणी ।। ५९ ।

---

१. रिपूणां पक्षास्तान् विनाशयति सः । कर्तरि ल्युट्प्रत्ययो बाहुलकात् ।

विंशत्यर्णा महाविद्या सर्वत्र सर्वदाऽवतु ।
हसकलहरी विद्या परिपातु सदाशिवा ।। ६० ।

सहस्रवदना वाणी परिपातु जलोदरी ।
जलरूपा सदा पातु महोज्वलकलेवरा ।। ६१ ।

षोडशी सकलहरी सर्वाणी पातु पार्वती ।
महामत्ता सदा पातु कामनाथप्रपूरका ।। ६२ ।

वामदेवी सदा पातु सर्वाङ्गे देहदेवता ।
कामपीठस्थिता दुर्गा परिवारगणावृता ।। ६३ ।

सदाशिवः सदा पातु सामवेदस्वरूपगा ।
श्मशानवासिनी देवी महाकालसमन्विता ।। ६४ ।

आर्या देवी सदा पातु माता पातु महाकला ।
सर्वत्र कपिला पातु महाभगवतीश्वरी ।। ६५ ।

इति ते कथितं नाथ महाविद्याफलप्रदम्[1] ।
कवचं दुर्लभं लोके तव स्नेहात् प्रकाशितम् ।। ६६ ।

अतिगुह्यतरं ज्ञानं कवचं सर्वसिद्धिदम् ।
[2]अमलोदारचित्तः सन् पूजयित्वा सदाशिवम् ।। ६७ ।

तथा श्रीशाकिनीदेव्याः पूजनं सुमहत्फलम् ।
राज्यदं धनदं वाञ्छासिद्धिदं धर्मसिद्धिदम् ।। ६८ ।

वाचां सिद्धि करे प्राप्य अष्टसिद्धिः करे भवेत् ।
काकिनीदर्शनं प्राप्य शाकिनीदर्शनं भवेत् ।। ६९ ।

मन्त्रसिद्धि तन्त्रसिद्धि क्रियासिद्धि लभेद् ध्रुवम् ।
आकाशगामिनी सिद्धिः करे तस्य विराजते ।। ७० ।

पुरुषो दक्षिणे बाहौ योषिद्वामभुजे तथा ।
धृत्वा कवचराजं तु राजत्वं लभते ध्रुवम् ।। ७१ ।

---

१. महाविद्यायाः फलं प्रददाति यः, सः, तमित्यर्थः ।
२. अमलं कामक्रोधादिमलशून्यमुदारं च चित्तं यस्यासौ ।

महापातककोटीश्च हत्वा राजत्वमालभेत् ।
वने वृक्षतलेऽश्वत्थमूले स्थित्वा पठेद् यदि ॥ ७२ ।
त्रिसन्ध्यं दशधा जप्त्वा शतधा वा सहस्रधा ।
स भवेत् कल्पवृक्षेशो भूमीशो नात्र संशयः ॥ ७३ ।
कोटिवर्षसहस्राणि चिरजीवी स योगिराट् ।
महासिद्धो भवेद् धीमान् महापातकनाशकृत् ॥ ७४ ।
मासार्धेन भवेद् योग्यो विप्रो गुणसमन्वितः ।
वर्षैकेण क्षत्रियश्च वैश्यो वर्षचतुष्टये ॥ ७५ ।
शूद्रो द्वादशवर्षेण योगी भवति पाठतः ।
एवं महाफलं नित्यं कवचं यः पठेत् सुधीः ॥ ७६ ।
[1]भोगमोक्षौ करे तस्य किमन्यैर्बहुभाषितैः ॥ ७७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे सदाशिवशाकिनीकवचफलादेशो नाम सप्ततितमः पटलः ॥

●

---

१. भोग ऐहलौकिकसुखसाक्षात्कारः, मोक्षः पारलौकिकानन्दरूपता, द्वयोरनयोरनायासेन सिद्धिः ।

अथैकसप्ततितमः पटलः

श्रीआनन्दभैरवी उवाच—

श्रूयतां देव कल्याण त्रैलोक्यविजयात्मक ।
सदाशिवमनुं नाथ महापातकनाशनम् ।। १ ।
आयुरारोग्यफलदं सर्वशत्रुनिवारणम् ।
अतिगुह्यतमं ध्यानं बालिशानां सुखावहम् ।। २ ।
आद्याबीजं समुद्धृत्य कामबीजं तदन्तरम् ।
रुद्रबीजं रमाबीजं कालबीजं ततः सदा ।। ३ ।
शिवनाथप्रियानन्दं ज्ञानं देहि युगं द्विठः ।
[1]फणिबीजं समुद्धृत्य राजराजेश्वरीमनुम् ।। ४ ।
वैष्णवीबीजमुद्धृत्य शिवबीजं तदन्तिके ।
सदाशिवाय शब्दान्ते हृल्लेखा वह्निसुन्दरी ।। ५ ।
आदिबीजं समुद्धृत्य ततो वामतनुस्थिता ।
शब्दबीजं मूलबीजं सदाशिव नमोऽस्तु ते ।। ६ ।
[2]द्विठान्तोऽयं मनुः श्रेष्ठः सर्वरत्नसमृद्धिदः ।
वासुदेवसमो विद्वान् स भवेन्नात्र संशयः ।। ७ ।
वैष्णवो वा महाशाक्तो महाशैवोऽथवा पुनः ।
गृह्णीयान्मनुराजेन्द्रं यत्प्रसादाच्छिवो भवेत् ।। ८ ।
विमला वाक्यसिद्धिः स्यात्कार्यसिद्धिर्न संशयः ।
शिवमन्त्रं प्रवक्ष्यामि येन सर्वार्थपारगः ।। ९ ।
अकालेऽपि च योगी स्यात् कामधेनुस्वरूपवान् ।
हालाहलं समुद्धृत्य ततो माहेशबीजकम् ।। १० ।

---

१. फणिनः शेषस्य भगवतो बीजम् ।
२. द्वौ ठौ ठकारौ अन्तौ अन्तावयवौ यस्य मनोः मन्त्रस्य स मनुः ।

श्रीबीजं धर्मबीजञ्च क्षेत्रपालमनुं तथा ।
नीलकण्ठमनुं पश्चात् प्रियागुं बीजमुद्धरेत् ।। ११ ।

शिवबीजं तदन्ते तु सदाशिवाय धीमहि ।
तन्नः शिवः प्रचोशब्दाद्दयादेवं द्विठो मनुः ।। १२ ।

आवाहनं पाद्यमर्घ्यमाचमनीयमनन्तरम् ।
गन्धपुष्पविल्वपत्रकोटिभिः परिपूजयेत् ।। १३ ।

स्तोषणं पोषणं पुष्टं दारणं मारणं तथा ।
सुप्तं कलहमुक्तानां पूजनं सुमहत्फलम् ।। १४ ।

शर्वादीन् परिपूज्याथ सद्योजातादिमर्चयेत् ।
प्राणायामत्रयं कृत्वा जपेत् तद्गतमानसः ।। १५ ।

देवं पिनाकपाणिं च पञ्चवक्त्रं त्रिलोचनम् ।
शूलखट्वाङ्गमुशलगदापाणिं महाभुजम् ।। १६ ।

देवदेवं महादेवं सर्वभूतात्मकं गुरुम् ।
त्रैलोक्यरक्षकं शम्भुं भुजङ्गहारभूषितम्[१] ।। १७ ।

अट्टहासादिशक्तीनां सहस्रगणपण्डितम् ।
वृषासनस्थं नीलेशं नीलकण्ठं सदाशिवम् ।। १८ ।

एवं ध्यात्वा जपेन्मन्त्रं सहस्रं प्रत्यहं शुचिः ।
विशेषेण दिवारात्रौ समभागेन सञ्जपेत् ।। १९ ।

तत्रैव त्र्यम्बकं ध्यात्वा तत्तद्रूपेण साधकः ।
तद्बुध्वा पूजयित्वा च त्र्यम्बकं यो जपेन्नरः ।। २० ।

तस्य हस्ते त्रिभुवनं हस्तामलकवद्[२] भवेत् ।
भोगमोक्षौ करे तस्य किमन्यत् साधनेन च ।। २१ ।

सदाशिवेन मनुना सम्पुटीत्य यो जपेत् ।
तस्य सर्वार्थसिद्धिः स्याद् यद्यन्मनसि वर्तते ।। २२ ।

---

१. भुजङ्गस्य सर्पस्य हारेण भूषितम् ।

२. हस्ते आमलकं हस्तामलकम्, सुप्सुपेति समासः ।

प्रणवं पूर्वमुच्चार्य त्र्यम्बकं तदनन्तरम् ।
यजामहे समुद्धृत्य सुगन्धि पुष्टिवर्धनम् ।। २३ ।
उर्वारुकमिवान्ते तु बन्धनात् पदमुद्धरेत् ।
मृत्योर्मुक्षीयशब्दान्ते[1] मामृताद्वह्निसुन्दरी ।। २४ ।
सदाशिवेन पुटितं मन्त्रं यो जपते नरः ।
स भवेत् कल्पतरुपः पूजनेनामृतं लभेत् ।। २५ ।
सर्वकालं सुखी भूत्वा मोक्षमाप्नोति निश्चितम् ।
अन्यं त्र्यम्बकमन्त्रं तु शृणुष्व सर्वकामदम् ।। २६ ।
राज्यदं धनदं मन्त्रं महापातकनाशनम् ।
शब्दब्रह्ममयं साक्षात् सर्वज्ञानं लभेद् ध्रुवम् ।। २७ ।
कालकूटं समुद्धृत्य मृत्युञ्जयं समुद्धरेत् ।
महापातकराशि मे हरयुग्मं ततो द्विठः ।। २८ ।
अन्यमन्त्रं प्रवक्ष्यामि सावधानोऽवधारय ।
विद्याद्ये प्रणवं दत्त्वा कामबीजद्वयं द्वयम् ।। २९ ।
मृत्युञ्जयं क्षेत्रपालं विशुद्धेशं स्थिरं कुरु ।
युगलं कामबीजान्तं देव्यन्ते वह्निसुन्दरी ।। ३० ।
अन्यं मन्त्रं प्रवक्ष्यामि सावधानोऽवधारय ।
कामकालीयुगं पश्चात् संज्ञाबीजद्वयं ततः ।। ३१ ।
वटुकं कामबीजञ्च षोडशारं प्रकाशय ।
युगलं शक्तिकूटञ्च शिवबीजं ततो द्विठः ।। ३२ ।
पूर्ववत् सकलं कुर्याज्जपपूजादिकं प्रभो ।
सदाशिवपूजनं च ध्यानहोमादितर्पणम् ।। ३३ ।
अन्यं मन्त्रं प्रवक्ष्यामि महादेवं समुद्धरेत् ।
वटुकं क्षेत्रपालं च गणेशस्य मनुं ततः ।। ३४ ।

---

१. प्रणव ओङ्कार आदिः मामृताद् अन्त इति श्रुत्वा मरुत्तरादियानचालनमन्यद् वा यत् कार्यं क्रियते, तत्रैव पूर्णा सिद्धिर्लभ्यते । अत्र नास्ति सन्देहः ।

कण्ठाब्जं मे सदानन्द प्रकाशय युगं द्विठः ।
अस्यापि ध्यानमाकृत्य जप्त्वा लक्षं समापयेत् ।। ३५ ।

करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
क्रमसमयसपर्याविघ्नविच्छेदहेतु-
र्जयति वटुकनाथः सिद्धिदः कौलिकानाम् ।। ३६ ।

वन्दे बालं स्फटिकसदृशं कुण्डलोल्लासिवक्त्रं
दिव्याकल्पैर्नवमणिमयैः किङ्किणीनूपुराद्यैः ।
दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं
हस्ताब्जाभ्यां दधतमनिशं शूलदण्डौ दधानम् ।। ३७ ।

उद्यद्भास्करसन्निभं त्रिनयनं रक्ताङ्गरागोज्ज्वलं
स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ।
नीलग्रीवमुदारकौस्तुभधरं शीतांशुखण्डोज्ज्वलं
वन्धूकारुणवाससं भयहरं देवं सदा भावये ।। ३८ ।

देवेशं वटुकं सदाशिवगुरुं त्रैलोक्यरक्षाकरं
नानालङ्कृतभूषणं शशधरं बन्धूकपुष्पोज्ज्वलम् ।
श्वेतश्वेतविभूषणं मणिमयं कृष्णं सनीलं शिवं
देवानामधिदैवतं सुखकरं नाथं सदा भावये ।। ३९ ।

एवं ध्यात्वा महायोगी नीलकण्ठं सदाशिवम् ।
कण्ठपद्मे स्थिरो भूत्वा शाकिनीदर्शनं लभेत् ।। ४० ।

भूत्वा महावीरनाथो मनोयोगमवाप्नुयात् ।
सिद्धमन्त्रं प्रवक्ष्यामि येन सर्वत्र पारगः ।। ४१ ।

[1]आकाशगामिनी सिद्धिः स्तम्भनादिसुसिद्धिभाक्[2] ।
वाक्सिद्धिं कायसिद्धिञ्च जरामरणवर्जितः ।। ४२ ।

---

१. आकाशे स्पष्टतया गन्तुमर्हति या सा ।

२. स्तम्भनमवरोधः, तदादिर्यासां सुसिद्धीनाम्, ता भजत इति ।

[1]शिवबीजं समुद्धृत्य विजयाबीजमुद्धरेत् ।
कामकालीयुगान्ते तु रमात्रिकूटमुद्धरेत् ॥ ४३ ।
बीजत्रयं समुद्धृत्य (स्फें स्फें स्फें) कामनाथाय शब्दतः ।
सदाशिवाय शब्दान्ते वरदाय नमो द्विठः ॥ ४४ ।
एतन्मन्त्रप्रसादेन योगी स्यान्नात्र संशयः ।
अन्यं मन्त्रं प्रवक्ष्यामि यथावदधारय ॥ ४५ ।
क्षान्तबीजं समुद्धृत्य लान्तबीजत्रयं तथा ।
भवानीबीजमुद्धृत्य सङ्घट्टयुगलं ततः ॥ ४६ ।
क्रोधराजबीजयुग्मं लक्ष्मीशपतये ततः ।
वरदाय हृत्पदान्ते कामदाय ततो द्विठः ॥ ४७ ।
अन्यं मन्त्रं प्रवक्ष्यामि येन योगी भवेन्नरः ।
गगनाबीजमुद्धृत्य कामराजं समुद्धरेत् ॥ ४८ ।
मायान्ते देवदेवाय हृच्छिवाय द्विठो मनुः ।
एतन्मन्त्रप्रसादेन किन्न सिद्धयति भूतले ॥ ४९ ।
अनायासेन योगी स्यात् किं पुनः साधनेन च ।
केवलं जपमात्रेण योगी स्यान्नात्र संशयः ॥ ५० ।
अन्यं वक्ष्ये भैरवेन्द्र प्रणवं कामराजकम् ।
श्रीबीजं वह्नियुगलं रिपुहरयुगं ततः ॥ ५१ ।
सिद्धिं देहि ततः स्वाहा[2] मन्त्रोऽयं योगिदुर्लभः ।
पूर्ववद्धयानमेवं हि कृत्वाऽमरत्वमश्नुते ॥ ५२ ।
अन्यं मन्त्रं प्रवक्ष्यामि येन पीठस्थिरो भवेत् ।
अमादिबीजमाभाष्य ततो महापदं स्मरेत् ॥ ५३ ।
कालाय विकरणाय कलान्ते तु समुद्धरेत् ।
बलाय बलविकरणाय षोडशारदलं ततः ॥ ५४ ।

---

१. सम्प्रदायगम्यं वाऽस्य ।
२. सांङ्केतिकोऽयं मन्त्रः । अत्रैव वर्तते तदीयः संकेतः ।

निवेशाय युगं वित्तं स्थापयान्ते सदाशिव ।
काकिनीशामावह्निसुन्दरीकामदो मनुः ॥ ५५ ।
एकाक्षरं प्रवक्ष्यामि येन सिद्धो मनुर्भवेत् ।
क्षान्तबीजं बिन्दुयुक्तं चन्द्रबीजं तथोद्धरेत् ॥ ५६ ।
अधो दन्तयुतं कृत्वा जपेत् तद्गतमानसः ।
प्रत्येकदलमध्ये तु ध्यात्वा देवं सदाशिवम् ॥ ५७ ।
अनायासेन सिद्धिः स्यात् प्राणरक्षा सदा भवेत् ।
पुनरेकाक्षरं वक्ष्ये येन सिद्ध्यन्ति मानवाः ॥ ५८ ।
न देयं पाशवेभ्यश्च निन्दकेभ्यो विशेषतः ।
शिवं चन्द्रबिन्दुयुक्तं महामन्त्रं [1]प्रकीर्तितम् ॥ ५९ ।
अस्य साधनमात्रेण योगिनां वल्लभो भवेत् ॥ ६० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे एकसप्ततितमः पटलः ॥

●

---

१. चन्द्रबिन्दुरनुस्वारस्तेन संयुक्तस्यास्य मन्त्रस्य महत्त्वं परिज्ञेयम्, यद्यपि मन्त्रशब्दो नित्यपुंल्लिङ्गः, तथापि लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति महाभाष्योक्त्या लोकाश्रयत्वेन तस्यात्र क्लीबताऽपि बोध्या, अथवा 'जानीहि' इत्यस्याध्याहारेण तत्प्रयोज्यं कर्मत्वं ज्ञेयम् ।

अथ द्विसप्ततितमः पटलः

श्रीआनन्दभैरवी उवाच—

महाकाल शिवानन्द परमानन्दनिर्भर ।
त्रैलोक्यसिद्धिद प्राणवल्लभ श्रूयतां स्तवः ॥ १ ।
शाकिनी हृदये भाति सा देवी जननी शिवा ।
कालीति जगति ख्याता सा देवी हृदयस्थिता ॥ २ ।
[1]निरञ्जना निराकारा नीलाञ्जनविकासिनी ।
आद्या देवी कालिकाख्या केवला निष्कला शिवा ॥ ३ ।
अनन्ताऽनन्तरूपस्था शाकिनी हृदयस्थिता ।
तामसी तारिणी तारा महोग्रा नीलविग्रहा ॥ ४ ।
कपाला मुण्डमालाढ्या शववाहनवाहना ।
ललज्जिह्वा सरोजाक्षी चन्द्रकोटिसमोदया ॥ ५ ।
वाय्वग्निभूजलान्तस्था भवानी [2]शून्यवासिनी ।
तस्मात् स्तोत्रमप्रकाश्यं कृष्णकाल्याः कुलोदयम् ॥ ६ ।
श्रीकृष्णभगवत्याश्च नीलदेव्या कुलार्णवम् ।
गोपनीयं प्रयत्नेन सावधानोऽवधारय ॥ ७ ।

महाभैरवी उवाच—

श्रीकालीचरणं चराचरगुणं सौदामिनीस्तम्भनं
गुञ्जद्गर्वगुरुप्रभानखमुखाह्लादैककृष्णासनम् ।
प्रेतारण्यासननिर्मितामलकजा नन्दोपरिश्वासनं
[3]श्रीमन्नाथकरारविन्दमिलनं नेत्राञ्जनं राजते ॥ ८ ।

---

१. निर्गतमञ्जनं यस्याः सा, अञ्जनं मायामलो बोध्यः ।

२. 'सून्य'—क० पाठः ।

३. श्रीमन्नाथस्य करौ अरविन्दं कमलमिवेति श्रीमन्नाथकरारविन्दं तस्य मिलनं मेलनमिति यावत् ।

दीप्तिः प्राप्तिः समाप्तिः प्रियमतिसुगतिः सङ्गतिः शीतनीतौ
मिथ्यामिथ्यासुरथ्या नतिररतिसती जातिवृत्तिर्गुणोक्तिः ।
व्यापारार्थी क्षुधार्थी वसति रतिपतिर्ज्योतिराकाशगङ्गा
[1]श्रीदुर्गाशम्भुकालीचरणकमलकं सर्वदा भाति सूक्ष्मम् ॥ ९ ।

देवेन्द्राः पञ्चभूता रविशशिमुकुटाः क्रोधवेतालकोलाः
कैलासस्थाः प्रशस्ताः स्तवनमपि तत्प्रत्यहं सम्पठन्ति ।
आत्मानं श्रीदकालीकुलचरणतलं हृत्कुलानन्दपद्मे
ध्यात्वा ध्यात्वा प्रवीरा अहमनुबहुधीः स्तौमि किं ध्याननिष्ठः ॥ १० ।

श्रुत्वा स्तोत्रगुणं तवैव चरणाम्भोजस्य वाञ्छाफलं
प्रेच्छामीहयति प्रियाय कुरुते मोक्षाय तत्त्वार्थतः ।
मातर्मोहिनिदानमानतरुणी कातीति मन्यामहे
योग्यश्रीचरणाम्बुजे त्रिजगतामानन्दपुञ्जे सुखम् ॥ ११ ।

पुत्रौ श्रीदेवपूज्यौ प्रकुरुत इतिहासादिगूढार्थगुप्तिं
श्यामे मातः प्रसन्ना भव वरदकरी कारणं देहि नित्यम् ।
योगानन्दं शिवान्तः सुरतरुफलदं सर्ववेदान्तभाष्यं
सत्सङ्गं सद्विवेकं कुरु कुरु कवितापञ्चभूतप्रकाशम् ॥ १२ ।

आह्लादोद्रेककारी परमपदविदां प्रोल्बणार्थप्रकाशः
प्रेष्यः पारार्थचिन्तामणिगुणसरलः पारणः प्रेमगानः ।
सारात्मा श्रीस्तवोऽयं जयसुरवसतां शुक्रसंस्कारगन्ता
मन्ता मोहादिकानां सुरगणतरुणी कोटिभिर्ध्येय इन्द्रैः ॥ १३ ।

नामग्रहणविमलपावनपुण्यजलनिधिमन्थनेन
निर्मलचित्तगसुरगुणपारग सुखसुधाकरस्थित-
हास्येन योगधराधरनरवरकुञ्जरभुजयुगदीर्घपद्ममृणालेन ॥ १४ ।

हरिविधिहर अपरपरसरभात्रकपाल
सेवनेन सुन्दरी काली चरणेन ॥ १५ ।

---

१. श्रिया सहिता दुर्गा-शम्भु-काल्यः, मध्यमपदलोपिसमासः, ततस्तासां चरणाः कमलकमिवेति उपमितसमासः ।

भास्वत्कोटिप्रचण्डानलगुणललिताभाविता सिद्धकाली
प्रोक्तं यद्योगगीतावचनसुरचनामङ्गलं योगिनाद्या ।
श्यामानन्दद्रुमाख्ये भजनयजनगङ्गाङ्गतीरप्रकाशं
सर्वानन्दोत्सवत्वं वरदसुरवदासम्भवे मय्यभावे ॥ १६ ।

एतत्प्रथमे कुलं गुरुकुलं लावण्यलीलाकुलं
प्राणानन्दकुलं कुलाकुलकुलं कालीकुलं संकुलम् ।
मातः कालियुगादि कौलिनि शिवे सर्वन्तराङ्गस्थितं
नित्यं तत्र नियोजय श्रुतिगिरा श्रीधर्मपुत्रं भवे ॥ १७ ।

हेरम्बादिकुलेशयोगजननि त्वं योगतत्त्वप्रिया
यद्येवं कुरुते पदाम्बुजरजो योगं तवानन्ददम् ।
सः स्यात्सङ्कटपाटलारिसदनं जित्वा स्वयं मन्मथं
श्रीमान्मन्मथमन्मथः प्रचयति ह्यष्टाङ्गयोगं परम् ॥ १८ ।

योगी याति परं पदं सुखपदं वाञ्छास्पदं सम्पदं
त्रैलोक्यं परमेश्वरं यदि पुनः पारं भवाम्भोनिधेः ।
भावं भूधरराजराजदुहिते ज्ञातं विचारं तव
श्रीपादाम्बुजपूजनं प्रकुरुते ते नीरदप्रोज्ज्वले ॥ १९ ।

आदावष्टाङ्गयोगं वदति भवसुखं भक्तिसिद्धान्तमेकं
भूलोके पावनाख्यं पवनगमनगं श्रीनगेन्द्राङ्गजायाः ।
सिद्धीनामष्टसिद्धिं यमनियमवशादासनप्राणयोगात्
प्रत्याहारं विभोर्ध्वारुणगुणवसनं ध्यानमेवं समाधिम् ॥ २० ।

मातः शान्तिगुणावलम्बिनि शिवे शान्तिप्रदे योगिनां
दारे देवगुणे विधेहि सकलं शान्तिक्रियामङ्गलम् ।
यज्ञानामुदयं प्रयाति सहसा यस्याः प्रसादाद् भुवं
तां सर्वां प्रवदामि [1]कामदहनस्तम्भाय मोहक्षयात् ॥ २१ ।

---

१. कामस्य कामदेवस्य दहनः, भगवान् शिवः, तस्य स्तम्भाय निरोधाय । दह्यते येन स इति कर्तरि ल्युट्प्रत्ययः ।

एको जीवति योगिराडतिसुखी जीवन्ति न श्रीसुताः
सर्वं योगभवं भवे विभवगाः पश्यन् स्वकीयायुषम् ।
इत्येवं परिभाव्य सर्वविषयं शान्ति समालम्ब्यको
मूले वेददलोज्ज्वले कुलपथे श्रीकुण्डलीं भावय ॥ २२ ।

शान्तिभ्रान्तिनिकृन्तनी स्वरमणी प्रेमोद्गता भक्तिदा
लावण्याम्बुधिरत्नकोटिकिरणाह्लादैकमूर्तिप्रभा ।
एकाकारपराक्रमादपय मा क्रोधक्रमक्षोभिणी
या मूलामलपङ्कजे रचयति श्रीमाधुरी तां भजे ॥ २३ ।

रे रे पामर दुर्भग प्रतिदिनं किं कर्म वा राधसे
व्यापारं विषयाश्रयं प्रकुरुषे न ध्यायसे श्रीपदम् ।
मिथ्यैतत्क्षणभङ्गुरं त्यज मुदा संसारभावं विषं
श्रीकालीं कुलपण्डितां गुणवतीं शान्ति समाराधय ॥ २४ ।

शिवस्त्री या शान्तिः परमसुखदा भावजनिका
विवेकः संजातो वहसि च तया भाति नियतम् ।
विवेकोऽसौ त्यागी जनयति सुधासिन्धुसुन्दर-
मदो ब्रह्मज्ञानं परमममले योगिनि परे ॥ २५ ।

द्वयं ब्रह्मज्ञानं परमममले चागममयं
विवेकोद्भूतं स्यादमलपरमं शब्दमपरम् ।
द्वयोर्मूलीभूता हृदि सपदि शान्तिः प्रियतमा
प्रभा कालीपादाम्बुजयुगलभक्तिप्रलयदा ॥ २६ ।

कुलश्रीकुण्डल्याः परमरसभावं[1] नवमयं
पदं मातुः काल्याः प्रथमरविकान्त्याः सुखमयम् ।
वदामि प्रोत्साहे वशषसशुभे हाटकनिभे
विधिः श्रीडाकिन्याऽमरपतिधरित्रीति च भजेत् ॥ २७ ।

---

१. नवमेव नवीनमेव नवमयम्, स्वार्थे मयट्प्रत्ययः, 'तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो मनोहरम्' इति माघोक्त्या तस्य नवत्वं बोध्यम् ।

त्रयं स्थान नित्यं [1]रविशशिकलावह्निघटितं
महातीर्थं सम्यक् पवनगगनस्थं भवकरम् ।
विभिन्नं सङ्कृत्य द्वयमपि कुलग्रन्थिसहितं
सुषुम्नाश्रीतीर्थे महति गगने पूर्णलयवान् ॥ २८ ।

त्रयं संशोध्यादौ परमपदवीं गच्छति महान्
सुदृष्टाङ्गैर्योगैः परिभवति शुद्धं मम तनुम् ।
अतो योगाष्टाङ्गं कलुषसुखमुक्तं वितनुते
क्रियादौ सङ्कुर्याद्यमनियमकार्यं यतिवरः ॥ २९ ।

अहिंसासत्यार्थी प्रचयति सुयोगं तव पदं
धनस्ते यद्योगी शुचिधृतिदयादाननिपुणः ।
क्षमालघ्वाहारी समगुणपरानन्दनिपुणः
स्वयं सिद्धः सद्ब्राह्मणकुलपताकी सुखमयी ॥ ३० ।

तपः सन्तोषाढ्यो हरयजन आस्तिक्यमतिमान्
यतीनां सिद्धान्तश्रवणहृदयप्राणविलयः ।
जयानन्दामग्नो हवनमनलेपः प्रकुरुते
महाभक्तः श्रीह्रीमंतिरतिकुलीनस्तव पदः ॥ ३१ ।

सुषुम्नामुखाम्भोरुहाग्रे च पद्मं
दलं चेदहेमाक्षरं मूलदेशे ।
स्थिरापृष्ठवंशस्य मध्ये सुषुम्ना-
न्तरे वज्रिणी चित्रिणीभासिपद्मैः ॥ ३२ ।

सुषुम्नादिनाड्या युगात् कर्णमूला-
त्प्रकाशप्रकाशा बहिर्युग्मनाडी ।
इडा पिङ्गला वामभागे च दक्षे
सुधां शूरवी राजसे तत्र नित्यम् ॥ ३३ ।

---

१. रविः सूर्यः शशिकला चन्द्रकला, वह्निः अग्निः, तैर्घटितम् ।

विसर्गं[1] बिन्द्वन्तं स्वगुणनिलयं त्वं जनयसि
त्वमेका कल्याणी गिरिशजननी कालिकलया ।
परानन्दं कृत्वा यदि परिजपन्ति प्रियतमाः
परिक्षाल्य ज्ञानैरिह परिजयन्ति प्रियपदम् ॥ ३४ ।

अष्टादशाङ्गुलगतं ऋजुदन्तकाष्ठं
स्वीयाङ्गुलार्धघटितं प्रशर शनैर्यः ।
संयोज्य [2]तालुरसनागलरन्ध्रमध्ये
दन्तीक्रियामुपचरेत् तव भावनाय ॥ ३५ ।

नाडीक्षालनमाकरोति यतिराड् दण्डे त्रयं धारयन्
युष्मच्छ्रीचरणार्पणो नवमदण्डस्यानिलस्तम्भनात् ।
प्राणायामफलं यतिः प्रतिदिनं संवर्धते सुश्रमा-
दानन्दाम्बुधिमज्जनं कुलरसैर्मुक्तो भवेत् तत्क्षणात् ॥ ३६ ।

वदामि परमश्रिये पदपद्मयोगं शुभं
हिताय जगतां मम प्रियगणस्य भागश्रिये ।
सदा हि कुरुते नरः सकलयोगसिद्धिं मुदा
तदेव तव सेवको जननि मातरेकाक्षरम् ॥ ३७ ।

करुणासागरे मग्नः सदा निर्मलतेजसा ।
तवाङ्घ्रिकोमलाम्भोजं ध्यात्वा योगीश्वरो भवेत् ॥ ३८ ।

करुणासागरे मग्नो येन योगेन निर्मलः ।
तद्योगं तव पादाब्जं को मूर्खः कः सुपण्डितः ॥ ३९ ।

यमनियमसुकाले नेउलीयोगशिक्षा
प्रवभति कफनाशा नाशरन्ध्रे त्रिसूत्री ।
हृदयकफविनाशा धोतिका योगशिक्षा
गलविलगलवस्त्रं षष्टिहस्तं वहन्ती ॥ ४० ।

---

१. विसर्गबिन्दुरन्तोऽन्तावयवो यस्य तमिति भावः ।
२. तालु च रसना च गलरन्ध्रश्चेति द्वन्द्वः, तन्मध्ये तादृशं काष्ठं संयोज्यम् ।

सुसूक्ष्मरसनस्य च स्वभुजषष्टिहस्तं गल-
प्रमाणमिति सन्ततप्रसरपञ्चयुग्माङ्गुलम् ।
पवित्रशुचिधोतिकारं भवसि सर्वपीडापहा
स्वकण्ठकमलोदयाममलभीतदामाभजे ॥ ४१ ॥

भजति यदि कुमारीं नेउली योगदृष्टचा
स भवति परवेत्ता मोहजालं छिनत्ति ।
स्मितमुखि भवति त्वां मूढ एवातिजीवो
भ्रमितमुदवधूर्ना कारसिद्धिं ददासि ॥ ४२ ॥

शनैर्दन्ती योगं स्वपदयुगपद्मे वितनुते
शिवे योगी मासादपि भवति वायुं स्थगयति ।
असौ मन्त्री चाम्रातकदलं सुदण्डं गलविले
नियोज्यादौ ध्यात्वा तव चरणपङ्केरुहतलम् ॥ ४३ ॥

कुलाकुलचेतता परिकरोषि विल्वच्छदी
सुशान्तिगुणदा जया परमभक्तिनिर्गुण्डिका ।
मुकुन्दतुलसी प्रिया गुणिनि मुक्तिदा योगिनी
ददास्यमरसम्पदं दलवियोगमूर्ध्वोदरीम् ॥ ४४ ॥

[1]पञ्चामरासाधनयोगकर्त्री पञ्चामरानाम महौषधिः स्थिता ।
त्वमेव सर्वेश्वररूपधारिणी यैः पूज्यते सोऽहिकपारमेष्ठी ॥४५॥

पठति यदि भवान्याः शाकिनीदेहदेव्याः
स्तवनमरुणवर्णामार्कलक्ष्म्याः प्रकाशम् ।
व्रजति परमराज्यं देवपूज्यः प्रतिष्ठो
मनुजपनसुशीलो लीलया शम्भुरूपम् ॥ ४६ ॥

---

१. पञ्चानाममराणां समाहारः पञ्चामरी, तस्याः साधनयोगं करोति या सा । 'पञ्चामरी' इति पाठो युक्तः । अथवा पञ्चामराणामासाधनेति पदच्छेदः कार्यः ।

प्रातर्मध्याह्नकाले च सायाह्ने च त्रिसप्तके ।
शतं पठित्वा मोक्षः स्यात् पुरश्चर्याफलं [1]लभेत् ॥ ४७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
षट्चक्रप्रकाशे भैरवीभैरवसंवादे शाकिनीकृत-
कालीस्तवनं नाम द्विसप्ततितमः पटलः ॥

१. पुरश्चर्या पुरश्चरणं तस्य फलं मोक्षाख्यम् । इदमेव पुरुषार्थचतुष्टयस्य चरमं फलमुक्तमस्ति शास्त्रेषु ।

अथ त्रिसप्ततितमः पटलः

श्रूयतां कोमलाम्भोजस्थितवक्त्रविराजिते ।
अत्यद्भुतं महागीतं शृणोति साधको हि यत् ।। १ ।

ध्वनिरन्तर्गतं ज्योतिर्ज्योतिरन्तर्गतं मनः ।
तन्मनो विलयं याति ध्वनिषु ज्ञानकोटिषु ।। २ ।

तद्ध्वनिज्ञानसंज्ञानं शृण्वन्ति योगिनो जनाः ।। ३ ।

परमगुणगभीरे धीरनीरे शरीरे
भवनवभवकान्तौ संप्रशात्मा नितान्तम् ।
विमलमधुरवाक्यालङ्कृतज्ञानसिन्धौ
सकलवचनरत्नं स्थापयामास वाणी ।। ४ ।

ॐतुण्डोग्रस्थिरवचनगा मोहयज्जीववर्णं
शङ्कातङ्कारहितचरिता मोहिता ज्ञानतन्द्रे ।
सालङ्कारा खरतरकरा वाक्यमालां वहन्ती
सा पश्यन्ती विमलकरुणा राध्यतां मूलचक्रे ।। ५ ।

संसारे सारभागे सयुवतिसुकपालक्षणैर्लक्षिताङ्गे
सिद्धान्तज्ञानजीवं चरमसमगुणं भूपतेर्योगिनो वा ।
विप्रेन्द्राणामनन्तं ध्वनिगुरुमधुरं व्यापितं पार्वतीशे
हे हे कालप्रकालप्रियतनुशिखरे वेशमासं चयत्वम् ।। ६ ।

सञ्चारे परमस्थिरे हरिहरे विद्याधरे भूधरे
साकारे करुणाकरे स्वविलये ते पादपङ्केरुहे ।
नित्यज्ञानमयं जयं सुरतरुच्छायालयं पूजये
मातः कालि कलाधरे गलबिले शाकम्भरि शाकिनि ।। ७ ।

भास्वत्कोटिरविच्छटाभरसुखश्रीकण्ठवीरालये
हृत्पङ्केरुहमध्यसारघटितं सारस्वतोत्पत्तिदम् ।
श्रीदेवीगुरुरूपिणीचरणपद्मान्तःप्रभामण्डलं
शैलेन्द्रोदयकारिणीमणिगृहं मापद्मनाभेरधः ॥ ८ ।

वाञ्छाकल्पद्रुमस्था स्थितिलयफलदा योगिनी योगमाता
सूक्ष्मानन्दप्रशंसा तरुणरविकला कोकिलालापमुग्धा ।
स्निग्धा स्निग्धाङ्गसङ्गा नवशशिमुकुटा चारुवर्णा विशाला
सा दुर्गा दुःखहन्त्री भवतु शिवगृहे कामनासिद्धिदात्री ॥ ९ ।

निराश्रयमहं पदं भवति कालि भक्त्याश्रये
श्रिये विमलभावदे सकलभावगो गोगणः ।
मयि प्रियधनं मुदा वितर चारुदृष्ट्या सुखं
तदेव गलभागकृद्गगनपद्ममध्यस्थले ॥ १० ।

नित्ये निष्फलरूपभूतिनिकरे त्रैलोक्यरक्षाकरे
धर्मध्वान्तनिकेतने गणयति ज्ञानप्रयोगान्तरम् ।
ते पादाम्बुजसम्भवः प्रियगणः प्राणाश्रितः पार्थिवो
मातः पर्वतराजराजदुहिते पुण्यं पवित्राप्तये ॥ ११ ।

भीभर्गो भारसर्गो भवरवविभवो भूतिभारावलम्बी
भावाभावः प्रभावः प्रभवति भुवने भीमभक्तिप्रकाशः ।
भूभूतोद्भूतभीतिप्रभृतिभयभवासम्भवानन्दभावो
मातस्ते पादपङ्केरुहविमलतलानन्दसेवाभिवृद्ध्या ॥ १२ ।

नित्यं पातु गणेश्वरी गणपतेर्माता रमे मातरं
प्राणं प्रत्ययपूर्वसिद्धिकरणी सिद्धासने रक्षतु ।
आनन्दाम्बुधिमज्जनैकसुखदा भालस्थलस्थापिनी
कण्ठाम्भोरुहकर्णिका सुरगणान् गीता परा सुस्वरान् ॥ १३ ।

कृपापारावारा विमलपुरुषं गौरिवपुषं[1]
धरावक्षे मुख्ये धरणिसुतबुद्ध्याऽधमनरम् ।
न जाने त्वत्कामं तनुविरहचिन्तामणिमयं
तव स्नेहाध्वीनां गमयति न पारं सुरवरः ॥ १४ ।

जयति जय जयाज्योतिराधारजेता
सुरनरगणपूज्यः खेटचक्रस्य मध्ये ।
भवकमलकराढ्यं नम्रभावं प्रतापं
गमयति तव पादाम्भोजसेवाबलेन ॥ १५ ।

इत्येतैः श्लोकमुख्यैस्तु स्तुत्वा गीतरसान्तरैः ।
परब्रह्ममयीं ध्यात्वा स्वयं ब्रह्मतनुं गतः ॥ १६ ।

अकस्माद् भोगसम्पत्तिर्मोक्षपद्धतयः शुभाः ।
प्रभवन्ति स्वयं विद्या अष्टादश गुणोदयाः ॥ १७ ।

नीलजीमूतसङ्काशं चन्द्रशेखरमीश्वरम् ।
सदाशिवं महाशक्तिशाकिनीवामसंस्थितम् ॥ १८ ।

चतुर्भुजं देवदेवमनन्तमक्षरं[2] हरम् ।
भावगीतं पुनर्गीत्वा परं ब्रह्मसमो भवेत् ॥ १९ ।

कण्ठषोडशसम्पूर्णमध्ये योगी स्थिराशयः ।
अष्टसिद्धीश्वरो भूत्वा भावसिद्धिं लभेद् ध्रुवम् ॥ २० ।

त्वया सह समाह्लाददर्शनं सिद्धिमाप्नुयात् ॥ २१ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वाणीगीतविन्यासो नाम त्रिसप्ततितमः पटलः ॥

●

---

१. गौर्या वपुर्यस्य तम् । बाहुलकाद् ईकारस्य स्थाने ह्रस्वादेशः ।

२. न क्षीयते न क्षरति वा अक्षरम्, क्षीयतेः क्षरतेर्वाङ्प्रत्ययः, अथवा अश्नुते व्याप्नोति यत्तदक्षरम् । अशे; सरन्प्रत्ययः ।

अथ चतुःसप्ततितमः पटलः

श्रीआनन्दभैरव उवाच—

शैलजे देवदेवेशि सर्वाम्नायप्रपूजिते ।
सर्वं मे कथितं देवि कवचं न प्रकाशितम् ॥ १ ॥

[1]प्रासादाख्यस्य मन्त्रस्य कवचं मे प्रकाशय ।
सदाशिवमहादेवभावितं सिद्धिदायकम् ॥ २ ॥

अप्रकाश्यं महामन्त्रं भैरवीभैरवोदयम् ।
सर्वरक्षाकरं देवि यदि स्नेहोऽस्ति मां प्रति ॥ ३ ॥

श्रीआनन्दभैरवी उवाच—

श्रूयतां भगवन्नाथ महाकालकुलार्णव ।
प्रासादमन्त्रकवचं सदाशिवकुलोदयम् ॥ ४ ॥

प्रासादमन्त्रदेवस्य वामदेव ऋषिः स्मृतः ।
पङ्क्तिश्छन्दश्च देवेशः सदाशिवोऽत्र देवता ॥ ५ ॥

[2]साधकाभीष्टसिद्धौ च विनियोगः प्रकीर्तितः ।
शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः ॥ ६ ॥

षडक्षरस्वरूपो मे वदनं तु महेश्वरः ।
अष्टाक्षरशक्तिरुद्रश्चक्षुषी मे सदाऽवतु ॥ ७ ॥

पञ्चाक्षरात्मा भगवान् भुजौ मे परिरक्षतु ।
मृत्युञ्जयस्त्रिबीजात्मा आयू रक्षतु मे सदा ॥ ८ ॥

वटमूलसमासीनो दक्षिणामूर्तिरव्ययः ।
सदा मां सर्वतः पातु षट्त्रिंशद्वर्णरूपधृक् ॥ ९ ॥

---

१. प्रकर्षेण आ समन्तात् सीदन्ति तिष्ठन्ति जना यस्मिन् स मन्त्रः प्रासादाख्यः ।

२. साधकानामभीष्टस्य सिद्धौ इत्यर्थः ।

द्वाविंशार्णात्मको रुद्रः कुक्षिं मे परिरक्षतु ।
त्रिवर्णाढ्यो नीलकण्ठः कण्ठं रक्षतु सर्वदा ॥ १० ।
चिन्तामणिर्बीजरूपोऽर्धनारीश्वरो [1]हरः ।
सदा रक्षतु मे गुह्यं सर्वसम्पत्प्रदायकः ॥ ११ ।
एकाक्षरस्वरूपात्मा कूटव्यापी महेश्वरः ।
मार्तण्डो भैरवो नित्यं पादौ मे परिरक्षतु ॥ १२ ।
तुम्बुराख्यो महाबीजस्वरूपस्त्रिपुरान्तकः[2] ।
सदा मारणभूमौ च रक्षतु त्रिदशाधिपः ॥ १३ ।
ऊर्ध्वमूर्ध्वानमीशानो मम रक्षतु सर्वदा ।
दक्षिणास्यं तत्पुरुषोऽवतु मे गिरिनायकः ॥ १४ ।
अघोराख्यो महादेवः पूर्वास्यं परिरक्षतु ।
वामदेवः पश्चिमास्यं सदा मे परिरक्षतु ॥ १५ ।
उत्तरास्यं सदा पातु सद्योजातस्वरूपधृक् ।
मृत्युजेता सदा पातु जलेऽरण्ये महाभये ॥ १६ ।
पर्वते विषमस्थाने विषहर्ता सदाऽवतु ।
कालरुद्रः सदा पातु सर्वाङ्गं कालदेवता ॥ १७ ।
कालाग्निरुद्रः सम्पातु महाव्याधिभयादिषु ।
अकालतारकः पातु खड्गधारी सदाशिवः ॥ १८ ।
कवची वामदेवश्च सदा पातु महाभये ।
[3]कालभक्षः पातु रुद्रो रुरुकः क्षेत्रपालकः ॥ १९ ।
मातृकामण्डलं पातु सम्पूर्णचन्द्रशेखरः ।
चिरायुः शाकिनीभर्ता चायुषं पातु मे सदा ॥ २० ।

---

१. अर्धे नारी, तादृश ईश्वरः, भगवान् शिवः । भगवतोऽर्धभागो नारीरूपः, अर्धञ्च नररूपः ।

२. त्रिपुरस्य त्रिपुराख्यस्यासुरस्य अन्तकः कालरूपः । अन्तं कायति इति अन्तकः ।

३. कालं भक्षयति योऽसौ कालभक्षः, कर्मण्यण् ।

सिंहस्कन्धः सदा पातु रुद्राणीवल्लभोऽवतु ।
भालं पातु वज्रदम्भालेखकः क्रान्तिरूपकः ॥ २१ ।

निरूपकः सदा पातु खेचरीखेचरप्रियः ।
रत्नमालाधरः पातु [1]रक्तमुखीश्वरोऽवतु ॥ २२ ।

वदनं चक्षुषी कर्णौ पातु पञ्चाननो मम ।
वेदध्वनिः सदा पातु नासारन्ध्रद्वयं मम ॥ २३ ।

कपालधारकः पातु गण्डयुग्मं युगान्तकृत् ।
रक्तजिह्वापतिः पातु ममोष्ठाधरवासिनम् ॥ २४ ।

दन्तावलियुगं पातु भृगुरामेश्वरः शिवः ।
तालमूलं सदा पातु विश्वभोजो रसामृतम् ॥ २५ ।

जिह्वाग्रं वाक्पतीशश्च भवानीशः शिवो मम ।
मुखवृत्तं सदा पातु महासेनः कवीश्वरः ॥ २६ ।

क्रोधनाथः सदा पातु दक्षहस्तादिमूलकम् ।
दक्षकूर्परमापातु तदग्रं कुक्कुरेश्वरः ॥ २७ ।

चिरजीवी सदा पातु चाङ्गुलीमूलदेशकम् ।
अङ्गुल्यग्रं सदा ब्रह्मा ब्रह्मलिङ्गधरः प्रभुः ॥ २८ ।

विद्यापतिः [2]पार्वतीशो वामहस्तादिमूलकम् ।
पातु वामकूर्परं मे वामकेश्वर ईश्वरः ॥ २९ ।

कुण्डवासी सदा पातु कूर्पराग्रं कुलाचलः ।
वेदमातृपतिः पातु कामधेनुपतिः प्रभुः ॥ ३० ।

ममाङ्गुलीमूलदेशं पातु पञ्चमुखो मम ।
वामाङ्गुल्यग्रभागं मे पातु पर्वतपूजितः[3] ॥ ३१ ।

---

१. रक्तं मुखं यस्याः सा रक्तमुखी तस्या ईश्वर इति षष्ठीतत्पुरुषः ।

२. पर्वतस्य पर्वतराजस्येयं पुत्री पार्वती, तस्या ईशः । पर्वाणि भवन्ति यस्मिन् सः पर्वतः । तत्पर्वमरुद्भ्यामिति तत्प्रत्ययः सप्तम्यर्थे ।

३. पर्वतेन पर्वतराजेन हिमाद्रिणा पूजितः समर्चितः, भगवान् शिवः ।

तनुमूलाग्रभागं मे कूर्मचक्रधरः प्रभुः ।
शाकिनीवल्लभः पातु दक्षाङ्घ्रिमध्यदेशकम् ॥ ३२ ।
गुल्फाग्रं गर्गरीनाथः पादाग्रं मूलदेवता ।
अभयावल्लभः पातु दक्षाङ्गुल्यग्रभागकम् ॥ ३३ ।
पातु स्मरहरो योगी [1]वामोरुमूलदेशकम् ।
वामपादमध्यदेशं मध्यदेशेश्वरोऽवतु ॥ ३४ ।
पातु मे भगवाञ्छम्भुर्मम गुल्फाग्रदेशकम् ।
मूलदेशं वामपादं पातु मेऽङ्गुष्ठमूलकम् ॥ ३५ ।
कारणात्मा नीलकण्ठः प्रभाधारी यमान्तकः ।
अङ्गुष्ठाग्रं सदा पातु सुषुम्नानाडिकेश्वरः ॥ ३६ ।
महारुद्रेश्वरः पातु मम नाभिमनोभवम् ।
उदरं गगनाधारः कामहर्ता हृदम्बुजम् ॥ ३७ ।
सर्वानन्दात्मकः पातु मम स्कन्धयुगं शिवः ।
हृदयाद् दक्षहस्ताग्रपर्यन्तं पातु शोकहा ॥ ३८ ।
हृदयाद् वामहस्ताग्रपर्यन्तं परमेश्वरः ।
हृदयान्मम दक्षाङ्घ्रिनखान्तं मे शिवोऽवतु ॥ ३९ ।
[2]सदानन्दा सदा पातु हृदाद्यङ्घ्रि तु उन्मदः ।
वासुकीवल्लभः पातु हृदादिगुददेशकम् ॥ ४० ।
अनन्तनाथ आपातु हृदादिमूर्धदेशकम्[3] ।
व्यापकः सर्वदा पातु सदाशिव उमापतिः ॥ ४१ ।
तारात्मकः कायसिद्धः शक्तीशः शुक्रदेवता ।
पञ्चचूडः सदा पातु पञ्चतत्त्वाङ्गरूपकम् ॥ ४२ ।

---

१. वाम ऊरुः जघनम् तस्य मूलदेशः, स एव मूलदेशकः, तम् ।
२. सदा सर्वदा आनन्दो यस्यां सा, अथवा सदा आनन्दयति भक्तान् या सा सदानन्दा, पचाद्यच्-प्रत्ययः कर्तरि ।
३. हृद् आदिर्यस्य तादृशो मूर्धा, स चासौ देशकश्चेति भावः ।

शीर्षादिपादपर्यन्तं कामधेनुः सदावतु ।
जलेऽरण्ये घोरवने सङ्कटे च महापथे ।। ४३ ।
प्रान्तरे पातु गुप्ताक्षः कामराजः परापरः ।
अर्धनारीश्वरः पातु मातृकापरमेश्वरः ।। ४४ ।
मातृकामन्त्रपुटितः स्वस्वस्थानं सदावतु ।
धर्मात्मा धर्मसन्धि मे पिङ्गलां पातु चण्डिकाम् ।। ४५ ।
विह्वलः सर्वदा पातु भोलानाथः सदाऽवतु ।
सर्वदेशे सर्वपीठे कामरूपे विशेषतः ।। ४६ ।
सर्वदा योगिनीनाथः परमात्मा सदाऽवतु ।
कामरूपाख्यपोठादि पञ्चाशत् पोठदेवताः ।। ४७ ।
पञ्चाशत्पीठमाया तु कामरूपं सदाशिवः ।
भवो रुद्रो महेशश्च शङ्करो मन्मथान्तकः ।। ४८ ।
गुह्यकेशः पापहर्ता कपाली शूलधारकः ।
पञ्चवक्त्रो दशभुजो भुजङ्गभूषणो हरः ।। ४९ ।
महाकालो महारुद्रो महावोरो हृदि स्थितः ।
महादेवो महागुह्यो महामाया महागुणः ।। ५० ।
पशुपतिर्विरूपाक्षो[1] हरीशो धवलेश्वरः ।
वटुकेशः क्रमाचार्यः पञ्चशूली हृदुद्भवः ।। ५१ ।
उन्मनीशः साहसिकः पराख्यः पर्वतेश्वरः ।
सर्वात्मा च महात्मा च शिवात्मा च श्मशानगः ।। ५२ ।
क्रोधवीरः कालकारी सूक्ष्मधर्मा धुरन्धरः ।
श्यामकः क्रूरहर्ता च गणेशः कालमाधवः ।। ५३ ।
ज्ञानात्मा कपिलात्मा च सिद्धात्मा योगिनीपतिः ।
कोटिसूर्यप्रतीकाश एकपञ्चाशदीश्वराः[2] ।। ५४ ।

---

१. विरूपे विकृते अक्षिणी यस्य स इति बहुव्रीहिः । षच्प्रत्ययः समासान्तः ।
२. एकेनाधिका एकाधिका, सा चासौ पञ्चाशच्चेति एकपञ्चाशत्, तत्संख्याका ईश्वराः मध्यमपदलोपिसमासः ।

सदा पान्तु मातृकस्थाः स्थितिसर्गलयात्मकाः ।
आदिपीठं कामरूपं काञ्चीपीठं तदन्तिके ॥ ५५ ।

अयोध्यापीठनगरं तदूर्ध्वे जालकन्धरम् ।
जालन्धरं तदूर्ध्वे तु सिद्धपीठं तदन्तिके ॥ ५६ ।

कालीपीठं तदूर्ध्वे तु चण्डिकापीठमग्रके ।
अष्टपुरीमहापीठं कण्ठदेशं सदाशिवः ॥ ५७ ।

सदा पातु महावीरः कालधर्मी परात्परः ।
मधुपुरीमहापीठं चाष्टपुरान्तरस्थितम् ॥ ५८ ।

[1]मायावतीमहापीठं तदूर्ध्वे परिकीर्तितम् ।
वाराणसीमहापीठं[2] धर्मपीठं तदन्तिके ॥ ५९ ।

ज्वालामुखीमहापीठं तदन्तःस्थं प्रकीर्तितम् ।
तदूर्ध्वे च महापीठं ज्वलन्तीपीठमेव च ॥ ६० ।

तदूर्ध्वे पूर्णगिर्याख्यं कुरुक्षेत्रं तदन्तिके ।
उड्डियानं तदूर्ध्वे तु कमलापीठमेव च ॥ ६१ ।

हरिद्वारं महापीठं बदरीपीठमेव च ।
व्यासपीठं नारदाख्यं तदूर्ध्वे वाडवानलम् ॥ ६२ ।

हिङ्गुलादं तदूर्ध्वे तु लङ्कापीठं तदूर्ध्वके ।
तदूर्ध्वे शारदापीठं रतिपीठं तदूर्ध्वके ॥ ६३ ।

लिङ्गपीठं कलापीठं द्वारकापीठमेव च ।
कपालपीठं हर्याख्ये वरदापीठमुत्तरे ॥ ६४ ।

कालीपीठं तदूर्ध्वे तु तारापीठं तदूर्ध्वके ।
उग्रतारामहापीठं महोग्रापीठमेव च ॥ ६५ ।

---

१. मायावती मायानगरी हरिद्वारपुरी, तस्या महापीठमिति भावः ।

२. वरं च तदनश्च वरानः, पवित्रजलम्, तदद्दूरगता नगरी वाराणसी, तस्या पीठस्य महनीयत्यवात् महापीठता ।

नीलसरस्वतीपीठं जरापीठं तदूर्ध्वके ।
तदूर्ध्वे गगनापीठं खेचरीपीठमेव च ॥ ६६ ।
तदूर्ध्वे तारिणीपीठं सहस्रदलमध्यके ।
कर्त्रीपीठं तदूर्ध्वे च देवीपीठं तदूर्ध्वके ॥ ६७ ।
राजराजेश्वरीपीठं षोडशीपीठमेव च ।
सहस्रदलमध्ये तु सहस्रपीठमेव च ॥ ६८ ।
मध्ये एकजटापीठं कर्त्रीतीरकलोपरि ।
षोडशीमुखविद्याभिर्वेष्टिता तारिणीकला ॥ ६९ ।
काली नीला महाविद्या त्वरिता छिन्नमस्तका[1] ।
वाग्वादिनी चान्नपूर्णा देवी प्रत्यङ्गिरा पुनः ॥ ७० ।
कामाख्या वासली बाला मातङ्गी शैलवासिनी ।
षोडशी भुवनेशानी भैरवी बगलामुखी ॥ ७१ ।
धूमावती वेदमाता हरसिद्धा च दक्षिणा ।
एता विद्या महाविद्याः शिवसेवनशोभिताः ॥ ७२ ।
द्वाविंशतिमहाविद्या द्वारं द्वाविंशतिस्थलम् ।
महापीठे सहस्रारे सर्वदा पान्तु मां कलाः ॥ ७३ ।
सदाशिवः शक्तियुक्तः पातु चण्डेश्वरो हरः ।
पञ्चामराधरः पातु देवीनाथः सदाऽवतु ॥ ७४ ।
पार्वतीप्राणनाथो मे सर्वाङ्गं पातु सर्वदा ।
अघोरनाथ ईशानो वरदो मदनान्तकः ॥ ७५ ।
यज्ञहर्ता दक्षखण्डो वीरभद्रो दिगम्बरः ।
अष्टादशभुजो रौद्रो नीलपङ्कजलोचनः ॥ ७६ ।
त्रिलोचनः कालकामो महारुद्रो गणेश्वरः ।
काकिनीवल्लभः शूली योगकर्ता महेश्वरः ॥ ७७ ।

---

१. छिन्नं मस्तकं यस्याः सा । एवंभूता भगवती छिन्नमस्तका इति कथ्यते ।

वागीश्वरः स्मरहरो महामन्त्रो हलायुधः ।
श्रीनाथः पूजितो बालो बालेन्द्रो बलवाहनः ॥ ७८ ।

बलरामः कृष्णरामो गोविन्दो माधवीश्वरः ।
जितामित्रेश्वरश्चूडामणीशो मानदः सुखी ॥ ७९ ।

मुखं वृन्दावनं पातु [1]षड्दलाम्भोरुहस्थितम् ।
वैष्णवीवल्लभः पातु ब्रह्माणं कुलकुण्डली ॥ ८० ।

विष्णुनाथः सदा पातु ब्रह्माग्नि गरुडध्वजः ।
ज्वालामालाधरः पातु [2]कालानलधरोऽवतु ॥ ८१ ।

काकिनीवल्लभः पातु ईश्वरो भैरवेश्वरः ।
महारुद्रो [3]नीलकण्ठो मणिपूरं सुलाकिनीम् ॥ ८२ ।

सदा पातु मणिगृहं रुद्राणीप्रियवल्लभः ।
महारुद्रो नीलकण्ठो महाविष्णुं सदावतु ॥ ८३ ।

राकिणीं विष्णुलक्ष्मीं च पातु मे वैष्णवीं कलाम् ।
सदाशिवो नीलकण्ठो मम पातु हृदि स्थलम् ॥ ८४ ।

ईश्वरं परमात्मानं मम रक्षतु शाकिनीम् ।
सदाशिवं सदा पातु द्विदलस्थोऽपरो हरः ॥ ८५ ।

हाकिनीशक्तितः पातु सहस्रारं शिवोऽवतु ।
तारानाथविधिः पातु सहस्रारनिवासिनीम् ॥ ८६ ।

महाकाशं सदा पातु तदधो वायुमण्डलम् ।
वह्निमण्डलमापातु तदधः शाकिनीश्वरः ॥ ८७ ।

तदात्मकः सदा पातु कीलालं कौलदेवता ।
पृथिवीं पार्थिवः पातु सर्वदैकं सदाशिवः ॥ ८८ ।

---

१. षड्दलानि यस्मिन् तत्, तादृशमम्भोरुहं कमलम्, तत्र स्थितम् ।

२. कालोऽन सः परो यस्मिन् । परत्वं प्रवानत्वम् ।

३. क्षीरसागरान्निःसृतं विषं पीत्वा भगवान् शिवो नीलग्रीवादिनामभिर्भूषितोऽभवत् । यतो हि विषस्य कण्ठ एवावरोधः कृतो भगवता, यदि उदरे तस्य प्रवेशः स्यात्तदा तत्रत्यानि नानाब्रह्माण्डानि भस्मीभूतानि भविष्यन्तीति मत्वा कण्ठ एवावरोधः कृतः, अतश्च नीलकण्ठेत्यादि नाम सुशोभितमभवत् ।

इत्थं रक्षाकरं नाथ कवचं देवदुर्लभम् ।
प्रातःकाले पठेद्यस्तु सोऽभीष्टं फलमाप्नुयात् ॥ ८९ ।

पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः ।
कीर्तिश्रीकान्तिमेधायुर्बृंहितो भवति ध्रुवम् ॥ ९० ।

अप्रकाश्यं महावीरकवचं सर्वसिद्धिदम् ।
ज्ञानमात्रेण भूर्लोके जेता कालस्य योगिराट् ॥ ९१ ।

अस्य धारणमात्रेण कालसूत्रान्तको भवेत् ।
अस्य धारणपाठेन सर्वज्ञो भवति ध्रुवम् ॥ ९२ ।

सर्वे व्यासवशिष्ठादिमहासिद्धाश्च योगिनः ।
पठित्वा धारयित्वा ते प्रधानास्तत्त्वचिन्तकाः ॥ ९३ ।

कण्ठे यो धारयेदेतत् कवचं त्वत्स्वरूपकम् ।
मद्वक्त्राम्भोरुहोद्भूतं विद्यावाक् सिद्धिदायकम् ॥ ९४ ।

युद्धे विजयमाप्नोति द्यूते वादे च साधकः ।
कवचं धारयेद्यस्तु साधको दक्षिणे भुजे ॥ ९५ ।

देवा मनुष्या गन्धर्वास्तस्य वश्या न संशयः ।
कवचं शिरसा यस्तु धारयेद् यतमानसः ॥ ९६ ।

करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः[1] ।
भूर्जपत्रे त्विमां विद्यां शुक्लपट्टेन वेष्टिताम् ॥ ९७ ।

रजतोदरसंविष्टां कृत्वा च धारयेत् सुधीः ।
सम्प्राप्य महतीं लक्ष्मीमन्ते तव शरीरधृक् ॥ ९८ ।

यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ।
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत् ॥ ९९ ।

योगिने ज्ञानयुक्ताय देयं धर्मात्मने सदा ।
अन्यथा सिद्धिहानिः स्यात्सत्यं सत्यं न संशयः[2] ॥ १०० ।

---

१. अणिमा आदिर्यासां ता अणिमादयः, ताश्चाष्टसिद्धयश्च इति बहुव्रीहिगर्भस्तत्पुरुषः ।
२. गन्धश्चन्दनादिः, पुष्पं कमलादि ते आद्ये येषां तैः । द्वन्द्वगर्भो बहुव्रीहिः ।

तव स्नेहान्महादेव कथितं कवचं शुभम् ।
न देयं कवचं सिद्धं यदीच्छेदात्मनो हितम् ।। १०१ ।

यदि भाग्यफलेनापि कवचं यदि लभ्यते ।
धूर्तो वा कपटी वापि खलो वा दुर्ग्रहस्थितः ।। १०२ ।

निजकर्मफलत्यागमवश्यं खलु कारयेत् ।
तदा सिद्धिमवाप्नोति धर्मधाराधरो भवेत् ।। १०३ ।

सिद्धिपूजाफलं तस्य दिवसे दिवसे सुधीः ।
धूर्ततां खलतां मिथ्यां कापटचं स विहाय च ।। १०४ ।

राजराजेश्वरो भूत्वा जीवन्मुक्तो न संशयः ।
योऽर्चयेद् [1]गण्धपुष्पाद्यैः कवचं मन्मुखोदितम् ।। १०५ ।

तेनार्चिता महादेव सर्वदेवा न संशयः ।
[2]राजसिकं मानसिकं तामसिकं परन्तपः ।। १०६ ।

हृद्ये मानसिकं ध्यायन् पूजा राजसिकं स्मृतम् ।
तामसिकं लोकमध्ये कवचार्चा त्रिधा मता ।। १०७ ।

सिद्धकवचमाख्यातं केवलं ज्ञानसिद्धये ।
मोक्षाय जगतां शम्भोः प्रियाय परमेश्वर ।। १०८ ।

तन्त्रेऽस्मिन् सारसङ्केतं पूजाऽप्यारोपणादिकम् ।
अन्तःकरणमध्ये तु सर्वकार्यमुदीरयेत् ।। १०९ ।

राज्ये च प्रपठेत् स्तोत्रं कवचं ज्ञानसिद्धये ।
इति ते कथितं नाथ परमात्मनि मङ्गलम् ।। ११० ।
यस्याराधनमात्रेण शिवत्वमुत किं प्रभो ।। १११ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे सदाशिवकवचपाठो नाम चतुःसप्ततितमः पटलः ।।

---

१. 'सदाशिव' इति सम्बोधनान्तः पाठः ।

२. सामान्ये नपुंसकम् । अतश्च कवचार्चा इति विशेष्यपदेन सह समानाधिकरणे नास्ति विरोधः ।

अथ पञ्चसप्ततितमः पटलः

आनन्दभैरव उवाच—

कथितं शारदं धाम अप्रकाश्यं [1]फलोदयम् ।
इदानीं कथय प्राणवल्लभे वरदा भव ।। १ ।

कण्ठाम्भोजे कीदृशी या सभा परममोहिनी ।
गायन्ती योगिभिर्नित्यं परमानन्दवर्धिनी ।। २ ।

सभोत्कृष्टां सिद्धसभां वर्तय ब्रह्मवादिनि ।
तदा मे सफलं ज्ञानं सफलं सारनिर्णयम् ।। ३ ।

यदि सा कथ्यते देवि सभा सर्वप्रतिष्ठिता ।

श्रीआनन्दभैरवी उवाच—

श्रूयतां देवदेवेश सर्वानन्दप्रपूरक ।। ४ ।

सभा ज्ञानमयी नित्या षोडशारप्रकाशिनी ।
विस्तीर्णा सप्तति चैव योजनानां शितप्रभा ।। ५ ।

तपसा निर्मिता लक्ष्मीर्ज्ञानमङ्गलमण्डिता ।
राशिप्रभा खेचरी सा कैलासशिखरोपमा ।। ६ ।

गुह्यकैरुह्यमाना सा मधुरध्वनिपूरणी ।
दिव्यहेममयैरुच्चैः पादपैरुपशोभिता ।। ७ ।

रश्मिमती भास्वती च दिव्यगन्धमनोरमा ।
शिताभ्रशिखराकारा हेमतोरणशोभिता ।। ८ ।

दिव्यहेममयैः शृङ्गैर्विद्युद्भिरिव चित्रिता ।
षोडशारकर्णिकायां प्रतिभा [2]विश्वजित्वरी ।। ९ ।

---

१. फलस्योदयो यस्मिन् तद् धाम शारदमप्रकाश्यम्, गोपनीयमिति भावः । उत्कृष्टं तत्त्वं सर्वं गोपनीयमेव भवति, तत एव तस्य सुरक्षा स्यात् ।

२. जयति तच्छीला जित्वरी, ''इण्नश्जिसर्तिभ्यः क्वरप्'' इति पाणिनिसूत्रेण कर्तरि क्वरप्प्रत्ययः । ''ह्रस्वस्य पिति कृति तुक्'' इति तुगागमः, ङीप् च, विश्वस्य जित्वरी जयनशीला इति ।

तस्यां सदाशिवो नाथो विचित्राभरणायुधः ।
स्त्रीसहस्रावृतः श्रीमानास्ते ज्वलितकुण्डलः ॥ १० ।

दिवाकरनिभे रम्ये दिव्यास्तरणसंयुते ।
दिव्यपादोपधाने च निषण्णः परमासने ॥ ११ ।

मन्दाराणामुदाराणां वनानि सुरभीणि च ।
सौगन्धिकानां चादाय गन्धान् गन्धवहः शुचिः ॥ १२ ।

नलिन्याश्चाणकाख्यायाश्चन्दनानां वनस्य च ।
मनोहृदयसंह्लादी वायुस्तमुपसेवते ॥ १३ ।

तत्र देवाः सगन्धर्वा गणैरप्सरसां वृताः ।
दिव्यतालेन गायन्ति गीतानि परमेश्वर ॥ १४ ।

मिश्रकेशी च रम्भा च चित्रसेना शुचिस्मिता ।
चारुनेत्रा घृताची च मेनका मुञ्जिकस्तनी ॥ १५ ।

विश्वाची सहजन्या च प्रम्लोचा उर्वशी इरा ।
वर्गा च सौरभेयी च समीची बुद्धिदा लता ॥ १६ ।

रत्नावती महामाया कमला गन्धकेशिका ।
बाणमाता महाभर्गा ज्योतिः प्रज्ञा भवाऽभवा ॥ १७ ।

प्रभवा सम्भवा गुञ्जा साराङ्गी सारविक्रमा ।
त्रिलोचनी त्रिवेदिस्था अम्बिका ससशायका ॥ १८ ।

विरला वरदा माया सिद्धा कात्यायनी तथा ।
योगिनी खेचरी सिद्धा जीवाङ्गी दीर्घलोचनी ॥ १९ ।

रमणी च हिरण्याक्षी पद्मवक्त्रा हिरण्मयी ।
एताः सहस्रशश्चान्या [1]नृत्यगीतविशारदाः ॥ २० ।

ईशानमुपतिष्ठन्ति गन्धर्वाप्सरसाङ्गणाः ।
अनिशं दिव्यवादित्रैर्नृत्यगीतैश्च सा सभा ॥ २१ ।

---

१. नृत्यं च गीतं च नृत्यगीते तत्र विशारदा इति सप्तमीसमासः, योगविभागस्य भाष्येऽदर्शनात् सह सुपेत्यत्र सुपेति विभक्तयोगेन समासो बोध्यः ।

अशून्या रुचिरा भाति गन्धर्वाप्सरसां गणैः ।
किन्नरोरगगन्धर्वा नरा नाम तथा परे ॥ २२ ।

मानभद्रोऽथ धनदः श्वेतभद्रोऽथ गुह्यकः ।
काशवलो गण्डकण्डूः पत्योद्रश्च महाबलः ॥ २३ ।

कुस्तुम्बुरुः पिशाचाश्च गजकर्णे विशानकः ।
वराहकर्णस्ताम्रोष्ठः फलभक्षः फलोदकः ॥ २४ ।

अङ्गचूडः शिखावर्तो हेमनेत्रो विभीषणः ।
पुष्पाननः पिङ्गलकः शोणितोदः प्रवालकः ॥ २५ ।

वृकवांश्चानिकेतश्च चीरवासाश्च भावतः ।
भरद्वाजो वारिधरी महामायो धनञ्जयः ॥ २६ ।

कपिलः कपिलाचार्यो महायोगी क्षमाधरः ।
एते चान्ये च बहवो यक्षा शतसहस्रशः ॥ २७ ।

सदा भगवती लक्ष्मीस्तथैव नलकूबरः ।
तयोः परिजनाः सर्वे वारुणीमद्यकारकाः ॥ २८ ।

अतो मधुपुरी नाम चाष्टपूरं मधुस्थलम् ।
तद्बाह्ये सा सभा भाति चन्द्रकोटिसमोदया ॥ २९ ।

अहञ्च निवसाम्यस्यां भवन्त्यन्ये च मद्विधाः ।
ब्रह्मर्षयो भवन्त्यत्र तथा देवर्षयो परे ॥ ३० ।

क्रव्यादा राक्षसाश्चान्ये गन्धर्वाश्च महाबलाः ।
उपासन्ते महात्मानं तस्यां शिवदमीश्वरम् ॥ ३१ ।

भगवान् भूतसङ्घैश्च वृतः शतसहस्रशः ।
उमापतिः पशुपतिः शूलधृग् भगनेत्रहा ॥ ३२ ।

त्र्यम्बको राजशार्दूलो देवी च [१]विगतक्रमाः ।
वामनैर्विकटैः कुब्जैः प्रिययक्षैर्महाबलैः ॥ ३३ ।

---

१. विगतः क्रमो येषां ते—क्रमस्य वैशिष्टयमत्राविवक्षितमिति भावः ।

[1]मेदोमांसासवैरुग्रैरुग्रधन्वा महाबलः ।
नानाप्रहरणैर्घोरैर्घातैरिव महाजवैः ॥ ३४ ।
वृतः सहायैस्तत्रास्ते सदैव श्रीसदाशिवः ।
प्रकृष्टाः सततञ्चा(पि?प्य)वन्तु शम्भुपरिच्छदाः ॥ ३५ ।
गन्धर्वाणाञ्च पतयो विश्वावसुर्हाहा हुहूः ।
तुम्बुरुः पर्वतश्चैव शैलूरश्च तथापरः ॥ ३६ ।
चित्रसेनश्च गीतज्ञस्तथा चित्ररथोऽपि च ।
एते चान्ये च गन्धर्वाः सदाशिवमुपासते ॥ ३७ ।
विद्याधराधिपश्चैव चक्रवर्मा (हि)मानुगः ।
उपासतुस्ततस्तस्यां प्रभुं धनदमीश्वरम् ॥ ३८ ।
हिमवान् पारिभद्रश्च विन्ध्यकैलासमन्दराः ।
किन्नराः शतशस्तत्र ज्ञानिनामीश्वरं प्रभुम् ॥ ३९ ।
गणाश्च शतशस्तत्र भगदत्तपुरोगमाः ।
द्रुमः किंपुरुषश्चैव उपास्ते वरदेश्वरम् ॥ ४० ।
राक्षसाधिपतिश्चैव महेन्द्रो गन्धमादनः ।
सह यज्ञैः सगन्धर्वैः सह सर्वैर्निशाचरैः ॥ ४१ ।
विभीषणश्च धर्मिष्ठ उपास्ते श्रीसदाशिवम् ।
मलयो मन्दरश्चैव महेन्द्रो गन्धमादनः ॥ ४२ ।
इन्द्रकीलः सनाभश्च तथा दिव्यौ च पर्वतौ ।
एते चान्ये च बहवः सर्वे मेरुपुरोगमाः ॥ ४३ ।
उपासते महात्मानं सदाशिवमधीश्वरम् ।
नन्दीश्वरश्च भगवान् महाकालस्तथैव च ॥ ४४ ।
शक्तं कर्णमुखाः[2] सर्वे देव्याः पारिषदास्तथा ।
काष्ठभृकुटी मुखोदन्ती विजया च तपोऽधिका ॥ ४५ ।

---

१. मेदश्च मांसश्च आसवश्चेति इतरेतरयोगद्वन्द्वः ।

२. कर्णस्य समीपे प्रत्यावर्तितं मुखं येषां ते । अथवा कर्णेन्द्रियेणैव मुखक्रिया सम्पाद्यते तैः । अथवा कर्णमुखाः कर्णेजपाः ।

श्वेतश्च वृषभश्चैव नर्दन्नास्ते महाबलः ।
वरदं राक्षसाश्चान्ये पिशाचाश्च समासते ॥ ४६ ।

पार्षदैः संपरिवृतमुमया च महेश्वरम् ।
सदा हि देवदेवेशं शिवं त्रैलोक्यभावनम् ॥ ४७ ।

प्रणम्य मूर्ध्ना पौलस्त्यो बन्धुरूपमुमापतिम् ।
ततोऽभ्यनुज्ञां सम्प्राप्य महादेवात् कुलेश्वरात् ॥ ४८ ।

आस्ते कदाचिद् भगवान् भवो धनपतेः सखा ।
निधिप्रवरमुख्यौ च शङ्खपद्मधनेश्वरौ ॥ ४९ ।

सर्वान्निधीन् प्रगृह्याथ उपास्ताद्वै सदाशिवम् ।
समता तादृशी रम्या मया गुप्तान्तरीक्षगा ॥ ५० ।

पितामहसभा तस्या ऊर्ध्वे भाति विभाविता ।
दिक्पालानां सभाग्रे तु स्थिरविद्युत्समोदया ॥ ५१ ।

महादेवं कीर्तयिष्ये सतां कण्ठसरोरुहे ।
योगिनां मौनशीलानां ध्यानसिद्धिप्रदा सभाम् ॥ ५२ ।

[1]महापातककोटिघ्नी वर्णना नास्ति ब्रह्मणः ।
सभाया वर्णने शक्तो नाहं वर्षशतैरपि ॥ ५३ ।

तथापि तव सिद्ध्यर्थं संक्षेपाद् वर्ण्यते प्रभो ।
पितामहसभां नाथ कथ्यमानां विशुद्धये ॥ ५४ ।

शक्यते सा न निर्देष्टुमेवं रूपेति सोज्ज्वला ।
सर्वदा संस्थिरा तत्र यथा नारायणे स्थिरा ॥ ५५ ।

समरूपं संविभाव्य सभया श्रीपितामहः ।
उपासते महात्मानं शाकिनी परमेश्वरम् ॥ ५६ ।

अप्रमेयां सभां दिव्यां मानुषीं नित्यरूपिणीम् ।
अनिर्दिश्यां प्रभावेण [2]सर्वभूतमनोरमाम् ॥ ५७ ।

---

१. महान्ति पातकानि हतवती या सा महापातघ्नी, हन्तेः क्विप् कर्तरि भूते ।

२. सर्वेषां भूतानां प्राणिनां मनांसि रमयति इत्यर्थिकाम् । रमयति या सा रमा, पचाद्यचि सति टाप् । सर्वभूतमनसां रमा इति विग्रहो बोध्यः ।

औषधैर्वा तथा युक्तैरुत्तमा या अनाशिनी ।
मन्मथा सा सभा देवी न शीता न च घर्मदा ।। ५८ ।

न क्षुत्पिपाशे न ग्लानिं न भूतां नापि भाविताम् ।
नानारूपैरिव कृता मणिभिः सहितायुधैः ।। ५९ ।

स्तम्भैर्न च धृता सा तु शाश्वती न च [1]साक्षरा ।
दिव्यैर्नानाविधैर्भावैर्भास्वद्भिरमितप्रभैः ।। ६० ।

अतिचन्द्रञ्च सूर्यञ्च भासते सा प्रभा स्वयम् ।
प्रदीप्ता नाकपृष्ठस्था भासयन्तीव भास्करम् ।। ६१ ।

तस्यां स भगवानास्ते विदधद्देवमानुषान् ।
स्वयमेकोऽनिशं नाथ सर्वलोकपितामहः ।। ६२ ।

उपतिष्ठन्ति चाप्येनं प्रजानां पतयः प्रभुम् ।
दक्षः प्रचेता पुलहो मरीचिः कश्यपो यतिः ।। ६३ ।

भृगुरत्रिर्वशिष्ठश्च गौतमोऽथाङ्गिरास्तथा ।
पुलस्त्यश्च क्रतुश्चैव प्रह्लादः कर्दमस्तथा ।। ६४ ।

अथर्वाङ्गिरसश्चैव बालखिल्या मरीचिपाः ।
मनोऽन्तरीक्षं विद्याश्च वायुस्तेजो जलं मही ।। ६५ ।

शब्दस्पर्शौ तथा रूपं रसो गन्धश्च धार्मिकः ।
प्रकृतिश्चाहङ्कारश्च यच्चान्यत्कारणं भुवः ।। ६६ ।

अगस्त्यश्च महातेजा मार्कण्डेयो मुनीश्वरः ।
जमदग्निर्भरद्वाजः संवर्तश्च्यवनस्तथा ।। ६७ ।

[2]दुर्वासाश्चामरिर्जेता ऋष्यशृङ्गस्तपोधनः ।
सनत्कुमारो भगवान् योगाचार्यो महातपाः ।। ६८ ।

असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित् ।
ऋषभो जितशत्रुश्च महावीर्यस्तपोमुनिः ।। ६९ ।

---

१. अश्नुते व्याप्नोति इत्यक्षरम्, अश्धातोः सरन् प्रत्ययः, तेन सहिता साक्षरा ।
२. दुष्टं विकृतं वासो यस्य स इति बहुव्रीहिः । वैराग्यातिशयेन वस्त्रविषयेऽभिलाषाभावः ।

आयुर्वेदस्तथाष्टाङ्गो देहवान् वीर्यधारकः ।
ऊर्ध्वरेता महायोगी देवदत्तो भगीरथः ॥ ७० ।

कपिलाचार्य ईशाप्तो धनदः सारसङ्गतः ।
महावाग्मीश्वरः कालः प्रियकर्मा च सुव्रतः ॥ ७१ ।

वरुणः सार्वभौमश्च देवाचार्यो धनञ्जयः ।
कामपुत्रो वशिष्ठश्च मन्दारोऽश्वत्थ एव च ॥ ७२ ।

रविमुख्यो विधाता च नैर्ऋतो यम एव च ।
अग्निः शक्रो विभाण्डश्च महावीरो गणेश्वरः ॥ ७३ ।

कार्तिकेयो जीवनाथो ग्रहचक्रः शुभङ्करः ।
वेदज्ञाता धर्मवेत्ता वारेन्द्रो नन्दनः प्रभुः ॥ ७४ ।

बृहस्पतिः शुक्रदेवो विज्ञानी भास्वरास्त्रधृक् ।
अन्ये च बहवः सन्ति ऊर्ध्वरेतार ईशगाः ॥ ७५ ।

तस्यां भान्ति महाकाल ! केवलानन्दविग्रहाः ।
चन्द्रमाः सह नक्षत्रैरादित्यैश्च गभस्तिभिः ॥ ७६ ।

वायवः क्रतवश्चैव सङ्कल्पः प्राण एव च ।
मूर्तिमन्तो महात्मानो [1]महाव्रतपरायणाः ॥ ७७ ।

एते चान्ये च बहवः सदाशिवमुपासते ।
अर्थो धर्मश्च कामश्च हर्षोऽद्वेषस्तपो दमः ॥ ७८ ।

आयान्ति तस्यां गन्धर्वाः सहिताप्सरसस्तथा ।
विंशतिः सप्त चैवान्ये लोकपालाश्च सर्वशः ॥ ७९ ।

नवग्रहास्तत्र सन्ति नानोपचारपण्डिताः ।
मन्त्रो रथन्तरश्चैव हरिमान् वसुमानपि ॥ ८० ।

आदित्याः [2]साधिराजानो नानावृन्दैरुपागताः ।
मरुतो विश्वकर्मा च वसवश्च दिगीश्वराः ॥ ८१ ।

---

१. महाव्रतानि परमयनं येषां ते महाव्रतपरायणाः । परायणत्वं प्रधानाश्रयता ।
२. राजानमधिगताः, अधिराजानस्तैः सहिताः ।

तथा पितृगणाः सर्वे सर्वाणि च हवींष्यथ ।
ऋग्वेदश्च सामवेदो यजुर्वेदः सदाशिवः ॥ ८२ ।
अथर्ववेदस्तस्यान्तः सर्वशास्त्राणि चैव ह ।
इतिहासोपदेशाश्च [1]वेदाङ्गानि च सर्वशः ॥ ८३ ।
ग्रहा यक्षाश्च सोमाश्च दैवतानि च सर्वशः ।
सावित्री दुर्गतरणी वाणी सप्तविधा तथा ॥ ८४ ।
स्मृतिर्मेधा धृतिश्चैव बुद्धिः प्रज्ञा क्षमा यशः ।
स्तुतिशास्त्राणि सामानि गाथास्तु विविधास्तथा ॥ ८५ ।
भाष्याणि तर्कवस्त्राणि देहवन्ति विभान्ति च ।
नाटका विविधाः काव्याः कथाख्याधिककारिकाः ॥ ८६ ।
तत्र तिष्ठन्ति ये पुण्या ये चान्ये गुरुपूजकाः ।
क्षणा लवा मुहूर्ताश्च दिवारात्रिः प्रभातगा ॥ ८७ ।
अर्धमासास्तथा मासा ऋतवः षट् च भैरव ।
संवत्सराः पञ्चयुगं मासा रात्रिश्चतुर्विधाः ॥ ८८ ।
कालचक्रञ्च यद्दिव्यं नित्यमक्षयमव्ययम् ।
धर्मचक्रं तथा चापि नित्यमन्तेषु विग्रहाः ॥ ८९ ।
अदितिर्दक्षकश्चैव सुरसा विनता इरा ।
कालका सुरभी देवी सरमा चाथ गौतमी ॥ ९० ।
प्रधा कद्रूश्च वै देव्यो देवतानाञ्च मातरः ।
रुद्राणी श्रीश्च लक्ष्मीश्च भद्रा षष्ठी तथापरा ॥ ९१ ।
पृथिवी गाङ्गता देवी ह्रीः स्वाहा कीर्तिरेव च ।
सुरा देवी शची चैव तथा पुष्टिररुन्धती ॥ ९२ ।
संवृद्धिराशा नियतिरिडा देवी रतिस्तथा ।
कामिनी परमानन्दा देवी श्रीत्रिपुरेश्वरी ॥ ९३ ।

---

१. वेदानामङ्गं षट्—शिक्षा, कल्पः, ज्यौतिषम्, व्याकरणम्, छन्दः, निरुक्तं चेति ।

काममाता महाबाला वरदाद्या सरस्वती ।
मन्दाकिनी वियद्गङ्गा स्वर्गगङ्गा [1]मनोजवा ॥ ९४ ।

त्रिस्रोता चन्द्रभागा च महावेगवती नदी ।
पञ्चतीर्थकलापद्माः सागराः सागरोदयाः ॥ ९५ ।

कालिन्दी वैष्णवी सिद्धा तरला [2]पुष्करोदयाः ।
भानुमती महावेगा चण्डशुक्रा महानदी ॥ ९६ ।

वेत्रवती च कावेरी महाभर्गा वसुन्धरा ।
विभावती पद्मलक्ष्मीः प्रभा भद्रा किरातिनी ॥ ९७ ।

अम्बालिका त्वहल्या च त्रितुण्डा मण्डलेश्वरी ।
मन्दोदरी मन्दवेगा मदिरा शारदा नदी ॥ ९८ ।

निर्मला मन्दरग्रन्थिः प्रज्ञा ज्वालावती रतिः ।
अवन्ती च रटन्ती च युगाद्या माघसप्तमी ॥ ९९ ।

पञ्चतुण्डा घोरनादा सन्तोषी तुष्टवंशिनी ।
भरद्वाजेश्वरी धर्मा शतधारा धरावती ॥ १०० ।

मल्लिका मालिनी मन्दा हिन्दोला लिङ्गवाहिनी।
वर्तुला सिद्धलङ्का च कुरुक्षेत्रस्थिता नदी ॥ १०१ ।

आकाशगङ्गा सिद्धाङ्गी गौतमी बालिका गया ।
दैत्यजिह्वा कालजिह्वा चतुष्कोटिकलाऽमला ॥ १०२ ।

नाडिका सार्धवह्निस्था प्रत्येकस्था न संस्थिताः ।
मूर्तिमत्यो विभान्त्यस्यां सिन्धुदेव्यस्तथा पराः ॥ १०३ ।

सभायां कृष्णनाम्नी च नदी कुलवती बला ।
तस्यां प्रधाना त्रिनदी वामदक्षिणमध्यतः ॥ १०४ ।

इडावती पिङ्गलाख्या सुषुम्नाद्या सरस्वती ।
त्रिमध्ये पूजिता देवी सुषुम्ना बहुरूपिणी ॥ १०५ ।

---

१. मनसो जवो वेगस्तत्सदृशो जवो यस्याः सा गङ्गा भगवती सर्वं पुनाति ।
२. पुष्करे पुष्करक्षेत्रे आद्यतीर्थे उदयो यासां ताः ।

नदाश्चापि च तत्सङ्ख्याः सार्धत्रिकोटयः स्मृताः।
नदः शोणो महाशोणो वटुको बलवान् हरः ॥ १०६ ।
तरुणस्तारको भद्रो विभद्रो नर्मदापतिः ।
प्रभानाथो वीरमुख्यो विशालो बलदेवकः ॥ १०७ ।
पद्मरागो मारकेतस्त्रिवृत्तो नन्दनो घनः ।
[1]अकालजिह्वो हिंसाढ्यो विधूतो ह्यवधूतकः ॥ १०८ ।
ब्रह्मपुत्रो विभाकारः कपिलोऽञ्जन एव च ।
साम्ब एको महासंख्यो[2] मण्डलाख्यो बृहन्नलः ॥ १०९ ।
शतनालाधरो रुद्रो विश्वगामी धनञ्जयः ।
सहस्रवदनो वाक्यो घर्घरो दमनस्तथा ॥ ११० ।
सिताख्यो मानवो गर्तः कुलाख्यो विसमापतिः ।
भवकुण्डो विसर्गाख्यो ज्योतिष्टोमः फलाकरः ॥ १११ ।
धवलो बदराख्यश्च वीरभद्रो मखस्तथा ।
मर्महन्ता शूलगर्तो मानभङ्गो दिवागमः ॥ ११२ ।
शूरश्चैव कालकूटो मधुगामी जलान्तकः ।
दधिधारो घृताख्यश्च सुधाधारो महानदः ॥ ११३ ।
हिङ्गूलाख्यो मालकेतुः पयस्वान् पयसः पतिः ।
लवणाख्यो धर्मपुत्रो जीवपुत्रो धनाकरः ॥ ११४ ।
मायापतिः कलानाथो विन्ध्यलो लवणाश्रयः ।
इक्षुधाराधरो मानो विधुवर्णो धराजलः ॥ ११५ ।
पुष्करो दुष्कराख्यश्च शङ्करश्च सदाशिव ।
एते चान्ये च बहवः पुष्करं समुपासते ॥ ११६ ।
त्रयाणां पुष्करः श्रेष्ठः सुषुम्नानाडिकाश्रयः ।
इडायां पुष्कराख्यश्च पिङ्गलायाञ्च शङ्करः ॥ ११७ ।
नदाश्चापि बहुतरा मूर्तिमन्तो विभान्ति च ।
नद्यश्च मूर्तिमत्यश्च सदाशिवमुपाश्रिताः ॥ ११८ ।

१. अकाले जिह्वा यस्य सः । अकाल एव प्राणिनं ग्रहीतुं जिह्वा याति यस्येत्यर्थः ।
२. मण्डं लाति आदत्ते इति मण्डलः, स आख्या यस्येति बहुव्रीहिः ।

पूजयन्ति कर्णिकायां सभायां ब्रह्मणः प्रभो ।
सदाशिवसभामध्ये ब्रह्मणः सभयोज्ज्वला ॥ ११९ ।
तस्यां देवसभा भाति शक्रस्यापि मनोहरा ।
पूर्वादिक्रमयोगेन ध्येया च खेचरीव वा ॥ १२० ।
वह्निकोणेऽनलसभा महातेजोमयी परा ।
कर्णिकाया दक्षिणे च [1]धर्मराजमहासभा ॥ १२१ ।
नैर्ऋते राक्षसेन्द्रस्य सभा सकलमोहिनी ।
वरुणे भाति दीप्ताख्या वारुणीया सभाऽपरा ॥ १२२ ।
वायुकोणे वायुसभा कौबेरी चोत्तरे सभा ।
अधो नन्दसभा भाति चोर्ध्वं ब्रह्मसभा प्रभो ॥ १२३ ।
मध्ये च भाति सूर्याभां शतायुतसमोदयाम् ।
सदाशिवसभां नाथ ब्रह्माण्डे मण्डलोद्भवाम् ॥ १२४ ।
सूक्ष्ममार्गे सदा भान्तीमीश्वरस्यापि रूपिणीम् ।
आदित्या वसवो रुद्रा मरुतश्चाश्विनावपि ॥ १२५ ।
विश्वेदेवाश्च साध्याश्च पितरश्च महर्षयः ।
एक एव तु राजर्षिः प्रधानस्तत्र भाति हि ॥ १२६ ।
[2]त्रयोदशगुणोपेता भान्ति राजर्षयस्तथा ।
पृथुश्चैव धर्मराजो हरिश्चन्द्रो युधिष्ठिरः ॥ १२७ ।
रामचन्द्रो रमानाथो भगीरथ इलापतिः ।
प्रह्लादः कर्दमश्चैव विभीषणश्च धार्मिकः ॥ १२८ ।
नलश्चैव रुक्ममाली विक्रमोद्धततापसाः ।
वामपार्श्वे अधोभागे प्रदीप्ता ह्यासनावनौ ॥ १२९ ।
अन्ये च मुनयः सन्ति समावेष्टय सदाशिवम् ।
महाभक्ताः प्रपश्यन्ति सदाशिवपरं पदम् ॥ १३० ।
अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
स्मरणात् पठनाद्ध्यानात् सदाशिवपतेः प्रभोः ॥ १३१ ।

१. धर्मस्य राजा धर्मराजः, स एव महानाश्रयो यस्याः सा ।
२. त्रयोदशसंख्याकैर्गुणैरुपेता इति मध्यमपदलोपिसमासः ।

अनायासेन सिद्धयन्ति ये ये भक्ता महीतले ।
वृद्धा वा बालका वापि यौवनस्था[1] नरा अपि ।। १३२ ।

अनायासं फलं लब्ध्वा प्रपश्यन्ति सदाशिवम् ।
एतेषां ध्यानमाकृत्य चार्चयन्ति सदाशिवम् ।। १३३ ।

स याति सहसा नाथ सदाशिवपरं पदम् ।
देवीनां यजनं कृत्वा ये ध्यायन्ति सदाशिवम् ।। १३४ ।

त्रैलोक्यं सहसा दृष्ट्वा प्रपश्यन्ति सदाशिवम् ।
यथाकाले निर्जने च गवीनां कुहरेऽपि वा ।। १३५ ।

स्थित्वा चैकमना ध्यायेत् सदाशिवपरं पदम् ।
शिवत्वं याति सहसा ध्यानाद् ब्रह्मगतस्य च ।। १३६ ।

ब्राह्मणः सहसा याति सदाशिवपरं पदम् ।
एवंभूतं ध्यायतीह सदाशिवपदाम्बुजम् ।। १३७ ।

रत्ननूपुरनादाढ्यं चलद्भूषणमण्डितम् ।
पद्मरागस्याङ्गुलीभिर्मण्डितं रक्तपङ्कजम् ।। १३८ ।

सिद्धसभासेवितञ्च सिद्धानामाश्रयाकरम् ।
[2]देवदानवगन्धर्वसिद्धचारणसेवितम् ।। १३९ ।

मुनीन्द्रगणपूज्यञ्च धर्मसिन्धुमयं ध्रुवम् ।
वाञ्छादिफलदं कान्तं शतारुणसमप्रभम् ।। १४० ।

सर्वविद्यामयं ध्यायेद् हंसमार्गे[3] निरञ्जने ।। १४१ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादेऽकालमृत्युहरणसभावर्णनं पञ्चसप्ततितमः पटलः ।।

---

१. यूनो भावो यौवनं तत्र तिष्ठति या सा "सुपि स्थः" इति कर्तरि अर्थे कप्रत्ययः । स्त्रीत्वविवक्षायां टाप्प्रत्ययः ।

२. देवदानवगन्धर्वसिद्धचारणैः सेवितम् । द्वन्द्वगर्भस्तृतीयासमासः ।

३. हंसानां नीरक्षीरविवेचनसदृशप्रकृतिपुरुषविवेकसाक्षात्कारवतां मार्गः पन्थाः, तत्रेत्यर्थः ।

अथ षष्ठसप्ततितमः पटलः

आनन्दभैरवी उवाच—

कथयामि महाकाल ! चात्यन्ताद्भुतसाधनम् ।
कवचं काकिनीदेव्या [1]अष्टोत्तरशताक्षरम् ॥ १ ।

यस्य गेहे करे शीर्षे कण्ठे च चित्तमध्यके ।
भुजमध्ये च कट्यां वा धारयित्वा महीतले ॥ २ ।

किं न सिद्धिं करोत्येव साधको योगिनीपतिः ।
योगसिद्धिः क्रियासिद्धिः शिवासिद्धिस्तथा परा ॥ ३ ।

महासिद्धिः खेचरी च सुषुम्णासिद्धिरेव च ।
फलसिद्धिः कालसिद्धिः क्रियासिद्धिः शिवाम्बिका ॥ ४ ।

जङ्घासिद्धिः परासिद्धिः खड्गसिद्धिः सुसूक्ष्मगा ।
अणिमाद्यष्टसिद्धिश्च करे तस्य स्थिरा भवेत् ॥ ५ ।

कवचं काकिनीदेव्याः सर्वसिद्धिप्रदायकम् ।
अकाले वा सुकाले वा पठनाद् धर्मसञ्चयम् ॥ ६ ।

जयो धर्मसञ्चयेन जयो यत्र शिवस्ततः ।
यत्र शिवा तत्र शिवः कवचात्मा द्वयं प्रियौ ॥ ७ ।

कर्तारौ तौ सदा तारौ पार्वतीपरमेश्वरौ ।
कार्यकारणस्रष्टारौ उभौ तत्र परात्परौ ॥ ८ ।

कवचात्मकमूर्त्तौ च स्थातारौ प्रभवात्मकौ ।
तस्य नामाक्षरं वक्ष्ये शृणुष्व भैरवेश्वर ॥ ९ ।

भैरवी भीमरूपा च विरूपा रूपवर्जिता ।
सूक्ष्मातिसूक्ष्मरूपा च स्वप्रकाशा[2] च शाकिनी ॥ १० ।

---

१. अष्टोत्तरं शतमक्षराणि यस्मिम् कवचे, तमत्यन्ताद्भुतसाधनभूतं सिद्धितत्त्वप्रदायकमित्यर्थः ।

२. स्वेनात्मना प्रकाशो यस्याः सा । घटादीनां यथा परप्रकाश्यत्वं तथा शाकिनीदेव्याः परतः प्रकाश्यता नास्ति । वेदान्तशास्त्रे परब्रह्मणः स्वप्रकाशत्वमुच्यते ।

चपला चञ्चला भीमा चन्द्रदेवी परापरा ।
कमलाक्षी देवमाता खड्गकपालधारिणी ॥ ११ ।
गुर्वी गौरी घनच्छाया ॐकाराद्या चरुप्रिया ।
छाया जया चाञ्जना च ओङ्कारात्मा कलावती ॥ १२ ।
टङ्कारिणी डाकिनी च टक्कादेवी रुणप्रिया ।
तारिणी स्थूलपुष्टा च दयाधर्मप्रिया नुतिः ॥ १३ ।
परमा बुद्धिशक्तिश्च फलदा फाल्गुनी कला ।
वसुधारा वासुकी च भद्रकाली भवाभवा ॥ १४ ।
मनसा मोहिनी माता यशोदा याज्ञिका यशा ।
रूपेश्वरी रणप्राणा लक्ष्मीर्लक्षणशोभिता ॥ १५ ।
वसुप्रिया वसुरता बालरक्षा शशिप्रभा ।
षडक्षरी शारदा च हरिद्रा हारमालिनी ॥ १६ ।
लावण्यनिरता लङ्का क्षयरोगविनाशिनी ।
क्षेत्रपाला च क्षेत्री च क्षत्रिया क्षेमदा क्षमा ॥ १७ ।
[1]क्षुन्निवृत्तिकरी क्षुब्धा क्षालनाख्या क्षराक्षरा ।
अनन्ताख्या उमा दुर्गा ऋषभा ईश्वरप्रिया ॥ १८ ।
लृकारबीजकूटस्था लृकारदीर्घजीविका ।
एरण्डरणचामुण्डा ऐन्द्री इट्टप्रियान्तरा ॥ १९ ।
तुनुतुण्डा ओषधी च उत्तमाधममध्यमा ।
औद्वेषिणी औषधस्था अट्टहासात्मसङ्गता ॥ २० ।
अर्थदा अष्टहस्ता च अर्ककोटिमयूखगा ।
अर्धनारीश्वरा अर्च्या अर्बुदास्त्रधरा समा ॥ २१ ।
अष्टैश्वर्यप्रदा[2] अर्धा अम्भस्था चाप्यरुन्धती ।
अर्पणाख्या अर्कमुनी अर्पणा अस्खलस्थिता ॥ २२ ।

---

१. क्षुधो निवृत्तिः, क्षुन्निवृत्तिस्तां करोति, तच्छीला या सा । कृञ्धातोष्टप्रत्ययः, टित्वाद् ङीप्प्रत्ययः ।

२. अष्टसंख्याकानि ऐश्वर्याणि, तानि प्रददाति या सा, "आतश्चोपसर्गे" इति कप्रत्यये स्त्रीत्वविवक्षायां टापप्रत्ययः ।

अर्चनाढ्या अर्चनास्था अराती अरुणाधरा ।
अष्टोत्तराख्यममृतं पठित्वा कवचं पठेत् ॥ २३ ।
तदा फलसमृद्धिः स्यादायुरारोग्यसाधनम्[1] ।
शाकिनीकवचस्यास्य सदाशिव ऋषिः स्मृतः ॥ २४ ।
गायत्रीच्छन्द एवापि शाकिनी देहदेवता ।
ओं श्रीं क्लीं मे शिरः पातु ब्लूँ ह्लूँ मे ललाटकम्॥ २५ ।
चक्षुषी खेचरी पातु कर्णौ मे शिवशाकिनी ।
गण्डयुग्मं सदा पातु देवशाकम्भरी रमा ॥ २६ ।
स्वाहा पातु युग्मनासां ओष्ठाऽधरं शिरोऽवतु ।
द्रीं ह्रीं श्रीं मे दन्तपङ्क्ति जिह्वाग्रं देहदेवता ॥ २७ ।
चिबुकं कमला देवी वाग्दात्री मे कपालकम् ।
वदनं कालिका पातु शब्दबीजात्मिका गलम् ॥ २८ ।
कण्ठदेवी शाकिनी च पातु मे कण्ठपङ्कजम् ।
सुरादेवी सदा पातु हृत्पद्मं कामरूपिणी ॥ २९ ।
कलावती कामकामा काममाला विशुद्धकम् ।
सदाशिवपथं पातु लक्ष्मीर्मे नाभिपङ्कजम् ॥ ३० ।
उल्कामुखी सदा पातु देवमाता षडक्षरम् ।
सदा पातु विष्णुपद्मं राकिणी पातु मे दलम् ॥ ३१ ।
कटिदेशं सदा पातु भोगदा ज्ञानमोक्षदा ।
मूलाधारं सदा पातु काकिनी परमेश्वरी ॥ ३२ ।
एकरूपा सदा पातु लिङ्गाधारं विरूपिणी ।
[2]मार्कण्डपूजिता देवी मृकुण्डा मूलवासिनी ॥ ३३ ।
सदा मे पातु देवेशि अभया चारुदेशकम् ।
दर्शनाख्या महादेवी लिङ्गाधारं पदान्तरम् ॥ ३४ ।

---

१. आयुश्चारोग्यं चेति आयुरारोग्ये ते साधयति यत्तत्, कर्तरि ल्युट् बाहुलकात् । अथवा करण एव सः ।

२. मृकण्डस्य पुत्रो मार्कण्डस्तेन पूजिता इति भावः । मार्कण्डेयशब्दस्तु ढक्प्रत्ययान्तो द्रष्टव्यः ।

पातु देवी हिरण्याक्षी सर्वाङ्गं सर्वदेवता ।
विधात्री सूक्ष्मरूपस्था [1]स्थूलाङ्गी च कृशोदरी ।। ३५ ।

सर्वत्र सर्वदा पातु देवी शाकम्भरी मम ।
हृत्कालिका सदा पातु सर्वाङ्गं सर्वदेशके ।। ३६ ।

इति ते कथितं नाथ कवचं देवदुर्लभम् ।
पठित्वा सिद्धिमाप्नोति राजत्वं लभते नरः ।। ३७ ।

अकस्मात् सूर्यतुल्यः स्यात् कामजेता स्वयं भवेत् ।
धारणाद् देहवृद्धिः स्यादायुरारोग्यसम्पदम् ।। ३८ ।

वायुसिद्धिकरं साक्षादमृतानन्दविग्रहम् ।
अग्निस्तम्भं जलस्तम्भं वायुस्तम्भं करोति हि ।। ३९ ।

खेचरो योगजेता स्यादाशाक्षयकरो भवेत् ।
ततः पठेत् काममन्त्रं तदन्ते ध्यानमाचरेत् ।। ४० ।

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे
नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणा-
मुम्म इषाण सर्वंलोकम्म इषाण ।। ४१ ।

जपित्वा काममन्त्रं हि सर्वकामफलं लभेत् ।
ततो ध्यात्वा च कवचं ध्यायेद्यः शाकिनीशिवम् ।। ४२ ।

स वेदपारमायाति शाकिनीध्यानयोगतः ।। ४३ ।

प्राणाख्यां शुक्लपद्मे निरवधिनिलयां शाकिनीं पीतवस्त्रां
सूक्ष्मां भूषातिरुद्रोद्भवतनुचपलां चञ्चलां सिद्धिलोलाम् ।
हस्तैः पद्मैश्चतुर्भिः सुनयनकमलैर्भासमानां शिवाढ्यां
पद्माभीतिप्रचण्डासिचयसहितां शाकमातां भजामि ।। ४४ ।

---

१. स्थूलेऽक्षिणी यस्याः सा । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति सूत्रेण षच्प्रत्ययः, षित्वान् ङीष् । स्थूलाङ्गी इति पाठेऽपि 'अङ्गगात्रकण्ठेभ्यो वक्तव्यम्' इति वचनेन ङीष्प्रत्ययो वैकल्पिकविधिना बोध्यः ।

ध्यात्वा योगी श्मशाने [1]गिरिवरकुहरे डाकिनीदेशमध्ये
शून्ये गर्ते वने वा गगनगृहतले शून्यगेहे सुप्रवासे ।
ज्ञानात्मा यो वशी वा पठति च सततं शाकिनीदेहयोगं
गङ्गायां स्वीयगर्भे कवचमभयदं सर्वदं याति सिद्धिम् ॥ ४५ ।

कवचं कारणैर्देवीं पूजयित्वा यथाविधि ।
अकस्मात् [2]कायसिद्धिः स्यादष्टैश्वर्यसमन्वितः ॥ ४६ ।

मोक्षमाप्नोति भावेन सुखं तस्य पदे पदे ।
म्रियन्तु बालका यस्याः [3]काकवन्ध्या च या भवेत् ॥ ४७ ।

धारयित्वा त्विमां विद्यामेतैर्दोषैर्न लिप्यते ।
कण्ठे यो धारयेदेतां समरे काण्डधारिणीम् ॥ ४८ ।

अक्षयत्वमवाप्नोति जीवमात्रः सदाशिवः ।
गोरोचनाकुङ्कुमेन कालागुरुहरिद्रया ॥ ४९ ।

लाक्षारसैर्लेखयित्वा धारयित्वाऽमृतं लभेत् ॥ ५० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे शाकिनीकवचं नाम षष्ठसप्ततितमः पटलः ॥

●

---

१. गिलति पृथिवीं निगिलति योऽसौ गिरिः । गृधातोरौणादिक इ-प्रत्ययः, तस्य कित्वाद् गुणाभावः । गिरीणां वरस्तस्य कुहरे इति भावः ।

२. चीयन्तेऽस्मिन्नस्थ्यादीनि स कायः, "निवासचितिशरीरोपसमाधानेष्वादेश्च कः' इति सूत्रेण चिञ्धातोर्घञ् आदेश्चकारस्य ककारादेशश्च, कायस्य सिद्धौ तस्य सर्वदेशेषु अप्रतिहता गतिर्भवति, सूर्यलोके, चन्द्रलोके, हिमाच्छन्नदेशे वा तद्गमनस्यावरोधो न भवति ।

३. काकवन्ध्याशब्दः पारिभाषिकः । यस्याः स्त्रिया बालका उत्पद्य म्रियन्ते, सा काकवन्ध्या इत्युच्यते ।

अथ सप्तसप्ततितमः पटलः

श्रीआनन्दभैरव उवाच—

इदानीं वद कौमारि सुन्दरि प्राणवल्लभे ।
अशीतितमे पटले वद योगार्थसञ्चयम् ।। १ ।

श्रीआनन्दभैरवी उवाच—

शृणु भैरवराजेन्द्र सदाशिवादिशाकिनीम् ।
द्वयोराह्लादयोगो हि भोगमोक्षफलायते[1] ।। २ ।
आकाशपरमाणूनां विशिष्टामलचक्षुषाम् ।
दर्शनं विद्युज्जडितं प्राप्नोति सहसा सुधीः ।। ३ ।
सदाशिवकुलस्थानोपरि श्रीशाकिनीपदम् ।
द्वयोर्यो हि विशिष्टज्ञो ज्ञानखेचरसिद्धये ।। ४ ।
तत्कुलस्थानमावक्ष्ये यथावदवधारय ।
षोडशाख्यदलाग्रेषु मध्यमूलेषु सर्वतः ।। ५ ।
सदाशिवकुलस्थानं चक्रराजं विचिन्तयेत् ।
विचिन्त्य शतधा योगी किं न सिद्धयति भूतले ।। ६ ।
भूतानामधिपो भूत्वा स्थिरो भवति भूतले ।
भगवन्तं महाकायं परदेवं सदाशिवम् ।। ७ ।
चक्रस्थं चक्रबाह्यस्थं बाह्यमाभ्यन्तरं परम् ।
पश्यत्येव महायोगी कालचक्रं ततः परम् ।। ८ ।
अनायासेन गगनग्रन्थिं भित्त्वा परे लयम् ।
चक्रराजप्रसादेन सर्वसञ्चारगो भवेत् ।। ९ ।
[2]द्वात्रिंशत्कठिनग्रन्थिं भित्त्वाकाशे खगोर्ध्वगः ।
ततः परशिवानन्दचक्रं शक्त्यात्मकं ततः ।। १० ।

---

१. भोगश्च मोक्षश्च भोगमोक्षौ, तौ च ते फले चेति भोगमोक्षफले, त इवाचरति इति भोगमोक्षफलायते, "उपमानादाचारे" इति सूत्रेण क्यङ्प्रत्ययः ।

२. द्वात्रिंशत्संख्याका कठिना ग्रन्थिस्तद्भेदनमुक्तम् । एतद्ग्रन्थिगणना पारिभाषिकी वर्तते ।

ततो हि शब्दनिकरं परास्थानं ततः परम् ।
[1]सकलानिष्कलास्थानं बोधनीमण्डलं ततः ॥ ११ ।

तदूर्ध्वञ्चोन्मनीपीठं भित्त्वा च तदनन्तरम् ।
भृगुपूरं ततो भित्त्वा नादपूरं ततः परम् ॥ १२ ।

नादान्तकं ततो भित्त्वा ब्रह्मविष्णुघटाकरम् ।
क्रियाकरं प्राणलयं यज्ञस्थानं शिखापदम् ॥ १३ ।

पूर्णगिरिमुड्डियानं भित्त्वा च स्वपदं ततः ।
दुर्गस्थानं ततो भित्त्वा प्रकाशस्थानमेव च ॥ १४ ।

तदूर्ध्वे पिङ्गलास्थानं तदूर्ध्वे तापदं ततः ।
सुषुम्नामण्डलं भित्त्वा धौत्रिकोणं महालयम् ॥ १५ ।

महाबिन्दुं तदूर्ध्वे तु षट्कोणं तु तदूर्ध्वके ।
तदूर्ध्वे वासनापूरं बीजपूरं तदूर्ध्वके ॥ १६ ।

तदूर्ध्वे विष्णुचक्रं तु कुलालिचक्रवत्स्थितम् ।
तं भित्त्वा कामनगरं सर्वकामफलप्रदम् ॥ १७ ।

तदूर्ध्वे शक्रचक्रं तु तदूर्ध्वे भूमिचक्रकम् ।
तदूर्ध्वे कोषचक्रं तु तदूर्ध्वे वायुचक्रकम् ॥ १८ ।

तदूर्ध्वे वह्निचक्रं तु तदूर्ध्वेऽमृतचक्रकम् ।
तदूर्ध्वे जलचक्रं तु दिवाचक्रं तदूर्ध्वके ॥ १९ ।

तदूर्ध्वे यामिनीचक्रं तदूर्ध्वे तारचक्रकम् ।
तदूर्ध्वे धर्मचक्रं तु कालचक्रं तदूर्ध्वके ॥ २० ।

सर्वकालं सदा व्याप्य जगत्स्थावरजङ्गमम् ।
सदा तदूर्ध्वनिकरं सप्तसागरमण्डलम् ॥ २१ ।

तदूर्ध्वे भाति सततं श्रीजलान्तकमण्डलम् ।
तदूर्ध्वे तु महाचक्रं महापद्मवनाकरम् ॥ २२ ।

---

१. कलाभिः सहिता सकला, निर्गता कला यस्याः सा निष्कला, सकला च निष्कला च, तासां स्थानम् । विरोधिधर्मयोः समावेशः परतत्त्व एव भवति । अत एव वन्दे वह्निशशाङ्कसूर्यनयनमिति कथनं भगवति शिवे संगच्छते ।

टङ्कारोपरि संध्यायेत् सहस्रारे सुपङ्कजम् ।
तं भित्त्वा ज्ञानपद्मं तु कर्णिकायां प्रपश्यति ।। २३ ।

[1]प्रेतरूपमहादेवशवाकारं तु निष्क्रियम् ।
अस्योरसि प्रेतबीजं सूर्यायुतसमप्रभम् ।। २४ ।

ऊरुमूले च तस्यापि क्रोधबीजं शतारुणम् ।
तस्योपरि महाकालीमवश्यं परिपश्यति ।। २५ ।

प्रत्यालीढपदामम्बामम्बुजाक्षीं हसन्मुखीम् ।
चतुर्भुजां खड्गमुण्डवराभयकराम्बुजाम् ।। २६ ।

त्रैलोक्यजननीं ब्रह्मरूपिणीं मुकुटोज्ज्वलाम् ।
मुण्डमालां संवहन्तीं सर्वास्त्रां सर्वकारणाम् ।। २७ ।

अनन्तकोटिब्रह्माण्डब्रह्मव्यापकरूपिणीम् ।
प्रसन्नवदनां घोरां शवकर्णां करालिनीम् ।। २८ ।

योगीन्द्रजननीं नित्यां भवानीं भवमोचिनीम् ।
विमलां निर्मलानन्दां ज्ञानानन्दस्वरूपिणीम् ।। २९ ।

धर्मार्थकाममोक्षस्थां मुक्तकेशीं दिगम्बरीम् ।
ललितां सुन्दरीं श्यामां महाकालनिषेविताम् ।। ३० ।

महोग्रां चन्द्रघण्टाढ्यनितम्बरत्नमेखलाम् ।
सहस्रानन्तसूर्योग्रतेजोरूपां कुलप्रियाम् ।। ३१ ।

श्मशानवासिनीं दुर्गां श्मशानालयवासिनीम् ।
घोररावां महारौद्रीं कालिकां दक्षिणां पराम् ।। ३२ ।

कर्णावतंसतां नीतशवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ।। ३३ ।

शवानां करसङ्घातैः कृतकाञ्चीं प्रियंवदाम् ।
[2]सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ।। ३४ ।

---

१. प्रेतरूपो महादेवस्तस्य शवाकारस्तं प्रपश्यति इत्यन्वयः ।

२. सृक्कद्वयेन गलन्ती या रक्तधारा, तया विस्फुरितमाननं यस्याः सा, तामिति भावः ।

[1]बालार्कमण्डलाम्भोजनयनत्रयभूषिताम् ।
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकुचश्रियम् ॥ ३५ ॥
शवरूपमहादेवहृदयोपरि संस्थिताम् ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥ ३६ ॥
महाकालव्यापकेन विपरीतरतातुराम् ।
सुखप्रसन्नवदनां स्मेरारुणसरोरुहाम् ॥ ३७ ॥
मधुमांसचर्वणाढ्यां वरदां मदनातुराम् ।
वेदवेदाङ्गविद्याभिरुदारगुणसम्भवाम् ॥ ३८ ॥
दैत्यदानवदर्पघ्नीं भगमालाकलेवराम् ॥ ३९ ॥
चिन्तयेत् कौलिकां कालीं कुलवृक्षतलस्थिताम् ।
श्रीकल्पलतिकां विद्युत्कोटिमण्डितकुण्डलाम् ॥ ४० ॥
नागयज्ञोपवीताढ्यां चन्द्रार्धकृतशेखराम् ।
सर्वालङ्कारयुक्ताञ्च वह्न्यर्कशशिलोचनाम् ॥ ४१ ॥
ललज्जिह्वां कामरूपां कामपीठनिवासिनीम् ।
अतिसौन्दर्यवदनां धाराविस्फुरितप्रभाम् ॥ ४२ ॥
कामदां सिद्धगन्धर्वदेवचारणनाटकैः ।
स्तूयमानां ब्रह्मविष्णुशिवशक्रमहर्षिभिः ॥ ४३ ॥
सर्वदा वन्दितां कोटिजलदाभतनुप्रभाम् ।
संसारतारिणीं तारां तारब्रह्मस्वरूपिणीम् ॥ ४४ ॥
इन्दुनीलमणिश्रेणिशोभाविद्युत्प्रकाशिनीम् ।
श्रीवासमधुरानन्दप्रियप्रेमदिगम्बरीम् ॥ ४५ ॥
लज्जातीतां कुलातीतां ज्ञानातीतां निरञ्जनाम् ।
[2]क्रोधपुञ्जसमुद्भूतद्वीपिचर्मकटिप्रभाम् ॥ ४६ ॥

---

१. बालार्को बालसूर्यस्तस्य मण्डलं तेन प्रस्फुटितमम्भोरुहं कमलं तद्वद् नयनत्रयं तेन भूषिताम् ।

२. क्रोधपुञ्जेन समुद्भूता द्वीपिचर्मणा (व्याघ्रचर्मणा) आच्छादिता या कटिस्तस्याः प्रभा यस्याः सा भगवती शिवा ।

नीला-घना-बला-माया-मात्रा-मुद्रा-कलादिभिः ।
सर्वदा पूजितां ध्यायेत् सहस्रारवराम्बुजे ॥ ४७ ॥

एवं ध्यात्वा महाकालीं श्यामां कामदुघां[1] शिवाम्[2] ।
[3]आकाशगामिनीं सिद्धिमवश्यं लभते वशी ॥ ४८ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे
षट्चक्रप्रकाशे सदाशिवकुलचक्रक्रमनिरूपणे
भैरवीभैरवसंवादे योगार्थसञ्चयनं नाम
सप्तसप्ततितमः पटलः ॥

---

१. कामान् इष्टान् विषयान् दोग्धीति कामदुघा, स्वेष्टविषयप्रपूरिका भगवती शिवा देवी इति भावः ।

२. शेते प्रलयकाले सर्वं जगद् यस्यां सा शिवा, शेतेर्डप्रत्यये टाप् ।

३. आकाशे गच्छति, तच्छीला "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनिः ।

अथाष्टसप्ततितमः पटलः

श्रीआनन्दभैरवी उवाच—

शृणु भैरव वक्ष्यामि सङ्केतार्थविनिर्णयम् ।
कुलचक्रक्रमं सिद्धं शक्तिसदाशिवस्य च ॥ १ ॥

अस्य विज्ञानमात्रेण कण्ठपद्मे स्थिरो भवेत् ।
पद्माग्रे च सारचक्रं योगिनामतिसुप्रियम् ॥ २ ॥

ध्यानादेव महाबाहो सर्वचक्रप्रदर्शकम् ।
ऊर्ध्वरेता कामजेता ज्ञानी मौनी दिगम्बरः ॥ ३ ॥

खेचरो धारकः श्रीमान् कौलिकः साधको भवेत् ।
तच्चक्रध्यानमेवं तु द्विद्वारमग्रतो मुखे ॥ ४ ॥

तदन्ते चापि द्विद्वारं तिलार्धं भिन्नरेखया ।
रेखाद्वये नैकद्वारमेवं द्वारद्वयं पुनः ॥ ५ ॥

अग्रादुत्तरपर्यन्तं ध्यायेद् वारद्वयं सुधीः ।
द्वयोर्मध्ये चतुर्वेदरेखामण्डलमेव च ॥ ६ ॥

तदन्तरे च षट्कोणं द्विषट्कोणं तदन्तरे ।
तन्मध्येऽष्टदलं पद्मं तन्मध्ये चन्द्रमण्डलम् ॥ ७ ॥

तन्मध्ये शून्यरूपं तु निराकारं निरञ्जनम् ।
तत्त्वज्ञानाश्रितानन्दविद्यात्मानं ममास्पदम् ॥ ८ ॥

स्थूलसूक्ष्ममयं शुद्धं वाच्यवाचकभावनम् ।
अभेदं तु ममात्मानं कोटिसूर्यसमप्रभम् ॥ ९ ॥

कोटिविद्युत्प्रभाकारं चन्द्रकोटिसुशीतलम् ।
'सर्वव्यापकमीशानमभेदज्ञानकारणम्' ॥ १० ॥

---

१. सर्वेषु पदार्थेषु व्याप्नोति इति सर्वव्यापकम् ।

२. अभेदज्ञानमद्वैतज्ञानम्, एकमेवाद्वितीयं ब्रह्म, इति श्रुतिप्रतिपादितं तस्य कारणम् ।

विधातारं परब्रह्म सर्वज्ञं सर्वदर्शिनम् ।
सर्वशास्त्रप्रवक्तारं ज्ञानज्ञेयं चराचरम् ॥ ११ ।

अष्टहस्तं विशालाक्षं शूलिनं मुण्डमालिनम् ।
जरातीतं निर्विकल्पं तरुणं तारकं हरम् ॥ १२ ।

हरिं ब्रह्माणमीशानं त्रिलोकानां प्रभामयम् ।
अभेद्यभेदकं सिद्धं सिद्धासनकरं सुरम् ॥ १३ ।

गन्धर्वनगरं देशं विशेषं सर्वतोमुखम् ।
अकालतारकं स्वाहास्वधाशक्तिसमन्वितम् ॥ १४ ।

कोटिकालानलाकारं रौद्रं रुद्रात्मकं भवम् ।
कन्याश्रीसुन्दरीकोटिमण्डलान्तःप्रकाशकम् ॥ १५ ।

तेजोबिम्बं भासमानं सर्वव्याधिनिकृन्तनम् ।
हृषीकेशानन्दसिद्धं त्रिविक्रमफलोदयम् ॥ १६ ।

नृसिंहक्रोधनिलयं सर्वदैत्यविनाशनम् ।
मीनावतारवेदार्थसमुद्धरणकारणम् ॥ १७ ।

कूर्मपृष्ठाधारचक्रं वराहदन्तभूषणम् ।
नरसिंहाकारभक्तरक्षकं परमेश्वरम् ॥ १८ ।

महेन्द्ररक्षकं दैत्यदर्पघ्नं वामनं तनुम् ।
दैत्यक्षत्रियदर्पघ्नं परशुरामं द्विजाधिपम् ॥ १९ ।

भृगुवंशपतिं सत्यज्ञानावतारमुत्तमम् ।
श्रीरामं पावनं रक्षोहन्तारं तापसं गुरुम् ॥ २० ।

त्रैलोक्याधारमानन्दरूपं हलधरं परम् ।
अनन्तं योगिनामाद्यं सहस्राङ्कफलान्वितम् ॥ २१ ।

बुद्धं [१]निराकारधर्मं [२]सर्वशास्त्रार्थवर्धकम् ।
नित्यश्रुत्युदितामोदधर्माधर्मविवर्जितम् ॥ २२ ।

१. निर्गत आकारो यस्मात्तादृशो धर्मो यस्य तम् ।
२. सर्वं शास्त्रार्थं वर्धयति समेधयति, छेदयति वा ।

स्वयम्भुवं स्वप्रकाशं परमात्मानं मङ्गलम् ।
एकाकारं धर्मचक्रवेदिनं स्वच्छसङ्गरम् ।। २३ ।
दुष्टनिग्रहकर्तारं महावीरं धनञ्जयम् ।
श्रीकृष्णं सर्वसेवाभिः पूजितं तन्मयं शुभम् ।। २४ ।
विमदं रक्षकं [1]ध्यानज्ञानमोक्षप्रकाशकम् ।
राजराजेश्वरं वास्यं सर्वलोकनिषेवितम् ।। २५ ।
सर्वदेहस्थितं धर्मं धर्मात्मानं विनोदिनम् ।
व्यापकं [2]व्यापकाधारं निर्विकल्पं सुधामयम् ।। २६ ।
विशिष्टं पञ्चपाषाणमहापीठनिवासिनम् ।
अनन्तानन्तमहिमं कपालशूलधारिणम् ।। २७ ।
त्रिरेखामण्डलस्थानं चतुर्वेदक्रमाकरम् ।
एकवक्त्रं द्विपादं च द्विमुखञ्च चतुष्पदम् ।। २८ ।
त्रिमुखं षड्भुजं नाथं चतुर्वक्त्रं विधिं परम् ।
अष्टाम्भोजभुजाम्भोजं पञ्चवक्त्रं त्रिलोचनम् ।। २९ ।
शिवं दशभुजं सौख्यं सुन्दरं श्रीषडाननम् ।
नित्यं द्वादशहस्तञ्च सर्वास्त्रधारिणं ध्रुवम् ।। ३० ।
सप्तमुखं महाकायं चतुर्दशभुजं प्रियम् ।
अष्टमुखं शिवाह्लादं भुजषोडशमण्डितम् ।। ३१ ।
नवपद्ममुखाम्भोजमष्टादशभुजं विभुम् ।
उन्मत्तभैरवं कोटिमहाविद्याद्यवल्लभम् ।। ३२ ।
अमरेशं महाकायमष्टादशभुजापतिम् ।
कालराशिं कृष्णवर्णं चित्रसर्पसुमालिनम् ।। ३३ ।
शतवक्त्रं कोटिहस्तं सहस्रवदनाम्बुजम् ।
शतकोटिमुखं [3]नित्यानन्दसन्तानमन्दिरम् ।। ३४ ।

---

१. ध्यानं ज्ञानं मोक्षं च प्रकाशयति इति भावः ।

२. व्यापकश्चासौ आधारश्चेति कर्मधारयो न तु बहुव्रीहिः ।

३. नित्यो य आनन्दस्तस्य सन्तानो विस्तारस्तस्य मन्दिरमाश्रयम् ।

[1]अनन्तचरणाम्भोजमनन्तजनसेवितम्[2] ।
अनन्तहस्तकमलमनन्तालङ्कृतोज्ज्वलम् ॥ ३५ ।
अन्तःप्रकाशनिकरमनन्तगुणसम्भवम् ।
अनन्तसृष्टिस्रष्टारमनन्तस्थितिकारणम् ॥ ३६ ।
अनन्तकमलावन्ये चानन्तसंहृतिप्रियम् ।
अनन्तबीजनिकरमनन्तशास्त्रनिश्चयम् ॥ ३७ ।
अनन्ततापसन्तृप्तमनन्तजलमध्यगम् ।
अनन्तपरमाधारमनन्तवह्निधारिणम् ॥ ३८ ।
अनन्ताकाशनिकरमनन्तपृथिवीपतिम् ।
अनन्तज्वालामालाढ्यमनन्तबुद्धिकारणम् ॥ ३९ ।
अनन्तस्थानपूजाढ्यमनन्तनामसिद्धिदम् ।
अनन्तगतिविज्ञानमनन्तराज्यदं सुखम् ॥ ४० ।
अनन्तधर्मशास्त्रार्थकिरणं काव्यपूजितम् ।
अनन्तदेवतास्थानमनन्तकर्मसिद्धिदम् ॥ ४१ ।
अनन्तमालागुटिकाजापिनं नित्यसिद्धिदम् ।
अनन्तचित्तसञ्चारमनन्तानन्तविक्रमम् ॥ ४२ ।
अनन्तजीवसंज्ञानमनन्तभावनाप्रियम् ।
अनन्तनिर्मलानन्दमनन्तप्राणिवल्लभम् ॥ ४३ ।
अनन्तगाथाकर्तारमनन्तसिन्धुसंस्थितम् ।
सर्वतः पाणिपादान्तं सर्वतोऽक्षिशिरोमुखम् ॥ ४४ ।
सर्वमावृत्य तिष्ठन्तमपराजितमीश्वरम् ।
ध्यात्वाऽऽनन्दमयं देवं पीठमध्ये च साधकम् ॥ ४५ ।
शाकिनीदेवशक्तिश्रीप्रेमाह्लादपरायणम् ।
[3]देवदेवं विश्वमयं शक्यरूपं [4]सनातनम् ॥ ४६ ।

---

१. अनन्तौ चरणौ अम्भोजमिव कमलमिव यस्य तम् ।
२. अनन्ता ये जनाः, तैः सेवितम्, सभाजितम् ।
३. देवानपि देवयति योऽसौ ।
४. सना भवः सनातनः तम् ।

मम रूपं यदा नाम्ना स्तौति [१]कामविनोदिनम् ।
ध्यात्वा चक्रपुरे योगी निरालम्बो दिगम्बरः ॥ ४७ ।

गगने चक्रसारं तु कुलनाम्ना प्रतिष्ठितम् ।
ध्यात्वा भवति योगीन्द्रः खेचरो गतभीः प्रभुः ॥ ४८ ।

अनायासेन सिद्धिः स्याद् ज्ञानी च ज्ञानवान् भवेत् ।
ऊर्ध्वमुखं कण्ठपद्मं तदग्रे चक्रमण्डलम् ॥ ४९ ।

अधोमुखं नेत्रपद्मं द्विदलं चातिसुन्दरम् ।
तदग्रे च महाचक्रं तदाकारं महाप्रभम् ॥ ५० ।

द्विचक्रसङ्गमं यत्र दृश्यते रात्रियोगतः ।
तदा भवति देवेश चतुर्द्वारं मनोहरम् ॥ ५१ ।

चक्रं निरञ्जनं ज्ञानज्ञेयं मन्त्रमयं शिव ।
यो जानाति महादेव स भवेत् कल्पपादपः ॥ ५२ ।

इति कण्ठस्य माहात्म्यं संक्षेपात् कथितं मया ।
जानाति योगी ध्यानेन ज्ञानयुक्तेन चेतसा ॥ ५३ ।

पश्यत्येव महात्मानं ज्ञानज्ञेयं सुधामयम् ।
कोटिवर्षशतेनापि कथितुं नैव शक्यते ॥ ५४ ।

तव भक्त्या महादेव तवायुःक्षेत्ररक्षणात् ।
इदानीं कथितं कण्ठपद्मसञ्चारमङ्गलम् ॥ ५५ ।

अप्रकाश्यं महागुह्यं शब्दब्रह्मस्वरूपकम् ।
निर्जने दोषरहिते व्याधिबाधाविवर्जिते ॥ ५६ ।

सुभिक्षानिन्दारहिते स्थित्वा तत्र दृढव्रतः ।
भावयेत् परया भक्त्या तव रूपं विचिन्तयन् ॥ ५७ ।

अचिराद्योगसिद्धः स्यान्निदानज्ञानसिद्धिभाक् ।
श्रीमातृका महादेवी लीलावती शुभा सती ॥ ५८ ।

---

१. कामदेवमपि विनोदयति तच्छीला, तमिति ।

अम्बा गुर्वी गुरुशक्तिः पातु मामतिकातरम् ।
तामम्बामम्बुजाक्षीं[1] च प्रणम्य च पुनः पुनः ॥ ५९ ।

इदानीं कथये नाथ भूपद्मज्ञाननिर्णयम्[2] ॥ ६० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे कण्ठाम्भोजभेदप्रकाशो नाम अष्टसप्ततितमः पटलः ॥

●

१. अम्बुजे कमले इवाक्षिणी यस्याः सा । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति सूत्रेण बहुव्रीहौ षच्प्रत्ययः । ततो ङीष्, स्त्रीत्वविवक्षासत्वात् ।

२. भूपद्मं पृथिवीकमलम्, अथवा भवनं भूः, उत्पत्तिः, पद्मो यस्यासौ भूपद्मः, ब्रह्मा, तस्य यज्ज्ञानं तस्य निर्णयो निश्चयो यत्र तमिति भावः ।

अथैकोनाशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

कथयस्व वरारोहे [1]कामनासिद्धिमङ्गलम् ।
अप्रकाश्यं महाज्ञानं यदि स्नेहोऽस्ति मां प्रति ॥ १ ।

अनादिशास्त्रगोप्यं तु सर्वतन्त्रेषु गोपितम् ।
सुखस्नेहकृपादृष्ट्या सर्वतत्त्वसुमङ्गलम् ॥ २ ।

ज्ञानगम्यं शब्दजालं कोमलान्तःप्रकाशकम् ।
आयुरारोग्यजननं धर्मार्थकाममोक्षदम् ॥ ३ ।

भूपद्मद्विदलं सिद्धमुनिमण्डलसङ्कुलम् ।
ज्ञानिनामात्मसिद्धान्तरूपज्ञानसमागमम् ॥ ४ ।

यामलस्य महारुद्रसेवितस्य वरानने ।
वद विस्तार्य यत्नेन जीवन्मुक्तिपदं यतः ॥ ५ ।

लभ्यते तत्क्षणादेव कृपया करुणामयि ।
कालकूटप्रभावेण चात्मनो विस्मृतिर्गता ॥ ६ ।

तां विस्मृतिं समाकृत्य स्मृतिज्ञानं विधेहि मे ।
परमानन्दनिर्वाहनिर्वाणप्रथमाङ्कुरम् ॥ ७ ।

श्रीआनन्दभैरवी उवाच—

वक्ष्येऽहं द्विदलं विभाण्डकमलं कालानलव्याकुलं
शोभामोहनरञ्जनं सुचपलामालाकपालोज्ज्वलम्[2] ।
दीप्तिश्रेणिसुकर्णिकान्तरगतः श्रीशाकिनीवल्लभः
प्राणिप्राणनिदानगः परशिवः सम्पातु सञ्चारगः ॥ ८ ।

---

१. कामनानां सिद्धयः, तासां मङ्गलम् । मङ्गेरलच्प्रत्ययः ।

२. सुचपला या मालाः, ताः कपाले यस्य सः, स चासौ उज्ज्वलश्च । अथवा सुचपला मालाः सन्ति यत्र कपाले, तेनोज्ज्वलमिति भावः ।

[1]संहारोज्ज्वलकान्तिकान्तनिकरं संहारकूपोज्ज्वलं
तेजोरूपमहाशिखासुखपदं पीयूषतैलप्रियम् ।
ताराधीशदिनेशतैजसमयं मायापरादोद्यमं
विद्यावल्लभभावसारविनुतं द्वे पत्रमित्रे भजे ॥ ९ ।

आकाशाग्रे प्रभाग्रोग्रगमनधरणीधारसारे प्रचारे
श्रीनाथेशः क्षितीशः प्रचुरविधुमणिश्रेणिमालाग्रकण्ठः ।
श्रीकण्ठो नीलकण्ठः प्रभवति भुवनानन्दकर्तार्थकर्ता
विद्या श्रीहाकिनीशः स्फटिकमणिगृहे रक्तशक्त्या च हंसः ॥ १० ।

पुरो विभाति कर्णिकासुमध्यचक्रमण्डले
विशिष्टशक्तिहाकिनी तथापि दुर्गतारिणी ।
यदीह भाव्यते नरैः सुमन्त्रतन्त्रगायनै-
स्तदा परत्वमाप्नुयाद्दिवि स्थिरो भवेद्द्रुते ॥ ११ ।

द्विदलकमलमध्ये हाकिनी देवमाता
विभवनवकुमारी योगिनी योगसिद्धा ।
यदि चरति विलिप्ता चोर्ध्वमार्गे निषण्णा
त्रिभुवनकरुणाभिः साधकस्य प्रसन्ना ॥ १२ ।

जपरटिपरमन्त्रप्राणजापी मनुष्यो
भवति विमलचेता हाकिनीहोमदेव्याः ।
मनुमपि हृदि नित्यं संविभाव्य प्रतिष्ठः
परपुरकुलगामी ध्यानविज्ञानपुण्यः ॥ १३ ।

विषयमधुरतृष्णावर्जितो [2]निर्जितारिः
कुलयुगकमलान्तः सुप्रकाशस्वरूपः ।
विधिकृतकुलदोषं भाति निर्जित्य दोषं
रतिपतिसमकान्तः साधको निर्णितान्तः[3] ॥ १४ ।

---

१. संहारोज्ज्वला कान्तिः, तस्याः कान्तस्तेषां निकरः समूहो यत्रासौ तम् ।
२. निर्जिता अरयः कामक्रोधलोभादयो येनासौ तमिति भावः ।
३. निर्णितः निर्णीतोऽन्तो यस्य । अत्रेकारस्य बाहुलकाद् ह्रस्वः ।

जपति मनुधनार्थं भ्रान्तिहोमोत्सवार्थं
मनुजकुलवरेण्योऽन्यानि काल्या विहाय ।
अयुतशतसुमन्त्रान्नाशपुञ्जाक्षराणि
प्रसवति [1]रिपुहन्ता साधको हाकिनीशः ॥ १५ ।

परशिवनवभावप्रावणान्तःप्रवेशी
द्विदलकमलशोभा कोटिसंभाषयन्ती ।
निजकुलपरिदेवैर्भाव्यते भावमानै-
र्भवति चपलमाद्या हाकिनी सुप्रसन्ना ॥ १६ ।

आज्ञानाम सुपङ्कजं विधुशताह्लादप्रभापाटलं
विद्युद्रश्मिभिरुन्नतं धवलपीठानन्दचिद्रूपदम् ।
हस्ताभ्यां कनकप्रभादीप्ताभ्यां प्रकाशोज्ज्वलं
हाकिन्या कलाभयाप्रचलितं ध्यायेत् परानन्दनम्[2] ॥१७।

ध्यानज्ञानादिधाम प्रचयति जयति क्षोभितारिप्रसारी
हस्ताभ्यां हेमभाभ्यां तरुणरविशशीशोभिताभ्यां विधाय ।
सूक्ष्मात्सूक्ष्मातिसूक्ष्मं विचरयति सुधां हाकिनी प्राप्य नाथं
कोटीन्दुक्षेमकान्तिप्रसभधनरसा नन्दितामभ्रपीठे ॥ १८ ।

ध्यायेद् देवीं पराढ्यां त्रिभुवनजननीं षण्मुखीं वेदहस्तां
विद्यामुद्राविरुण्डं जपवटिडमरुं धारयन्तीं ज्वलन्तीम् ।
चेतःशान्तिप्रदात्रीं विधुमणिमुकुरां भीषमानां समानां
षट्कोणे बिन्दुमूले युगदलकमले द्वारयुग्मद्वयाढ्ये ॥ १९ ।

एतच्चक्रस्य मध्ये सकलसुरगणविद्युताकारदीप्ता
नित्यं संभाति पार्श्वावधिकमलमहामण्डलाकारभावे ।
दोषाशेषापनाशे सकलबुधजनैः शोभिता पद्ममाला
प्राणाख्या वह्निजिह्वा[3] सुखमयविमला योगिनो योगमुख्या॥२०।

---

१. रिपूणां कामक्रोधलोभादीनां हन्ता विनाशकः ।
२. परान् अन्यान् आनन्दयति योऽसौ तम् ।
३. वह्निरग्निर्जिह्वा यस्याः सा, संयोगोपधत्वाद् ङीषोऽभावः ।

[1]मनोयोगचिह्नं प्रसिद्धं सुसूक्ष्मं
शुभे पद्ममध्ये शिखाकारचित्तम् ।
महायोनिचक्रे प्रिये कर्णिकायां
शिवस्थानमुग्रं वशी वीक्ष्य शुक्लम् ॥ २१ ।

महाविद्युताकारणं भासमानं
परंब्रह्मसूत्रप्रबोधं विनोदम् ।
महाकौलमार्गं स्थिरप्राणबुद्धिः
क्रमेणैव तच्चिन्तयेत् साधकेन्द्रः ॥ २२ ।

महावेदसूत्रादिबीजप्रकाशं
शतानन्दचन्द्रप्रभं भाव्यमानम् ।
विभाव्याशु नाथप्रियं पञ्चचूडं
महामोक्षगामी जितक्रोधकामः ॥ २३ ।

य एतत् स्वचित्तान्वितः साधकेन्द्रो
विभुध्यानयुक्तः प्रियात्मा महात्मा ।
पुरे शीघ्रगामी पराणां नराणां
मुनीन्द्रः क्षितीन्द्रो महावेदवक्ता ॥ २४ ।

द्विधा बोधविज्ञानशून्यो वरेण्यो भवेत् सर्वदर्शी स सर्वज्ञराजः ।
सदा पूर्णसिद्धिप्रसिद्धोऽरिहन्ता महासृष्टिसंहारपालादिकर्ता ॥ २५ ।

क्षणादाविभाव्य प्रभुर्दीर्घजीवी सुधीः सर्वशास्त्रार्थवेत्ता सुमन्त्री ।
महाज्ञानयुक्तो भवेदेकचित्तो बली बाणतुल्यो विधातुः प्रशस्यः ॥ २६ ।

स्वचक्रमण्डलान्तरे त्रिकोणभूमिबिम्बके
तदन्तरे च षोडशच्छदा विभान्ति वामके ।
सुपत्रके मनोहरे प्रदीपभाशिखाकृति-
र्महोज्ज्वला [2]स्फु(र)त्प्रभा चतुर्गृहं ततो बहिः ॥२७।

---

१. मनसो योगः, मनस एकाग्रता, स एव चिह्नं लक्षणं यस्य तम् ।

२. स्फुरन्ती प्रभा यस्याः सा, स्वप्रकाशा इति भावः ।

[१]प्रणवविरचनाभिः शोभितं चक्रराजं
तदुपरि विलसच्छ्रीचन्द्रखण्डप्रकाशः ।
तदुपरि विगलद्बिन्दुकान्तो मकार-
स्तदुपरि शितनादो भाति पीयूषपुञ्जः ॥ २८ ॥

ध्यायेद्यः क्रमतः सुधीः प्रियपदालीने इह क्षेत्रके
बध्वा चेतसि भावपुञ्जनिकरां श्रीनाथसेवोदिताम् ।
योगीन्द्रोदितयोगशासननिरालम्बां परां सादरा-
मभ्यासान्नियतं वशी परनर उग्रां कलां पश्यति ॥ २९ ॥

तन्मध्यान्तः प्रकाशामतिविमलकलामादिवात्मप्रकाशा-
माद्यक्षे स्वप्रतिष्ठामतिसुखविभवामाश्रये स्थानसिद्धाम् ।
हाकिन्याङ्घ्रिप्रभामण्डलकमलमहारूपलावण्यधैर्यं
सौभाग्यं ध्याननिष्ठे विलसति मधुरं ध्यानमारोपयामि ॥ ३० ॥

ज्वलत्कोटिदीपाकृतिस्नेहजालं
वहन्तं रटन्तं नवोनार्ककान्तम्[२] ।
स्फुरज्ज्योतिराकाशपृथ्वीन्दुमध्यं
भवेद् वै महेन्द्रो विलोक्याशु योगी ॥ ३१ ॥

इहानन्दबाह्ये परेशो हि साक्षान्
महापूर्णभूतिप्रभावोऽव्ययो हि ।
महावह्निचन्द्रार्कसन्मण्डलो वा
महाविष्णुचक्रोपरि श्रीहरिः स्यात् ॥ ३२ ॥

महाविष्णुयोगी महायोगयोगीन्द्रसेव्यं महेन्द्रः ।
विलोक्याशुभन्नार्थतन्त्रप्रतापं तदा तद्विशत्यत्र पञ्चत्वकाले ॥ ३३ ॥

लयस्थानमाकाशवायोरतीव
प्रतापप्रियस्याञ्जनस्याशु पश्येत् ।
महानादरूपं तदूर्ध्वे शिवार्धं[३]
विशालाक्षरूपं शिवाकारमानम् ॥ ३४ ॥

---

१. प्रणवस्य विरचनाः, ताभिः शोभितम् ।

२. नवीनो योऽर्कः सूर्यः बालसूर्यः, स इव कान्तः कमनीयः ।

३. विशालेऽक्षिणी यस्य सः, तस्य रूपमिव रूपं यस्य ।

सुशान्तं महान्तं धराकान्तलान्तं वरं दातुमुत्फुल्लहस्तारविन्दम् ।
सभीतिप्रदं [1]शुद्धबुद्धप्रबोधं दयादानकर्तारमापश्यतीह ॥ ३५ ।

गुरूणां पदाम्भोरुहाह्लादलीनो
जनः पश्यति प्राणनाथं परेशम् ।
दिनेशं रमेशं धनेशं नरेशं
स योगी निरोगी महाशुद्धवेशम् ॥ ३६ ।

स वाचां सुसिद्धिं समाप्नोति शुद्धिं
वरं कामलक्ष्मीश्वरत्वं महत्त्वम् ।
न भूयात् त्रिलोके पुनर्जन्मभावः
सदा गायति श्रीपतिर्नारदो वा ॥ ३७ ।

श्रीआनन्दभैरव उवाच—

न श्रुतं देवि कल्याणि हाकिनीकूटमन्त्रकम् ।
तथा पूजाविधिं ध्यानं जपं वायुविनिर्गमम् ॥ ३८ ।

इत्यादियोगं स्तोत्राणि सहस्रनाममङ्गलम् ।
तथा [2]श्रीवरनाथस्य कृपया वद सुन्दरि ॥ ३९ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे शाकिनीमन्त्रोद्देशो नाम एकोनाशीतितमः पटलः ॥

●

---

१. शुद्धो बुद्धः प्रबोधो यस्यासौ ।

२. श्रिया सहितो वरः, श्रीवरः, मध्यमपदलोपिसमासः । स चासौ नाथश्चेति श्रीवरनाथः ।

अथाशीतितमः पटलः

श्रीआनन्दभैरवी उवाच—

श्रृणुष्व [1]परमानन्दहेतुपानप्रियङ्कर ।
अत्यद्‌भुतं परस्यापि हाकिन्या मन्त्रमेव च ।। १ ।
त्र्यशीतितमे नाथ पठनाह्लादसागरे ।
रहस्यं परमानन्दवर्धनं कामदं मनुम् ।। २ ।
अस्यापि भावकर्ता यः स योगी न तु मानुषः ।
अतिविद्या चातिधनं महाराज्यं सदाशिव ।। ३ ।
अस्याराधनमात्रेण स्वयमेव समाप्नुयात् ।
इति हेतोः संकथये मन्त्रोद्धारं क्रमेण तु ।। ४ ।
अत्यद्‌भुत ज्ञाननिदानभावदं
महामनुं मानसजापमाश्रयम् ।
अनल्पविज्ञाननिधिप्रदं शुभं
पुण्यं पवित्रं श्रृणु भैरवेन्द्र ।। ५ ।

तारं ब्रह्म मनुं श्मशानसहितं शम्भुं विभुं हान्तकं
भान्तं रान्तजलं हुताशनमयं वायुञ्च वामाक्षिणम् ।
वायोरक्षरसंयुतं त्रिपुरया श्रीकामकूटान्वितं
चान्ते हाकिनि देवि वह्नियुवती मन्त्रोऽयमानन्ददः ।। ६ ।
भाषामारकलारमावधुयुता देवी शिवप्रेयसी
विद्ये हाकिनि तारमन्त्रपुटितं मायाग्निजायान्वितम् ।
योगेन्द्रावनतं महेन्द्रजपितं श्वासाभिरुच्छ्‌वासितं
ये ध्यायन्ति महीतले प्रियमयी भार्या [2]पतिप्रेमगा ।। ७ ।

---

१. परमानन्दहेतुः पानं यस्यासौ, प्रियं करोति इति प्रियंकरः, ''क्षेमप्रियमद्रेऽण् च'' इति सूत्रेण खच्प्रत्ययः कर्तरि । पानान्तस्य करान्तेन सह कर्मधारयसमासो ज्ञेयः । अथवा परमानन्दहेतवे पानं भक्तजनानां रक्षणं येन सः । भक्तान् रक्षित्वा तेभ्यः परमानन्दं ददाति भगवान् शिव इति भावः ।

२. पतिप्रेम गच्छति, गमयति वा सा । गमेः कर्तरि डप्रत्ययः, ततष्टाप् ।

आकाशं वह्निकूटं [1]वधुशिवदयिताशक्तिकामत्रिकूटं
हाकिन्यै परनाथभासुरगुरोः शक्त्यै नमोऽग्निप्रिया ।
हाकिन्याः प्रेममन्त्रं जपति यदि सुधी राजराजेश्वरः स्या-
दानन्दाब्धौ निमग्नः प्रचयति किरणं भावराशिप्रकाशम् ।। ८ ।

द्वे लक्षे मन्त्रसिद्धिर्भवति निजकुले कामधेनुस्वरूपः[2]
क्षेत्रज्ञः क्षेत्रविज्ञो वशयति जगतां भावसारं नरेन्द्रः ।
विद्याबीजं रमाढ्यं सुरधुनिसहितं कामकूटं तदन्ते
शब्दाख्यं ब्रह्मतत्त्वं तरुणि भुवनेशि प्रेत्य हाकिनीं श्रीम् ।। ९ ।

स्वाहान्तो मन्त्रराजः [3]सकलसुरपदानन्दितो भावपूज्यः ।
महामन्त्रं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ।। १० ।

शिवमन्त्रं हाकिनीश परनाथस्य भूपतेः ।
यस्याराधनमात्रेण मृत्युजेता न संशयः ।। ११ ।

प्रेतबीजं समुद्धृत्य विषबीजं ततः परम् ।
वह्निबीजं कालकूटबीजं तु तदनन्तरम् ।। १२ ।

अत्यन्तं दुःखजालं मे हन युग्मं विदारय ।
युगलं कामकूटं तु संहारबीजमेव च ।। १३ ।

शिवबीजं तदन्ते तु हंसः सोहं ततो वदेत् ।
स्वाहान्तमन्त्रो जप्तो हि लक्षमात्रं महेश्वर ।। १४ ।

कुम्भकं रेचकं कृत्वा धारयेत् पवनं शुभम् ।
एवं कृत्वा महादेव शिवानन्दं प्रकृत्य च ।। १५ ।

महाप्रलयकालेऽपि सुस्थिरो भवति ध्रुवम् ।
तस्यापि हस्तकमले सदा तिष्ठन्ति सिद्धयः ।। १६ ।

जपित्वा युगलक्षं तु यत्नेन परमेश्वर ।
वाक्सिद्धिं देवलोके तु गमनं निजदेहतः ।। १७ ।

---

१. वधूश्चासौ शिवदयिता च, सा चासौ शक्तिश्च, तस्याः कामस्तस्य त्रिकूटम् । द्वितीयान्तं जपति इत्यनेनान्वेति ।

२. कामधेनोः स्वरूपमिव स्वरूपं यस्य सः । सर्वेष्टदाता इति भावः ।

३. सकला ये सुरास्तेषां पदैरानन्दित इति भावः ।

तस्य दर्शनमात्रेण लोकाः स्युर्हि निरोगिणः ।
अष्टादशलक्षजपाद् [१]ब्रह्माण्डभेदको भवेत् ॥ १८ ।
सहस्रारे मनो याति तस्यैव नात्र संशयः ।
तदा [२]संसारसंहारपालनसृजनास्पदः ॥ १९ ।
तस्य संसारं सकलं कोटिब्रह्माण्डमेव च ।
अनयोर्मन्त्रजापेन सिद्धार्थवद् भवेत् कविः ॥ २० ।
सर्वशास्त्रार्थवेदार्थसाङ्ख्यार्थादिषु पारगः ।
तस्य साक्षान्मूर्तिमन्तो विभान्ति पुरतो ध्रुवम् ॥ २१ ।
वारमेकं कदाचिद्वा चायाति मुखपङ्कजे ।
चतुर्विधा मुक्तिः कामसिद्धयः सर्वदा हृदि ॥ २२ ।
विभान्ति हि किमन्यद्वा कथितुं शक्यते मया ।
वलान्ते रामपुत्रः स्यात् सश्रीकः कृष्ण एव सः ॥ २३ ।
कृष्णान्ते रामनाम स्यात् भूपतेः पालको भवेत् ।
श्रीरुद्रस्य परदेवदेवस्य सुप्रियो भवेत् ॥ २४ ।
नवान्ते द्वीपराशीनां चतुर्यामलपारगः ।
चतुःषष्टितन्त्रवेत्ता चेत् कामनगरे स्थितः ॥ २५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे भेदोपक्रमो नाम अशीतितमः पटलः ॥

●

---

१. ब्रह्माण्डानां भेदं करोति इति । ब्रह्माण्डभेदनसामर्थ्यवानिति भावः ।

२. संसारस्य संहारः पालनं सृजनम्, तत्रास्पदं प्रतिष्ठा यस्य सः । भगवान् शिव एवास्य जगतः सर्जन-पालन-संहारान् करोतीति तत्त्वम् ।

अथैकाशीतितमः पटलः

श्रीआनन्दभैरवी उवाच—

अथ वक्ष्यामि लोकेश [1]मन्त्रोद्धारान्तकालके ।
हाकिन्याः परनाथस्य साधनं पूजनं शृणु ।। १ ।

त्र्याशीतितमान्ते तु चतुरशीतितमे मम ।
परनाथस्य हाकिन्या यजनं चाद्भुतं महत् ।। २ ।

अप्रकाश्यं महागोप्यं सारात्सारं परात्परम् ।
भ्रूपद्मभेदनादीनां क्रमं शृणु महेश्वर ।। ३ ।

यो हि जानाति भ्रूमध्ये भ्रूपद्मभेदनक्रमम् ।
स ममाग्रे समायाति जीवन्मुक्तो भवार्णवे ।। ४ ।

तत्क्रमोपक्रमज्ञानं महापातकनाशनम् ।
अकस्मात् सिद्धिदं नित्यं सदानन्दपदप्रदम् ।। ५ ।

भार्या भवति कामेशी लक्ष्मीनाथो भवेद् ध्रुवम् ।

आनन्दभैरव उवाच—

अथ राज्यक्रियासारं केन प्राप्नोति भूतले ।। ६ ।

राजत्वं शिष्यवर्गाणां भेदनं केन वा भवेत् ।
साक्षात् सिद्धिक्रमज्ञानं भ्रूपद्मभेदनक्रमम् ।। ७ ।

कृपया वद मे शीघ्रं यदि श्रद्धा दया मयि ।

आनन्दभैरवी उवाच—

विस्तार्यं कथयाम्यत्र सारसङ्केतमङ्गलम् ।। ८ ।

श्रीगुरोर्वदनाम्भोजनिजमन्त्रप्रकाशितम्[2] ।
श्रुत्वा योगी योगयोग्यो भवत्येव न संशयः ।। ९ ।

---

१. मन्त्रोद्धारस्यान्तः अवसानं तस्य कालः समयः, तत्र, स्वार्थे कप्रत्ययः ।

२. वदनमम्भोजमिवेति वदनाम्भोजम्, ततो मन्त्रस्य प्रकाशितम्, प्रकाशनमित्यर्थः ।

अधोमुखे भाति [1]महारविप्रभा ग्रन्थिप्रचण्डोपरिवारकाभिः।
शनैः शनैर्भेदनयोगकाले प्रयत्नमाकृत्य भवेद्धि योगी ॥१०।

बद्धमेकासनं कृत्वा चित्तमारोप्य यत्नतः।
भ्रूपद्मनिकरे शोभामण्डलानन्दपूरिते ॥ ११ ।

सत्त्वग्रन्थिपदं भित्वा स्थिरचेता भवेद् ध्रुवम्।
अकालमृत्युः कुत एव तस्य प्रभाकरज्ञाननिकेतशोभौ।
आकाशगामी भुवनाधिकारी स्थिराशयः प्रेमकलापगामी ॥१२।

सप्तसु ग्रन्थिमुखेषु देवताः सप्तधा मुदा ॥ १३ ।

विभान्ति योगिरक्षायै योगमायावशाय च।
स्थिरमाया योगमाया कालमाया च लाकिनी ॥ १४ ।

देवमाया धर्ममाया विमाया सप्त देवताः।
ग्रन्थिमध्ये रत्नवर्णा निर्मलानन्ददायिकाः ॥ १५ ।

सत्त्वग्रन्थिर्महादेव आकाशाग्रेति भाति हि।
आदौ तस्यापि भेदञ्च एकैकक्रमयोगतः ॥ १६ ।

सूक्ष्मवायुक्रमेणैव भित्वा च योगिमण्डले।
शीघ्रं याति मनो यस्य स वीरो न तु मानुषः ॥ १७ ।

ग्रन्थिनामानि वक्ष्यामि सावधानोऽवधारय।
खगिनी द्राविणी धूम्रा कठिना कर्कटी तथा ॥ १८ ।

श्यामला कपिला सप्त ग्रन्थिरूपप्रतिष्ठिता।
खगिनीमन्त्रमुच्चार्य सूक्ष्मश्वासक्रमेण[2] तु ॥ १९ ।

ऊर्ध्वमार्गे विहायापि ह्यष्टोत्तरशतेन च।
प्रणवं भुवनेशानी खगिनीबीजमेव च ॥ २० ।

भेदा भेदा भवान्ते तु पुनः खं बीजमेव च।
अस्त्रान्तं मन्त्रमुच्चार्य भेदने च दृढो भवेत् ॥ २१ ।

---

१. महान् रविः, प्रचण्डः सूर्यः, तस्य प्रभा इव प्रभा यस्याः सा।

२. सूक्ष्मो यः श्वासक्रमस्तेन। उपांशुप्रयोगेणेत्यर्थः। अयमेव मानसो जपः।

द्राविणीमन्त्रमुच्चार्यं सूक्ष्ममार्गेण भैरव ।
जपेदष्टोत्तरेणापि शतमन्त्रेण सर्वदा ॥ २२ ।

प्रणवं परमाबीजं ब्रह्मबीजं ततो बहिः ।
वाग्भवं द्राविणीबीजं ग्रन्थिद्रावययुग्मकम् ॥ २३ ।

स्वाहास्त्र्यन्तं महामन्त्रं ध्यात्वा ध्यात्वा पुनः पुनः ।
[1]जप्त्वा भ्रूदलसूक्ष्मदृष्ट्या विलोक्य भ्रूदलान्तरम् ॥ २४ ।

अकस्माद् भेदमाप्नोति किं बन्धक्लेशतः प्रभो ।
धूम्रामन्त्रं प्रवक्ष्यामि येन सिद्धो भवेन्नरः ॥ २५ ।

प्रणवं कमलाबीजं देवीबीजं ततः परम् ।
धूम्राबीजं तदन्ते तु मृत्युनाशिनि शब्दतः ॥ २६ ।

ग्रन्थि धनयुगान्ते तु चास्त्राय फडिति स्थितिः ।
इति मन्त्रं सहस्रं वा शतं वाष्टोत्तरं जपेत् ॥ २७ ।

चक्रासनमुपाकृत्य [2]भेकासनमथापि वा ।
भ्रुवोरन्तर्गतं पद्मं द्विदलं चारुमण्डलम् ॥ २८ ।

तदन्तरे कर्णिकायां महापीठं विचिन्तयेत् ।
बिन्दुषट्कोणमालिख्य त्रिकोणस्थान्तरः सुधीः ॥ २९ ।

तद्बहिः सप्तभूरेखं विचिन्त्य पङ्कजं शुभम् ।
दिव्यं शतदलं विद्युत्कोटिकान्तिसमप्रभम् ॥ ३० ।

पत्रे पत्रे महामुद्रास्थानं परमदुर्लभम् ।
दिव्यस्थानं परीवारस्थानं ध्यात्वा पुनः पुनः ॥ ३१ ।

कर्णिकायां ततो ध्यायेद् हाकिनीपरमेश्वरम् ।
कठिनामन्त्रमावक्ष्ये ग्रन्थिभेत्ता भवेदनु ॥ ३२ ।

येन योगक्रमेणैव शास्त्रजालं वशं नयेत् ।
प्रणवं वाग्भवं माया रमा कामस्ततः परम् ॥ ३३ ।

---

१. जपधातुः सेट्कः, इति कृत्वा जपित्वा इति स्याच्छान्दसत्वात् प्रकृते इडभावो बोध्यः । अथवा गणपाठस्य बाहुलकात्, 'बहुलमेतन्निदर्शनम्' इति वचनात् ।

२. भेकस्य मण्डूकस्यासनं भेकासनम् ।

कठिनग्रन्थि छेदयेति युगलं परमेश्वरि ।
मायास्त्राय फडन्ताय महामन्त्र उदाहृतः ।। ३४ ।

शतमष्टोत्तरं नित्यं सहस्रं वा जपेद् बुधः ।
अधो मुण्डासनं कृत्वा तत्र पद्मासने विशेत् ।। ३५ ।

भूपद्मे चित्तमारोप्य महापीठे मनोरमे ।
पीठं त्रिकोणमध्ये तु बिन्दुषट्कोणमेव च ।। ३६ ।

तद्बहिः सप्तभूबिम्बं तत्र पद्मं विचिन्तयेत् ।
रक्तं शवदलं पद्मं चतुर्द्वारं तदुत्तरे ।। ३७ ।

पत्रे पत्रे केशराणि त्रीणि त्रीणि क्रमेण तु ।
ब्रह्मविष्णुमहेशादिरूपाणि परिचिन्तयेत् ।। ३८ ।

[1]कर्कटीमन्त्रमावक्ष्ये साक्षाद्भूमिविभेदनात् ।
ब्रह्मबीजं मायाशब्दं मायाकर्कटीशब्दतः[2] ।। ३९ ।

कूटग्रन्थि भेदयेति द्वयं कामकला ततः ।
अस्त्राय फडिति ख्यातो महामन्त्रोत्तमोत्तमः ।। ४० ।

शतमष्टोत्तरं ध्यात्वा मन्त्रं चिच्छक्तिमण्डले ।
श्यामलामन्त्रमावक्ष्ये भैरवेश महाप्रभो ।। ४१ ।

शृणुष्वाराधय ज्ञानं सार्वज्ञसिद्धिदायकम् ।
प्रणवं कालिकाबीजं त्रिवारमुच्चरेत् सुधीः ।। ४२ ।

तदन्ते मायायुगलं श्रीबीजं तदनन्तरम् ।
तदन्ते श्यामलाबीजं दृढग्रन्थिविभेदिनी ।। ४३ ।

विलं निर्मलं शब्दान्ते मा कुरु द्वयमेव च ।
कामास्त्राय फडिति च मन्त्रसारः प्रयोगदः ।। ४४ ।

शतमष्टोत्तरं जाप्यं प्रत्यहं चासनस्थितः ।
शनैः शनैः सिद्धियुक्तो ज्ञानी मौनी महागुणी[3] ।। ४५ ।

---

१. कर्कट्या मायाया मन्त्रस्तमिति भावः । स मन्त्रः सम्प्रदायगम्यः ।
२. माया च कर्कटी चेति शब्दौ यत्र मन्त्रे तस्मात् ।
३. महांश्चासौ गुणश्चेति महागुणः, सोऽस्ति अस्येति मत्वर्थीय इनिप्रत्ययः ।

भवेत् साधकमुख्यश्च मम देहाश्रितो भवेत् ।
[1]कपिलामन्त्रमावक्ष्ये शृणुष्व भैरवेश्वर ॥ ४६ ।

प्रणवं बालाबीजं तु कपिलाबीजमुत्तमम् ।
तां तु ग्रन्थि भेदयेति युगलं छेदयेति च ॥ ४७ ।

चित्तं मे भूगृहे पश्चात् समारोपय युग्मकम् ।
पुनस्तु कपिलाबीजं मायाबीजं ततो वदेत् ॥ ४८ ।

रमास्त्राय फडन्तोऽयं महामन्त्रोत्तमोत्तमः ।
शतमष्टोत्तरं वापि सहस्रं प्रजपेद् यदि ॥ ४९ ।

[2]द्विमासात् [3]सप्तग्रन्थीनां भेत्ता स्याद् भैरवो यथा।
इति ग्रन्थिभेदनस्य क्रमज्ञानमुदाहृतम् ॥ ५० ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे भ्रूपद्मसप्तग्रन्थिभेदो नाम एकाशीतितमः पटलः ॥

●

१. कपिलामन्त्रः, कर्कटीमन्त्रः, माया मन्त्रः, इमे मन्त्राः साम्प्रदायिकाः ।
२. द्वयोर्मासयोः समाहारो द्विमासम्, तस्मात् ।
३. सप्तसंख्याकानां ग्रन्थीनामिति मध्यमपदलोपिसमासः ।

अथ द्व्यशीतितमः पटलः

श्रीआनन्दभैरवी उवाच—

अथ कान्त प्रवक्ष्यामि साधय त्वं सदा निशि ।
हृदि सिद्धान्तविज्ञानं सिद्धिमिष्टां यदिच्छसि ॥ १ ।

गोपय त्वं प्रयत्नेन सच्छिष्ये च निवेदय ।
दुष्टेभ्यो वञ्चकेभ्यश्च पुत्रेभ्यो न प्रकाशय ॥ २ ।

निर्जने प्रातरुत्थाय प्रातः कीर्तिं समाचरन् ।
देहबाह्यस्नानमादौ कृत्वा च साधकोत्तमः ॥ ३ ।

आसनञ्च गोपनीयं प्रत्येकेनापि कारयेत् ।
[1]पूर्वोक्तयोगचिह्नानि आसनानि समाचरेत् ॥ ४ ।

आदौ श्रीमत्स्यकूर्माम्बुजविकटकटस्वस्तिकेन्द्रासनानि
चित्राथर्वापवर्गाननविषमसमाचन्द्रताज्ञानदानि ।
कोकावाक्ताम्रचूडासवभगमृगभीमाद्यवीरोत्कटानि
क्रोधाक्षत्राङ्गसिद्धाहिगरुडमुकुटायोनिभेकासनानि ॥ ५ ।

चतुस्त्रिंशत्संख्याघटितकवलं चासनमिह
प्रबुद्धं देहस्य क्षयमरणशङ्काविरहितम् ।
महच्छब्देनाढ्यं यदि गदितसत्त्रयमिति
प्रभाते मध्याह्ने निशि विकुरुते योगहृदयः ॥ ६ ।

गौरी गौरवगुर्विणीन्द्रियमहागार्हाग्निदा योगदा
[2]योगानन्तभवद्गुणानुगमनाः को वासमर्थो मखैः ।
यस्यास्तां सविता दधाति मतिमान् पादाम्बुजं कोमलं
हाकिन्याः परनाथदेववपुषः सम्भाव्य सम्पूज्यते ॥ ७ ।

---

१. पूर्वोक्तानि यानि योगचिह्नानि योगलक्षणानि ।
२. योगेनानन्ता अथवा योगस्यानन्ता ये भवतां गुणास्ताननुगतं मनो यस्य स इति भावः ।

एतान्यासनमूलानि कृत्वा दृढतरः सुधीः ।
निर्जने पूजनं कुर्याद् यदि कल्याणमिच्छति ॥ ८ ।
[1]दिव्यशङ्खहस्तपद्मो योगो योगमुपाश्रयेत् ।
आसनान्ते महापद्मासनं कृत्वाऽर्चयेन्मुदा ॥ ९ ।
इति योगाभ्यासकाल इदानीं यजनं शृणु ।
बाह्यपूजां समाप्यादौ हृद्यन्तर्यजनं चरेत् ॥ १० ।
[2]योगाभ्यासविधिज्ञानमिति शास्त्रार्थनिश्चयम् ।
पूजानिर्घण्टनं नाथ शृणु संक्षेपतः प्रभो ॥ ११ ।
तदन्ते तु प्रवक्तव्यं पूजाविधानमन्त्रकम् ।
सदाभ्यासेन योगेन जीवन्मुक्तिपदं लभेत् ॥ १२ ।
आदावाचमनं नाथ तदन्ते जलशोधनम् ।
आसनादिशोधनं तु चक्रमण्डलभावना ॥ १३ ।
शिखाग्रन्थिबन्धनं तु पीठनिर्माणमेव च ।
पुष्पघण्टाशोधनं तु शङ्खशोधनमेव च ॥ १४ ।
पीठपूजा हृदि ध्यानं भूतशुद्धिस्ततः परम् ।
न्यासजालं ततः सिद्धपुरुषाणाञ्च भावनम् ॥ १५ ।
पुनर्ध्यानम् ऋषिध्यानं हाकिनीपरदेवयोः ।
जीवसंस्कारमेवं हि जीवदानं ततः परम् ॥ १६ ।
महामुद्रादर्शनं तु चावाहनादिमुद्रया[3] ।
पाद्यमर्घ्यस्थापनं तु कृत्वा युगलमेव च ॥ १७ ।
पाद्यादिभिः पूजनञ्च मङ्गलं सोपचारकम् ।
दशोपचारं पञ्चोपचारं मूलेन कारयेत् ॥ १८ ।
अष्टादशोपचारं तु महाभक्त्या निवेदयेत् ।
षोडशोपचारयुक्तैः पूजयेद् वापि साधकः ॥ १९ ।

---

१. दिव्यः शङ्खो हस्तपद्मो यस्य सः । हस्तौ पद्ममिवेति हस्तपद्मम्, उपमितं व्याघ्रादिभिरिति समासः ।

२. योगाभ्यासस्य विधिस्तस्य ज्ञानम् ।

३. आवाहनादीनामपि मुद्रा भवति, सा च साम्प्रदायिकविधिनैव ज्ञेया ।

ततः प्राणायामयुग्मं कृत्वा च [1]साधकोत्तमः ।
जपेत् सहस्रं शतं वा चाष्टोत्तरसमन्वितम् ॥ २० ।
त्रिलक्षं लक्षमेकं वा जपेन्मन्त्रमनन्यधीः ।
जपसमर्पणं कृत्वा प्राणायामत्रयं चरेत् ॥ २१ ।
ततो हि वन्दनं स्तोत्रकवचं सर्वदा जपेत् ।
सहस्रनामसन्तानं चाष्टोत्तरशतान्वितम् ॥ २२ ।
पठित्वा भेदमाकृत्य नरो योगीश्वरो भवेत् ।
श्रवणाद्दर्शनाज्ज्ञानान्मयि भावानुकीर्तनात् ॥ २३ ।
यादृशी जायते श्रद्धा सन्निकर्षं तमालभेत् ।
त्रिलक्षं जपमाकृत्य तद्दशांशेन होमयेत् ॥ २४ ।
तद्दशांशतर्पणन्तु तद्दशांशं चाभिषेकम् ।
तद्दशांशं विप्रभोज्यं कुमारीभोजनं तथा ॥ २५ ।
कुमारीयजनं तत्र कुमारीतन्त्रमापठेत् ।
कुमारीसहस्रनामानि पठेदावश्यकं नरः ॥ २६ ।
ततः कुलक्रियां कुर्याद्योगी योगेश्वरो भवेत् ।
[2]आद्याशक्तिप्रभावः स्यात्तस्य हृत्पद्ममण्डले ॥ २७ ।
यथा मूले स्वाधिष्ठाने मणिपूरे यथा मम ।
हृत्पङ्कजे यथा पूजा या पूजा कण्ठपङ्कजे[3] ॥ २८ ।
सा पूजा भ्रूमहापद्मे मम मन्त्रेण कारयेत् ।
तदायेष्वथ सन्तोषः प्रीतिवृद्धिः सदा मम ॥ २९ ।
मम सन्तोषमात्रेण ग्रन्थिभेत्ता स्वयं भवेत् ।
त्रिराचमनं कुर्यान्मूलमन्त्रेण शङ्कर ॥ ३० ।
तथा चाचमनं वारमेकं कृत्वा महासुधीः ।
ततो जलं शोधयेद् वै मूलान्ते जलबीजकम् ॥ ३१ ।

---

१. साधकेषु उत्तम इति । सप्तमी इति योगविभागेन सुपेति विभक्तयोगेन वा समासः ।

२. आद्यायाः शक्तेः प्रभावः ।

३. कण्ठः पङ्कजमिवेति कण्ठपङ्कजम्, उपमितसमासः ।

निर्मलं चन्द्रखण्डेन सुगन्धिचन्दनेन च ।
मिलितं शोधयानन्दभैरव प्राणभैरवी ॥ ३२ ।

एतन्मन्त्रेण संशोध्य चासनं परिशोधयेत् ।
आसने संस्थिते देवि [1]कूर्मचक्रनिवासिनी ॥ ३३ ।

ममासनं शोधय त्वं सिद्धिदे परडाकिनि ।
एवं संशोध्य मनुना भावयेच्चक्रमण्डलम् ॥ ३४ ।

त्रैलोक्यव्यापिनं योगिमहाविष्णुसुमण्डलम् ।
अत्युच्चं सर्वदा ध्यात्वा तस्योपरि निजासनम् ॥ ३५ ।

विभाव्य पूजयेद् देवीं भ्रूपीठचक्रमण्डले ।
शिखाबन्धनमन्त्रं तु श्रृणु भैरव भूपते ॥ ३६ ।

यस्यापि कारणेनापि पलायन्तेऽतिविघ्नदा ।
प्रणवञ्च शिखाबन्धवालं बन्धयद्वयम् ॥ ३७ ।

तारं मायास्त्राय फट् च मन्त्रोऽयं ज्ञानिदुर्लभः ।
प्रणवान्ते वासग्रन्थि बन्धयामि नमो द्विठः ॥ ३८ ।

पीठनिर्माणमावक्ष्ये सावधानोऽवधारय ।
त्रिकोणाभ्यन्तरे बिन्दुषट्कोणं संल्लिखेत् सुधीः ॥ ३९ ।

तदन्ते सप्तभूबिम्बं ततः शतदलायुतम् ।
चतुर्द्वारं समालिख्य मन्त्रसंस्कारमाचरेत् ॥ ४० ।

विस्तीर्णताम्रपात्रे तु लिखेत् स्वर्णशलाकया ।
अथवा रौप्यलेखन्या चाथवा बिल्वकण्टकैः ॥ ४१ ।

यन्त्रं निर्माय संस्कारं कुर्याच्छ्रीतत्त्वमुद्रया ।
प्रणवं यन्त्रराजं तु रुचिरेखासमाकुलम् ॥ ४२ ।

[2]योषित्प्रियतराकारं कुलपीठं प्रशोधये ।
स्वाहान्तं मूलमुच्चार्य रक्तवर्णं विचिन्तयेत् ॥ ४३ ।

---

१. कूर्मचक्रे निवसति तच्छीला सुप्यजाताविति णिनिः कर्तरि ।
२. योषितां स्त्रीणां प्रियतर आकारो यस्यासौ इति बहुव्रीहिः ।

शुक्लचन्दनसारेण[1] रक्तचन्दनकेन वा ।
कुङ्कुमेनापि संलिख्य चानेन संस्क्रियां चरेत् ॥ ४४ ।

पुष्पशोधनमावक्ष्ये प्रणवं भुवनेश्वरीम् ।
शोधयामि वरं पुष्पं सुगन्धं रक्तपाटलम् ॥ ४५ ।

श्वेतं पीतं नीलकृष्णं कुसुमं गन्धसागरम् ।
शोधयामि युगं स्वाहा मन्त्रेणानेन शोधयेत् ॥ ४६ ।

प्रणवं शब्दबीजं तु चाकाशबीजसेचनम् ।
घं घण्टां शोधयाम्यद्य वरदा भवहाकिनी ॥ ४७ ।

पीठे सम्पूजयेद् भक्त्या साधकेन्द्रो न चान्यधीः ।
षड्दले च रक्तवर्णां पूजयेत् पीठनायिकाम् ॥ ४८ ।

कमला सुन्दरी रम्या मोहिनी हरमेखला ।
तेजोरूपा शिखावह्निज्वालाकालानलेश्वरी ॥ ४९ ।

समया रमणी भीमा रतिः कामसरस्वती ।
वीणावती मधुमती वासनाकर्षिणी तथा ॥ ५० ।

ईरा शुद्धात्मिका भद्रा शान्तिर्निर्माल्यवासिनी ।
अरुन्धती च सावित्री किरणाच्छादिनी तथा ॥ ५१ ।

स्वाहा स्वधा[2] विशालाक्षी मदना मदनातुरा ।
भ्रान्तिः प्रभावती ज्ञानदात्री विज्ञानदायिनी ॥ ५२ ।

कोकिलाक्षी कुरङ्गाक्षी बोधिनी सप्तमण्डली ।
हिरण्या मन्दिरा चेतःशुद्धिदा सिद्धिदा तथा ॥ ५३ ।

मन्दाकिनी बृहद्गङ्गा सिद्धा भोगवती तथा ।
तरङ्गिनी च मोहा च त्रिवेणी मूर्तधारिणी ॥ ५४ ।

गुर्वी तरङ्गपूज्या च विमला त्रिपुरा परा ।
त्रितारी तारिणी भद्रकालिका ग्रन्थिभेदिनी ॥ ५५ ।

---

१. रक्तं यच्चन्दनं तत् कायतीति रक्तचन्दनकः, तेन । सर्गे 'आतोऽनुपसर्गे कः' इति कप्रत्ययः कर्तरि ज्ञेयः ।

२. विशालेऽक्षिणी यस्याः सा । 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्' इति षच्प्रत्ययः समासान्तः ।

रत्नमाला[1] पापहरा पार्वती [2]मानसीश्वरा ।
भगमालिन्युमा देवी देवमाता कलावती ।। ५६ ।

पञ्चानना कालजित्वा दृप्ता पञ्चशिखा तथा ।
मर्दिनी रणमातङ्गी खड्गहस्ता हसन्मुखी ।। ५७ ।

पद्ममाला किङ्किणी च धरित्री च वसुन्धरा ।
फाल्गुनी पञ्चपीठस्था दीप्ता घोषयसालसा ।। ५८ ।

पवित्रा धूमिनी दीर्घजङ्घा व्याघ्रमुखी तथा ।
कातरा तरुणी हक्षा हाकिनीन्द्रावती जया ।। ५९ ।

जयदा पूजिता एताः शतच्छदनिकेतने ।
पराशक्ति पूजयित्वा मन्त्रशक्ति प्रपूजयेत् ।। ६० ।

तरला चञ्चला धात्री चारुणा सूर्यगा दया ।
स्मृतिर्दीक्षा धारणाक्षा दंशिनी भद्रकालिका ।। ६१ ।

षट्कालतारिणी रुद्रवलिता वर्णरूपिणी ।
एताः पूज्या महादेव योगिन्यो मन्त्रशक्तयः ।। ६२ ।

हृदि ध्यानं प्रवक्ष्यामि ध्यानात्मा साधको यतः ।
महाबीजं रक्तवर्णं विभावय न······ ।। ६३ ।

महासुन्दररूपं तु कोटिसूर्यसमप्रभम् ।
विभाव्य मनसा योगी भूतशुद्धिं समाचरेत् ।। ६४ ।

वह्निना दह्यमानं तु देहं ध्यात्वा पुनः पुनः ।
वायुना शोष्य देहं तु जलेनाप्लावयन् पुनः ।। ६५ ।

मूलमन्त्रेण सर्वाङ्गं [3]सुधासागरसम्भवम् ।
ध्यात्वा दिव्यमयं पश्चान्मनःपूजां समाचरेत् ।। ६६ ।

न्यासजालं प्रवक्ष्यामि साधकानां हिताय च ।
न्यासजालप्रभावेण साधको योगिराड् भवेत् ।। ६७ ।

---

१. हरतीति हरा पचाद्यचि टाप्, पापस्येति कर्मणि षष्ठ्या समासः ।
२. मानसः मनसा स्वीकृत ईश्वरो यया सा । शकन्ध्वादित्वात् पररूपम् ।
३. सुधायाः सागरस्तस्य सम्भवो यत्र तदिति भावः ।

[1]अच्छेद्याभेद्यकायः स्यान्मृत्युजेता स्वयं भवेत् ।
ऋषिमातृकरन्यासं चाङ्गन्यासं ततः परम् ॥ ६८ ।
आचरेत् पूर्ववद् भक्त्या मूलं चाद्याक्षरेण च ।
सदाशिव ऋषिः प्रोक्तो गायत्रीच्छन्द एव च ॥ ६९ ।
देवता हाकिनी देवी परनाथप्रियङ्करी[2] ।
देवता क्लीं बीजसारं कीलकं मूलमेव च ॥ ७० ।
शीर्षे मुखे हृदि ग्रन्थौ मूलाधारे च विग्रहे ।
ऋषिन्यासं सदा कुर्याद्धाकिनीप्रीतिवर्धनम् ॥ ७१ ।
ॐ पदान्ते च शिरसि सदाशिवाय शब्दतः ।
ऋषये नम उच्चार्य मुखे शब्दं ततो वदेत् ॥ ७२ ।
गायत्रीच्छन्दसे पश्चान्नमःशब्दं ततो वदेत् ।
हृदि श्रीहाकिनीदेव्यै परशक्त्यै ततो वदेत् ॥ ७३ ।
देवतायै नमः पश्चान्मूलाधारे ततो वदेत् ।
क्लीं बीजाय नमः पश्चात् सर्वाङ्गे च ततो वदेत् ॥ ७४ ।
मूलमार्यदेवतायै नमःशब्दं ततो वदेत् ।
ततः कुर्यान्महादेव शृणु सर्वाङ्गसिद्धये ॥ ७५ ।
हृदये हस्तमारोप्य श्रीतत्त्वमुद्रया सुधीः ।
बिन्दुयुक्तं न्यसेदादौ ततो दक्षभुजे न्यसेत् ॥ ७६ ।
एकारादिचतुर्वर्ण्यं मूलेन पुटितं प्रभो ।
बिन्दुयुक्तं दक्षहस्ते विन्यसेत् साधकोत्तमः ॥ ७७ ।
तथा वामभुजे न्यासमाचरेन्मनुसम्पुटम् ।
ठादिठान्ताक्षरैर्बिन्दुयुक्तैर्न्यासं समाचरेत् ॥ ७८ ।
नादिभान्ताक्षरैर्बिन्दुयुक्तैः स्वमनुसम्पुटैः ।
दक्षपादे न्यसेद्धीमान्[3] ततो वामपदे न्यसेत् ॥ ७९ ।

---

१. अच्छेद्योऽभेद्यश्च कायो यस्येति तद्गुणसंज्ञानबहुव्रीहिर्बोध्यः ।

२. पर उत्कृष्टो नाथः सदाशिवः, तस्य प्रियं करोति या सा गौरादेराकृतिगणत्वात्, पुंयोगविवक्षया वा ङीष् ।

३. प्रशस्ता धीर्यस्यासौ धीमान्, प्राशस्त्ये मतुप् ।

मादिक्षान्ताक्षरैर्बिन्दुसंयुतैर्मनुसम्पुटैः ।
मातृकान्यासमाकृत्य करन्यासं समाचरेत् ॥ ८० ।
ह्लींबीजेन करन्यासं षड्दीर्घभाक्स्वरेण च ।
एवं चाङ्गन्यासं कार्यं विधानेन कुलेश्वर ॥ ८१ ।
पूर्वोक्तेनापि सकलं न्यासजालं समापयेत् ।
ततः षोढा समाकुर्याद्धाकिनीपरदेवयोः ॥ ८२ ।
मूलाख्यां मातृकास्थाने न्यासस्थानं सुलक्षणम् ।
रुद्रैस्तु प्रथमो न्यासो द्वितीयस्तु ग्रहैर्युतः ॥ ८३ ।
लोकपालैस्तृतोयः स्याच्छिवशक्त्या चतुर्थकः ।
शक्त्यादिभिः पञ्चमः स्यात् षष्ठः पीठैर्निगद्यते ॥ ८४ ।
मन्त्रेण पुटितं रुद्रं मातृस्थाने प्रविन्यसेत् ।
श्रीकण्ठोऽनन्तसूक्ष्मेण [1]त्रिमूर्तीशामरेण कौ[2] ॥ ८५ ।
अर्घीशो भारभूतीशोऽतिथीशो हि ततः परम् ।
स्थाणुकेशो हरेशश्च झिण्टीशो भौतिकेश्वरः ॥ ८६ ।
सद्योजातेश्वरः पश्चादनुग्राहेश्वरस्ततः ।
अक्रूरेशो महासेनः सूराणामधिपेश्वरः ॥ ८७ ।
क्रोधीशश्चापि चण्डेशः पञ्चान्तकेश एव च ।
शिवोत्तमेशश्चात्रापि चैकरुद्रेश्वरस्ततः ॥ ८८ ।
कूर्मेश एकनेत्रेशश्चतुरानन एव च ।
अजेशश्चापि सर्वेशः सोमेशस्तदनन्तरम् ॥ ८९ ।
लाङ्गलीशो दारुकेशोऽर्धनारीश्वर एव च ।
उमाकान्तेश्वरः पश्चादाषाढीशस्ततः परम् ॥ ९० ।
दण्डीशो द्रीशमीनेशौ मेघेशस्तदनन्तरम् ।
लोहितेशः [3]शिखीशश्च छागलण्डेश एव च ॥ ९१ ।

---

१. त्रिसृणां मूर्तीनां समाहारः, त्रिमूर्ति, तस्येशोऽमरस्तेन ।

२. कायन्ति शब्दायन्ते प्राणिनो यस्यां सा कुः पृथिवी । 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः ।

३. शिखाऽस्ति यस्य स शिखी, तस्येशः ।

द्विरण्डेशो [1]महाकालेश्वरो वाणीश एव च ।
भुजङ्गेशः पिनाकीशः खड्गीशस्तदनन्तरम् ।। ९२ ।
बकेश्वरश्च श्वेतेशो भृग्वीशस्तदनन्तरम् ।
नकुलीशः शिवेशश्च संवर्तकेश एव च ।। ९३ ।
पञ्चाशदेकयुक्ताः स्यू रुद्राद्याः क्रोधभैरवाः ।
आदौ मूलं ततो मातृवर्णमेकं क्रमेण तु ।। ९४ ।
मातृकास्थानमध्ये तु श्रीकण्ठादीश्वरास्ततः ।
चतुर्थ्यन्ते नमःशब्दं ततो मूलं पुनः पुनः ।। ९५ ।
इति श्रीकण्ठविन्यासः कथितः कुलभैरव ।
तदिदानीं ग्रहन्यासं शृणु वक्ष्यामि तत्त्वतः ।। ९६ ।
हृदये च भ्रुवोर्मध्ये लोचनत्रितये ततः ।
हृदये च कण्ठकूपे गलदेशे ततः परम् ।। ९७ ।
नाभिमूले मुखाम्भोजे गुह्ये च विन्यसेद् ग्रहान् ।
रविसोमौ मङ्गलश्च बुधो बृहस्पतिस्तथा ।। ९८ ।
शुक्रः शनैश्चरः पश्चाद् राहुः केतुस्ततः परम् ।
न्यसेत्तु स्वस्वमुद्रया ममोक्तस्थानमण्डले ।। ९९ ।
स्वरैः सूर्यं यादिरान्तैः सोमं कादिशरैः कुजम् ।
चादिपञ्चाक्षरं नाथ बुधं टादिशरैर्गुरुम् ।। १०० ।
डादिहान्तैस्तथा शुक्रं पादिमान्तैः शनैश्चरम् ।
शादिहान्तैस्तथा राहुं लक्षाद्यां केतुमेव च ।। १०१ ।
लोकपालन्यासमादौ वक्ष्यामि कुलभैरव ।
शिरोमण्डलमध्ये तु दक्षिणावर्तयोगतः ।। १०२ ।
अधःपर्यन्तमाल्यस्य मूलेन पुटितं सदा ।
इन्द्राय शक्तिहस्ताय [2]सवाहनाय ॐ नमः ।। १०३ ।

---

१. महान् कालः स एवेश्वरः, 'कालोऽस्मि लोकक्षयकृत् प्रवृद्धः' इति गीतावचनात् ।
२. वहन्ति यैस्ते वाहनाः, कर्तरि ल्युट् वाहुलकात्, तैः सहिताय ।

ह्रस्वपञ्चस्वरेणापि मूलान्ते संन्यसेत् सुधीः ।
एकादशस्वरेणापि युक्ताय वह्नये नमः ॥ १०४ ।
सवाहनाय [1]सर्वास्त्रधारिणे तादृशाय च ।
यमाय वाहनस्थाय शूलास्त्रधारिणे नमः ॥ १०५ ।
कादिपञ्चवर्णसारैर्मूलेन पुटितैरपि ।
कर्णे दक्षिणमूलोर्ध्वे हस्तस्य तत्त्वमुद्रया ॥ १०६ ।
यमन्यासं प्रकृत्याशु नैर्ऋत्ये न्यासमाचरेत् ।
आदौ बीजं चादिपञ्चबीजान्ते नैर्ऋताय च ॥ १०७ ।
वसोऽधिपतये सर्वास्त्रादिवाहनवाहिने ।
नमोऽन्ते मूलमन्त्रं तु इति सर्वत्र भावना ॥ १०८ ।
मूलं टादिपञ्चवर्णं वरुणाय ततः परम् ।
सवाहनाय सर्वास्त्रधारिणे नम एव च ॥ १०९ ।
तदन्ते मूलमन्त्रं तु वरुणाय समाचरेत् ।
मूलान्ते तादिपञ्चार्णं सवाहनाय वायवे ॥ ११० ।
सर्वास्त्रधारिणे पश्चान्नमो मूलं ततः परम् ।
ततः कुर्यात् कुबेरस्य न्यासं परमदुर्लभम् ॥ १११ ।
आदौ मूलं पादिपञ्चाक्षरमुच्चार्य साधकः ।
कुबेराय सर्वास्त्रधारिणे नरवाहिने ॥ ११२ ।
नमोऽन्ते मूलमन्त्रं तु वामकर्णोपरि न्यसेत् ।
आदौ मूलं पादिवान्तमीशानाय ततः परम् ॥ ११३ ।
सवाहनाय सर्वास्त्रधारिणे नम उच्चरेत् ।
तदन्ते बीजविन्यासमीशानन्यास ईरितः ॥ ११४ ।
आदौ मूलं शादिहान्तं [2]शक्रोर्ध्वे हस्तमर्पयन् ।
अधोऽनन्ताय देवाय सर्वास्त्रधारिणे ततः ॥ ११५ ।

---

१. सर्वाणि अस्त्राणि सर्वास्त्राणि, विशेषणसमासः, तानि धरति तच्छीलः, णिनिः कर्तरि ।

२. शक्र इन्द्रदेवः, तस्योर्ध्वे ऊर्ध्वभागे ।

सवाहनाय हृच्छब्दं मूलं चापि तदन्तरे ।
आदौ मूलं ततो लक्षं ब्रह्मणेऽस्त्रादिधारिणे ।। ११६ ।
सवाहनाय हृच्छब्दं मूलञ्च तदनन्तरम् ।
ब्रह्मरन्ध्रे प्रविन्यस्य ब्रह्मज्ञानमवाप्नुयात् ।। ११७ ।
इति दिक्पालविन्यासः कथितः कालभैरव ।
शिवशक्तिन्यासजालं शृणुष्व परमाद्भुतम् ।। ११८ ।
यस्य करणमात्रेण षट्चक्रभेदको भवेत् ।
आदौ स्थानं प्रवक्ष्यामि यत्र न्यासं स्वमुद्रया ।। ११९ ।
मूलाधारपद्ममध्ये स्वाधिष्ठानाम्बुजे ततः ।
मणिपूरे महापद्मे [1]हृदयाम्भोजमण्डले ।। १२० ।
कण्ठे विशुद्धपद्मे च तथा [2]भ्रूपद्ममण्डले ।
एतेषु षट्सु पद्मेषु शक्तियुक्तं शिवं न्यसेत् ।। १२१ ।
आदौ मूलं वादिसान्तं डाकिनीसहिताय च ।
ब्रह्मणे नम उच्चार्य मूलमन्त्रं ततः परम् ।। १२२ ।
आदौ मूलं वादिलान्तं राकिणीसहिताय च ।
विष्णवे नम उच्चार्यं मूलविद्यां ततो वदेत् ।। १२३ ।
आदौ मूलं वादिलान्तं राकिणीसहिताय च ।
विष्णवे नम उच्चार्यं मूलविद्यां ततो वदेत् ।। १२४ ।
आदौ मूलं डादिफान्तं लाकिनीसहिताय च ।
रुद्राय नम उच्चार्यं ततो मूलं प्रविन्यसेत् ।। १२५ ।
आदौ मूलं कादिठान्तं काकिनीसहिताय च ।
ईश्वराय नमो मूलं विन्यसेत् साधकाग्रणीः ।। १२६ ।
आदौ मूलं स्वरान् पश्चात् शाकिनीसहिताय च ।
सदाशिवाय हृच्छब्दं मूलमुच्चार्यं विन्यसेत् ।। १२७ ।
आदौ मूलं ततो हं क्षं हाकिनीसहिताय च ।
ततः परशिवायान्ते नमो मूलं प्रविन्यसेत् ।। १२८ ।

१. हृदयस्याम्भोजं कमलम्, तस्य मण्डलम् । कमलमिति जात्यभिप्रायेण एकवचनम् । अथवा अम्भोजानि कमलानि, तेषां मण्डलं समूहः ।

२. भ्रूपद्मानि भ्रूकमलानि, तेषां मण्डलम् । भ्रुवौ कमले इवेति उपमितसमासः ।

[1]शिवशक्तिन्न्यासमेवं कथितं तव यत्नतः ।
इदानीं शक्तिविन्यासं कथयामि शृणुष्व तत् ।। १२९ ।

ब्रह्मरन्ध्रे ललाटे च भ्रूमध्ये कण्ठगह्वरे ।
हृदये नाभिमूले च लिङ्गमूले स्वमूलके ।। १३० ।

ऊरुमूले तथा जङ्घायुगले विन्यसेत् सुधीः ।
पादद्वये तथा गुह्ये युगले पादयोस्तले ।। १३१ ।

क्रमेण विन्यसेद्धीमान् मूलमन्त्रेण सम्पुटम् ।
शक्तिनाम शृणु प्राणवल्लभ प्राणरक्षक ।। १३२ ।

शक्तिर्माया रमादेवी भवानी दीनवत्सला ।
सुमना काकिनी हंसी तथा संसारतारिणी ।। १३३ ।

योगिनी गोपिका माला वज्राख्या चित्रिणी तथा ।
नटिनी भारवी दुर्गा रतिर्महिषमर्दिनी ।। १३४ ।

एता अष्टादश (श)क्तिमुख्याः संन्यासकर्मणि ।
आदौ मूलं स्वरं चैकं षोडशादिक्रमेण तु ।। १३५ ।

तदन्ते शक्तिमुच्चार्यं चतुर्थ्यन्तपदान्वितम् ।
नमःशब्दं तदन्ते तु ततो मूलं वदेत् सुधीः ।। १३६ ।

कादिनान्ताक्षराणां तु चाद्ये बीजं निधाय च ।
रत्यै नमो मूलमन्त्रं चाङ्गुष्ठं युगले न्यसेत् ।। १३७ ।

आदौ मूलं पादिक्षान्तं शक्तिञ्च तदनन्तरम् ।
चतुर्थ्यन्तं नमो मूलं शक्तिन्यासः समीरितः ।। १३८ ।

पीठन्यासं प्रवक्ष्यामि सावधानोऽवधारय ।
मूलाधारे कामरूपं कामाख्यं लिङ्गमूलके ।। १३९ ।

कामराजं त्रिकोणे तु हृदि ज्वालन्धरं तथा ।
हृद्यूर्ध्वे मधुकरस्थानं तदूर्ध्वे गगनाख्यकम् ।। १४० ।

---

१. शिवस्य शक्तेश्च न्यासम् । एतन्मते शिवशक्त्योः परस्परमभेद एव ।

ललाटे [1]पूर्णगिर्याख्यमुड्डयानं तदूर्ध्वके ।
तदूर्ध्वे शाङ्करीपीठं रुद्रपीठं तदूर्ध्वके ।। १४१ ।
तदूर्ध्वे करुणापीठं चोन्मनीपीठमेव च ।
रोधनीपीठमेवं तु बिन्दुपीठं तदूर्ध्वके ।। १४२ ।
तदूर्ध्वे रत्नपीठं तु तदूर्ध्वे शुक्रपीठकम् ।
तदूर्ध्वे वासनापीठं विसर्गपीठमेव च ।। १४३ ।
ब्रह्मपीठं तदूर्ध्वे तु कालीपीठं तदूर्ध्वके ।
तदूर्ध्वे तारिणीपीठं एकपीठं तदूर्ध्वके ।। १४४ ।
तदूर्ध्वे च जटापीठं पिङ्गलापीठमेव च ।
वाराणसीमहापीठं भ्रुवोर्मध्ये प्रविन्यसेत् ।। १४५ ।
लोचनत्रयमध्ये तु अवन्तीपीठमेव च ।
मायावतीं मुखवृत्ते जिह्वाग्रे तु मधूत्तमम् ।। १४६ ।
तन्मध्ये रसनापीठं दंष्ट्रापीठं तदन्तिके ।
विद्यापीठं तदग्रे तु योगिनीपीठमेव च ।। १४७ ।
कण्ठे चाष्टपुरीपीठं[2] तथा मधुपुरीत्रयम् ।
भुजद्वये भोगपीठं श्रीपीठं पार्श्वयुग्मके ।। १४८ ।
उदरे रह्लपीठं धर्मपीठं निवीतके ।
काञ्चीपीठं कटितटे देवपीठं तदुत्तरे ।। १४९ ।
तदधः श्यामलापीठं गोपीपीठं तदन्तिके ।
अयोध्यापीठचक्रं[3] तु नाभिमूले प्रविन्यसेत् ।। १५० ।
श्मशानपीठं गुह्ये तु शिवापीठं तथा तले ।
ऊरुयुग्मे शीतले वा पीठयुग्मं प्रविन्यसेत् ।। १५१ ।
रङ्किणीपीठनगरं जङ्घायुग्मे उदाहृतम् ।
स्तनयुग्मे क्षीरपीठमङ्गुष्ठे द्वे प्रविन्यसेत् ।। १५२ ।

---

१. पूर्णगिरिराख्या यस्य तादृशमुड्डयानम् ।
२. अष्टसंख्याकाः पुर्यः अष्टपुर्यस्तासां पीठम् ।
३. अयोध्यायाः पीठं तस्य चक्रम् । मर्यादापुरुषोत्तमरामस्य जन्मभूरयोध्यापीठम् ।

कालीपीठं क्रोधपीठं विन्यसेत् [1]साधकाग्रणीः ।
पञ्चाशदेकपीठं तु केशाग्रे राज्यपीठकम् ॥ १५३ ।

आदौ मूलं ततो वर्णं स्थाननाम ततः परम् ।
पीठनाम चतुर्थ्यन्तं नमोमूलं ततः परम् ॥ १५४ ।

इति पीठन्यासमूलं कथितं तव यत्नतः ।
अस्य करणमात्रेण योगी सिद्धिमवाप्नुयात् ॥ १५५ ।

चिरजीवी स्वयं देवः प्रभाकरसमो बली ।
यन्नमन्ति महेशानि षोढापुटितविग्रहाः ॥ १५६ ।

अल्पायुः स भवेत् सद्यो देवता कम्पते भिया ।
इति ते कथितं नाथ षोढान्यासं महाशुभम् ॥ १५७ ।

ततः सिद्धपुरुषाणां भावनं शृणु शङ्कर ।
मीननाथो गुरुः श्रीमान् आगस्यो देवराजकः ॥ १५८ ।

कालाननः सोमराजो वीरनाथो धनञ्जयः ।
कृष्णः कान्तमतिर्बुद्धो धर्मावतार एव च ॥ १५९ ।

वशिष्ठो नारदश्चैव शुकः प्रह्लाद एव च ।
जनको भार्गवेशश्च कुरुक्षेत्रेश्वरस्तथा ॥ १६० ।

विश्वामित्रो भरद्वाजो मैनाको मेरुरेव च ।
अनन्तो योगनाथश्च महेन्द्रो मदिरेश्वरः ॥ १६१ ।

[2]ब्रह्मानन्दशिवानन्दौ सनकानन्द एव च ।
सर्वेश्वरः कामदेवः शुक्राचार्यः कुलेश्वरः ॥ १६२ ।

इति सिद्धपुरुषाणां ध्यानं कृत्वा विभावयेत् ।
रक्तवर्णं महासत्त्वं पुरुषं सर्वभूषणम् ॥ १६३ ।

विभाव्य ध्यानमाकुर्याद् हाकिनीपरदेवयोः ।
आदौ श्रीपरदेवस्य[3] ध्यानं शृणु महेश्वर ॥ १६४ ।

---

१. साधकानामग्रणीः प्रमुखः, न तु साधकश्चासौ अग्रणीः ।
२. ब्रह्मरूप आनन्दः, शिवात्मकश्च आनन्दः, 'सच्चिदानन्दं ब्रह्म' इति श्रुतिः ।
३. श्रीसहितः परदेवः, तस्य ।

शुक्लाभं परमेश्वरं परशिवं [1]सूक्ष्मातिसूक्ष्मं गुरुं
सर्वाऽलङ्कृतविग्रहं त्रिजगतां सारं परं निर्मलम् ।
अद्वैतं दशहस्तपङ्कजतलं श्रीदं त्रिनेत्रं शिवं
देवेन्द्रैः परिपूजितं सुखमयं सच्चित्परानन्ददम् ॥ १६५ ।

ध्यायेत् पञ्चमुखं महास्त्रवरदं भक्तैः सदा पूजितम्॥ १६६ ।

एवं ध्यात्वा परनाथं मानसोग्रोपचारतः ।
पूजयित्वा नमस्कृत्य हाकिनीध्यानमाचरेत् ॥ १६७ ।

त्रैलोक्योत्सववन्दितां त्रिजगतामानन्दपूर्णोदयां
नानाऽलङ्कृतभूषणां सुमुकुटोल्लासैकबीजप्रभाम् ।
श्यामां मोक्षदवेदहस्तकमलां कारुण्यवारांनिधिं
शोभामण्डलमण्डितां पथि भजे श्रीहाकिनीमीश्वरीम् ॥१६८।

अस्याः सप्तकुलध्यानं पश्चाद् वक्तव्यमेव च ।
महामुद्रादर्शनं तु चेदानीं शृणु भैरव ॥ १६९ ।

योनिमुद्रा महामुद्रा सर्वतन्त्रेषु गोपिता ।
तया चावाहनं कुर्यात् साधको निश्चलात्मना ॥ १७० ।

अर्घ्यद्वयं स्थापयित्वा पूर्वंचक्रक्रमेण तु ।
पुनर्ध्यात्वा तयोः पादाम्भोजे दद्यात् सदाशिवः ॥ १७१ ।

षोडशोपचारद्रव्यैस्ततः सम्पूजयेत् सुधीः ।
ऋषिध्यानं प्रवक्ष्यामि यस्य मूर्ध्नि प्रविन्यसेत् ॥ १७२ ।

मूर्तं सदाशिवं देवं नानालङ्कारभूषितम्[2] ।
द्विभुजं पीतवसनं धर्माधर्मप्रदर्शकम् ॥ १७३ ।

वराभयकरं शान्तं हाकिनीशिरसि स्थितम् ।
विभाव्य पूजयेत् तत्र गन्धपुष्पादिभिः प्रभो ॥ १७४ ।

जीवसंस्कारमावक्ष्ये येन [3]जीवस्थितिर्भवेत् ।
स्वहृदये दक्षहस्ते तत्र मुद्राक्रमेण तु ॥ १७५ ।

---

१. सूक्ष्मेभ्योऽपि अतिसूक्ष्मम् । अणोरणीयान् महतो महीयानिति श्रुतिः ।

२. नानाऽलङ्कारैर्भूषिताम्, तृतीयातत्पुरुषः ।

३. जीवानां स्थितिः जीवसंस्कारजन्या भवति ।

हाकिनीपरदेवस्य मन्त्रं स्मृत्वा पुनः पुनः ।
स्थापयामि स्वचित्तं मे हाकिन्या सह सम्पदेः ॥ १७६ ।

स्थिरो भव महाजीव ममाज्ञां परिपालय ।
स्वाहान्तं मन्त्रमुच्चार्यं जीवं संस्कारयेत् ततः ॥ १७७ ।

जीवदानमतो वक्ष्ये हाकिनीपरदेवयोः ।
आदौ श्रीहाकिनीदेव्या जीवदानं शृणु प्रभो ॥ १७८ ।

आं ह्रीं क्रों बीजमुच्चार्यं पूर्ववज्जीवसंस्थितम्[1] ।
एकविंशतिवारं तु हाकिनीहृदये जपेत् ॥ १७९ ।

स्वाहान्तेनापि मनुना जीवसंस्कार ईरितः ।
एवं श्रीपरदेवस्य प्राणदानमुदाहृतम् ॥ १८० ।

पुनर्ध्यानं प्रवक्ष्यामि शृणु भैरव वल्लभ ।
यां ध्यात्वा सर्वग्रन्थीनां स्वयं भेत्ता स्वयं हरिः ॥ १८१ ।

अर्घ्यविन्यासयुगलं शृणु भद्रोदर प्रभो ॥ १८२ ।

वेदाङ्गोज्वलनप्रभां त्रिनयनानन्दैकचित्तोज्ज्वलां
लावण्यं प्रियवाक्यमोहनिकरां श्रीसन्मुखीं हाकिनीम् ।
चण्डालामलभालमहाखड्गप्रभापङ्कज-
छायापुत्रवरान् भयहरामश्रं द्युयन्तीं भजे ॥ १८३ ।

श्रीं श्रीं श्रीं भैरवेशं सुखमयपुरुषं कोटिदीपप्रकाशं
कोटचलङ्कारभूषणं त्रिजगति वरदं व्याघ्रचर्माम्बराढचम् ।
योगीन्द्रैर्योगिमुख्यैः सुरवरतरुणैः सर्वदा पूज्यमानं
पञ्चास्यं शून्यचन्द्रायतभुजकिरणं योगिचूडामणीशम् ॥१८४।

ध्यायेऽहं शरणागतं प्रियतमं मायाश्रयं शङ्करं
रौप्याद्रिप्रभविग्रहं शवमुखं शून्येन्दुवक्त्राम्बुजम् ।
षट्स्थानात्रशतार्कचन्द्रकिरणं [2]भास्वत्त्रिनेत्रं परं
निर्वाणाख्यपदप्रदं कुलकलानाथं भजे भ्रूदले ॥ १८५ ।

---

१. जीवसंस्कारजन्यैव जीवानां संस्थितिर्भवति ।
२. भास्वन्ति प्रभावन्ति त्रिनेत्राणि यस्य । त्रयाणां नेत्राणां समाहारः ।

एवं ध्यात्वा महादेवीं हाकिनीं श्रीपरेश्वरम् ।
नित्यं स्वयम्भुं [1]नागेन्द्रघण्टाडमरुनादितम् ॥ १८६ ।
महाकायकराम्भोजपूजितं पञ्चचूडिनम् ।
अतिसौन्दर्यवदनं नागेन्द्रहारशोभितम् ॥ १८७ ।
महातेजोमयं कोटिचन्द्रकान्तिस्फुरत्प्रभम् ।
घर्घरध्वनिमञ्जीरहंसाकारपदाम्बुजम् ॥ १८८ ।
वृषासनस्थं योगीन्द्रं हाकिनीपरमेश्वरम् ।
हाकिनीसुन्दरीवामशोभाविद्युत्प्रकाशिनम् ॥ १८९ ।
अतिसौन्दर्यलहरीं योगमायास्वरूपिणीम् ।
कामधेनुस्वरूपाख्यां स्वकान्त्या विश्वमोहिनीम् ॥ १९० ।
रौप्याद्रिसदृशाकारां चित्रविद्रुमसल्लताम् ।
मुक्तकेशीं मेघमालां रौप्याद्रयाच्छादनीं कियत् ॥ १९१ ।
चलद्भ्रमरकोटचर्कचन्द्रवह्नित्रिलोचनाम् ।
[2]षण्मुखीं वेदहस्तां तु पद्मरागसमप्रभाम् ॥ १९२ ।
पद्मरागकान्तमालाधारिणीं हेतुसुप्रियाम् ।
साधकानां हितार्थाय कपालासिभयानकाम् ॥ १९३ ।
सर्वसौभाग्यदां नित्यां डमरुजपमालिकाम् ।
धारयन्तीं महाविद्यामानन्दोदयसाक्षिणीम्[3] ॥ १९४ ।
भ्रू पद्मकर्णिकामध्ये गतच्छदसुपङ्कजे ।
शोभारूपं संप्रहन्तीं काकिनोशाकिनीप्रियाम् ॥ १९५ ।
लाकिनीराकिणीध्येयां डाकिनीपरिपूजिताम् ।
कुण्डलीबन्धुजननी पूजयामि महोतले ॥ १९६ ।
एवं ध्यात्वा चार्घ्यसारं क्रमतो युगलं चरेत् ।
त्रिकोणमण्डलद्वन्द्वं चाग्रे कृत्वाऽङ्गुलेन च ॥ १९७ ।

---

१. नागानामिन्द्रो नागेन्द्र ऐरावतः, तस्य घण्टा च डमरुश्च ताभ्यां नादितं शब्दायितम् ।

२. षट्संख्याकानि मुखानि यस्याः सा, स्वाङ्गाच्चोपसर्जनादिति ङीष् ।
स्वोद्योगवति ।

३. आनन्दस्योदये साक्षिणीम् । यस्याः साक्षित्वे आनन्दस्योदयो भवति ।

[1]तीर्थवाहनकालाद्यैः पूरयेद् गन्धकैस्ततः ।
तदाद्ये चापि फट्कारैः खड्गाधारञ्च शङ्खकम् ।। १९८ ।
क्षालयेन्मनुनानेन शृणुष्व कुलभैरव ।
ॐशङ्खस्थं शङ्खत्वं पुण्यानां मङ्गलानाञ्च मङ्गलम् ।।१९९।
विष्णुना विधृतो नित्यं मम शान्तिप्रदो भव ।
ॐशङ्खाधारं शोधयामि कूर्माकारेण भास्वता ।। २०० ।
विसर्गबिन्दुसर्गेऽहं त्रिकोणे स्थापयाम्यहम् ।
धेनुयोनिं मत्स्यमुद्रां दशधा मन्त्रमाजपेत् ।। २०१ ।
आत्मानं प्रोक्षयेदादौ ततो द्रव्यादिप्रोक्षणम् ।
एवं क्रमेण देवेश देवदेव महेश्वर ।। २०२ ।
अर्घ्यद्वयं पुरः श्रीमान् स्थापयन् कौलिको जनः ।
पूजां कुर्याद्विशेषेण रात्रिशेषे विशेषतः ।। २०३ ।
महामुद्रादर्शनं तु चाधुनापि समाचरेत् ।
[2]अवश्यं सिद्धिमाप्नोति हेतुयुक्तो हि साधकः ।। २०४ ।
महामुद्रा योनिमुद्रा सर्वतन्त्रे निरूपिता ।
यो जानाति महादेव स योगी नात्र संशयः ।। २०५ ।
महापूजां समाकुर्याद् देवदेव मयोदिताम् ।
ध्यानयुक्तस्य या पूजा सा पूजा सफला भुवि ।। २०६ ।
सदा कालीपूजनवत् पूजां कुर्यात् समाहितः ।
तच्च देशे समागम्य गन्धर्वनगरेऽपि वा ।। २०७ ।
पर्वते निर्जने वापि शून्यागारे श्मशानके ।
महाविद्यां कामधेनुं हाकिनीं परिपूजयेत् ।। २०८ ।
पाद्यमन्त्रं प्रवक्ष्यामि प्रणवं रतिसुन्दरी[3] ।
रमाबीजं महादेवि तदन्ते पाद्यमुत्तमम् ।। २०९ ।

---

१. तीर्थवाहनकालाद्यैर्गन्धकैः पूरयेदित्यन्वयः ।
२. हेतुयुक्तः सत्तर्कशीलः साधकः अवश्यं निश्चयेन सिद्धिमाप्नोति ।
३. रतिश्च सा सुन्दरी च, अथवा रतौ सुन्दरी ।

गन्धोदितं गृह्ण गृह्ण हाकिन्यै हूँ द्विठः प्रभो ।
एवं सर्वत्र कर्तव्यं नामभेदेन कारयेत् ।। २१० ।

दापयेन्नामभेदैश्च सर्वद्रव्याणि भैरव ।
आसनं स्वागतं पाद्यमर्घ्यमाचनीयकम् ।। २११ ।

[1]मधुपर्काचमनस्नानवसनाभरणानि च ।
गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा ।। २१२ ।

पानार्थं जलदानन्तु बलिदानं ततः परम् ।
अष्टादशोपचाराश्च सर्वतन्त्रेषु गोपिताः ।। २१३ ।

प्राणायामत्रयं कुर्यात् साधको निर्भयः शुचिः ।
जपं कुर्याद् विशेषेण महामालाक्रमेण तु ।। २१४ ।

अन्यं मनुवरं नाथ शृणु भैरव ईश्वर ।
प्रणवं प्रेतराजं तु वह्निबीजं तदुत्तरे ।। २१५ ।

हालाहलं महाकाल परनाथाय धीमहि ।
कामबीजं हाकिनी च चतुर्थ्यन्तपदात्मिका ।। २१६ ।

सोऽहं हंसस्ततः स्वाहा महामन्त्रं जपेद् बुधः ।
लक्षजपेन सिद्धिः स्यादज्ञानी ज्ञानवान् भवेत् ।। २१७ ।

असिद्धः सिद्धरूपी स्यादाख्या कीर्तिः प्रवर्धते ।
महावाग्मी सर्वशास्त्रवेत्ता सर्वज्ञसिद्धिभाक् ।। २१८ ।

वाचां सिद्धिरष्टसिद्धिः प्रकाश्या भान्ति तत्करे ।
युगयुग्मपुरश्चर्याविधानेनामरो भवेत् ।। २१९ ।

योगी स्यात् प्रलयस्थायी ध्यानात्मा ज्ञानवाञ्छुचिः ।
अप्रकाश्यगुणी भूत्वा राजराजेश्वरो भवेत् ।। २२० ।

गुह्यातिगुह्यगोप्त्री[2] त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात् परेश्वरि ।। २२१ ।

---

१. **मधुपर्कः**—'पलमेकं मधु कुर्याद् द्विपलं दधि उच्यते ।
पलमेकं घृतं चैव मधुपर्कविधिःस्मृतः ।।

२. गुह्येष्वपि अतिगुह्यं तस्य गोप्त्री रक्षिका इत्यर्थः ।

इति समर्प्य तद्धस्ते हेमरूपं विचिन्तयन् ।
ततः प्राणायामयुतं मन्त्रं तु त्रिगतं जपेत् ॥ २२२ ।
बलिदानमनुं वक्ष्ये शृणु श्रीकुलपण्डित ।
आदौ मूलं सिद्धबलिं सुधामांससमन्वितम्[1] ॥ २२३ ।
[2]मोनमुद्रासमाक्रान्तमथवा मिष्टसद्बलिम् ।
गृह्णयुग्मं तथा गृह्णापययुग्मं द्विठस्ततः ॥ २२४ ।
दापयेत् साधकेन्द्रश्च भक्त्या कामसुसिद्धये ।
ततः स्तोत्रं पठेद्धीमान् गद्यपद्यादिभेदतः ॥ २२५ ।
पठेच्च कवचं ब्रह्मसम्मतं देहरक्षणम् ।
सहस्रनामसन्तानं पठेद् वा हरमुद्रया ॥ २२६ ।
स्वस्थाने स्थापयेन्नाथ हाकिन्या परमेश्वरम् ॥ २२७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे हाकिनीपरशिवयजनं नाम द्व्यशीतितमः पटलः ॥

---

१. सुधया मिश्रितेन मांसेन समन्वितम् ।

२. मीनेन मुद्रया च समाक्रान्तम् ।

विशेषः—मीनो मुद्रा सुधामांसप्रभृतिपदार्था न कामपूरकाः, अपि तु पारिभाषिकरूपेण विधिपूरकाः ।

अथ त्र्यशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

कथयस्व वरारोहे हाकिनीस्तोत्रमुत्तमम् ।
यस्य प्रपाठनाद् [1]वाग्मी कृपायासे दयामयि ॥ १ ॥

श्रीआनन्दभैरवी उवाच—

अत्यद्भुतं स्तोत्रवरं शृणु प्रभो सर्वेश्वरैर्भावितमादिगुह्यम् ।
यैः पठ्यते साधकचक्रनाथैस्तैरेव सिद्धैरतिधर्मविद्भिः ॥ २ ॥

ब्रह्माख्यां कामविद्यां नरहरिजननीं कामकूटस्वरूपां
हाकिन्याख्यां शम्भुजायां त्रिवधुमदनशां तारिणीं स्तौमि सिद्धाम् ।
हेरम्बानन्दविद्यां त्रिसमनदमनीं दीर्घकेशीं त्रिनेत्रां
मन्दारारण्यमध्ये विकसितवदनाम्भोजहासप्रकाशाम् ॥ ३ ॥

हिरण्यालङ्कारां त्रितयनयनां पट्टवसनां
महास्निग्धां शुद्धां कुलजनवरामिन्दुवदनाम् ।
सदा स्तौति श्रीदां भुवनकरुणां भावतरुणां
त्रिवेणीश्वेताभां वसमयतनुं भ्रूयुगदले ॥ ४ ॥

महापद्मवनोद्रेकरम्यस्थाननिवासिनि ।
हाकिनि त्वां मुदा स्तौमि तद्धर्मंकुरुपागताम् ॥ ५ ॥

संसारार्णवतारिणीं नरहरिप्रेमाभिलाषोन्मनीं
[2]भावारम्भविसर्जनैकनिलयां मायां महासुन्दरीम् ।
भास्वत्कोटिसुरत्नसिंहवसतिं श्रीहाकिनीं द्राविणीं
स्तौमि क्षेत्रनिरीक्षणाय नियतां श्रीभारतीभाविताम् ॥ ६ ॥

---

१. वाचो ग्मिनिरिति ग्मिनिप्रत्ययः ।

२. भास्वत्कोटिसुरत्नेति सिंहस्य विशेषणम् । अथवा स्वतन्त्रमेव । तेषु सिंहे च वसतिर्यस्याः सा ।

[1]संस्कारश्रियमातनोति सहसा श्रीपार्वतीवल्लभे
नानारत्नकलापदर्शनमहाज्ञानं निदानं धनम् ।
सा साक्षादखिलेश्वरी [2]परशिवानन्दैकबिन्दूज्ज्वला
मामादौ परिरक्षतु प्रियकरी संस्तौमि पीठान्तरे ॥ ७ ।

आकाशवेदलिङ्गे स्थितिपथिमिलिते भाति सा रक्तबर्हा
सा मां पात्वम्ब काली कुलपथभविका क्रोधनिःक्रोधकर्त्री ।
तस्याः श्रीपादपद्मत्रिभुवनभक्तकेशालिमाला
युक्तं सर्वेन्द्रपूज्यं निरवधिकमले द्वे दले स्तौमि विद्याम् ॥ ८ ।

साङ्गं द्वयं त्वत्प्रियं पदयुगं पत्रद्वयश्रेयसं
मञ्जीराद्भुतहारपादकमलं सम्भाव्य संस्तौम्यहम् ।
यद् ध्यात्वा हरिरीश्वरो गुणधरो जेता महारेःक्षणा-
दाशापाशविसर्जनैकनिलयं त्रैलोक्यसंरक्षकः ॥ ९ ।

या यात्रा व्रतवासिनी शशिमुखी छागादिमांसप्रिया
मामेकं परिपालय त्वमखिले त्वामेकरूपां शिवाम् ।
स्तौमीन्द्रावनतिप्रियां वाङ्मोक्षसहितानन्दैकहेतुप्रदाम् ॥ १० ।

वरं परं नमाम्यहं गिरीन्द्ररूपगर्वहं[3]
महेश्वरं परेश्वरं श्मशानबीजगह्वरम् ।
हिरण्यरत्नभूषणं शतेन्दुतेजसं तथा
शिवं तनुं पुनः परप्रभाप्रभाकरम् ॥ ११ ।

शरण्यं वरेण्यं महाकामधन्यं
महादेवदेवं त्रिकालादिजन्यम् ।
श्मशानोग्रधूलिप्रियाङ्गानुलेपं
सदा स्तौमि संसारसारं निषेकम् ॥ १२ ।

---

१. संस्कारजनितां श्रियमित्यर्थः ।
२. परशिव आनन्दस्तस्यैको बिन्दुस्तेनोज्ज्वला प्रकाशमाना ।
३. गिरीन्द्ररूपस्य गर्वं हन्ति, एवंभूतो महेश्वरः ।

परशिवं मनसा सहसा निशि
प्रतिदिनं प्रणमाम्यहमादिमम्[1] ।
शशिमुखीशतचन्द्रिकयान्वितं
भजनसाधनसत्फलदायकम् ॥ १३ ।

परशिवचरणाब्जं हाकिनीशक्तिसेव्यं
त्रिभुवनसुखदानं ध्यानमात्रप्रकाशम् ।
अतिसुललितहस्ताम्भोजशोभां वहन्तं
भुवि निजकुलसारं स्तौमि योगीन्द्रगम्यम् ॥ १४ ।

शोक्कशोकावलीलामति हि कलयति प्राणदेहाभिलाषं
हाकिन्याः प्राणनाथो भवशमनकरो हीरकासृग्धरो वा ।
सोऽसौ भ्रूपद्मसारे रचयति कलिकां चित्तदीपस्य नित्यां
तस्य श्रीपादपद्मं गुणगणयजितं पूजितं स्तौमि भाले ॥ १५ ।

मेरुशृङ्गनिकेतनैकवसनं गोलोकसंसेवितं
यज्ञानन्दनिषेवितं परशिवं योगीन्द्रचित्तस्थलम् ।
हालापाननिराकुलं पशुसमां सामोदनाचर्वणां
वन्दे नन्दिमहादिभैरववरैर्वन्द्यं जगत्कारणम् ॥ १६ ।

मायापथच्छलकलाकपिलापतिस्त्वं
त्वं भूविरपतिरूपापतिरेकचक्रः ।
आपोऽनलत्वमखिले गगनप्रकाशा-
वायुस्थमावसिमुखं शरणं प्रपद्ये ॥ १७ ।

वाञ्छाकल्पद्रुमतलगतं हेमसिंहासनस्थं
श्रीहाकिन्या रमणनिरतं कामकेलिप्रकाशम् ।
मायामोहं क्षयमतिसुखं विन्ध्यशैलाग्रसंस्थं
वन्दे नाथं हरपरशिवं रूपजालप्रकाशम् ॥ १८ ।

---

१. आदौ सृष्टेरादौ भवमादिमम् । 'अग्रादिपश्चाड्डिमच्' इति डिमच्प्रत्ययः । सृष्टिकर्ता भर्ता इत्यर्थः ।

पठेद् यः स्तोत्रार्थं भवति स सुखी योगनिपुणः
क्षुधातृष्णानाशः श्रवणधृतयशोवासिसरसः ।
स योगीन्द्रो मासादतिशयपरानन्दघटकः
परीतः प्राणाख्ये रचयति [1]सुधासिन्धुसुरसम् ।। १९ ।

एतत् स्तोत्रं पठेद्विद्वान् [2]ध्यानन्यासससमन्वितम् ।
शुक्लं रक्तं तथा पीतं नीलं कृष्णं विभाव्य च ।। २० ।

कालचतुष्टये नित्यं पठित्वा सिद्धिमाप्नुयात् ।
आकाशे भूतले नाथ पाताले विघ्नकोटयः ।। २१ ।

योगिनां पठनादेव नश्यन्ति तत्क्षणादिह ।
सर्वत्र गामी स भवेदतिभाग्यफलोदयम् ।। २२ ।

महापापहरं स्तोत्रं हाकिनीहृदयोद्भवम् ।
सदाशिवप्रियं योगसिद्धिदं देवसेवितम् ।। २३ ।

सहस्रवारपाठेन पुरश्चर्याफलं लभेत् ।
पठित्वा स्तोत्रराजं तु श्मशाने निर्जने वने ।। २४ ।

अन्तरिक्षेऽथवा नाथ योगी स्यादमरो महान् ।
अस्य प्रपठनाद्वाग्मी ज्ञानवान् विजितेन्द्रियः ।। २५ ।

ध्यानात्मा संभवेत् क्षिप्रं परिवारगणैः सह ।
प्रातःकाले निशायां तु मध्याह्ने शेषकालके ।। २६ ।

प्रपठेत् स्तोत्रसारं तु भावात्मा साधकोत्तमः ।
अनायासेन भ्रूपद्मे स्थिरो भवति निश्चितम् ।। २७ ।

श्रीगुरोश्चरणाम्भोजं[3] हृदये ध्याननिर्णयम् ।
यो ध्यात्वा पठचते स्तोत्रं स भवेत् कल्पपादपः[4] ।।२८ ।

---

१. सुधासिन्धुश्चासौ सुरसश्च । शोभनरससमन्वितः ।
२. ध्यानेन न्यासेन च समन्वितम् ।
३. चरणौ अम्भोजमिव इति, उपमितसमासः ।
४. कल्पस्य कल्पनायाः पादपो वृक्षः, कल्पतरुरित्यर्थः । यस्य छायायां मनोरथानि फलन्ति ।

इदानीं कथये नाथ कवचं पटलान्तरे ॥ २९ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे हाकिनीपरनाथस्तोत्रविन्यासो नाम त्र्यशीतितमः पटलः ॥

●

अथ चतुरशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

अथादौ कथयानन्दभैरवि प्राणवल्लभे ।
कवचं हाकिनीदेव्याः परमानन्दवर्धनम् ॥ १ ।

हेतुयुक्तं श्रद्धया मे करुणासागरस्थिते ।
शीघ्रं विरचयानन्द कवचं सारमङ्गलम्[1] ॥ २ ।

श्रीआनन्दभैरवी उवाच—

आदौ शृणु महावीर परमानन्दसागर ।
कवचं हाकिनीदेव्याः संसारार्णवतारकम् ॥ ३ ।

यस्य स्मरणमात्रेण योगी योगस्थिरो भवेत् ।
अन्तरिक्षे च भूलोके पाताले ये चराचराः ॥ ४ ।

स्तम्भिता वेपमानाः स्युर्विद्याज्ञानादिपाठतः ।
कवचध्वनिमात्रेण भूतप्रेतपिशाचकाः[2] ॥ ५ ।

विद्रवन्ति भयार्ता वै कालरुद्रप्रभावतः ।
यथाऽऽलोको वह्निमध्ये स्थिरो भवति निश्चितम् ॥ ६ ।

ॐ अस्याः श्रीहाकिनीदेव्याः सानन्दसारमङ्गलस्य महाकवचस्य सदाशिव ऋषिर्गायत्रीच्छन्दः श्रीहाकिनीपरदेवता क्लीं बीजं स्वाहा शक्तिः सिद्धलक्ष्मीमूलकीलकं देहान्तर्गतमहाकामसिद्धयर्थे जपे विनियोगः ।

ॐ पातु शीर्षचक्रं मे क्लीं पातु भालमण्डलम्[3] ।
स्वमूलं पातु मे नित्यं लोचनत्रितयं मम ॥ ७ ।

---

१. सारमङ्गलं कवचं शीघ्र विरचयेत्यन्वयः ।

२. भूताश्च प्रेताश्च पिशाचकाश्च इतरेतरयोगद्वन्द्वः ।

३. भालस्य मस्तकस्य मण्डलम् ।

गण्डयुग्मं सदा पातु वाग्भवाद्या [1]मनोरमा ।
श्रीं ह्रीं पातु कर्णयुग्मं हाकिनी परदेवता ॥ ८ ।
महाविद्या सदा पातु ममोष्ठाधरसम्पुटम् ।
[2]दन्तावलियुगं पातु ह्लीं श्रीं स्वाहा परेश्वरी ॥ ९ ।
क्लीं ह्लीं श्रीं हाकिनीदेवी स्वाहा पातु रसप्रियाम् ।
सृक्कनीं पातु सततं शक्तिः कामवरा मधुः ॥ १० ।
स्वाहा पातु शिखा शक्तिर्भ्रूमध्यं पातु सर्वदा ।
हाकिनी मण्डलं पातु परानाथेश्वरी परा ॥ ११ ।
सुन्दरी सर्वदा पातु द्विदलं कामसुन्दरी ।
अमृताख्या सदा पातु भ्रूप्रकाशस्थलं मम ॥ १२ ।
वह्निज्वाला सदा पातु भ्रूश्मशानस्थलं मम ।
सुरभी पातु मायास्त्रं स्वाहा मे भ्रूगतच्छदम् ॥ १३ ।
त्रिकोणं पातु कामाख्या हाकिनी परमेश्वरी ।
त्रिपुरा सुन्दरी पातु द्विषट्कोणं सदा मम ॥ १४ ।
हिङ्गुलादेश्वरी पातु षट्कोणबिन्दुमण्डलम् ।
सप्तभूबिम्बमापातु भूतलान्तःप्रकाशिनी ॥ १५ ।
महाशतदलं पातु शतकोटिमरुप्रिया ।
गुरुविद्यामयी पातु वाणी मे मत्तगामिनी ॥ १६ ।
चतुर्द्वारं सर्वचक्रं पातु मे परमेश्वरी ।
अत्यन्तदुःखहन्त्री मे मनश्चक्रं सदावतु ॥ १७ ।
शब्दब्रह्ममयी[3] पातु चन्द्रमण्डलमेव मे ।
अकालतारिणी दुर्गा सर्गस्थित्यन्तकारिणी ॥ १८ ।
महापुरुषसंस्थानं हाकिनी मण्डलं मम ।
पातु वर्णमयी तारा चन्द्रार्धं मे सुरेश्वरी ॥ १९ ।

---

१. रमयति या सा रमा, मनसो रमा मनोरमा ।

२. दन्तानामवली, तयोर्युगम् । उपरिभागेऽधोभागे च स्थिता दन्तावलिः ।

३. शब्द एव ब्रह्म, तत्स्वरूपा ।

उन्मनीनगरं पातु [1]वह्निकुण्डनिवासिनी ।
मदिरा पातु सततं भालं विषहरा मम ॥ २० ।
धर्मदा ज्ञानदा पातु धर्मज्ञानपदं मम ।
तालपत्नीश्वरी पातु अमृतानन्दकारिणी[2] ॥ २१ ।
वैराग्यनिकरं पातु बिन्दुस्थानं महाबला ।
त्रितारी कूटशक्तिर्मे सदा पातु विशुद्धकम् ॥ २२ ।
शाकिनीशं सदा पातु शाकिनी कुलभैरवी ।
सप्तद्वीपेश्वरी पातु मम षोडशपङ्कजम् ॥ २३ ।
शाकिनी भैरवी पातु चण्डदुर्गा सरस्वती ।
कुमारी कुलजा लक्ष्मीः सिद्धार्थं मे सदाऽवतु ॥ २४ ।
हृदयं पातु सततं शाकिनी परमेश्वरी ।
बीजरूपा सदा देवी महामहिषघातिनी ॥ २५ ।
उदरं पातु सततं योगिनीकोटिभिः सह ।
उमा महेश्वरी पातु प्रचण्डा मम पृष्ठकम् ॥ २६ ।
चामुण्डा भैरवी बाला पार्श्वयुग्मं सदाऽवतु ।
परमा चेश्वरी पातु देवमाता स्तनद्वयम् ॥ २७ ।
सौभाग्यहाकिनी देवी पायात्तु वक्षसः प्रियम् ।
आद्या देवी शिखारूपा भुजयुग्मं सदाऽवतु ॥ २८ ।
सर्वापराधहर्त्री मे कामविद्या दशच्छदम् ।
मणिपूरं सदा पातु दशवर्णात्मिका शिवा ॥ २९ ।
नाभिचक्रं सदा पातु लाकिनी पद्मवासिनी ।
नित्यदेशदलं पातु पार्वती वेदपालिनी ॥ ३० ।
महारुद्रेश्वरी पातु पीठरूपं मणि मम ।
[3]तेजोमण्डलमापातु रुद्राणी शूलधारिणी ॥ ३१ ।

---

१. वहति हविर्द्रव्यमिति वह्निः, तस्य कुण्डे निवसति, तच्छीला ।
२. अमृतानन्दं करोति तच्छीला, णिनिः कर्तरि, स्त्रीत्वविवक्षायां ङीप् ।
३. शूलधारिणी रुद्राणी तेजोमण्डलम् आपातु इत्यन्वययोजना ।

अभया सर्वदा पातु योगविद्या नितम्बकम् ।
नितम्बाधारचक्रं मे पातु शैलं[1] नितम्बिनी ॥ ३२ ।
तरुणी मन्त्रजालस्था वैष्णवी लिङ्गमण्डलम् ।
सदा पातु हाकिनीशा महाविष्णुस्थलं मम ॥ ३३ ।
वैष्णवी ललिता माया रमादेवी कटिं मम ।
स्वाधिष्ठानं सदा पातु गुह्यरूपा सरस्वती ॥ ३४ ।
भवानी भगवत्पत्नी श्मशानकालिका गुदम् ।
पातु मे रणमातङ्गी राकिनी कुलमण्डलम् ॥ ३५ ।
व्यक्ताव्यक्तस्वरूपा मे मूलाधारं सदाऽवतु ।
चतुर्दलं चतुर्वर्णं पातु मे ज्ञानकुण्डली ॥ ३६ ।
तपस्विनी सदा पातु पावनी मूलमावतु ।
रतिका घटिका वेश्या धरिणी कामसुन्दरी ॥ ३७ ।
वह्निकान्ता सदा पातु ममोरुयुगलं सदा ।
उल्कामुखी क्षेत्रसिद्धा जङ्घायुग्मं सदाऽवतु ॥ ३८ ।
बालामुखी पातु सम्पत्प्रदा श्रीकुलभैरवी ।
पादाम्बुजद्वयं पातु सर्वाङ्गं परहाकिनी ॥ ३९ ।
मदना मेदिनी धन्या चामुण्डा मुण्डमालिनी ।
रमा कामकला ज्येष्ठा तथाज्ञा रतिसुन्दरी ॥ ४० ।
मनोयोगा सदा पातु निर्मला विमलामला ।
काञ्चनी बगला रात्रिः पञ्चमी रतिसुन्दरी ॥ ४१ ।
सर्वत्र सर्वदा पातु योगाद्या प्रेमकातरा ।
पर्वते विपिने शून्ये रणे घोरतरे भवे ॥ ४२ ।
[2]श्मशानवासिनी पातु सर्ववाहनवाहना ।
सर्वास्त्रधारिणी पातु पञ्चमी पञ्चमप्रिया ॥ ४३ ।

---

१. 'शैलनितम्बिनी' इत्येवं पदं युक्तम् ।

२. श्मशाने वसति तच्छीला । शवानां शयनमिति विग्रहे शवशब्दस्य श्म आदेशः, शयनस्य शानादेशः, पृषोदरादित्वात् ।

चतुर्भुजा सदा पातु हाकिनी देहदेवता ।
[1]सहस्रायुतकोटीन्दुवदना परमेश्वरी ॥ ४४ ।
योगिनीभिः सदा पातु सर्वदेशे तु सर्वदा ।
अनन्ता सर्वदा पातु महाविघ्नविनाशिनी ॥ ४५ ।
जले चानलगर्ते वा व्याधिभीतौ रिपोर्भये ।
व्याघ्रभीतौ चौरभीतौ महोन्मादभयादिषु ॥ ४६ ।
ग्रहभीतौ देवभीतौ दानवादिभयेषु च ।
अभया निर्भया भीतिहारिणी भयनाशिनी ॥ ४७ ।
महाभीमा भद्रकाली भैरवी मारकामला ।
महाभूतेश्वरी माता जगद्धात्री सदाऽवतु ॥ ४८ ।
सर्वदेशे सर्वपीठे मातृका पातु नित्यशः ।
इत्येतत् कवचं सर्वसिद्धिदं दुःखनाशनम् ॥ ४९ ।
कथितं तव यत्नेन महाकाल प्रभो ! हर ।
यः पठेत् प्रातरुत्थाय कवचं देवदुर्लभम् ॥ ५० ।
स भवेत् कालजेताऽपि स देवो न तु मानुषः ।
ध्यानात्मा साधकः श्रीमान् परमात्मा भवेत् स्वयम् ॥५१।
आज्ञापद्मे स्थिरो भूत्वा नित्यो भवति निश्चितम् ।
अकालमृत्युहरणं [2]संसारार्णवतारणम् ॥ ५२ ।
कवचं देवदेवेश चानन्दसारमङ्गलम् ।
यः पठेदतिभक्त्या च जीवन्मुक्तो भवेद् ध्रुवम् ॥ ५३ ।
चतुर्विधा मुक्तिमाला तद्गले संस्थिरा ध्रुवम् ।
भवन्ति योगमुख्यानां गुरुर्वेदान्तपारगः ॥ ५४ ।
[3]सर्वशास्त्रार्थवेत्ता स्याद् यामलार्थज्ञ ईश्वरः ।
शान्ति विद्यां प्रतिष्ठाञ्च निर्वृत्ति प्राप्य निर्मलः ॥ ५५ ।

---

१. सहस्रायुतकोटीन्दूनां वदनमिव वदनं यस्याः सा। उद्यते उच्यतेऽनेनेति वदनम्, वदेः करणे ल्युट्प्रत्ययः ।

२. आनन्दस्य सारः सारभूतं मङ्गलं मङ्गलस्वरूपम्, कवचमित्यस्य विशेषणमिदम् ।

३. सर्वाणि च तानि शास्त्राणि तेषामर्थस्य वेत्ता ज्ञाता, यामलस्यार्थं जानाति, तादृशः ।

योगात्मा चेश्वरत्वं हि प्राप्नोति नात्र संशयः ।
कुजे वा शनिवारे वा संक्रान्त्यां रविवासरे ।। ५६ ।
अमावास्यासु रिक्तायां धारयेत् कवचं शुभम् ।
पुरुषो दक्षिणे हस्ते वामा[1] वामभुजे तदा ।। ५७ ।
सर्वसिद्धिमवाप्नोति यद्यन्मनसि वर्तते ।
गोरोचनाकुङ्कुमेन चालक्तेन विलिख्य च ।। ५८ ।
अवश्यं सिद्धिमाप्नोति [2]हाकिनीयोगजापतः ।। ५९ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे भैरवीभैरवसंवादे हाकिनीकवचं नाम चतुरशीतितमः पटलः ।।

●

१. वामा वामाङ्गिनो स्त्री वामभुजे वामहस्ते कवचं धारयेत् । पुरुषस्तु दक्षिणे हस्ते धारयेत् ।

२. हाकिन्या योगस्य जापेनेति भावः । आद्यादिभ्यस्तसेरुपसंख्यानमिति वचनेन सार्वविभक्तिकस्तसिः प्रत्ययः ।

अथ पञ्चाशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

वरानने वरारोहे [1]सर्वज्ञाननिदानदे ।
आनन्दहृदयोल्लासे परमानन्दवर्धिनि ॥ १ ।
कथितं कवचं पुण्यं रहस्यं चातिदुर्लभम् ।
न चोक्तं ज्ञानगम्यं तु महाजालनिसेवितम् ॥ २ ।
परनाथस्य कवचं सार्वज्ञज्ञानसिद्धिदम् ।
इदानीं वद मे यत्नादानन्दकुलभैरवी ॥ ३ ।

श्रीआनन्दभैरवी उवाच—

श्रूयतां योगिनीनाथ योगविद्यापते प्रभो ।
परनाथस्य कवचं ज्ञानगम्यं पुरातनम् ॥ ४ ।
अतिगोप्यं योगसारं सर्वतन्त्रेषु दुर्लभम् ।
इदानीं नाथ यत्नेन कथयामि परं पदम् ॥ ५ ।

अस्य श्रीपरनाथमहाकवचस्य सदाशिव ऋषिः परमात्मा देवता ह्सौः बीजं ज्ञानशक्तिरानन्दं कीलकं सर्वाभीष्टसिद्धयर्थे विनियोगः ।

ॐकारं वेदबीजं मे सदा पातु शिरोधनम् ।
ह्सौः महाप्रेतराजः कपालं पातु सर्वदा ॥ ६ ।
हाकिनीशः सहायाख्यः कामकेशगुणानि[2] मे ।
वाराणसीपुरः पातु भ्रूमध्यपरदेवता ॥ ७ ।
षं रं शं वं सदा पातु हं क्षं पातु भ्रुवोर्दलम् ।
बाणलिङ्गं सदा पातु भ्रूपद्मयुवती मम ॥ ८ ।

---

१. सर्वेषां ज्ञानानां निदानं ददाति या सा, तत्सम्बोधने सर्वज्ञाननिदानदे इति रूपम् । निदानमादिकारणम् ।

२. काम्यन्ते ये ते कामाः, कर्मणि घञ्प्रत्ययः, ते च ते केशाश्च कामकेशाः, तेषां गुणानि, ग्रथनानि ।

कालानलः सदा पातु द्विदलस्थं परात्परम् ।
भ्रूगह्वरं सदानन्दं पातु त्रिपुरभैरवः ॥ ९ ।
अनाथलिङ्गः सर्वेशः पातु मे लोचनत्रयम् ।
अभयो मङ्गलः पातु ध्रुवाख्ये लोलजिह्विकाम् ॥ १० ।
[1]पञ्चाननः सदा पातु वदनं कामसुन्दरः ।
उन्मत्तभैरवेन्द्रोऽथ [2]गण्डयुग्मं सदावतु ॥ ११ ।
हिरण्याख्यः सदा पातु दन्ताग्रालिं श्मशानगः ।
महादेवः सदा पातु महाकाशः श्रुती मम ॥ १२ ।
विकटाख्यो मञ्जुघोषः सदा पातु हनुस्थलम् ।
प्रणवात्मा सदा पातु कण्ठं मे नीलकण्ठभृत् ॥ १३ ।
अपराजितः शुक्लवर्णः सदा पातु महामला ।
गलदेशं महाकाशं त्रिपुरा परमेश्वरी ॥ १४ ।
मृत्युञ्जयश्च घोराख्यो विशुद्धं सर्वदाऽवतु ।
[3]स्वरानीश्वरसंयुक्तान् योगीशः सर्वदाऽवतु ॥ १५ ।
वामदेवः सदा पातु हृदयं परमेश्वरः ।
ईश्वरः सर्वदा पातु परदेवः सदाशिवः ॥ १६ ।
अट्टहासः सदा पातु योगिनीकोटिभिः सह ।
अकालचक्रः सर्वज्ञश्चावधूतेश्वरो भुजौ ॥ १७ ।
महाकालः सदा पातु भेरुण्डापतिरीश्वरः ।
पार्श्वदेशं सदा पातु काकिनीपरवल्लभः ॥ १८ ।
अच्युतेशः सदा पातु कुक्षियुग्मं सदा मम ।
अथर्वेशः सदानन्दः पातु पृष्ठं सुरेश्वरः ॥ १९ ।
तपिनीपतिरीशानो वीरभद्रो यतीश्वरः ।
नाभिमण्डलमापातु ममोदरमुमापतिः[4] ॥ २० ।

---

१. पञ्चसंख्याकानि आननानि यस्य सः । आ समन्ताद् अनिति प्राणिति येन तत् ।
२. गण्डयोः कपोलयोर्युग्मम् । गडि वदनैकदेशे इति धातुर्घञन्तः ।
३. ईश्वरसंयुक्तान् स्वरान् योगीशः सर्वदाऽवतु रक्षतु—इत्यर्थः ।
४. उमाया भगवत्याः पार्वत्याः पतिः शिवः ।

घर्घरः पातु सततं रुद्रं [1]राकिणिवल्लभम् ।
जटाजूटधरः पातु रुद्राणीं रौद्रदेवताम् ॥ २१ ।
नितम्बं पातु योगेन्द्रः प्रभाद्यो मे कटिस्थलम् ।
स्वाधिष्ठानं सदा पातु षड्दलान्तः प्रकाशकः ॥ २२ ।
अभयः सर्वदा पातु भर्गः पातु चतुर्दलम् ।
तरुणीशः सदा पातु कुण्डलीं डाकिनीपदम् ॥ २३ ।
गुदरन्ध्रं सदा पातु पार्वतीप्रियवल्लभः[2] ।
यज्ञनाथः सदा पातु ऊरुयुग्मं स्वमन्त्रवित् ॥ २४ ।
जङ्घायुगं सदा पातु धर्मलक्ष्मीश्वरः प्रभुः ।
महाकालः पातु पादतलयुग्मं महीश्वरः ॥ २५ ।
सर्वाङ्गं वरदः पातु वटुकः श्रीसदाशिवः ।
महारुद्रः श्रीपतीशः सदा उग्रः प्रपातु माम् ॥ २६ ।
रणे द्यूते विवादे च शून्यागारे महाभये ।
पाताले पर्वतेऽरण्ये पातु वाग्वादिनीश्वरः ॥ २७ ।
घण्टेश्वरः शङ्खनादो मुरारीशः प्रपातु माम् ।
परमानन्ददः पातु हितार्थी पथि पातु माम् ॥ २८ ।
महाविद्यापतिः पातु प्रेतराजः प्रपातु माम् ।
पुत्रं मित्रं कलत्रं मे बन्धुं स्वजनमेव च ॥ २९ ।
सर्वाधारः सदा पातु लिङ्गरूपी महेश्वरः ।
परमात्मा सदा पातु गुह्यदेशस्थदेवताम् ॥ ३० ।
परिवारान्वितः पातु महाचन्द्रः सदाऽवतु ।
मारणोच्चाटने स्तम्भे विद्वेषे पातु मोहनः ॥ ३१ ।
मोहने द्रावणे स्थैर्ये वश्ये शान्तौ सदाशिवः ।
परनाथो गुरुः पातु [3]पारिजातवनाश्रयः ॥ ३२ ।

---

१. राकिण्या वल्लभः, छान्दसत्वाद् बाहुलकाद् वा ह्रस्वः ।

२. पार्वतीप्रियो वल्लभः सदाशिवः । पार्वतीवल्लभ इति कथने तु वल्लभे भगवत्याः प्रियत्वं सातिशयं न भासेत ।

३. पारिजातस्य वनमाश्रयो यस्य सः ।

सर्वभुक् कालरुद्रो मे सर्वत्र परिपातु माम् ।
इत्येतत् कथितं सर्वसिद्धिदं कवचं शुभम् ।। ३३ ।
परनाथस्य देवस्य [1]सार्वज्ञज्ञानसिद्धिदम् ।
कवचं दुर्लभं लोके सर्वतन्त्रेषु गोपितम् ।। ३४ ।
यामले देवदेवेश प्रकाशितमहर्निशम् ।
यः पठेदेकवारं तु स रुद्रो नात्र संशयः ।। ३५ ।
कीर्तिश्रीकान्तिमेधायुर्बृंहितो भवति ध्रुवम् ।
अस्य स्मरणमात्रेण राजत्वं योगिनां पतिः ।। ३६ ।
भवेत् कामक्रोधजेता मृत्युजेता महाकविः ।
तस्यासाध्यं त्रिभुवने न किञ्चिदपि वर्तते ।। ३७ ।
यः कण्ठे मस्तके वापि धारयेत् कवचं शुभम् ।
रक्तेन चन्दनेनापि कुङ्कुमेनापि वा लिखेत् ।। ३८ ।
स भवेद् वीरपुत्रश्च महापातककोटिहा[2] ।
अनायासेन देवेश योगसिद्धिमवाप्नुयात् ।। ३९ ।
शतमष्टोत्तरं जप्त्वा पुरश्चर्याफलं लभेत् ।। ४० ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे परशिवकवचपाठो नाम पञ्चाशीतितमः पटलः ।।

●

---

१. सर्वं जानाति इति सर्वज्ञः, तस्य भावः सार्वज्ञ्यम्, तस्य ज्ञानं तस्य सिद्धिं ददाति इति ।
२. महान्ति च तानि पातकानि चेति महापातकानि तेषां कोटिं हतवानिति महापातककोटिहा, भूते क्विप् । प्रथमैकवचने रूपम् ।

अथ षडशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

[1]आनन्दार्णवमध्यभावघटितश्रौतप्रवाहोज्ज्वले
कान्ते दत्तसुशान्तिदे यमदमाह्लादैकशक्तिप्रभे[2] ।
स्नेहानन्दकटाख्यदिव्यकृपया शीघ्रं वदस्वाद्‌भुतं
हाकिन्याः शुभनाम सुन्दरसहस्राष्टोत्तरं श्रीगुरोः ।। १ ।

श्रीआनन्दभैरवी उवाच—

साक्षात्ते कथयामि नाथ सकलं पुण्यं पवित्रं गुरो
नाम्नां शक्तिसहस्रनाम भविकं ज्ञानादि चाष्टोत्तरम् ।
योगीन्द्रैर्जयकाङ्‌क्षिभिः प्रियकलाप्रेमाभिलाषार्चितैः
सेव्यं पाठ्यमतीव गोप्यमखिलं शीघ्रं पठस्व प्रभो ।। २ ।

अस्य श्रीपरनाथमहाशक्तिहाकिनीपरमेश्वरीदेव्यष्टोत्तरसहस्रनाम्नः स्तोत्रस्य सदाशिव ऋषिः गायत्रीच्छन्दः श्रीपरमेश्वरीहाकिनीमहाशक्तिर्देवता क्लीं बीजं स्वाहा शक्तिः सिद्धलक्ष्मीमूलकीलकं देहान्तर्गतमहाकायज्ञानसिद्ध्यर्थे जपे विनियोगः ।

ॐ हाकिनी वसुधा लक्ष्मी परमात्मकला परा ।
परप्रिया परातीता परमा परमप्रिया ।। ३ ।
परेश्वरी परप्रेमा परब्रह्मस्वरूपिणी ।
परन्तपा परानन्दा परनाथनिसेविनी ।। ४ ।
[3]पराकाशस्थिता पारा पारापारनिरूपिणी ।
पराकाङ्‌क्ष्या पराशक्तिः पुरातनतनुः प्रभा ।। ५ ।

---

१. आनन्दार्णवमध्यभावघटितेन श्रौतप्रवाहेणोज्ज्वला इति भावः ।
२. यमदमजनिताह्लादेन जनिता या एका अद्वितीया शक्तिस्तस्याः प्रभास्वरूपा ।
३. पराकाशे परमाकाशे स्थिता, न तु अपराकाशे इति भावः ।

पञ्चाननप्रिया पूर्वा परदारा परादरा ।
परदेशगता नाथा [1]परमाह्लादवर्धिनी ॥ ६ ॥

पार्वती परकुलाख्या पराञ्जनसुलोचना ।
परंब्रह्मप्रिया माया परंब्रह्मप्रकाशिनी ॥ ७ ॥

परंब्रह्मज्ञानगम्या परंब्रह्मेश्वरप्रिया ।
पूर्वातीता परातीता अपारमहिमस्थिता ॥ ८ ॥

अपारसागरोद्धारा अपारदुस्तरोद्धरा ।
परानलशिखाकारा परभ्रूमध्यवासिनी ॥ ९ ॥

परश्रेष्ठा परक्षेत्रवासिनी परमालिनी ।
पर्वतेश्वरकन्या च पराग्निकोटिसम्भवा ॥ १० ॥

परच्छाया परच्छत्रा परच्छिद्रविनिर्गता ।
परदेवगतिः प्रेमा [2]पञ्चचूडामणिप्रभा ॥ ११ ॥

पञ्चमी पशुनाथेशी त्रिपञ्चा पञ्चसुन्दरी ।
पारिजातवनस्था च पारिजातस्रजप्रिया ॥ १२ ॥

परापरविभेदा च परलोकविमुक्तिदा ।
परतापानलाकारा परस्त्री परजापिनी ॥ १३ ॥

परास्त्रधारिणी पूरवासिनी परमेश्वरी ।
प्रेमोल्लासकरी प्रेमसन्तानभक्तिदायिनी ॥ १४ ॥

परशब्दप्रिया पौरा परामर्षणकारिणी ।
प्रसन्ना परयन्त्रस्था प्रसन्ना पद्ममालिनी ॥ १५ ॥

प्रियंवदा परत्राता परधान्यार्थवर्धिनी ।
परभूमिरता पीता परकातरपूजिता ॥ १६ ॥

[3]परास्यवाक्यविनता पुरुषस्था पुरञ्जना ।
प्रौढा मेयहरा प्रीतिवर्धनी प्रियवर्धिनी ॥ १७ ॥

---

१. परममाह्लादं वर्धयति तच्छीला इति विग्रहे णिनिः कर्तरि ।
२. पञ्चानां चूडामणीनां प्रभा इव प्रभा यस्याः सा ।
३. परस्यास्यं मुखम्, तस्य यद् वाक्यम्, तेन विनता, विशेषेण नता ।

[1]प्रपञ्चदुःखहन्त्री च [2]प्रपञ्चसारनिर्गता ।
पुराणनिर्गता पीना पीनस्तनभवोज्ज्वला[3] ॥ १८ ।
पट्टवस्त्रपरीधाना पट्टसूत्रप्रचालिनी ।
परद्रव्यप्रदा प्रीता परश्रद्धा परान्तरा ॥ १९ ।
पावनीया परक्षुब्धा परसारविनाशिनी ।
परमेव [4]निगूढार्थतत्त्वचिन्ताप्रकाशिनी ॥ २० ।
प्रचुरार्थप्रदा पृथ्वी पद्मपत्रद्वयस्थिता ।
प्रसन्नहृदयानन्दा प्रसन्नासनसंस्थिता ॥ २१ ।
प्रसन्नरत्नमालाढ्या प्रसन्नवनमालिनी ।
प्रसन्नकरुणानन्दा प्रसन्नहृदयस्थिता ॥ २२ ।
पराभासरता पूर्वपश्चिमोत्तरदक्षिणा ।
पवनस्था पानरता पवनाधारविग्रहा ॥ २३ ।
प्रभुप्रिया प्रभुरता प्रभुभक्तिप्रदायिनी ।
परतृष्णावर्धिनी च प्रचया परजन्मदा ॥ २४ ।
परजन्मनिरस्ता च परसञ्चारकारिणी ।
परजाता पारिजाता पवित्रा पुण्यवर्धिनी ॥ २५ ।
पापहर्त्री पापकोटिनाशिनी परमोक्षदा ।
परमाणुरता सूक्ष्मा परमाणुविभञ्जिनी ॥ २६ ।
परमाणुस्थूलकरी परात्परतरा पथा ।
पूषणः प्रियकर्त्री च पूषणा पोषणत्रपा ॥ २७ ।
भूपपाला पाशहस्ता प्रचण्डा प्राणरक्षिणी ।
पयःशिलाऽपूपभक्षा पीयूषपानतत्परा ॥ २८ ।
पीयूषतृप्तदेहा च पीयूषमथनक्रिया ।
पीयूषसागरोद्भूता पीयूषस्निग्धदोहिनी ॥ २९ ।

---

१. प्रपञ्चस्य दुःखं तस्य हर्त्री विनाशिका ।

२. प्रपञ्चसाराद् निर्गता ।

३. पीनौ यौ स्तनौ, तयोर्भवेन सत्तया उज्ज्वलः ।

४. निगूढार्थतत्त्वस्य चिन्तां प्रकाशयति तच्छीला । कर्तरि णिनिः ।

पीयूषनिर्मलाकारा [1]पीयूषघनविग्रहा ।
प्राणापानसमानादिपवनस्तम्भनप्रिया ॥ ३० ।
पवनांशप्रभाकारा प्रेमोद्गतस्वभक्तिदा ।
पाषाणतनुसंस्था च पाषाणचित्तविग्रहा ॥ ३१ ।
पश्चिमानन्दनिरता पश्चिमा पश्चिमप्रिया ।
प्रभाकारतनूग्रा च प्रभाकरमुखी प्रभा ॥ ३२ ।
सुप्रभा प्रान्तरस्था च प्रेयत्वसाधनप्रिया ।
अस्थिता पामसी पूर्वनाथपूजितपादुका ॥ ३३ ।
पादुकामन्त्रसिद्धा च पादुकामन्त्रजापिनी ।
पादुकामङ्गलस्था च पादुकाम्भोजराजिनी ॥ ३४ ।
प्रभाभारुणकोटिस्था प्रचण्डसूर्यकोटिगा[2] ।
पालयन्ती त्रिलोकानां परमा परहाकिनी ॥ ३५ ।
परावरानना प्रज्ञा प्रान्तरान्तःप्रसिद्धिदा ।
पारिजातवनोन्मादा परमोन्मादरागिणी ॥ ३६ ।
परमाह्लादमोदा च परमाकाशवाहिनी ।
परमाकाशदेवी च प्रथाद्रिपुरसुन्दरी ॥ ३७ ।
प्रतिकूलकरी प्राणानुकूलपरिकारिणी ।
प्राणरुद्रेश्वरप्रीता प्रचण्डगणनायिका ॥ ३८ ।
पोष्ट्री पौत्रादिरक्षत्री पुण्ड्रका पञ्चचामरा ।
परयोषा परप्राया परसन्तानरक्षका ॥ ३९ ।
परयोगिरता पाशपशुपाशविमोहिनी ।
पशुपाशप्रदा पूज्या प्रसादगुणदायिनी ॥ ४० ।
प्रह्लादस्था [3]प्रफुल्लाब्जमुखी परमसुन्दरी ।
परामा परारामा पार्वणी पार्वणप्रिया ॥ ४१ ।

---

१. पीयूषघनो विग्रहो यस्याः सा, अमृतमयशरीरा इति भावः ।
२. प्रचण्डानां सूर्याणां कोटिं गच्छति या सा ।
३. प्रफुल्लमब्जं कमलं तदिव मुखं यस्याः सा ।

प्रियङ्करी पूर्वमाता पालनाख्या [1]परासरा ।
[2]पराशरसुभाग्यस्था परकान्तिनितम्बिनी ॥ ४२ ।
परश्मशानगम्या च प्रियचन्द्रमुखीपला ।
पलसानकरी प्लक्षा प्लवङ्गगणपूजिता ॥ ४३ ।
प्लक्षस्था पल्लवस्था च पङ्केरुहमुखी पटा ।
पटाकारस्थिता पाठ्या पवित्रलोकदायिनी ॥ ४४ ।
पवित्रमन्त्रजाप्यस्था पवित्रस्थानवासिनी[3] ।
पवित्रालङ्कृताङ्गी च पवित्रदेहधारिणी ॥ ४५ ।
त्रिपुरा परमैश्वर्यपूजिता सर्वपूजिता ।
पललप्रियहृद्या च पलालचर्वणप्रिया ॥ ४६ ।
परगोगणगोप्या च प्रभुस्त्रीरौद्रतैजसी ।
प्रफुल्लाम्भोजवदना प्रफुल्लपद्ममालिनी ॥ ४७ ।
पुष्पप्रिया पुष्पकुला कुलपुष्पप्रियाकुला ।
पुष्पस्था पुष्पसङ्काशा पुष्पकोमलविग्रहा ॥ ४८ ।
पौष्पी पानरता पुष्पमधुपानरता प्रचा ।
प्रतीची प्रचयाह्लादो प्राचनाख्या च प्राञ्चिका ॥ ४९ ।
परोदरे गुणानन्दा परौदार्यगुणप्रिया ।
पारा कोटिध्वनिरता पद्मसूत्रप्रबोधिनी ॥ ५० ।
प्रियप्रबोधनिरता प्रचण्डनादमोहिनी ।
पीवरा पीवरग्रन्थिप्रभेदा प्रलयापहा ॥ ५१ ।
प्रलया प्रलयानन्दा प्रलयस्था प्रयोगिनी ।
प्रयोगकुशला पक्षा पक्षभेदप्रकाशिनी ॥ ५२ ।
एकपक्षा द्विपक्षा च पञ्चपक्षप्रसिद्धिदा ।
पलाशकुसुमानन्दा [4]पलाशपुष्पमालिनी ॥ ५३ ।

---

१. परान् शत्रून् आ समन्तात् सरति (सारयति) या सा पचाद्यजन्तेन प्रासराशब्देन सह षष्ठीसमासः ।

२. पराशरस्य सुभाग्ये तिष्ठति या सा । 'सुपि स्थः' इति कप्रत्ययेन सता समासः ।

३. पवित्रस्थाने वसति तच्छोला । कर्तरि णिनिः, उपपदसमासः । पवित्रस्थाने वसितव्यं भक्तजनैरित्यनेन सूचितम् ।

४. पलाशपुष्पैर्मालिते शोभते या सा । अथवा पलाशपुष्पमाला अस्ति यस्याः सा । शिखादित्वादिनिः ।

[1]पलाशपुष्पहोमस्था पलाशच्छदसंस्थिता ।
पात्रपक्षा पीतवस्त्रा पीतवर्णप्रकाशिनी ।। ५४ ।
निपीतकालकूटी च पीतसंसारसागरा ।
पद्मपत्रजलस्था च पद्मपत्रनिवासिनी ।। ५५ ।
पद्ममाला पापहरा पट्टाम्बरधरा परा ।
परनिर्वाणदात्री च पराशा [2]परशासना ।। ५६ ।
अप्रियविनिहन्त्री च परसंस्कारपालिनी ।
प्रतिष्ठा पूजिता सिद्धा प्रसिद्धप्रभुवादिनी ।। ५७ ।
प्रयाससिद्धिदा क्षुब्धा प्रपञ्चगुणनाशिनी ।
प्रणिपत्या प्राणिशिष्या प्रतिष्ठिततनूप्रिया ।। ५८ ।
अप्रतिष्ठा निहन्त्री च पादपद्मद्वयान्विता ।
पादाम्बुजप्रेमभक्तिपूज्यप्राणप्रदायिनी ।। ५९ ।
पैशाची च प्रक्षपिता पितृश्रद्धा पितामही ।
प्रपितामहपूज्या च पितृलोकस्वधापरा ।। ६० ।
पुनर्भवा पुनर्जीवा पौनःपुन्यगतिस्थिता ।
प्रधानबलिभक्षादिसुप्रिया प्रियसाक्षिणी ।। ६१ ।
पतङ्गकोटिजीवाख्या पावकस्था च पावनी ।
परज्ञानार्थदात्री च परतन्त्रार्थसाधिनी ।। ६२ ।
प्रत्यग्ज्योतिःस्वरूपा च प्रथमा प्रथमारुणा ।
प्रातःसन्ध्या पार्थसन्ध्या परसन्ध्यास्वरूपिणी ।। ६३ ।
प्रधानवरदा प्राणज्ञाननिर्णयकारिणी ।
प्रभञ्जना प्राञ्जनेशी प्रयोगोद्रेककारिणी ।। ६४ ।
प्रफुल्लपददात्री च प्रसमाया पुरोदया ।
पर्वतप्राणरक्षत्री [3]पर्वताधारसाक्षिणी ।। ६५ ।

---

१. पलाशपुष्पाणां होमे तिष्ठति या सा । 'सुपि स्थः' इति कर्तरि कप्रत्ययः । उपपदमतिङिति समासः ।

२. परान् शास्तीति, बाहुलकात् कर्तरि ल्युट्प्रत्ययः । षष्ठीसमासः । अजादित्वाट्टाप् । अथवा नन्द्यादित्वात् ल्युः ।

३. पर्वतानामाधारस्य साक्षिणी । एतावता गभीरसाक्षित्वं भगवत्या व्यज्यते ।

पर्वतप्राणशोभा च [1]पर्वतच्छत्रकारिणी ।
पर्वता ज्ञानहर्त्री च प्रलयोदयसाक्षिणी ॥ ६६ ।
प्रारब्धजननी काली प्रद्युम्नजननी सुरा ।
प्राक्सुरेश्वरपत्नी च परवीरकुलापहा ॥ ६७ ।
परवीरनियन्त्री च परप्रणवमालिनी ।
प्रणवेशी प्रणवगा प्रणवाद्याक्षरप्रिया ॥ ६८ ।
प्रणवार्णजपप्रीता प्राणमृत्युञ्जयप्रदा ।
प्रणवालङ्कृता व्यूढा पशुभक्षणतर्पणा ॥ ६९ ।
पशुदोषहरा पाशुपतास्त्रकोटिधारिणी ।
प्रवेशिनी प्रवेशाख्या पद्मपत्रत्रिलोचना ॥ ७० ।
पशुमांसासवानन्दा पशुकोटिबलिप्रिया ।
पशुधर्मक्षया प्रार्या पशुतर्पणकारिणी[2] ॥ ७१ ।
पशुश्रद्धाकरी पूज्या पशुमुण्डसुमालिनी ।
परवीरयोगशिक्षा परसिद्धान्तयोगिनी ॥ ७२ ।
परशुक्रोधमुख्यास्त्रा परशुप्रलयप्रदा ।
पद्मरागमालधरा पद्मरागासनस्थिता ॥ ७३ ।
पद्मरागमणिश्रेणीहारालङ्कारशोभिता ।
परमधूलिसौन्दर्यमञ्जीरपादुकाम्बुजा ॥ ७४ ।
हर्त्री समस्तदुःखानां हिरण्यहारशोभिता ।
हरिणाक्षी हरिस्था च हरा हारावती हिरा ॥ ७५ ।
हारकुण्डलशोभाढ्या हारकेयूरमण्डिता ।
हरणस्था हाकिनी च [3]होमकर्मप्रकाशिनी ॥ ७६ ।
हरिद्रा हरिपूज्या च हरमाला हरेश्वरी ।
हरातीता हरसिद्धा ह्लींकारी हंसमालिनी ॥ ७७ ।

---

१. पर्वतानां छत्रं करोति तच्छीला । णिनिप्रत्ययान्तेन सहोपपदसमासः । अनेन विशिष्टभक्तानां कृते आच्छादनदानकर्त्री भगवती, इति व्यज्यते ।

२. पशूनां तर्पणं करोति तच्छीला उपपदसमासेन साधुत्वप्राप्तिः । एतावता भक्तजन-तर्पयित्री भगवती इति व्यज्यते ।

३. होमकर्माणि प्रकाशयति तच्छीला । उपपदसमासः ।

हंसमन्त्रस्वरूपा च [1]हंसमण्डलभेदिनी ।
हंसः सोऽहं मणिकरा हंसराजोपरिस्थिता ॥ ७८ ।
हीरकाभा हीरकसूकधारिणी हरमेखला ।
हरकुण्डमेखला च होमदण्डसुमेखला ॥ ७९ ।
हरधरप्रियानन्दा हलीशानी हरोदया ।
हरपत्नी हररता संहारविग्रहोज्ज्वला ॥ ८० ।
संहारनिलया हाला ह्लौंबीजप्रणवप्रिया ।
हलक्षा हक्षवर्णस्था हाकिनो हरमोहिनी ॥ ८१ ।
हाहा - हूहू - प्रियानन्दगायनप्रेमसुप्रिया ।
हरभूतिप्रदा हारप्रिया हीरकमालिनी ॥ ८२ ।
हीरकाभा हीरकस्था हराधारा हरस्थिता ।
हालानिषेविता हिन्ता हिन्तालवनसिद्धिदा ॥ ८३ ।
महामाया महारौद्री महादेवनिषेविता ।
महानया महादेवी महासिद्धा महोदया ॥ ८४ ।
महायोगा महाभद्रा महायोगेन्द्रतारिणी[2] ।
महादीपशिखाकारा महादीपप्रकाशिनी ॥ ८५ ।
महादीपप्रकाशाख्या महाश्रद्धा महामतिः ।
महामहीयसी मोहनाशिनी महती महा ॥ ८६ ।
महाकालपूजिता च महाकालकुलेश्वरी ।
महायोगीन्द्रजननी मोहसिद्धिप्रदायिनी ॥ ८७ ।
आहुतिस्थाहुतिरता होतृवेदमनुप्रिया ।
हैयङ्गबीजभोक्त्री च हैयङ्गबीजसुप्रिया ॥ ८८ ।
हे सम्बोधनरूपा च हे हेतोः परमात्मजा ।
हलनाथप्रिया देवी [3]हिताहितविनाशिनी ॥ ८९ ।

---

१. हंसानां मण्डलं भेद्यति भेदयति स्नेहयति या तच्छीला सा हंससमुदाये स्नेहं सम्पादयति ।

२. महान्तो योगेन्द्रास्तान् तारयति तच्छीला भगवती इति भावः ।

३. हितेषु येऽहितांशाः, तान् विनाशयति तच्छीला ।

हन्त्री समस्तपापानां [1]हलहेतुप्रदाप्रदा ।
हलहेतुच्छलस्था च हिलिहिलिप्रयागिनी ॥ ९० ।
हुतासनमुखी शून्या हरिणी हरतन्त्रदा ।
हठात्कारगतिप्रीता सुण्टकालङ्कृता इला ॥ ९१ ।
हलायुधाद्यजननी हिल्लोला हेमबर्हिणी ।
हैमी हिमसुता हेमपर्वतश्शृङ्गसंस्थिरा ॥ ९२ ।
हरणाख्या हरिप्रेमवर्धिनी हरमोहिनी ।
हरमाता हरप्रज्ञा हुङ्कारी हरपावनी ॥ ९३ ।
हेरम्बजननी हट्टमध्यस्थलनिवासिनी ।
हिमकुन्देन्दुधवला हिमपर्वतवासिनी ॥ ९४ ।
होतृस्था हरहाला च हेलातीता अहर्गणा ।
अहङ्कारा हेतुगर्ता हेतुस्था हितकारिणी ॥ ९५ ।
हतभाग्यनिहन्त्री च हतासद्‌बुद्धिजीविका ।
हेतुप्रिया महारात्री अहोराख्या हरोद्‌गमा ॥ ९६ ।
अर्हणादिप्रिया चार्हा [2]हाहाकारनिनादिनी ।
हनुमत्कल्पसंस्थाना हनुमत्सिद्धिदायिनी ॥ ९७ ।
हलाहलप्रियाघोरा महाभीमा हलायुधा ।
हसौः बीजस्वरूपा च हसौं प्रेताख्यजापिनी ॥ ९८ ।
आह्लादिनी इहानन्दा अर्घ्यक्रान्ता हरार्चना ।
हरभीतिहराहःका बीजहःकामहक्षरा ॥ ९९ ।
हेरम्बयोगसिद्धिस्था हेरम्बादिसुतप्रिया ।
हननाख्या हेतुनाम्नी हठात् सिद्धिप्रयोगदा ॥ १०० ।
उमा महेश्वरी आद्या अनन्तानन्तशक्तिदा ।
[3]आधारार्हंसुरक्षा च ईश्वरी उग्रतारिणी ॥ १०१ ।

---

१. हलस्य विलेखनस्य ये हेतवः, तान् प्रदापयन्ति ये ते हलहेतुप्रदापाः, कर्मण्यण्प्रत्ययः । तान् ददाति या सा, 'आतोऽनुपसर्गे कः' इति कर्तरि कप्रत्ययः, स्त्रीत्वविवक्षायां टाप् ।

२. हाहाकारं निनादयति तच्छीला, णिनिप्रत्ययान्तेन सहोपपदसमासः, ङीप्प्रत्ययः स्त्रीत्वद्योतकः ।

३. आधारार्हाणां सुरक्षा । षष्ठीसमासे साधुता ।

उषेश्वरी उत्तमा च [1]ऊर्ध्वपद्मविभेदिनी ।
ऋद्धिसिद्धिप्रदा क्षुल्लाकाशबीजसुसिद्धिदा ॥ १०२ ।
तृतकस्थातृतकस्था तृस्वराखर्वबीजगा ।
एरण्डपुष्पहोमाढ्या ऐश्वर्यदानतत्परा[2] ॥ १०३ ।
ओड्रपुष्पप्रिया ॐकाराक्षरा औषधप्रिया ।
अर्वणासारःअंशाख्या अःस्था च कपिला कला ॥ १०४ ।
कैलासस्था कामधेनुः खर्वा खेटकधारिणी ।
खरपुष्पप्रिया खड्गधारिणी खरगामिनी ॥ १०५ ।
गभीरा गीतगायत्री गुर्वा गुरुतरा गया ।
घनकोटिनादकरी घर्घरा घोरनादिनी ॥ १०६ ।
घनच्छाया चारुवर्णा चण्डिका चारुहासिनी ।
चारुचन्द्रमुखी चारुचित्तभावार्थगामिनी ॥ १०७ ।
छत्राकिनी छलच्छिन्ना छागमांसविनोदिनी ।
जयदा जीवी जन्या च जीमूतैरुपशोभिता ॥ १०८ ।
जयिश्री जयमुण्डाली झङ्कारी झञ्जनादिका ।
टङ्कारधारिणी टङ्कबाणकार्मुकधारिणी ॥ १०९ ।
ठकुराणी ठठङ्कारी डामरेशी च डिण्डिमा ।
ढक्कानादप्रिया ढक्का तवमाला तलातला ॥ ११० ।
तिमिरा तारिणी तारा तरुणा तालसिद्धिदा ।
तृप्ता च तैजसी चैव तुलनातलवासिनी ॥ १११ ।
तोषणा तौलिनी तैलगन्धामोदितदिङ्मुखी ।
स्थूलप्रिया थकाराद्या स्थितिरूपा च संस्थिरा ॥ ११२ ।
दक्षिणदेहनादाक्षा दक्षपत्नी च दक्षजा ।
दारिद्र्यदोषहन्त्री च [3]दारुणास्त्रविभञ्जिनी ॥ ११३ ।

---

१. ऊर्ध्वपद्मानि विभेदयति तच्छीला । उपपदसमासेन साधुता ।

२. ऐश्वर्यदाने तत्परा, तादृशी भगवती जगदम्बिका ।

३. दारुणानि यानि अस्त्राणि, तानि विभनक्ति तच्छीला । एतावता आधुनिकानां परमाणुबमाख्यानामस्त्राणां बिनाशेऽपि दक्षा ।

[1]दंष्ट्राकरालवदनी दीर्घमात्रादलान्विता ।
देवमाता देवसेना देवपूज्या दयादशा ॥ ११४ ॥

दीक्षादानप्रदा दैन्यहन्त्री दीर्घसुकुन्तला ।
दनुजेन्द्रनिहन्त्री च दनुजारिविमर्दिनी ॥ ११५ ॥

देशपूज्या दायदात्री दशनास्त्रप्रधारिणी[2] ।
दासरक्षा देशरक्षा दिगम्बरदिगम्बरी ॥ ११६ ॥

दिक्प्रभापाटलव्याप्ता दरोगृहनिवासिनी ।
दर्शनस्था दार्शनिका दत्तभार्या च दुर्गहा ॥ ११७ ॥

दुर्गा दीर्घमुखी दुःखनाशिनी दिविसंस्थिता ।
धन्या धनप्रदा धारा धरणी धारिणी धरा ॥ ११८ ॥

धृतसौन्दर्यवदना धनदा धान्यवर्धिनी ।
ध्यानप्राप्ता ध्यानगम्या ध्यानज्ञानप्रकाशिनी ॥ ११९ ॥

ध्येया धीरपूजिता च धूमेशी च धुरन्धरा ।
धूमकेतुहरा धूमा ध्येया सर्वसुरेश्वरैः ॥ १२० ॥

धर्मार्थमोक्षदा धर्मचिन्ता धर्मप्रकाशिनी ।
धूलिरूपा च धवला धवलच्छत्रधारिणी ॥ १२१ ॥

धवलाम्बरधात्री च धवलासनसंस्थिता ।
धवला हिमालयधरा धरणी साधनक्रिया ॥ १२२ ॥

धवलेश्वरकन्या च धवलाध्वाधलामुखी ।
धोरकन्या धर्मकन्या ध्रुवसिद्धिप्रदायिनी ॥ १२३ ॥

ध्रुवानन्दा ध्रुवश्रद्धा ध्रुवसन्तोषवर्धिनी ।
नारिकेलजलस्नाता नारिकेलफलासना ॥ १२४ ॥

नारी नारायणीशाना नम्रपूजनसुप्रिया ।
नरदेवरता [3]नित्यगणगन्धर्वपूजिता ॥ १२५ ॥

---

१. दंष्ट्राभिः करालं भयङ्करं वदनं यस्याः सा । स्वाङ्गाच्चोपसर्जनादसंयोगोपधादिति ङीष् ।
२. दशनान्येव दन्ता एव अस्त्राणि, तानि प्रकर्षेण धरति, तच्छीला ।
३. नित्यं यथा स्यात्तथा गणेन गन्धर्वैश्च पूजिता, सम्मानिता ।

नरकविहारिणी चैव [1]नरकान्तककारिणी ।
नरक्षेत्रकलादेवी नवकोशनिवासिनी ॥ १२६ ।
नाक्षत्रविद्या नाक्षत्री नक्षत्रमण्डलस्थिता ।
नृपोन्नाशकरी नारायणी नूपुरधारिणी ॥ १२७ ।
नृत्यगीतप्रियानीता नवीना नामशायिनी ।
नौनूतनास्त्रधरा नित्या नवपुष्पवनस्थिता ॥ १२८ ।
नवपुष्पप्रेमरता नवचम्पकमालिनी ।
नवरत्नहारमाला नवजाम्बूनदप्रभा ॥ १२९ ।
नमस्कारप्रिया निन्दा वादनादप्रणाशिनी ।
पवनाक्षरमाला च पवनाक्षरमालिनी ॥ १३० ।
परदोषभयङ्कारा प्रचरद्रूपसंस्थिता ।
प्रस्फुटिताम्भोजमालाधारिणी प्रेमवासिनी ॥ १३१ ।
परमानन्दसप्तानहरी पृथुनितम्बिनी ।
प्रवालमाला लोभाङ्गी पयोदा शतविग्रहा ॥ १३२ ।
पयोदकरुणाकारा पारम्पर्याप्रसादिनी ।
प्रारम्भकर्मनिरता प्रारब्धभोगदायिनी[2] ॥ १३३ ।
प्रेमसिद्धिकरी प्रेमधारा गङ्गाम्बुशोभिनी ।
फेरुपुण्यवरानन्दा फेरुभोजनतोषणी ॥ १३४ ।
फलदा फलवर्धा च फलाह्लादविनोदिनी ।
फणिमालाधरा देवी फणिहारादिशोभिनी ॥ १३५ ।
फणा फणीकारमुखी फणस्था फणिमण्डला ।
सहस्रफणिसम्प्राप्ता फुल्लारविन्दमालिनी ॥ १३६ ।
वासुकी व्यासपूज्या च वासुदेवार्चनप्रिया ।
[3]वासुदेवकलावाच्या वाचकस्था वसुस्थिता ॥ १३७ ।

---

१. नरकस्य नरकासुरस्यान्तकं करोति तच्छीला, णिनिः कर्तरि, उपपदसमासः ।
२. प्रारब्धा ये भोगाः, तान् ददाति, तच्छीला ।
३. वासुदेवस्य भगवतः कलाः, ताभिर्वाच्या वाच्यमाना ।

वज्रदण्डधराधारा[1] विरदा वादसाधिनी ।
वसन्तकालनिलया वसोर्द्धारा वसुन्धरा ॥ १३८ ।

वेपमानरक्षका च वपूरक्षा वृषासना ।
विवस्वत्प्रेमकुशला विद्यावाद्यविनोदिनी ॥ १३९ ।

विधिविद्याप्रकाशा च विधिसिद्धान्तदायिनी ।
विधिज्ञा वेदकुशला वेदवाक्यविवासिनी ॥ १४० ।

बलदेवपूजिता च बालभावप्रपूजिता[2] ।
बाला वसुमती वेद्या वृद्धमाता बुधप्रिया ॥ १४१ ।

बृहस्पतिप्रिया वीरपूजिता बालचन्द्रिका ।
विग्रहज्ञानरक्षा च व्याघ्रचर्मधरावरा ॥ १४२ ।

व्यथाबोधापहन्त्री च विसर्गमण्डलस्थिता ।
बाणभूषापूजिता वनमाला विहायसी ॥ १४३ ।

वामदेवप्रिया वामपूजाजापपरायणा ।
भद्रा भ्रमरवर्णा च भ्रामरी भ्रमरप्रभा ॥ १४४ ।

भालचन्द्रधरा भीमा भीमनेत्राभवाभवा ।
भीममुखी भीमदेहा भीमविक्रमकारिणी ॥ १४५ ।

भीमश्रद्धा भीमपूज्या भीमाकारातिसुन्दरी ।
भीमसङ्ग्रामजयदा भीमाद्या [3]भीमभैरवी ॥ १४६ ।

भैरवेशी भैरवी च सदानन्दादिभैरवी ।
सदानन्दभैरवी च भैरवेन्द्रप्रियङ्करी ॥ १४७ ।

भल्लास्त्रधारिणी भैमी भृगुवंशप्रकाशिनी ।
भर्गपत्नी भर्गमाता भङ्गस्था [4]भङ्गभक्षिणी ॥ १४८ ।

---

१. वज्रदण्डं धरन्ति ये ते वज्रदण्डधराः। पचाद्यजन्तेन धराशब्देन समासः, तेषामाधारा आधारभूता ।

२. बालभावेन प्रपूजिता । एतेन भगवत्यां बालभावोऽपि महनीयोऽस्ति ।

३. भीमलोचनेति पाठान्तरमप्युल्लिखितमस्ति ।

४. भङ्गस्य भङ्गपत्रस्य भक्षिणी। एतेन विजयापानमपि भगवत्या इष्टमस्ति इति व्यज्यते ।

भक्षप्रिया भक्षरता भृकुण्डा भावभैरवी ।
भावदा भवदा भावप्रभावा [1]भावनाशिनी ॥ १४९ ।
भालसिन्दूरतिलका भाललोकसुकुण्डला ।
भालमालालकाशोभा भासयन्ती भवार्णवा ॥ १५० ।
भवभीतिहरा भालचन्द्रमण्डलवासिनी[2] ।
भ्रमद्भ्रमरनेत्राब्जसुन्दरी भीमसुन्दरी ॥ १५१ ।
भजनप्रियरूपा च भावभोजनसिद्धिदा ।
भ्रूचन्द्रनिरता बिन्दुचक्रभ्रूपद्मभेदिनी ॥ १५२ ।
भवपाशहरा भीमभावकन्दनिवासिनी ।
मनोयोगसिद्धिदात्री मानसी मनसो मही ॥ १५३ ।
महती मीनभक्षा च मीनचर्बणतत्परा ।
मीनावतारनिरता मांसचर्बणतत्परा ॥ १५४ ।
मांसप्रिया मांससिद्धा सिद्धमांसविनोदिनी ।
माया महावीरपूज्या मधुप्रेमदिगम्बरी ॥ १५५ ।
माधवी मदिरामध्या मधुमांसनिषेविता ।
मीनमुद्राभक्षिणी च मीनमुद्राप्रतर्पिणी ॥ १५६ ।
मुद्रामैथुनसंतृप्ता मैथुनानन्दवर्धिनी ।
मैथुनज्ञानमोक्षस्था महामहिषमर्दिनी ॥ १५७ ।
यज्ञश्रद्धा योगसिद्धा यत्नी यत्नप्रकाशिनी ।
यशोदा यशसि प्रीता यौवनस्था यमापहा ॥ १५८ ।
रासश्रद्धातुरारामरमणीरमणप्रिया ।
राज्यदा [3]रजनीराजवल्लभा रामसुन्दरी ॥ १५९ ।
रतिश्चारतिरूपा च रुद्रलोकसरस्वती ।
रुद्राणी रणचामुण्डा रघुवंशप्रकाशिनी ॥ १६० ।

---

१. भावं नाशयति या सा, अत्र भावपदं कुत्सितभावबोधकमिति ज्ञेयम् ।
२. भाले चन्द्रो यस्य स भालचन्द्रः शिवः, तस्य मण्डलं समाजस्तत्र वसति या सा ।
३. रजन्यां राजते योऽसौ रजनीराजश्चन्द्रः, स वल्लभो यस्या सा ।

लक्ष्मीर्लीलावती लोका [1]लावण्यकोटिसम्भवा ।
लोकातीता लक्षणाख्या लिङ्गधारा लवङ्गदा ॥ १६१ ।
लवङ्गपुष्पनिरता लवङ्गतरुसंस्थिता ।
लेलिहाना लयकरी लोलादेहप्रकाशिनी ॥ १६२ ।
लाक्षाशोभाधरा लङ्का रत्नमासवधारिणी ।
लक्षजापसिद्धिकरी लक्षमन्त्रप्रकाशिनी ॥ १६३ ।
वशिनी वशकर्त्री च वश्यकर्मनिवासिनी[2] ।
वेशावेश्या वेशवेश्या वंशिनी वंशवर्धिनी ॥ १६४ ।
वंशमाया वज्रशब्दमोहिनी शब्दरूपिणी ।
शिवा शिवमयी शिक्षा शशिचूडामणिप्रभा ॥ १६५ ।
शवयुग्मभीतिदा च शवयुग्मभयानका ।
शवस्था शववक्षस्था शाब्दबोधप्रकाशिनी ॥ १६६ ।
षट्पद्मभेदिनी षट्का षट्कोणयन्त्रमध्यगा ।
षट्चक्रसारदा सारा सारात्सारसरोरुहा ॥ १६७ ।
समनादिनिहन्त्री च सिद्धिदा संशयापहा ।
संसारपूजिता धन्या सप्तमण्डलसाक्षिणी ॥ १६८ ।
सुन्दरी सुन्दरप्रीता सुन्दरानन्दवर्धिनी ।
सुन्दरास्या सुनवस्त्री सौन्दर्यसिद्धिदायिनी ॥ १६९ ।
त्रिसुन्दरी[3] सर्वरी च सर्वा त्रिपुरसुन्दरी ।
श्यामला सर्वमाता च सख्यभावप्रिया स्वरा ॥ १७० ।
साक्षात्कारस्थिता साक्षात्साक्षिणी सर्वसाक्षिणी ।
हाकिनी शाकिनीमाता शाकिनी काकिनीप्रिया ॥ १७१ ।

---

१. लावण्यानि सौन्दर्याणि तेषां कोटौ सम्भवति या सा । परमातिशयलावण्यसम्पन्ना इति भावः ।

२. वशमर्हन्ति ये ते वश्याः, तेषां कर्मणि निवसति, तच्छीला । एतेन भक्तजनानां क्रियां सफलतया सम्पादयतीति ध्वनितम् ।

३. त्रिषु लोकेषु सुन्दरी, अथवा त्रिषु गुणेषु सुन्दरी इति भावः ।

हाकिनी लाकिनीमाता हाकिनी राकिणीप्रिया ।
हाकिनी डाकिनीमाता हरा कुण्डलिनी हया ।। १७२ ।

हयस्था हयतेजःस्था हसौंबीजप्रकाशिनी ।
लवणाम्बुस्थिता लक्षग्रन्थिभेदनकारिणी ।। १७२ ।

लक्षकोटिभास्कराभा [1]लक्षब्रह्माण्डकारिणी ।
क्षणदण्डपलाकारा क्षपाक्षोभविनाशिनी ।। १७४ ।

क्षेत्रपालादिवटुकगणेशयोगिनीप्रिया ।
क्षयरोगहरा क्षौणी क्षालनस्थाक्षरप्रिया ।। १७५ ।

क्षाद्यस्वरान्तसिद्धिस्था क्षादिकान्तप्रकाशिनी ।
क्षाराम्बुतिक्तनिकरा क्षितिदुःखविनाशिनी ।। १७६ ।

क्षुन्निवृत्तिः क्षणज्ञानी वल्लभा क्षणभङ्गुरा ।
इत्येतत् कथितं नाथ हाकिन्याः कुलशेखर ।। १७७ ।

सहस्रनामयोगाङ्गमष्टोत्तरशतान्वितम् ।
यः पठेन्नियतः श्रीमान् स योगी नात्र संशयः ।। १७८ ।

अस्य स्मरणमात्रेण वीरो योगेश्वरो भवेत् ।
अस्यापि च फलं वक्तुं कोटिवर्षशतैरपि ।। १७९ ।

शक्यते नापि सहसा संक्षेपात् शृणु सत्फलम् ।
आयुरारोग्यमाप्नोति विश्वासं श्रीगुरोः पदैः ।। १८० ।

सारसिद्धिकरं पुण्यं पवित्रं पापनाशनम् ।
[2]अत्यन्तदुःखदहनं सर्वसौभाग्यदायकम् ।। १८१ ।

पठनात् सर्वदा योगसिद्धिमाप्नोति योगिराट् ।
देहसिद्धिः काव्यसिद्धिर्ज्ञानसिद्धिर्भवेद् ध्रुवम् ।। १८२ ।

वाचां सिद्धिः खड्गसिद्धिः खेचरत्वमवाप्नुयात् ।
त्रैलोक्यवल्लभो योगी सर्वकामार्थसिद्धिभाक् ।। १८३ ।

---

१. लक्षाणि लक्षसंख्याकानि अनेकानि इति यावत्, इयन्ति यानि ब्रह्माण्डानि, तानि करोति तच्छीला लक्षब्रह्माण्डकारिणी इति भावः ।

२. अत्यन्तं यद् दुःखम्, तस्य दहनं दाहकम् । बाहुलकात् कर्तरि ल्युट्प्रत्ययः ।

अप्रकाश्यं महारत्नं पठित्वा सिद्धिमाप्नुयात् ।
अस्य प्रपठनेनापि भ्रूपद्मे चित्तमर्पयन् ॥ १८४ ।

[1]यशोभाग्यमवाप्नोति राजराजेश्वरो भवेत् ।
डाकिनीसिद्धिमाप्नोति कुण्डलीवशमानयेत् ॥ १८५ ।

ध्यानात्मा साधकेन्द्रश्च यतिर्भूत्वा शुभे दिने ।
ध्यानं कुर्यात् पद्ममध्यकर्णिकायां शिखालये ॥ १८६ ।

भ्रूमध्ये चक्रसारे च ध्यात्वा ध्यात्वा पठेद् यदि ।
राकिणीसिद्धिमाप्नोति देवतादर्शनं लभेत् ॥ १८७ ।

भाग्यसिद्धिमवाप्नोति नित्यं प्रपठनाद्यतः ।
साक्षात्सिद्धिमवाप्नोति शक्तियुक्तः पठेद्यदि ॥ १८८ ।

हिरण्याक्षी लाकिनीशा वशमाप्नोति धैर्यवान् ।
रात्रिशेषे समुत्थाय पठेद् यदि शिवालये ॥ १८९ ।

पूजान्ते वा जपान्ते वा वारमेकं पठेद्यदि ।
वीरसिद्धिमवाप्नोति काकिनीवशमानयेत् ॥ १९० ।

रात्रिं व्याप्य पठेद्यस्तु शुद्धचेता जितेन्द्रियः ।
शय्यायां चण्डिकागेहे मधुगेहेऽथवा पुनः ॥ १९१ ।

शाकिनीसिद्धिमाप्नोति सर्वदेशे च सर्वदा ।
प्रभाते च समुत्थाय शुद्धात्मा पञ्चमे दिने ॥ १९२ ।

अमावास्यासु विज्ञायां श्रवणायां विशेषतः ।
शुक्लपक्षे नवम्यां तु कृष्णपक्षेऽष्टमीदिने ॥ १९३ ।

भार्यायुक्तः पठेद्यस्तु वशमाप्नोति भूपतिम् ।
एकाकी निर्जने देशे कामजेता[2] महाबली ॥ १९४ ।

प्रपठेद् रात्रिशेषे च स भवेत् साधकोत्तमः ।
कल्पद्रुमसमो दाता देवजेता न संशयः ॥ १९५ ।

---

१. यशश्च भाग्यं चेत्यनयोः समाहारद्वन्द्वे साधुता । अथवा यशसा सहितं भाग्यमिति मध्यमपदलोपिसमासः ।

२. कामस्य कामदेवस्य जेता । अथवा कामस्य इच्छातत्त्वस्य जेता ।

[1]शिवशक्तिमध्यभागे यन्त्रं संस्थाप्य यत्नतः ।
प्रपठेत् साधकेन्द्रश्च सर्वज्ञाता स्थिराशयः ॥ १९६ ।
एकान्तनिर्जने रम्ये तपःसिद्धिफलोदये[2] ।
देशे स्थित्वा पठेद्यस्तु जीवन्मुक्ति फलं लभेत् ॥ १९७ ।
अकालेऽपि सकालेऽपि पठित्वा सिद्धिमाप्नुयात् ।
त्रिकालं यस्तु पठति प्रान्तरे वा चतुष्पथे ॥ १९८ ।
योगिनीनां पतिः साक्षादायुर्वृद्धिर्दिने दिने ।
वारमेकं पठेद्यस्तु मूर्खो वा पण्डितोऽपि वा ॥ १९९ ।
वाचामीशो भवेत् क्षिप्रं योगयुक्तो भवेद् ध्रुवम् ।
सम्भावितो भवेदेकं वारपाठेन भैरव ॥ २०० ।
जित्वा कालमहामृत्युं देवीभक्तिमवाप्नुयात् ।
पठित्वा वारमेकं तु यात्रां कुर्वन्ति ये जनाः ॥ २०१ ।
देवीदर्शनसिद्धिञ्च प्राप्तो योगमवाप्नुयात् ।
प्रत्येकं नाममुच्चार्य यो यागमनुसञ्चरेत् ॥ २०२ ।
स भवेन्मम पुत्रो हि सर्वकामफलं लभेत् ।
[3]सर्वयज्ञफलं ज्ञानसिद्धिमाप्नोति योगिराट् ॥ २०३ ।
भूतले भूभृतांनाथो महासिद्धो महाकविः ।
कण्ठे शीर्षे दक्षभुजे पुरुषो धारयेद्यदि ॥ २०४ ।
योषिद्वामभुजे धृत्वा सर्वसिद्धिमवाप्नुयात् ।
गोरोचनाकुङ्कुमेन रक्तचन्दनकेन च ॥ २०५ ।
यावकैर्वा महेशानि लिखेन्मन्त्रं समाहितः ।
आद्या देवी परप्राणसिद्धिमाप्नोति निश्चितम् ॥ २०६ ।
लिङ्गं पीठे पूर्णिमायां कृष्णचतुर्दशीदिने ।
भौमवारे मध्यरात्रौ पठित्वा [4]कामसिद्धिभाक् ॥ २०७ ।

---

१. शिवस्य शक्तेश्च मध्यभागे यन्त्रस्य संस्थापना कार्या ।
२. तपसां सिद्धिः, तस्याः फलस्योदये, उत्पत्तिसमये ।
३. सर्वेषां यज्ञानां फलानि च ज्ञानं च तेषां सिद्धिः ।
४. कामानां संकल्पानां सिद्धिः ।

किं न सिद्धयति भूखण्डे अजरामर एव सः ।
रमणीकोटिभर्ता स्याद् वर्षद्वादशपाठतः ॥ २०८ ।
अष्टवर्षप्रपाठेन [1]कायप्रवेशसिद्धिभाक् ।
षड्वर्षमात्रपाठेन कुबेरसदृशो धनी ॥ २०९ ।
वारैकमात्रपाठेन वर्षे वर्षे दिने दिने ।
स भवेत् पञ्चतत्त्वज्ञो तत्त्वज्ञानी न संशयः ॥ २१० ।
सर्वपापविनिर्मुक्तो वसेत् कल्पत्रयं भुवि ।
यः पठेत् सप्तधा नाथ सप्ताहनि दिने दिने ॥ २११ ।
रात्रौ वारत्रयं धीमान् पठित्वा खेचरो भवेत् ।
अश्विनी शुक्लपक्षे च रोहिण्यसितपक्षके ॥ २१२ ।
अष्टम्यां हि नवम्यां तु पठेद् वारत्रयं निशि ।
दिवसे वारमेकं तु स भवेत् पञ्चतत्त्ववित् ॥ २१३ ।
अनायासेन देवेश पञ्चामरादिसिद्धिभाक् ।
खेचरीमेलनं तस्य नित्यं भवति निश्चितम् ॥ २१४ ।
स्वर्गे मर्त्ये च पाताले क्षणान्निःसरति ध्रुवम् ।
[2]अग्निस्तम्भं जलस्तम्भं वातस्तम्भं करोति सः ॥ २१५ ।
पञ्चतत्त्वक्रमेणैव श्मशाने यस्तु सम्पठेत् ।
स भवेद् देवदेवेशः सिद्धान्तसारपण्डितः[3] ॥ २१६ ।
शूकरासवसंयुक्तः कुलद्रव्येण वा पुनः ।
बिल्वमूले पीठमूले विधानेन प्रपूजयेत् ॥
परेण परमा देवी तुष्टा भवति सिद्धिदा ॥ २१७ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवभैरवीसंवादे हाकिनीसहस्रनाम-विन्यासो नाम षडशीतितमः पटलः ॥

---

१. काये परशरीरे प्रवेशः, तस्य सिद्धिः ।

२. अग्नि-जल-वायूनां स्तम्भो निरोधः ।

३. सिद्धोऽन्तो येषां ते सिद्धान्ताः, तेषां सारः, तत्र पण्डितः विज्ञः । सदसद्विवेकिनी बुद्धिः पण्डा, सा सञ्जाता यस्य सः पण्डितः ।

अथ सप्ताशीतितमः पटलः

श्रीआनन्दभैरव उवाच—

आनन्दभैरवि प्राणवल्लभे जगदीश्वरि ।
तव [1]प्रसादवाक्येन श्रुतं नामसहस्रकम् ॥ १ ।

हाकिन्याः कुलयोगिन्याः परमाद्भुतमङ्गलम् ।
इदानीं श्रोतुमिच्छामि परनाथस्य वाञ्छितम् ॥ २ ।

सहस्रनामयोगाङ्गमष्टोत्तरसमाकुलम् ।
भ्रूपद्मभेदनार्थाय हाकिनीयोगसिद्धये ॥ ३ ।

परनाथस्य योगाधिसिद्धये कुलभैरवि ।
कृपया वद मे प्रीता धर्मसिद्धिनिबन्धनात् ॥ ४ ।

मम देहरक्षणाय पातिव्रात्यप्रसिद्धये ।
महाविषहरे शीघ्रं वद योगिनि विस्तरात् ॥ ५ ।

त्वत्प्रसादात् खेचराणां भैरवाणां हि योगिनाम् ।
नाथोऽहं जगतीखण्डे सुधाखण्डे वद प्रिये ॥ ६ ।

पुनः पुनः स्तौमि नित्ये त्वमेव सुप्रिया भव ।

श्रीआनन्दभैरवी उवाच—

अथ योगेश्वर प्राणनाथ योगेन्द्र सिद्धिद ॥ ७ ।

इदानीं कथये तेऽहं निजदेहसुसिद्धये ।
सर्वदा हि पठस्व त्वं कालमृत्युं वशं नय ॥ ८ ।

कृपया तव नाथस्य स्नेहपाशनियन्त्रिता ।
तवाज्ञापालनार्थाय कालकूटविनाशनात् ॥ ९ ।

[2]भुक्तिमुक्तिक्रियाभक्तिसिद्धये तच्छृणु प्रभो ।
नित्यामृतखण्डरसोल्लासनामसहस्रकम् ॥ १० ।

---

१. प्रसादः प्रसन्नता, तस्या वाक्यम्, प्रसादवचनमिति यावत् ।
२. भुक्तिश्च मुक्तिश्च क्रिया च भक्तिश्च तासां सिद्धिः, तस्यै ।

अष्टोत्तरं प्रयत्नेन योगिनां हि हिताय च ।
कथयामि [1]सिद्धनामज्ञाननिर्णयसाधनम् ॥ ११ ।

अस्य श्रीपरनाथमहादेवमात्मनोऽष्टोत्तरसहस्र-नाम्नः स्तोत्रस्य सदाशिव ऋषिरुष्णिक्छन्दः श्रीपरनाथमहापुरुषपरमात्मा देवता ह्सौं बीजं सां शक्तिः प्रचण्डपरनाथमूलकीलकं चतुर्वर्गह्राकिनी-परयोगसिद्ध्यर्थे जपे विनियोगः ॥

ॐ ह्सौ सां परेशश्च पराशक्तिः प्रियेश्वरः ।
शिवः परः पारिभद्रः परेशो निर्मलोऽद्वयः ॥ १२ ।
स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः ।
परमात्मा पराकाशोऽपरोऽप्यपराजितः ॥ १३ ।
पार्वतीवल्लभः श्रीमान् दीनबन्धुस्त्रिलोचनः ।
योगात्मा योगदः सिद्धेश्वरो वीरः स्वरान्तकः ॥ १४ ।
कपिलेशो गुरुर्गीतः स्वप्रियो गीतमोहनः ।
गभीरो गाधनस्थश्च गीतवाद्यप्रियङ्करः ॥ १५ ।
गुरुगीतापवित्रश्च गानसम्मानतोज्झितः ।
गयानाथो दत्तनाथो दत्तात्रेयपतिः शिवः ॥ १६ ।
आकाशवाहको नीलो नीलाञ्जनशरीरधृक् ।
खगरूपी खेचरश्च गगनात्मा गभीरगः ॥ १७ ।
गोकोटिदानकर्त्ता च गोकोटिदुग्धभोजनः ।
अभयावल्लभः श्रीमान् परमात्मा निराकृतिः ॥ १८ ।
सांख्याधारी निराकारी निराकरणवल्लभः ।
वाय्वाहारी वायुरूपी वायुगन्ता स्ववायुपाः ॥ १९ ।
[2]वातघ्नो वातसम्पत्तिर्वाताजीर्णो वसन्तवित् ।
वासनीशो व्यासनाथो नारदादिमुनीश्वरः ॥ २० ।

---

१. सिद्धानां नामानि तेषां ज्ञानानि, तन्निर्णयस्य साधनम् ।

२. वातं हन्ति इति वातघ्नः, वातेति कर्मण्युपपदे हन्तेः टक्प्रत्ययः कर्तरि । गमहनेस्यकारलोपः ।

[1]नारायणप्रियानन्दो नारायणनिराकृतिः ।
नावमालो नावकर्ता नावसंज्ञानधारकः ॥ २१ ।
जलाधारो ज्ञेय इन्द्रो निरिन्द्रियगुणोदयः ।
तेजोरूपी चण्डभीमो तेजोमालाधरः कुलः ॥ २२ ।
कुलतेजा कुलानन्दः शोभाढ्यो वेदरश्मिधृक् ।
किरणात्मा कारणात्मा कल्पच्छायापतिः शशी ॥ २३ ।
परज्ञानी परानन्ददायको धर्मजित्प्रभुः ।
त्रिलोचनाम्भोजराजो दीर्घनेत्रो मनोहरः ॥ २४ ।
चामुण्डेशः प्रचण्डेशः पारिभद्रेश्वरो हरः ।
गोपिता मोहितो गोप्ता गुप्तिस्थो गोपपूजितः ॥ २५ ।
गोपनाख्यो गोधनेशश्च चारुवक्त्रो दिगम्बरः ।
पञ्चाननः पञ्चमीशो विशालो गरुडेश्वरः ॥ २६ ।
अर्धनारीश्वरेशश्च नायिकेशः कुलान्तकः ।
संहारविग्रहः प्रेतभूतकोटिपरायणः ॥ २७ ।
अनन्तेशोऽप्यनन्तात्मा मणिचूडो विभावसुः ।
कालानलः कालरूपी वेदधर्मेश्वरः कविः ॥ २८ ।
भर्गः स्मरहरः शम्भुः स्वयम्भुः पीतकुण्डलः ।
जायापतिर्याजजूको विलाशीशः शिखापतिः ॥ २९ ।
पर्वतेशः पार्वणाख्यः क्षेत्रपालो महीश्वरः ।
[2]वाराणसीपतिर्मान्यो धन्यो वृषसुवाहनः ॥ ३० ।
अमृतानन्दितो मुग्धो वनमालीश्वरः प्रियः ।
काशीपतिः प्राणपतिः कालकण्ठो महेश्वरः ॥ ३१ ।
कम्बुकण्ठः क्रान्तिवर्गो वर्गात्मा जलशासनः ।
जलबुद्बुदवक्षश्च जलरेखामयः पृथुः ॥ ३२ ।

---

१. नारायणस्य प्रिय आनन्दो यस्य सः । आपो नाराः, तेऽयनं यस्य स नारायणः । पूर्वपदात् संज्ञायामिति णत्वम् ।

२. वरं च तदनश्च वरानः पवित्रजलम्, तस्यादूरभवा नगरी वाराणसी, अदूरभवश्चेत्यणि, संज्ञायां णत्वे च साधुता ।

[1]पार्थिवेशो महीकर्ता पृथिवीपरिपालकः ।
भूमिस्थो भूमिपूज्यश्च क्षौणीवृन्दारकार्चितः ॥ ३३ ।
शूलपाणिः शक्तिहस्तो पद्मगर्भो हिरण्यभृत् ।
भूगर्तसंस्थितो योगी योगसम्भवविग्रहः ॥ ३४ ।
पातालमूलकर्ता च पातालकुलपालकः ।
पातालनागमालाढ्यो दानकर्ता निराकुलः ॥ ३५ ।
भ्रूणहन्ता पापराधिनागकः कालनागकः ।
कपिलोग्रतपःप्रीतो लोकोपकारकृन्नृपः ॥ ३६ ।
नृपार्चितो नृपार्थस्थो नृपार्थकोटिदायकः ।
पार्थिवार्चनसन्तुष्टो महावेगी परेश्वरः ॥ ३७ ।
परापारापारतरो महातरुनिवासकः ।
तरुमूलस्थितो रुद्रो रुद्रनामफलोदयः ॥ ३८ ।
रौद्रीशक्तिपतिः क्रोधी कोपनष्टो विरोचनः ।
असंख्येयाख्ययुक्तश्च परिणामविवर्जितः ॥ ३९ ।
प्रतापी पवनाधारः प्रशंस्यः सर्वनिर्णयः ।
वेदजापी मन्त्रजापी देवता गुरुरीश्वरः ॥ ४० ।
श्रीनाथो गुरुदेवश्च परनाथो गुरुः प्रभुः ।
परापरगुरुर्ज्ञानी तन्त्रज्ञोऽर्कशतप्रभाः ॥ ४१ ।
तार्क्ष्यो गमनकारी च कालभावी निरञ्जनः ।
कालकूटानलः श्रोतः पुञ्जपानपरायणः ॥ ४२ ।
परिवारगणाढ्यश्च पाराशाषिसुतस्थितः ।
स्थितिस्थापकरूपश्च [2]रूपातीतोऽमलापतिः ॥ ४३ ।
पतीशो भागुरिश्चैव कालश्चैव हरिस्तथा ।
वैष्णवः प्रेमसिन्धुश्च तरलो वातवित्तहा ॥ ४४ ।

---

१. पृथिव्या ईश्वरः पार्थिवः, स चासौ ईशश्चेति पार्थिवेशः । अथवा पार्थिवानां पृथिवीपतीनामीश इति ।

२. रूपमतीतोऽतिक्रान्त इति रूपातीतः, द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरिति तत्पुरुषसमासः ।

भावस्वरूपो भगवान् निराकाशः सनातनः ।
अव्ययः पुरुषः साक्षी चाच्युतो मन्दराश्रयः ॥ ४५ ।
मन्दराद्रिक्रियानन्दो[1] वृन्दावनतनूद्भवः ।
वाच्यावाच्यस्वरूपश्च निर्मलाख्यो विवादहा ॥ ४६ ।
वैद्यो वेदपरो ग्रन्थो वेदशास्त्रप्रकाशकः ।
स्मृतिमूलो वेदयुक्तिः प्रत्यक्षकुलदेवता ॥ ४७ ।
परीक्षको वारणाख्यो महाशैलनिषेवितः ।
विरिञ्चप्रेमदाता च जन्योल्लासकरः प्रियः ॥ ४८ ।
प्रयागधारी पयोऽर्थी गाङ्गागङ्गाधरः स्मरः ।
गङ्गाबुद्धिप्रियो देवो गङ्गास्नाननिषेवितः ॥ ४९ ।
गङ्गासलिलसंस्थो हि गङ्गाप्रत्यक्षसाधकः ।
गिरो गङ्गामणिमरो मल्लिकामालधारकः ॥ ५० ।
मल्लिकागन्धसुप्रेमो मल्लिकापुष्पधारकः ।
महाद्रुमो महावीरो महाशूरो महोरगः ॥ ५१ ।
महातुष्टिर्महापुष्टिर्महालक्ष्मीशुभङ्करः ।
महाश्रमी महाध्यानी महाचण्डेश्वरो महान् ॥ ५२ ।
महादेवो महाह्लादो महाबुद्धिप्रकाशकः ।
महाभक्तो महाशक्तो महाधूर्तो महामतिः ॥ ५३ ।
महाच्छत्रधरो धारोधरकोटिगतप्रभा ।
अद्वैतानन्दवादी च मुक्तो भङ्गप्रियोऽप्रियः ॥ ५४ ।
अतिगन्धश्चातिमात्रो निर्णितान्तः परन्तपः ।
निर्णितोऽनिलधारी च सूक्ष्मानिलनिरूपकः ॥ ५५ ।
महाभयङ्करो गोलो [2]महाविवेकभूषणः ।
सुधानन्दः पीठसंस्थो हिङ्गुलादेश्वरः सुरः ॥ ५६ ।

---

१. मन्दरश्चासौ अद्रिश्चेति मन्दराद्रिः, मन्दराचलः, तदीयक्रियया क्षीरसागरे संचरणेन आनन्दो यस्य सः ।

२. महान् विवेकः स एव भूषणं यस्य स इत्यर्थः ।

नरो नागपतिः क्रूरो भक्तानां कामदः प्रभुः ।
नागमालाधरो धर्मी नित्यकर्मी कुलीनकृत् ।। ५७ ।

शिशुपालेश्वरः [1]कीर्तिविकारी लिङ्गधारकः ।
तृषानन्दो हृषीकेशेश्वरः पाञ्चालवल्लभः ।। ५८ ।

अक्रूरेशः पतिः प्रीतिवर्धको लोकवर्धकः ।
अतिपूज्यो वामदेवो दारुणो रतिसुन्दरः ।। ५९ ।

महाकालः प्रियाह्लादी विनोदी पञ्चचूडधृक् ।
आद्याशक्तिपतिः पान्तो विभाधारी प्रभाकरः ।। ६० ।

अनायासगतिर्बुद्धिप्रफुल्लो नन्दिपूजितः ।
शिलामूर्तिस्थितो रत्नमालामण्डितविग्रहः ।। ६१ ।

बुधश्रीदो बुधानन्दो विबुधो बोधवर्धनः ।
अघोरः कालहर्ता च निष्कलङ्को निराश्रयः ।। ६२ ।

पीठशक्तिपतिः प्रेमधारको मोहकारकः ।
असमो विसमो भावोऽभावो भावो निरिन्द्रियः ।। ६३ ।

निरालोको बिलानन्दो बिलस्थो विषभुक्पतिः ।
दुर्गापतिर्दुर्गहर्ता दीर्घसिद्धान्तपूजितः ।। ६४ ।

सर्वो दुर्गपतिर्विप्रो विप्रपूजापरायणः ।
ब्राह्मणानन्दनिरतो ब्रह्मकर्मसमाधिवित् ।। ६५ ।

विश्वात्मा विश्वभर्ता च विश्वविज्ञानपूरकः ।
विश्वान्तःकरणस्थश्च विश्वसंज्ञाप्रतिष्ठितः ।। ६६ ।

विश्वाधारो विश्वपूज्यो विश्वस्थोऽर्चित इन्द्रहा ।
अलाबुभक्षणः क्षान्तिरक्षो रक्षनिवारणः ।। ६७ ।

तितिक्षारहितो हूतिः [2]पुरुहूतप्रियङ्करः ।
पुरुषः पुरुषश्रेष्ठो विलालस्थः कुलालहा ।। ६८ ।

---

१. कीर्तिं विकिरति तच्छीलः, कीर्तिविक्षेपेण शोभते योऽसौ । णिनिः ताच्छील्ये कर्मण्युपपदे सति ।

२. पुरुहूतस्येन्द्रदेवस्य प्रियं करोति इति, अथवा पुरुहूतस्य प्रियङ्कर इत्येव ।

कुटिलस्थो विधिप्राणो [1]विषयानन्दपारगः ।
ब्रह्मज्ञानप्रदो ब्रह्मज्ञानी ब्रह्मगुणान्तरः ।। ६९ ।

पालकेशो विराजश्च वज्रदण्डो महास्त्रधृक् ।
सर्वास्त्ररक्षकः श्रीदो विधिबुद्धिप्रपूरणः ।। ७० ।

आर्यापुत्रो देवराजपूजितो मुनिपूजितः ।
गन्धर्वपूजितः पूज्यो दानवज्ञाननाशनः ।। ७१ ।

अप्सरोगणपूज्यश्च मर्त्यलोकसुपूजितः ।
मृत्युजिद्रिपुजित् प्लक्षो मृत्युञ्जय इषुप्रियः ।। ७२ ।

त्रिबीजात्मा नीलकण्ठः क्षितीशो रोगनाशनः ।
जितारिः प्रेमसेव्यश्च भक्तिगम्यो निरुद्यमः ।। ७३ ।

निरीहो निरयाह्लादः कुमारो रिपुपूजितः ।
अजो देवात्मजो धर्मोऽसन्तो मन्दमासनः ।। ७४ ।

मन्दहासो मन्दनष्टो मन्दगन्धसुवासितः ।
माणिक्यहारनिलयो मुक्ताहारविभूषितः ।। ७५ ।

मुक्तिदो भक्तिदश्चैव निर्वाणपददानदः ।
निर्विकल्पो मोदधारी निरातङ्को महाजनः ।। ७६ ।

मुक्ताविद्रुममालाढ्यो मुक्तादामलसत्कटिः ।। ७७ ।

रत्नेश्वरो धनेशश्च धनेशप्राणवल्लभः ।
धनजीवी कर्मजीवी संहारविग्रहोज्ज्वलः ।। ७८ ।

सङ्केतार्थज्ञानशून्यो महासङ्केतपण्डितः ।
सुपण्डितः क्षेमदाता भवदाता भवान्वयः ।। ७९ ।

किङ्करेशो विधाता च विधातुः प्रियवल्लभः ।
कर्ता हर्ता कारयिता [2]योजनायोजनाश्रयः ।। ८० ।

---

१. विषयजनितो य आनन्दः, तस्य पारं गत इति । गमेर्डप्रत्ययः ।

२. योजनानामयोजनानां चेति योजनायोजनाः, तासामाश्रयः ।

युक्तो योगपतिः श्रद्धापालको [1]भूतशङ्करः ।
भूताध्यक्षो भूतनाथो भूतपालनतत्परः ॥ ८१ ।
विभूतिदाता भूतिश्च महाभूतिविवर्धनः ।
महालक्ष्मीश्वरः कान्तः कमनीयः कलाधरः ॥ ८२ ।
कमलाकान्त ईशानो यमोऽमरो मनोजवः ।
मनयोगी मानयोगी मानभङ्गो निरूपणः ॥ ८३ ।
अव्यक्तानन्दनिरतो व्यक्ताव्यक्तनिरूपितः ।
आत्मारामपतिः कृष्णपालको रामपालकः ॥ ८४ ।
लक्षणेशो लक्षभर्ता भावतीशः प्रजाभवः ।
भरताख्यो भारतश्च शत्रुघ्नो हनुमान् कपिः ॥ ८५ ।
कपिचूडामणिः क्षेत्रपालेशो दिक्करान्तरः ।
दिशांपतिर्दिशीशश्च दिक्पालो हि दिगम्बरः ॥ ८६ ।
अनन्तरत्नचूडाढ्यो नानारत्नासनस्थितः ।
संविदानन्दनिरतो विजयो विजयात्मजः ॥ ८७ ।
जयाजयविचारश्च भावचूडामणीश्वरः ।
मुण्डमालाधरस्तन्त्री सारतन्त्रप्रचारकः ॥ ८८ ।
संसाररक्षकः प्राणी पञ्चप्राणो महाशयः ।
गरुडध्वजपूज्यश्च गरुडध्वजविग्रहः ॥ ८९ ।
गारुडीशो मन्त्रिणीशो मैत्रप्राणहिताकरः ।
सिद्धिमित्रो मित्रदेवो जगन्नाथो नरेश्वरः ॥ ९० ।
नरेन्द्रेश्वरभावस्थो विद्याभावप्रचारवित् ।
कालाग्निरुद्रो भगवान् प्रचण्डेश्वरभूपतिः ॥ ९१ ।
[2]अलक्ष्मीहारकः क्रुद्धो रिपूणां क्षयकारकः ।
सदानन्दमयो वृद्धो धर्मसाक्षी सुधांशुधृक् ॥ ९२ ।

---

१. भूतानां भूतयोनिं प्राप्तानां शं कल्याणं करोति योऽसौ भूतशंकरः, शमित्युपपदे करोतेः 'कृञो हेतुताच्छील्यानुलोम्येषु' इति पाणिनीयसूत्रेण ताच्छील्ये द्योत्ये टप्रत्यये सति साधुता बोध्या ।

२. न लक्ष्मीरलक्ष्मीर्दरिद्रादेवी तां हरति योऽसौ । अथवा लक्ष्मीं हरतीति लक्ष्मीहारक इति । न लक्ष्मीहारकः ।

साक्षरो रिपुवर्गस्थो दैत्यहा [1]मुण्डधारकः ।
कपाली रुण्डमालाढ्यो महाबीजप्रकाशकः ॥ ९३ ।

अजेयोग्रपतिः स्वाहावल्लभो हेतुवल्लभः ।
हेतुप्रियानन्ददाता हेतुबीजप्रकाशकः ॥ ९४ ।

श्रुतिक्षिप्रमणिरतो ब्रह्मसूत्रप्रबोधकः ।
ब्रह्मानन्दो जयानन्दो विजयानन्द एव च ॥ ९५ ।

सुधानन्दो बुधानन्दो विद्यानन्दो बलीपतिः ।
ज्ञानानन्दो विभानन्दो भावानन्दो नृपासनः ॥ ९६ ।

सर्वासनोग्रानन्दश्च जगदानन्ददायकः ।
पूर्णानन्दो भवानन्दो ह्यमृतानन्द एव च ॥ ९७ ।

शीतलोऽशीतिवर्षस्थो व्यवस्थापरिचायकः ।
शीलाढ्यश्च सुशीलश्च शीलानन्दो पराश्रयः ॥ ९८ ।

सुलभो मधुरानन्दो मधुरामोदमादनः ।
अभेद्यो मूत्रसञ्चारी कलहाख्यो विषङ्कुटः ॥ ९९ ।

वाशभाढ्यः परानन्दो विसमानन्द उल्बणः ।
अधिपो वारुणीमत्तो मत्तगन्धर्वशासनः ॥ १०० ।

शतकोटिशरुश्रीदो वीरकोटिसमप्रभः ।
अजाविभावरीनाथो विषमापूष्णिपूजितः ॥ १०१ ।

विद्यापतिर्वेदपतिरप्रमेयपराक्रमः ।
रक्षोपतिर्महावीरपतिः प्रेमोपकारकः ॥ १०२ ।

वारणाविप्रियानन्दो वारणेशो विभुस्थितः ।
रणचण्डो रणेशश्च रणरामप्रियः प्रभुः ॥ १०३ ।

रणनाथो रणाह्लादः संग्रामप्रेतविग्रहः[2] ।
देवीभक्तो देवदेवो दिवि दारुणतत्परः ॥ १०४ ।

---

१. धरतीति धारकः, धृञो ण्वुल्प्रत्ययः, मुण्डानां धारकः, महादेवः ।

२. संग्रामे युद्धे प्रेतस्य विग्रहो देहो यस्य सः । रणक्षेत्रे प्रेतशरीरं धृत्वा रणक्रिया विधीयत इति भावः ।

खड्गी च कवची सिद्धः शूली धूलिस्त्रिशूलधृक् ।
धनुष्मान् धर्मचित्तेशोऽचिन्ननागसुमाल्यधृक्[1] ॥ १०५ ।
अर्थोऽनर्थप्रियोऽप्रायो मलातीतोऽतिसुन्दरः ।
काञ्चनाढ्यो हेममाली काञ्चनशृङ्गशासनः ॥ १०६ ।
कन्दर्पजेता पुरुषः कपित्थेशोऽर्कशेखरः ।
पद्मगन्धोऽतिसद्गन्धश्चन्द्रशेखरभृत् सुखी ॥ १०७ ।
पवित्राधारनिलयो विद्यावद्वरबीजभृत् ।
कन्दर्पसदृशाकारो मायाजिद् व्याघ्रचर्मधृक् ॥ १०८ ।
अतिसौन्दर्यचूडाढ्यो नागचित्रमणिप्रियः ।
अतिगण्डः कुम्भकर्णः कुरुजेता कवीश्वरः ॥ १०९ ।
एकमुखो द्वितुण्डश्च द्विविधो वेदशासनः ।
आत्माश्रयो गुरुमयो गुरुमन्त्रप्रदायकः ॥ ११० ।
शौरीनाथो ज्ञानमार्गी सिद्धमार्गी प्रचण्डगः ।
नामगः क्षेत्रगः क्षेत्रो गगनग्रन्थिभेदकः ॥ १११ ।
गाणपत्यवसाच्छन्नो गाणपत्यवसादवः ।
गम्भीरोऽतिसुसूक्ष्मश्च गीतवाद्यप्रियंवदः ॥ ११२ ।
आह्लादोद्रेककारी च सदाह्लादी मनोगतिः ।
शिवशक्तिप्रियः श्यामवर्णः परमबान्धवः ॥ ११३ ।
अतिथिप्रियकरो नित्यो गोविन्देशो हरीश्वरः ।
सर्वेशो भाविनीनाथो विद्यागर्भो विभाण्डकः ॥ ११४ ।
ब्रह्माण्डरूपकर्ता च ब्रह्माण्डधर्मधारकः ।
धर्मार्णवो धर्ममार्गी धर्मचिन्तासुसिद्धिदः ॥ ११५ ।
अस्थास्थितो ह्यास्तिकश्च स्वस्तिस्वच्छन्दवाचकः ।
[2]अन्नरूपी अन्नकस्थो मानदाता महामनाः ॥ ११६ ।

---

१. अचित् न इति अचिन्न, अर्थात् चिद्रूपः । पुनश्च नागानां सुमाल्यं शोभना माला तां धृष्णोतीति । क्विन्प्रत्ययान्तः, क्विन्प्रत्ययस्य कुरिति कुत्वे सति साधुता ।

२. अन्नस्य रूपमन्नरूपम्, तदस्याति अन्नरूपी । अत इनिप्रत्ययः । अथवा अन्नं रूपयति प्रकाशयति इति णिनिः कर्तरि ।

आद्याशक्तिप्रभुर्मातृवर्णजालप्रचारकः ।
मातृकामन्त्रपूज्यश्च [1]मातृकामन्त्रसिद्धिदः ॥ ११७ ।

मातृप्रियो मातृपूज्यो मातृकामण्डलेश्वरः ।
भ्रान्तिहन्ता भ्रान्तिदाता भ्रान्तस्थो भ्रान्तिवल्लभः ॥ ११८ ।

इत्येतत् कथितं नाथ सहस्रनाममङ्गलम् ।
अष्टोत्तरं महापुण्यं स्वर्गीयं भुवि दुर्लभम् ॥ ११९ ।

यस्य श्रवणमात्रेण नरो नारायणो भवेत् ।
अप्रकाश्यं महागुह्यं देवानामप्यगोचरम् ॥ १२० ।

फलं कोटिवर्षशतैर्वक्तुं न शक्यते बुधैः ।
यस्य स्मरणमाकृत्य योगिनीयोगपारगः ॥ १२१ ।

सोक्षणः सर्वसिद्धीनां त्रैलोक्ये सचराचरे ।
देवाश्च बहवः सन्ति योगिनस्तत्त्वचिन्तकाः ॥ १२२ ।

पठनाद्धारणाज्ज्ञानी महापातकनाशकः ।
आयुरारोग्यसम्पत्तिबृंहितो भवति ध्रुवम् ॥ १२३ ।

संग्रामे ग्रहभीतौ च महारण्ये जले भये ।
वारमेकं पठेद्यस्तु स भवेद् देववल्लभः ॥ १२४ ।

सर्वेषां मानसम्भङ्गो योगिराड् भवति क्षणात् ।
पूजां कृत्वा विशेषेण यः पठेन्नियतः शुचिः ॥ १२५ ।

स सर्वलोकनाथः स्यात् परमानन्दमाप्नुयात् ।
एकपीठे जपेद्यस्तु कामरूपे विशेषतः ॥ १२६ ।

त्रिकालं वाथ षट्कालं पठित्वा योगिराड् भवेत् ।
आकाशगामिनीं सिद्धिं गुटिकासिद्धिमेव च ॥ १२७ ।

प्राप्नोति साधकेन्द्रस्तु राजत्वं हि दिने दिने ।
सर्वदा यः पठेन्नित्यं सर्वज्ञः सुकुशाग्रधीः[2] ॥ १२८ ।

---

१. मातृकामन्त्रस्य सिद्धिं ददाति, 'आतोऽनुपसर्गे कः' इति कर्तरि कप्रत्यये साधुता ।

२. कुशाग्रमिव तीक्ष्णा धीर्बुद्धिर्यस्य सः, शोभनः कुशाग्रधीः इति ।

अवश्यं योगिनां श्रेष्ठः [1]कामजेता महीतले ।
अज्ञानी ज्ञानवान् सद्योऽधनी च धनवान् भवेत् ॥ १२९ ।

सर्वदा राजसम्मानं पञ्चत्वं नास्ति तस्य हि ।
गले दक्षिणबाहौ च धारयेद्यस्तु भक्तितः ॥ १३० ।

अचिरात्तस्य सिद्धिः स्यान्नात्र कार्या विचारणा ।
अवधूतेश्वरो भूत्वा राजते नात्र संशयः ॥ १३१ ।

रक्तचन्दनयुक्तेन हरिद्राकुङ्कुमेन च ।
सेफालिकापुष्पदण्डैर्दलसङ्कुलवर्जितैः ॥ १३२ ।

मिलित्वा यो लिखेत् स्तोत्रं केवलं चन्दनाम्भसा ।
स भवेत् पार्वतीपुत्रः क्षणाद्वा द्वादशाहनि ॥ १३३ ।

एकमासं द्विमासं वा त्रिमासं वर्षमेव च ।
जीवन्मुक्तो धारयित्वा सहस्रनामकीर्तनम् ॥ १३४ ।

पठित्वा तद्द्विगुणशः पुण्यं कोटिगुणं लभेत् ।
किमन्यं कथयिष्यामि सार्वभौमेश्वरो भवेत् ॥ १३५ ।

त्रिभुवनगणनाथो योगिनीशो धनाढ्यो
[2]मतिसुविमलभावो दीर्घकालं वसेत् सः ।
इह पठति भवानीवल्लभः स्तोत्रसारं
दशशतमभिधेयं ज्ञानमष्टोत्तरं च ॥ १३६ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्कोणप्रकाशे भ्रूपद्मभेदविन्यासे भैरवीभैरवसंवादे पराशवहाकिनीश्वराष्टोत्तर-सहस्रनामपाठे सप्ताशीतितमः पटलः ॥

●

---

१. काम्यन्ते ये ते कामा इष्टविषयाः, तेषां जेता । तद्ग्रहणेच्छाशून्य इति भावः ।

२. मन्यतेऽनया सा मतिः, बुद्धिः, तत्र सुविमला भावा यस्य भक्तजनस्य, स मतिसुविमल-भावः । अथवा मतिसहितः सुविमलो भावो यस्य इति ।

अथाष्टाशीतितमः पटलः

श्रीआनन्दभैरवी उवाच—

शृणुष्व परमेश त्वं दुर्लभं योगिमण्डले ।
[1]महायोगज्ञानसारं त्रैलोक्यमङ्गलं शुभम् ॥ १ ।
यस्य विज्ञानमात्रेण साधकोऽसाधकोऽपि वा ।
मृत्युञ्जयो भवेज्ज्ञानी परमानन्दरूपभाक् ॥ २ ।
होमस्थानं शिखामध्ये दीपस्य भ्रूदलान्तरे ।
परंब्रह्मस्वरूपां तां शिखारूपां जगत्प्रियाम् ॥ ३ ।
स्वाहाशक्ति तत्र नाथ विचिन्त्य मनसा सुधीः ।
यः स्तुत्वा प्रत्यहं होमकर्मसिद्धि समापयेत् ॥ ४ ।
इत्येतत् परमं ज्ञानमन्यज्ज्ञानं शृणु प्रभो ।
शिखोर्ध्वे च परा शक्तिः परंब्रह्मस्वरूपिणी ॥ ५ ।
उष्ट्रमुखी रक्तमुखी कोटिकालानलोपमा ।
तां ध्यात्वा कुलपद्मस्य कर्णिकायां महामनाः ॥ ६ ।
मनोयोगस्थितां देवीं परमानन्ददायिनीम् ।
सूक्ष्मातिसूक्ष्मभावस्थां स्थूलातिस्थूलविग्रहाम् ॥ ७ ।
कालातीतां कालरूपां कालाकालप्रकाशिनीम् ।
धर्मोदयां भानुमतीं प्रबन्धकौशलेश्वरीम् ॥ ८ ।
पार्वतीं रणमातङ्गीं मतङ्गगमनां पराम् ।
निर्वाणसिद्धिदां धात्रीं पञ्चतत्त्वप्रकाशिनीम् ॥ ९ ।
पञ्चमीं पञ्चमस्थाञ्च पञ्चवक्त्रप्रियंवदाम्[2] ।
पद्मरश्मि पद्मवान् शोभितां दिक्पटाम्बराम् ॥ १० ।

---

१. महान्तो ये योगा इति महायोगाः, तेषां ज्ञानानि, तत्सारमिति द्वितीयैकवचनान्तमेतत् । श्रवणक्रियानिरूपिता कर्मता ।

२. पञ्चवक्त्राणि मुखानि यस्यासौ पञ्चवक्त्रः शिवः, तस्य प्रियं वदति या सा, 'प्रियवशे वदः खच्' इति खच्प्रत्ययः ।

प्रवालस्थूलकोटीन्द्रनीलचन्द्रमणिस्रजाम् ।
द्विभुजां मौनशीलाञ्च [1]ज्ञानपुस्तकधारिणीम् ॥ ११ ।
एकाकारस्थितां रौद्रीं परदेवीं विभाव्य च ।
तच्चतुर्दिक्षु सततं शतयोगिनीमण्डलम् ॥ १२ ।
चक्रपङ्क्त्याकारशोभामण्डलं मण्डपस्थितम् ।
तासां नामानि वक्ष्यामि शृणु भैरववल्लभ ॥ १३ ।
श्मशानवासिनी दुर्गा हरिणाक्षी प्रचण्डिका ।
रौद्री श्यामा योगिनी च शिवानी शिवमोहिनी ॥ १४ ।
सुखिनी पञ्चमी बाला कुटिलाक्षी वसुन्धरा ।
सुवर्णाङ्गी पावना च पवित्रा परमानना ॥ १५ ।
सिद्धिदा मङ्गला भाव्या सुरति कामदा रतिः ।
प्रबला विमला चमना प्रभा काञ्चनमालिनी ॥ १६ ।
त्रिभङ्गदेहश्यामाङ्गी तरुणा तरलावती ।
सुलभा दुर्लभा सर्वा प्रफुल्लकमलापि वा ॥ १७ ।
पातालमुखी गोमुण्डा घोरहासा विलासिनी ।
अरुणा श्रवणा मन्त्री मालती मल्लिका तथा ॥ १८ ।
वैश्वानरी भरद्वाजा त्रिविभागा मतिः क्षुधा ।
सुभद्राभाकरी लिप्ता नर्तका चिटिसुन्दरी ॥ १९ ।
बृहन्नली भागवती विशाला विरला तथा ।
मानसी वानरीग्रीवा क्रोधिनी मोहिनी तथा ॥ २० ।
आकर्षिणी स्तम्भिनी च त्रिजटा रुक्ममालिनी ।
ससिका सुकला गौर्या गभीरा मुषलावती ॥ २१ ।
बृहन्नितम्बा मोहाक्षी मन्दिरा चन्द्रिका तथा ।
सिद्धा विद्याधरा हारा रतिः [2]कैशोरधर्मिणी ॥ २२ ।

---

१. ज्ञानस्य पुस्तकं ज्ञानप्रदं पुस्तकं धरति तच्छीला, णिनिः कर्तरि । पुनश्च ऋन्नेभ्यो ङीबिति ङीप्प्रत्ययः ।

२. किशोरस्य भावः कैशोरम्, तादृशो धर्मोऽस्ति यस्याः सा । इनिः, तद्धितः ।

तथा शान्तिर्भद्रदा च विकारी मञ्चवासिनी ।
महाविद्या भवानी च [1]तारब्रह्मस्वरूपिणी ॥ २३ ।
मातङ्गी बगला कृष्णा शिवा हैमवतीश्वरा ।
समनापहरा काली कन्दर्पवनिता शुभा ॥ २४ ।
वाराणसीश्वरी बाला कमला चारुहासिनी ।
अजन्ता हिमकन्या च शर्वाणी कुलचञ्चला ॥ २५ ।
तपस्विनी राजपुत्री चोमापर्णा निरञ्जना ।
आधारभूता सावित्री वाच्यावाच्या चराचरा ॥ २६ ।
कल्क्येशी शशिवदना निर्विकल्पसुपाक्षणी ।
भुवनेशी सुन्दरी च सती सिद्धिप्रदा कला ॥ २७ ।
कृपणा पद्मवदना शब्देशी भगमालिनी ।
आराधिता शोकहरा हरा हीरकमालिनी ॥ २८ ।
हालाहलहरा हारा रती कालानलापहा ।
भैरवी वीरमाता च महाभाग्यवती उमा ॥ २९ ।
सुलभा दुर्गमाता च सुगन्धा गन्धमालिनी ।
अमावास्या सिता भद्रा चारुणी सूर्यपुत्रिणी ॥ ३० ।
दानदा धनदा सिद्धिदायिनी भोगदायिनी ।
इलावती रत्नमाला मनोयोगनिवासिनी ॥ ३१ ।
मनस्विनी मूलमाता मूलमन्त्रस्वरूपिणी ।
एतासां ध्यानमाकृत्य चतुर्दिक्षु क्रमेण तु ॥ ३२ ।
विभाव्य तैजसीं सर्वां तेजोमालाविनाशिनीम् ।
अतिसौन्दर्यलहरीं पारिजातवनान्तरे ॥ ३३ ।
महामण्डलमध्ये तु [2]रत्नसन्तानर्निमिते ।
ग्रहस्यापि महाकालं चतुर्द्वारं विचिन्तयेत् ॥ ३४ ।

---

१. तारयति यत्तद् तारम्, तच्च तद् ब्रह्म चेति तारब्रह्म, तस्य स्वरूपमस्ति यस्याः सा । इनिः तद्धितः ।

२. रत्नानां सन्तानः प्रस्तानः, तेन निर्मिते इति भावः ।

[1]मणिकोटिविनिर्माणचतुस्तोरणभूषितम् ।
मण्डपस्योर्ध्वभागे च महाचन्द्रातपं शितम् ॥ ३५ ।
शतसूर्यप्रभं कान्तं मुक्तादामविभूषितम् ।
तथा मण्डपमध्योर्ध्वे वितालाङ्कं मनोहरम् ॥ ३६ ।
तदधः स्वर्णनिर्माणच्छत्रं मणिमयं रुचिम् ।
तदधः सिंहरूपाक्षि युक्तंसिंहासनं परम् ॥ ३७ ।
तदूर्ध्वे प्रेतबीजं तु प्रेतलिङ्गोपमं स्मृतम् ।
प्रेतलिङ्गोपरि ध्यात्वा काञ्चनस्यापि मण्डलम् ॥ ३८ ।
महापीठं त्रिकोणं तु कर्णिकायां महाप्रभम् ।
शुक्लपद्मं महाशोभं षोडशच्छदमण्डितम् ॥ ३९ ।
षोडशस्वरसंयुक्तं केशकेषु च वर्णकान् ।
दक्षिणावर्तयोगेन विद्युद्रूपं विचिन्तयेत् ॥ ४० ।
चतुष्कोणत्रयं पश्चाच्चतुर्द्वारं मनोहरम् ।
तत्र संचिन्तयेद् देवीं वारुणीमत्तविग्रहाम् ॥ ४१ ।
परामबारूपिणीं तारां तरुणादित्यसन्निभाम् ।
चतुर्द्वारे सदा ध्यायेद् देवानां चापि मण्डलम् ॥ ४२ ।
सवाहनं दैवतं च परिवारसमन्वितम् ।
इन्द्रनीलप्रभं कान्तं पूर्वद्वारीन्द्रचिन्तनम् ॥ ४३ ।
वह्निकोणे तथा वह्निमण्डलं सर्वतोमुखम् ।
परिवारान्वितं ध्यात्वा यमलोकं तु दक्षिणे ॥ ४४ ।
यमं श्यामं महाकान्तं परिवारगणान्वितम् ।
सवाहनं ततो ध्यायेन्नैर्ऋतं राक्षसीं पुरीम् ॥ ४५ ।
तदुत्तरे सदा ध्यायेद् वरुणं [2]मेषवाहनम् ।
परिवारान्वितं शुक्लं भास्वरं तत्र चिन्तयेत् ॥ ४६ ।

---

१. मणिकोटिभिर्विनिर्माणम्, तेन चतुस्तोरणेन च भूषितं शोभितम् ।
२. मेषो वाहनं यस्य सः । वह-धातोः करणे ल्युट् , निपातनाद् दीर्घश्च ।

तदुत्तरे मरुल्लोकं [1]कृष्णसारस्ववाहनम् ।
परिवारान्वितं ध्यात्वा तत्पूर्वे चिन्तयेत् ततः ।। ४७ ।

कुबेरमुत्तरद्वारि परिवारगणान्वितम् ।
सवाहनं कुत्सितञ्च सर्वरत्नोपशोभितम् ।। ४८ ।

ईशाने ईशलोकञ्च परिवारगणान्वितम् ।
सवाहनं सर्वलोकपूजितं परमेश्वरम् ।। ४९ ।

परिवारान्वितं ध्यात्वा नानावाद्यसमन्वितम् ।
भेरीतुरीधुधुरीणां सहस्रकोटिमेव च ।। ५० ।

दुन्दुभिकुलितामोदगायनानन्दपूरितम् ।
नानासुन्दरवाद्याढ्यं पूर्वलोकं विचिन्तयेत् ।। ५१ ।

वेणुवीणामृदङ्गानां सहस्रकोटिनादितम् ।
यमलोकं नैऋते च मन्त्रकोटिसमन्वितम् ।। ५२ ।

करतालकांस्यढक्काध्वनिकोटिप्रपूरितम् ।
जलेश्वरमहालोकं दुन्दुभिध्वनिमोहितम् ।। ५३ ।

यन्त्रकोटिध्वनिश्रेणिमोहितं तत्र चिन्तयेत् ।
झर्झरीपर्परीताङ्गीस्वनादनादितं रुचिम् ।। ५४ ।

मरुल्लोकं तथा ध्यायेत् कुबेरस्थानमेव च ।
दुन्दुभिश्रेणिढक्कादियन्त्रनादविमोहितम् ।। ५५ ।

रागतालनृत्यगीतं मूर्तिमन्त्रं विचिन्तयेत् ।
दीप्तिश्रेणिधरं कान्तं गन्धर्वनगरं ततः ।। ५६ ।

अप्सरोभिः परिवृतं सर्वत्र नगरे सुधीः ।
विचिन्तयेद् गानरसं रसिकं सर्वमङ्गलम् ।। ५७ ।

सर्वलोकस्थिता शोभा शोभा [2]सर्वविमोहिनी ।
सर्वस्यान्तु समायान्तु देवर्षि यन्त्रगायकम् ।। ५८ ।

---

१. कृष्णसारा मृगविशेषाः स्ववाहनं यत्र तम् । एतावता तद्देशस्य पावित्र्यं प्रत्यायितम् ।
२. सर्वान् विमोहयति तच्छीला, णिनिः ताच्छील्ये कर्तरि ।

वाद्यवादकमेवं हि चिन्तयेत् परमावृतम् ।
ब्रह्मर्षिमण्डलं तस्यां सर्वेषां गायनान्वितम् ॥ ५९ ।
[1]देवर्षिसर्वविज्ञानवाक्यरत्नस्वगायनम् ।
विचिन्त्यैवं विधानेन निजपीठं विचिन्तयेत् ॥ ६० ।
पीठशक्तिं विचिन्त्याशु पीठनायकमेव च ।
विचिन्त्यानन्दमग्नः स्यादचिरात् सिद्धिमाप्नुयात् ॥
अधो [2]वाराणसीपीठं ध्यायेत् तत् क्रममाश्रृणु ॥ ६१ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे पराशक्तिनिर्मूलस्थान-निर्णयो नाम अष्टाशीतितमः पटलः ॥

---

१. देवर्षिर्नारदस्तस्य सर्वविज्ञानयुक्तं वाक्यं रत्नमिव प्रकाशकं तेन स्वगायनं यत्र पीठे तमिति भावः ।

२. वरणा च असिश्चेति वरणासी, तयोर्मध्ये भवा नगरी वाराणसी, अण्प्रत्यये ङीपि च साधुता ज्ञेया, तस्यां पीठमिति यावत् ।

अथैकोननवतितमः पटलः

श्रीआनन्दभैरवी उवाच—

कालरूप महादेव कालकूटासवप्रिय ।
इदानीं शृणु देवेश वाराणस्याः प्रियं पदम्[1] ॥ १ ।

शतकोटियोगिनीनां मण्डलं योगिसेवितम् ।
तं ध्यायेत् सर्वदा योगी यदि कल्याणमिच्छति ॥ २ ।

भ्रूमध्ये भाति सततं मण्डलाकारशोभितम् ।
मातृकायन्त्ररूपं तु सर्वसारं विचिन्तयेत् ॥ ३ ।

कोटिस्वयम्भुलिङ्गाढ्यं पुण्यकोटिफलोदयम् ।
अतिसिद्धिप्रदं देशं देशनाथप्रियम्पदम् ॥ ४ ।

अमलाकमलाशक्तिकोटिकोटिसमन्वितम् ।
त्रिशूलोपरि पूरं तु च्छत्राकारं फलाकरम् ॥ ५ ।

कोटिलिङ्गप्रधानन्तु योगेश्वरशिवं प्रभुम् ।
अष्टोत्तरशतानन्दविग्रहं मन्मथान्तकम् ॥ ६ ।

वराभयकरं सिद्धं डमरुच्छत्रधारिणम् ।
त्रिशूलमुद्गराद्यस्त्रखेटकादिविभूषितम् ॥ ७ ।

पञ्चमुखं दशभुजं शङ्खमालाकपालकम् ।
ध्यात्वा सञ्चिन्तयेच्छम्भुं दश दिक्षु क्रमेण तु ॥ ८ ।

स्थाने स्थाने दश दश मूर्तिचिह्नं विचिन्तयेत् ।
शोणाभं विद्युताभञ्च [2]पुरीरक्षणकारणम् ॥ ९ ।

हेतुप्रियं गजारूढं वृषारूढं द्वयं द्वयम् ।
अत्र चिन्तनमाकृत्य पीठविद्यावशं नयेत् ॥ १० ।

---

१. पदं स्थानम्, 'पदं व्यवसितत्राणस्थान लक्ष्माङ्घ्रिवस्तुषु' इति कोशप्रमाणेन पदशब्दस्य स्थानेऽर्थेऽपि वृत्तिः ।

२. पुरी वाराणसी, तस्या रक्षणे कारणम् । भगवान् शिवो विश्वनाथः ।

दशकं व्याप्य तिष्ठन्ति [1]मण्डलाकारसुक्रमात् ।
अयुतं शिवलिङ्गं तु दश दिक्षु दश स्थले ॥ ११ ।
विचिन्तयेच्छुक्लवर्णं काञ्चनालङ्कृतोज्ज्वलम् ।
पूर्वस्यां दशरूपं तु चायुतावरणं प्रभुम् ॥ १२ ।
दश नाम प्रवक्ष्यामि शृणु भैरवभूपते ।
जटिलः काल उन्मत्तः क्रोधराजः सदाशिवः ॥ १३ ।
परो दधीचिनाथश्च सुवाशी प्रमथेश्वरः ।
यज्ञनाथेश्वरश्चैव चायुतेश्वरवल्लभः ॥ १४ ।
वह्निकोणे सदा भान्ति मूर्तिमन्तः शिवा दश ।
वज्रधरो महाकालः कपिलेश्वर एव च ॥ १५ ।
पञ्चाननो योगिनाथो घर्घरेशः पिनाकधृक् ।
पशुपालः क्षेमदश्च ब्रह्मनाथो दश स्मृताः ॥ १६ ।
एते चायुतलिङ्गेशा मूर्तिमन्तो विभान्ति च ।
एतेषां ध्यानमाकृत्य पूजयेद् घृतधारया ॥ १७ ।
चिन्तयेद् दक्षिणे पश्चाद्दशमूर्त्ति शिवस्य च ।
वीरः शूलेश्वरः सिद्धेश्वरः श्रीपार्वतीश्वरः ॥ १८ ।
गणनाथेश्वरः शम्भुः प्रचण्डो दक्षयज्ञहा ।
काशीपतिः पशुपतिः शिवा एते दश स्मृताः ॥ १९ ।
अयुतानन्दलिङ्गेशाः कपालशूलधारकाः[2] ।
मूर्तिमन्तो विभान्त्यत्र शिवमण्डलमध्यगाः ॥ २० ।
एतान् सञ्चिन्तयेद् भक्त्या पीठक्षेत्रे च दक्षिणे ।
नैर्ऋते चिन्तयेत् पश्चात् कामाख्यः शिवलिङ्गकः ॥ २१ ।
दक्षिणामूर्तिरीशानो वामनेशो मनोहरः ।
वामदेवो बाणनाथो [3]रघुवीरेश्वरस्ततः ॥ २२ ।

---

१. मण्डलस्याकारस्तस्य शोभनीयः क्रमस्तस्मात् ।

२. कपालस्य शूलस्य च धारकाः । धरन्ति इति धारकाः ।

३. रघूणां वीरः, रामचन्द्रः, तस्येश्वरः ।

[१]कामराजेश्वरः कामकलेशो दश ईश्वराः ।
मूर्तिमन्तो विभान्त्यत्रायुतलिङ्गेश्वराः प्रभो ॥ २३ ।

विचिन्त्य परया भक्त्या पूजयेद् बिल्वपत्रकैः ।
सर्वत्र मानसार्चा च पूर्वोक्तमूर्तिकल्पना ॥ २४ ।

वरुणे च ततो ध्यायेन्मण्डलस्थान् दश क्रमान् ।
अरुणेश्वरो योगेन्द्रकाशीराजसुरान्तकाः ॥ २५ ।

त्रिशूली वरुणेशश्च कालाख्यः कामदायकः ।
कालाग्निरुद्रो भद्रेशो दश रुद्राः प्रकीर्तिताः ॥ २६ ।

शिवलिङ्गायुतेशाश्च सर्वशक्तिसमन्विताः ।
वायुकोणे स्थिता एते रुद्राश्चायुतलिङ्गपाः ॥ २७ ।

महारुद्रो वातनाथो रुद्रात्मा रौद्ररूपकः ।
रूपनाथो हि हनुमान् सूर्येशो वसुधेश्वरः ॥ २८ ।

वासुकीवल्लभः सत्यपतिरेते महेश्वराः ।
परिवारयुताः श्रेष्ठा महारुद्रादिवल्लभाः ॥ २९ ।

एते पूज्याश्चिन्तनीयाः कामनाफलसिद्धये ।
उत्तरे चोत्तरास्यश्च कुबेरेश्वर ईश्वरः ॥ ३० ।

पञ्चाधारः पारमेशः परहंसप्रभाकरः ।
अनन्तेशः कायरक्षो रत्नेश्वर उमापतिः ॥ ३१ ।

एकादशैते रुद्राश्च नित्यायुतगणेश्वराः ।
एते पूज्या ध्यायितव्याः पूर्वोक्तमूर्तिकल्पनाः ॥ ३२ ।

ईशाने च ततो ध्यायेदीश्वरान् परमेश्वर ।
ईशो वैश्वानरेशश्च [२]विश्वामित्रेश्वरस्तथा ॥ ३३ ।

ईशानोऽपि च मायेशो बटुकेशो रमेश्वरः ।
कालान्तकेशः कामाख्यो महाकामपुरीश्वरः ॥ ३४ ।

---

१. कामराजस्येश्वरः, अथवा कामराज ईश्वरो यस्य सः ।

२. विश्वं मित्रं यस्यासौ विश्वामित्रः, 'मित्रे चर्षौ' इति दीर्घः । तस्येश्वरः ।

[1]श्मशानवासिदेवेशः सर्वरूपप्रकाशकः ।
एकादशैते रुद्राश्च कामपीठनिवासिनः ॥ ३५ ।
अयुतानन्दलिङ्गेशाश्चिन्तनीयाः प्रपूजिताः ।
वाराणसीमध्यपीठे त्रयोदश शिवेश्वराः ॥ ३६ ।
अधोमण्डलमध्ये तु चिन्तयित्वा प्रपूजयेत् ।
मृत्युञ्जयो मोक्षदश्च शिवेशो भैरवेश्वरः ॥ ३७ ।
भूतनाथो भूतकर्ता क्षेत्रपालः परापरः ।
मञ्जुघोषेश्वरः कालदमनः कौशलेश्वरः ॥ ३८ ।
मुनिनाथो वर्णमाली रुद्रा भैरवरूपिणः ।
एते त्रयोदशानन्दशिवरूपाः सुरेश्वराः ॥ ३९ ।
अयुतानन्दलिङ्गेशाः पूज्यमानाः सुरासुरैः ।
वराभयप्रदाः पञ्चतत्त्वप्रकाशकारिणः ॥ ४० ।
वाराणस्यूर्ध्वपीठे च त्रयोदश शिवान् यजेत् ।
विचिन्त्य परमानन्दसाधकः स्थिरचेतसा ॥ ४१ ।
ब्रह्मेशो ब्रह्मकुलेशो ब्रह्मलिङ्गो विधीश्वरः ।
ब्रह्माण्डभेदकश्चात्मारामो वक्रेश्वरस्तथा ॥ ४२ ।
बलीशो भार्गवेशश्च सदानन्देश्वरो हरः ।
कृष्णेश्वरो रामनाथो रुद्रास्त्रयोदश स्मृताः ॥ ४३ ।
अयुतानन्दलिङ्गेशा भैरवेन्द्राः प्रकीर्तिताः ।
एते पूज्या महाकालरुद्रास्त्रिभुवनेश्वराः ॥ ४४ ।
कपालीशादयो ज्ञानज्ञेया निर्मलचेतसा ।
सर्वाऽलङ्कारशोभाढ्या रत्नकुण्डलमण्डिताः ॥ ४५ ।
[2]सृष्टिसंहारकर्तारो देवकार्ये नियोजिताः ।
एतेषां ध्यानमाकृत्य पूजयेच्चित्तपुष्पकैः ॥ ४६ ।

---

१. श्मशाने वसति तच्छीलः श्मशानवासी, स चासौ देवेशश्च ।
२. सृष्टिसंहारस्य कर्तारो विधातार इति यावत् ।

तदा सिद्धिमवाप्नोति सत्यं सत्यं महेश्वर ।
अकालतारका एते [1]सर्वसिद्धिसमृद्धिदाः ॥ ४७ ।
आनन्दभैरवाह्लादकारिणः कुलपण्डिताः ।
एते रुद्राः पूजयन्ति महाविद्याः सुलक्षणाः ॥ ४८ ।
तासां नाम प्रवक्ष्यामि क्रमशः शृणु भैरव ।
द्रां द्रीं दश महाविद्याः पञ्चतत्त्वप्रकाशिकाः ॥ ४९ ।
सर्वसिद्धिप्रदा नाथ पूजयन्ति महीतले ।
सत्यत्रेताद्वापरे च कलौ पूर्णफलप्रदाः ॥ ५० ।
तासां नामानि वक्ष्यामि या या हि रुद्रपूजिताः ।
त्रिपुरासुन्दरी देवी तथा त्रिपुरभैरवी ॥ ५१ ।
भुवनेशी चान्नपूर्णा मातङ्गी विन्ध्यवासिनी ।
छिन्नमस्ता च बगला त्रिकूटा पञ्चमी तथा ॥ ५२ ।
कालिका तारिणी देवी काशीनाथप्रपूजिताः ।
[2]तन्त्रोक्तबाह्यपूजादिरवश्यं पूजयेत् सुधीः ॥ ५३ ।
साधकः सिद्धिमाप्नोति कुलपूजाक्रमेण तु ।
योगसिद्धिमवाप्नोति मासादेव न संशयः ॥ ५४ ।
भ्रूपद्मभेदने काले त्ववश्यं परिपूजयेत् ॥ ५५ ।

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वाराणसीपीठनाथान्तर्यजनं नाम एकोननवतितमः पटलः ॥

---

१. सर्वासां सिद्धीनां समृद्धीनां च दातारः, 'आतोऽनुपसर्गे कः' इति कप्रत्यये साधुता ।
२. तन्त्रे तन्त्रागमे उक्ता प्रोक्ता या बाह्यपूजा, सा आदिर्यस्याः पूजायाः सा ताम्, पूजादिमिति यावत् । अत्र द्वितीयान्त एव पाठो युक्तः ।

अथ नवतितमः पटलः

श्रीआनन्दभैरवी उवाच—

श्रृणु कान्त प्रवक्ष्यामि हाकिनीपञ्चमण्डलम् ।
वाराणसीमध्यपीठे पञ्चकोणं विचिन्तयेत् ॥ १ ॥

तत्र श्रीहाकिनीदेव्याः पञ्चपीठं विचिन्तयेत् ।
पञ्चपीठे पञ्चदेवं [1]रत्नमालाविमण्डितम् ॥ २ ॥

भूतप्रेतपिशाचादियक्षदानवकोटिभिः ।
वेष्टितं सर्वलोकाढ्यं पञ्चकोणं विचिन्तयेत् ॥ ३ ॥

पञ्चकोणे पञ्चपीठं कामदं व्यालसिद्धिदम् ।
निर्वाणसिद्धिदं देव किमन्यत् कथयामि ते ॥ ४ ॥

पञ्चकोणे पञ्चतत्त्वं पञ्चबीजं स्वमेव च ।
पूर्वकोणे इन्द्रबीजं पृथिव्याश्च त्रिकोणकम् ॥ ५ ॥

तद्दक्षिणे वायुबीजं वायवीशक्तिमण्डलम् ।
वायुमुग्रवेगधरं धरणीभञ्जनाख्यकम् ॥ ६ ॥

तदधो गृहपीठे च त्रिकोणमण्डलोज्ज्वले ।
जलबीजं वारुणाख्यं सर्वरत्नासनस्थितम् ॥ ७ ॥

शीतलं बहुरूपं तं त्रिलोकवायुभञ्जकम् ।
सर्वाधस्तैजसं रूपं वह्निबीजं महाप्रभम् ॥ ८ ॥

सर्वदा तं मूर्तिमन्तं तेजोमालासमाकुलम् ।
महोग्रं सर्वभक्षञ्च जलीयदोषभञ्जकम् ॥ ९ ॥

आकाशं सर्वशेषाख्यं महाप्रलयसङ्गमम् ।
कुम्भकाधारचक्रं तु [2]आकाशबीजरूपिणम् ॥ १० ॥

---

१. रत्नमालाभिर्विमण्डितम् । तृतीयातत्पुरुषेण साधुता ।

२. आकाशस्य बीजं रूपयति तच्छीलः, आकाशबीजरूपी, तमित्यर्थः ।

सर्वेषां लयसंस्थानं निर्मलं [1]तत्त्वसिद्धिदम् ।
हाकिनीपञ्चपीठञ्च पञ्च प्राणान् तदन्तरे ॥ ११ ।
प्राणोऽपानः समानश्चोदानव्यानौ च वायवः ।
मूर्तिमन्तो विभान्त्यत्र लोकानां मृत्युनाशनात् ॥ १२ ।
एतेषु वायुकुण्डेषु पूजयेत् पञ्चवायवीम् ।
प्राणेशी गुदगापाना समानेशी कुलान्तरा ॥ १३ ।
उदानेशी व्यानमाता वायव्यः पञ्च पूजिताः ।
पञ्चप्राणो पञ्चयोगं यः करोति कुलेश्वर ॥ १४ ।
वायवीष्वर्पयेन्नित्यं पञ्चतत्त्वं सुयोगवित् ।
शुद्धासवं शुद्धमांसं शुद्धमीनं तथापरम् ॥ १५ ।
शुद्धमुद्रां तथा शुद्धकुलचन्दनमर्पयेत् ।
पञ्चतत्त्वं दापयेद् यः कुलसिद्धिनिबन्धनात् ॥ १६ ।
हाकिनीपरमायान्तु परमाभिः प्रतर्पयेत् ।
वाराणसीमध्यपीठचक्रविद्या समा शृणु ॥ १७ ।
वाराणसीमण्डलञ्च त्रिकोणं षोडशच्छदम् ।
केशरद्वयमेवं तु पत्रे पत्रे प्रतिष्ठितम् ॥ १८ ।
चतुष्कोणत्रयं तस्योर्ध्वे चतुर्द्वारमेव च ।
एतद्वाराणसीचक्रं सर्वकामसुसिद्धिदम् ॥ १९ ।
वाराणसीचक्रमध्ये त्रिकोणस्यान्तरे सुधीः ।
प्रपञ्चगुणदुःखानि हरेच्च पञ्चकोणकम् ॥ २० ।
त्रिकोणस्यान्तरे ध्यात्वा किन्न सिद्ध्यति भूतले ।
एतत्प्रकाशितं चक्रं यो ध्यायति निरन्तरम् ॥ २१ ।
[2]मनोयोगसिद्धिभावं स प्राप्नोति न संशयः ।
मनोयोगसिद्धिकाले सदावश्यं विचिन्तयेत् ॥ २२ ।

---

१. तत्त्वानां सिद्धिं ददाति इति । 'आतोऽनुपसर्गे कः' इति कप्रत्ययः ।
२. मनोयोगस्य सिद्धिस्तस्या भावस्तम् । भावो भावना ।

पञ्चकोणे पञ्चतत्त्वं काशीपीठे च लिङ्गिनः ।
कोटिरूपधरा एते चात्रैव भान्ति नित्यशः ॥ २३ ।
हाकिनीमण्डलं मध्ये काश्यास्त्रिकोणयन्त्रके ।
हाकिनी पञ्चतत्त्वाख्यां पञ्चभूतप्रकाशिनीम्[1] ॥ २४ ।
पृथिवीजलरूपाञ्च तेजोरूपाञ्च वायवीम् ।
गगनां क्रमतो ध्यायेद् दक्षिणावर्तसत्पथा ॥ २५ ।
विभाव्य पञ्चमीं देवीं हाकिनीमण्डले यजेत् ।
सर्वत्र ह्यन्तर्यजनं कृत्वा सिद्धिमवाप्नुयात् ॥ २६ ।
इति वाराणसीचक्रमध्यस्थं पञ्चकोणकम् ।
हाकिनीमण्डलं देवनायिकागणमण्डितम् ॥ २७ ।
सर्वालङ्कारशोभाढ्यं हेममालाविराजितम् ।
शिवशक्त्यात्मकं चक्रं परमसिद्धिदायकम् ॥ २८ ।
अप्रकाश्यं सर्वतन्त्रे काशितं रुद्रयामले ।
षट्कोणमण्डलं वक्ष्ये हाकिन्याः शिवशक्तिगम् ॥ २९ ।
वाराणसीमण्डलाग्रे प्रतिभाति निरन्तरम् ।
शिवशक्तिमयं शुद्धचक्रराजं विचिन्तयेत् ॥ ३० ।
तदूर्ध्वे चोन्मनीदेशं तदूर्ध्वे बोधनीपुरम् ।
मण्डलं शृणु यत्नेन येनान्तर्यजनं लभेत् ॥ ३१ ।
षट्कोणं कर्णिकामध्ये तद्बाह्ये मण्डलाष्टकम् ।
तदूर्ध्वे षोडशदलं केशरद्वयसंयुतम् ॥ ३२ ।
चतुर्द्वारं तदूर्ध्वे तु व्याप्य तिष्ठति सर्वदा ।
षट्कोणमध्यदेशे तु परनाथं परान्वितम् ॥ ३३ ।
षट्कोणे सर्वदा भान्ति [2]षट्चक्रस्थितिशक्तयः ।
पतिभिः सह देवेशी डाकिनी कुण्डलीप्रिया ॥ ३४ ।

---

१. पञ्चसंख्याकानि भूतानि प्रकाशयति तच्छीला ।
२. षट्चक्रेषु स्थितिर्यासां शक्तीनां ताः शक्तयः । अथवा षट्चक्रस्थितेति पाठोऽदन्तः ।

राकिणी लाकिनी देवी काकिनी शाकिनी तथा ।
हाकिनी च दक्षिणतो ध्येया शिवसमीपगा ।। ३५ ।
ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो ध्येयः [1]स्वमुक्तिमण्डलस्थितः ।। ३६ ।
ध्यात्वा सम्पूजयेच्चक्रे शिवशक्तिमयं परम् ।
[2]पराशक्तिसमाक्रान्तं स्वयम्भुलिङ्गरूपिणम् ।। ३७ ।
सर्वसिद्धान्तनिलयं वेदवेदाङ्गगायनम् ।
मायातीतं निर्विकल्पं स्वप्रकाशं निरञ्जनम् ।। ३८ ।
षट्कोणान्तर्गतं ध्यात्वा पराशक्तिसमन्वितम् ।
तदूर्ध्वेऽष्टमण्डलं तु व्याप्य कोटिसहस्रशः ।। ३९ ।
योगिन्यः सन्ति नित्यं तु परमानन्दसिद्धिदाः ।
तदूर्ध्वे षोडशारे च भान्ति स्वरसमन्विताः ।। ४० ।
परा शक्तिः प्रभाकारा चतुर्द्वारे ततो लिखेत् ।
अष्टवर्गक्रमेणापि सर्वसिद्धिं विभावयेत् ।। ४१ ।
सिद्धिपूजामवाप्नोति मण्डलाकारभावनात् ।
मण्डलं यो महाकालभ्रूर्ध्वे ध्यायेद्यदि प्रियम् ।। ४२ ।
महासिद्धिमवाप्नोति सत्यं सत्यं कुलेश्वर ।
अनायासेन योगेन्द्र योगिनीसिद्धिमाप्नुयात् ।। ४३ ।
एतच्चक्रं विभाव्याशु भावसिद्धिमवाप्नुयात् ।
भावसिद्धिस्थितं चक्रं मनोयोगसुसिद्धिदम् ।। ४४ ।
अन्यच्छ्रीबोधिनीचक्रस्याधोभागे विचिन्तयेत् ।
उन्मनीज्ञानचक्रं तु [3]सार्वज्ञसिद्धिदायकम् ।। ४५ ।
नवकोणं बिन्दुयुक्तं प्रेतबीजं विचिन्तयेत् ।
तं व्याप्य नवकोणं तु मण्डलत्रयमेव च ।। ४६ ।

---

१. स्वस्य मुक्तिस्तस्या मण्डले स्थित इति भावः ।

२. पराशक्तिः पश्यन्त्या अपि परा परा वाक्, एषैव भगवती सर्वस्य जगतो विधात्री । तया शक्त्या समाक्रान्तम् ।

३. सर्वज्ञस्य भावः सार्वज्ञ्यं तस्य सिद्धिः, तस्या दायकम् ।

षोडशारं तद्बहिस्तु चतुर्द्वारं तु तद्बहिः ।
दले दले सुरान् ध्यायेदष्टवर्गं ततो लिखेत् ।। ४७ ।

अष्टकोणे चतुर्द्वारमण्डलस्य विभाव्य च ।
उन्मनीनगरं मध्ये तन्मध्ये पररूपिणम् ।। ४८ ।

शक्तियुक्तं विभाव्याशु सिद्धिमिष्टां प्रयच्छति ।
पदार्थनवकं तत्र बीजयुक्तं विभावयेत् ।। ४९ ।

तत्पदार्थान् प्रवक्ष्यामि शृणुष्व भैरवेश्वर ।
पृथिवीं जलरेखाञ्च तेजोरूपाञ्च वायवीम् ।। ५० ।

[1]आकाशगामिनीं देवीं कालरूपां दिगम्बरीम् ।
आत्मशक्तिं मनःशक्तिं [2]दक्षिणावर्तयोगतः ।
लिखित्वा स्वस्वबीजाढ्यां भावयेत् कुलवर्त्मना ।। ५१ ।

।। इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धमन्त्रप्रकरणे षट्चक्रप्रकाशे भैरवीभैरवसंवादे वाराणसीपञ्चपीठ-प्रकाशो नाम नवतितमः पटलः ।।

।। समाप्तश्चायं ग्रन्थः ।।

---

१. आकाशे गच्छति तच्छीला आकाशगामिनी, ताम् ।
२. दक्षिणावर्तस्य योगतः । दक्षिणावर्तः शङ्खोऽस्ति ।

श्लोकानुक्रमणिका

●